A TRIENNIAL CATALOGUE OF
MANUSCRIPTS

COLLECTED DURING THE TRIENNIUM

1916-17 TO 1918-19

FOR THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS

BY

S. KUPPUSWAMI SASTRI, M.A.

CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, AND PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE, MADRAS

Prepared under the orders of the Government of Madras

Volume III.—Part 1—Sanskrit C

MADRAS

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS

1922

PRICE, 4 *rupees* 4 *annas*.

1. The maximum time allowed for retention of a book shall be one fortnight. It may be borrowed again if not required by others.

2. No reference books shall be lent out.

3. No borrower shall have more than two volumes out of the Library at one time.

4. Borrowers must not pass books from one to another but must return them to the Librarian.

5. Library books must not be used as class-books.

6. Any one who defaces by writing or otherwise damages any book shall pay the full cost of the book or of the entire works, if it consists of more than one volume.

7. The borrower shall be responsible for the value of the books lent out to him if they are lost, damaged or otherwise cannot be returned to the Library when they are due or recalled.

8. The presence of the voucher with the Librarian shall be considered sufficient proof of the non-return of books.

1615-36 The Bangalore Press

A TRIENNIAL CATALOGUE OF MANUSCRIPTS

COLLECTED DURING THE TRIENNIUM

1916-17 TO 1918-19

FOR THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS

BY

S. KUPPUSWAMI SASTRI, M.A.

CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, AND PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE, MADRAS

Prepared under the orders of the Government of Madras

Volume III.—Part 1—Sanskrit C

MADRAS

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS

1922

A TRIENNIAL CATALOGUE OF MANUSCRIPTS.

1916-17 TO 1918-19.

VOLUME III.

PART 1—SANSKRIT—C.

R. No. 2680.

Paper. 11 × 9¾ inches. Foll. 36. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of the Raja of Chirakkal, Malabar district.

ध्वन्यालोकलोचनव्याख्या.

DHVANYĀLOKALŌCANAVYĀKHYĀ.

A commentary on Abhinavagupta's Dhvanyālōkalōcana, described under No. 12893 of the D.C.S. MSS., Vol. XXII. The names of the commentary and of the commentator are not given. According to this commentary, Bhaṭṭēndurāja was the teacher of Abhinavaguptācārya's teacher.

Contains the first Udyōta almost complete.

Beginning:

कारुण्यस्फुरणं चन्द्रकलापुष्पजटावनम् ।
समग्रमृगशाबाक्ष्यास्तर्पस्योपरि वर्तते ॥
को नामात्र परं चिन्त्यालोचनप्रसराशयम् ।
तदप्येतस्य दिङ्मात्रमभिव्यक्तुमुपक्रमे ॥

. . . . अथामी श्रीमदाभिनवगुप्ताचायपादा ध्वनिग्रन्थव्याख्यानारम्भ मङ्गलमाचरन्ति— अपूर्वं यद्वास्त्वित्यादिना । अत्र द्वितीयवाक्ये तृतीये च यद्वृत्तमनुषञ्जनीयम् । च शब्दस्तृतीये निवेशनीयः । एको द्योतको बहुषु द्योत्येष्वन्त्ये इति न्यायात् । अन्त्यनिविष्टोऽयमर्थात्पूर्वत्र सम्बध्यते । यथा—"एकातपत्रं जगतः प्रभुत्वं नवं वयः

कान्तमिदं वपुश्च" इति । सरस्वत्यास्तत्कविहृदयाख्यं तत्त्वं स्वरूपं विजयते ।

* * * *

अथ चिकीर्षितं प्रतिजानीते—भट्टेन्दुराजेति । अभिनवगुप्तपदाभिधोऽहं जनस्य श्रोतृजनस्य काव्यालोकं काव्यालोकनामानं ध्वनिलक्षणग्रन्थं स्फुटयामि अभिव्यक्तयामि विवृणोमि । यस्तु किञ्चिदनुरणन्नपि स्तोकं वदन्नपि स्वलोचननियोजनया स्वबोधसमर्पणेन नेत्रनियोजनया यथाप्रकाशं स्फुटयतीत्यपि स्फुरति । भट्टेन्दुराजस्य परमगुरोश्चरणाब्जे कृतो योऽधिवासस्सुरभीकरणं तेन हृद्यं श्रुतं यस्य स तथा । स्वयमव्युच्छिन्नपरमेश्वरेत्यादि । वृत्तिकार इत्यनेन स्वेच्छाकेसरी इति पद्यं न सूत्रमिति दर्शयति ।

* * * *

अथेत्यादि । ध्वनिस्वरूपं प्रधानतयाभिधेयम् । सहृदयमनःप्रीतिरूपं प्रयोजनप्रयोजनं प्रधानम् । तद्वद्धं प्रयोजनप्रयोजनसम्बन्धः प्रयोजनममुख्यप्रयोजनं ध्वनिस्वरूपज्ञानात्मकम् । प्रयोजनप्रयोजनस्य प्रयोजनपूर्वकत्वात् सहृदयमनःप्रीतय इति शाब्दत्वात् प्रयोजनप्रयोजनस्य प्राधान्यमुच्यते । आर्थत्वात्प्रयोजनस्याप्राधान्यम् । वस्तुतस्तु ध्वनिस्वरूपकथनस्य ध्वनिस्वरूपपरिज्ञानममुख्यं प्रयोजनम् । तस्य प्रयोजनं मनस्समाह्लादः । सङ्ग्रहविवरणयोरपि यथायोगं युगपदेव व्याख्यानं चिकीर्षन्नाह—काव्यात्मशब्दसन्निधानादित्यादिना ।

End :

ध्वनेः साररूपत्वाभिधानमस्माकमभिमतम् । यतो वयं काव्यस्यात्मा ध्वनिरिति ब्रूम इति भावः । लोचनमिति । लोचनं नेत्रम, अयं व्याख्यानग्रन्थश्च । लोको भुवनमालोकश्चायं ध्वनिग्रन्थः । चन्द्रिका ज्योत्स्ना ध्वनिव्याख्यानग्रन्थश्चान्यः । लोचनोन्मीलनमुन्मीलितं लोचनमिति यावत् । आलोकस्य शोभा ग्रहणं या उन्मीलितेन लोचनेन नान्येनेत्यर्थः । यदुन्मीलनेति । उन्मीलनयुक्त्या स्फुटयुक्त्या उन्मीलति स्फुरति । स्वात्मायतनविश्रान्तां

R. No. **2681**.

Paper. 11 × 9¾ inches. Foll. 16. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Kāśībhaṭla Mahādēvuḍugāru of Kadali, Godavari district.

अगस्त्यसंहिता.

AGASTYASAMHITĀ.

Foll. 1*a*—15*a*. Foll. 15*b* and 16 are left blank.

Same work as that described under No. 5190 of the D.C.S. MSS., Vol. XI, wherein the numbering of the Adhyāyas is different from that given here.

Contains the Adhyāyas 30 to 35 complete and the 36th incomplete. The 30th Adhyāya wants the beginning.

Beginning:

अगस्त्यः—

बाह्यपूजां पुनर्वक्ष्ये सुतीक्ष्ण मुनिसत्तम ।
स्वगृहे शुद्धभूभागे विलिप्ते गोमयाम्बुना ॥
सुवितानसमायुक्ते पुष्पाद्यैस्समलङ्कृते ।
गीतवाद्यैस्सुनृत्यैश्च सर्वतस्सुमनोहरैः ॥
ऊर्ध्वासने समासीनमुपचारैस्स्वशक्तितः ।
चन्दनागरुकर्पूरकस्तूरीकुङ्कुमादिभिः ॥

* * * *

पाटलैः केतकीपुष्पैः पूजयेद्रघुनन्दनम् ॥
वैष्णवेषु च सर्वेषु शङ्खपूजां प्रयत्नतः ।
कुरु त्रिकालं विधिवद्विधिज्ञस्साधकोत्तमैः ॥
विनैव शङ्खपूजां यो वैष्णवः पूजयेद्धरिम् ।
पूजाफलं न चाप्नोति सुसम्यक् पूजकोऽपि सः ॥

* * * *

Colophon:

इत्यगस्त्यसंहितायां त्रिंशोऽध्यायः ॥

End:

एवं यः कुरुते पूजां बहिर्वा हृदयेऽपि वा ।
सकृत्पूजनमात्रेण राम एव भवेन्नरः ॥
किं पुनस्सततं कुर्यात् ब्रह्मण्येव स्थितो हि सः ।
सर्वान् कामानवाप्नोति इह लोके परत्र च ॥

Colophon:

इत्यगस्त्यसंहितायां पञ्चत्रिंशोऽध्यायः ॥

अगस्त्यः—

जानकीवल्लभं दान्तं वह्निर्जाया हुमादिकम् ।
दशाक्षरी राममन्त्रो वसिष्ठस्स्यादृषिः स्वराट् ॥

* * * *

कव्यां गुह्ये पुनः पादसन्धिष्वर्णान्न्यसेन्मनोः ।
पूर्वोक्तं ध्यानमन्त्रोपि जपेल्लक्षं निरन्तरम् ॥

R. No. 2682.

Paper. 11 × 9¾ inches. Foll. 70. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of Kūḍalūr Nārāyaṇa Nambūdirippād, Na‑eri, Tritala, Malabar district.

बृहतीव्याख्या—ऋजुविमला.

BṚHATĪVYĀKHYĀ: ṚJUVIMALĀ.

Foll. 1*a*—69*b*. Fol. 70 is left blank.

A commentary by Śālikanātha Mahōpādhyāya on Prabhākara's Bṛhatī which is itself a commentary on Śabarasvāmin's Mīmāṁsāsūtrabhāṣya. According to the India Office Library Catalogue, Śālikanātha wrote a commentary on the Śābarabhāṣya under the name of Ṛjuvimalāpañcikā.

Contains the second Adhyāya complete without the first 12 Sūtras of the first Pāda.

Beginning:

ततश्च माहेन्द्रग्रहयजनमहत्त्वस्यापि देवताभावेनान्वयः । यदि परमुत्तर पदार्थं प्रधानमाकूतमाश्रित्य ततः किमुत्तरं तत इदं भवति । नानाभिधानतैव स्थास्यति । सगुणस्यान्वयात् । माहेन्द्रग्रहयजन(ने)महेन्द्रशब्दोऽस्यां सगुणां देवतामभिधत्ते । ऐन्द्यां तु स्तुतावपीन्द्रशब्दोऽस्यां निर्गुणामिति राद्धान्तैकदेशी पूर्वपक्षैकदेशिनो मतमाशङ्कते—अथ मतमर्थान्तरसम्बन्धः पुनरर्थान्तरेण केवल एव सम्बध्यत इति । महत्त्वेनार्थान्तरे सम्बन्धो यद्यपीन्द्रशब्दस्यार्थस्तथापि केवल एव तद्धितार्थेन सम्बध्यते । अथवा तद्धितार्थेन केवलस्सम्बन्धः पश्चान्महत्त्वेन, तेन न सगुणस्य देवतात्वेनान्वय इति दूषयति—उक्तम्, परस्परान्वये समासस्तथार्थान्तरान्वयः ।

* * * *

Colophon:

इति महोपाध्यायश्रीशालिकनाथभट्टमिश्रकृतायां ऋजुविमलायां पञ्चिकायां द्वितीयस्याध्यायस्य प्रथमः पादः ॥

End:

अत्र त्वेतद्वक्तव्यम् । यदा समिदादीना . . . . द्वयमिह नोपपद्यते । शाखान्तरेषु तु भिन्नेषु प्रमातृषु तद्भेदेनैवाज्ञातज्ञापनमप्रवृत्तप्रवर्तनं च विधेरुपपन्नमिति न शक्नोति भेदमापादयितुम् ॥

Colophon:

इति शालिकनाथमहोपाध्यायमिश्रकृतायामृजुविमलायां पञ्चिकायां द्वितीयस्याध्यायस्य चतुर्थः पादः ॥

R. No. **2683.**

Paper. 11 × 9¾ inches. Foll. 50. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of the Raja of Chirakkal, Malabar district.

शिशुपालवधव्याख्यानम्.

ŚIŚUPĀLAVADHAVYĀKHYĀNAM.

Foll. 1*a*—50*a*. Fol. 50*b* is left blank.

By Dēvarāja. Same commentary as that described under No. 11812 of the D.C.S. MSS., Vol. XX.

Contains the Sargas 10 and 11 complete and the 12th incomplete.

Beginning:

सज्जितानीति । अथ अनन्तरं यूनां प्रियतमावदनानि सुरायाः तरुणानां मधुपानस्य मुखान्येव पात्राण्यासन् । प्रेयसीमुखगण्डूषसुरां युवानः व(प)पुरिति । कीदृशानि प्रियतमावदनानि, सज्जितानि कल्पितानि, ओष्ठस्ताम्बूलद्युतिविशद इत्यादिप्रकारेण योग्यतामापादितानि । तथा सुरभीणि स्वभावात् कर्पूरादिमुखवासाच्च । तथोल्लसन्नयनवारिरुहाणि उल्लसन्ति नयनान्येव (वोत्पलानि)येषां नयनानामुल्लसनं कान्तावलोकनात्तदङ्गसन्तोषाद्यथा सुघटितानि सुष्ठु घटितमवयवसंस्थानमेषां तानि ।

* * * *

Colophon:

इति माघव्याख्याने दशमस्सर्गः ॥

* * * *

Colophon :

इति देवराजविरचिते शिशुपालवधव्याख्याने एकादशस्सर्गस्समाप्तः ॥

End :

इत्थमिति । इत्थं पूर्वसर्गवर्णितप्रकारेण प्रभाते सति अथानन्तरम् । रथाश्वेभनिषादिनां गणः । रथाश्वाश्वेभाश्च रथाश्वेभमित्यत्र पूर्वनिपात-लक्षणमनादृत्योक्तम् । तत्र निषीदन्तीति निषादिनस्तेषां गणः । प्रस्थान-कालक्षमः ।

* * * *

कूलङ्कषेति । सर्वकूलाभ्रकरीरेषु कष इति खः । खित्यनव्ययस्येति मुम् । पद्मैरननुगता वधूमुखानां द्युत्कान्तिर्याभिः आतपत्रजां छत्रसंभूताम्.

R. No. 2684.

Paper. 11 × 9⅜ inches. Foll. 58. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of the Raja of Chirakkal, Malabar district.

किरातार्जुनीयव्याख्यानम्.

KIRĀTĀRJUNĪYAVYĀKHYĀNAM.

A commentary on the Kirātārjunīya of Bhāravi, described under No. 11464 of the D.C.S. MSS., Vol. XX : by Maṅgala.

Contains the Sargas one to five complete and the sixth incomplete.

Beginning :

श्रियः कुरूणामित्यादि । वनेचरो युधिष्ठिरं द्वैतवने समाययौ । कृत-कार्य इति सम्यक् प्राप्तवान् । युधिष्ठिरं युद्धेन न साध्यमस्मत्साध्यं प्रायशो भविष्यतीति चिन्तयान्नित्यन्वर्थनामधेयं द्वैतवने काम्यकस्थेनैव स नियुक्तः कुरूणामधिपस्य सुयोधनस्य प्रजासु वृत्तिं प्रजाविषयं परिपालनलक्षणं वर्तनं वेदितुं यमयुङ्क्त नियुक्तवान् ।

* * * *

Colophon :

इति मङ्गलविरचितायां किरातटीकायां प्रथमस्सर्गः ॥

End :

Colophon :

इति मङ्गलविरचितायां किरातटीकायां पञ्चमस्सर्गः ।

रुचिराकृतिः । अथशब्द आनन्तर्ये समासादनन्तरं स पुरुहूतसुतः तं शैलमारुरोह । आरूढवान् ।।

*   *   *   *

अवधूत— अवधूताः अवक्षिप्ता पङ्कजपरागकणाः पद्मरेणुकणा यैः ततः अवधूतपङ्कजपरागकणाः । अनेन सुरभित्वं कथ्यते । जाह्नवीसलिलवीचिभिदः जाह्नव्या गङ्गायाः.

R. No. 2685.

Paper. 11 × 9¾ inches. Foll. 50. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippaḍ, Nareri, Tritala, Malabar district.

(a) कर्पूरमञ्जरीव्याख्या.

KARPŪRAMAÑJARĪVYĀKHYĀ.

Foll. 1*a*—42*a*. Fol. 42*b* is left blank.

A commentary on the Karpūramañjarī of Rājaśēkhara. Similar to the work described under No. 12510 of the D.C.S. MSS., Vol. XXI. The commentator is Nṛsiṁharāja, son of Samudrabandhṛyajvan who is stated to have written a commentary called Sētu.

Complete.

Beginning:

अन्तरायान्धतमसविध्वंसनविभाकरम् ।
दैत्यपद्मोपमर्देन्दुं वन्दे करिमुखं महः ॥
उत्तराभिमुखा भक्ता यस्य वाचस्पतावपि ।
भजामि भागधेयं तत्प्रसन्नं दक्षिणामुखम् ॥
व्याकृत्या सेतुना यस्समधिकगहनं शास्त्रसाहित्यसिन्धुं
बद्ध्वा बुद्ध्वा यथार्थां व्यरचयत निजां सिन्धुबन्धेतिसंज्ञाम् ।
नत्वा तं यायजूकं नियमविधिविदं तातमस्य प्रसादात्
व्याख्यानं सट्टकस्य स्फुटतरमधुना सिंहराजोऽभिधास्ये ॥
भद्रं भवतु सरस्वत्याः कवयो नन्दन्तु व्यासादयः
अन्येषामपि परं प्रवर्ततां वरा वाणी विदग्धप्रिया ।
वैदर्भी तथा मागधी स्फुरतु नस्सा किञ्च पाञ्चालिका
रीतिका विलिहन्तु काव्यकुशला ज्योत्स्नां चकोरा इव ॥

अत्र प्रथमपादे प्रथममविघ्नपरिसमाप्त्यर्थं प्रकृताभिमतां देवतां वाचिकेनाराधनेनाराध्य पश्चात् काव्यसरणिप्रतिष्ठायां सिद्धायां स्वकाव्यप्रतिष्ठा सिध्यतीति मन्वानो व्यासाद्यानन्दप्रार्थनामुखेन पूर्वेषां काव्यानां प्रतिष्ठां समर्थ्य द्वितीयेनाप्रवृत्तानां काव्यानां प्रवृत्तिसातथ्यं प्रार्थयते । उत्तराभ्यां तु पदाभ्यां भविष्यत्सु काव्येषु रीतिमत्त्वं विशेषेण प्रार्थयते । तत्प्राधान्य ख्यापनार्थं रीतिमत्त्वं हि काव्यव्यपदेशप्रयोजनम् । शब्दार्थात्मकं तु शास्त्रकाव्यसाधारणम् । उक्तं हि वामनेन—रीतिरात्मा काव्यस्येति ।

* * * *

Colophon:

इति नृसिंहराजविरचिते सट्टकविवरणे प्रथमं यवनिकान्तरं समाप्तम् ॥

End:

अन्यत्किमपि प्रियं क्रियते । इतः परं प्रियं न किमपि । तथाप्येतद्भवतु—

अनवरतविस्फुरन्मनीषिजनसकलगुणविनाशकरः ।
रिक्तत्वदावाग्निर्विरमतु कमलाकटाक्षवर्षेण ॥

Colophon:

इति सकलविद्याविशारदस्य समुद्रबन्धयज्वनः सूनुना सिंहराजेन विरचिते सट्टकविवरणे चतुर्थं यवनिकान्तरम् ॥ सट्टकविवरणं समाप्तम् ॥

(*b*) विक्रमोर्वशीयटिप्पणम्.

VIKRAMŌRVAŚĪYAṬIPPAṆAM.

Foll. 43*a*—45*a*.

Brief notes on a few passages of Kālidāsa's Vikramōrvaśīya described under No. 12665 of the D.C.S. MSS., Vol XX. The name of the commentator is not known.

Complete

Beginning:

वेदान्तेष्वित्यादि । रोदसी द्यावापृथिव्यौ । इयं चतुष्पदा नान्दी । . . न पदं पदमित्याहुः वाक्यार्थः पदमुच्यते । प्रणयिषु । सद्वस्तु सत्कथा । क्रियां कृतिम् । नरसखस्य मुनेः विष्णोः । उपसृत्य नृत्तेनोपास्य । सुरपक्खीजस्स । सुरपक्षीयस्य ।

* * * *

Colophon :

इति विक्रमोर्वशीये प्रथमोऽङ्कः ॥

End :

पुरूरवाः नैमिशीयः कश्चिदाश्रमः । कवयहरो, कवचहरः क्षत्रिय-कुमारः । षोडशवयस्क इत्यर्थः । वक्कल, वल्कलम् । दम्यो वत्सतरः । अर्हणा पूजा । भद्रपीठे सिंहासने ॥

Colophon :

इति विक्रमोर्वशीये पञ्चमोऽङ्कः समाप्तः ॥ विक्रमोर्वशीयटिप्पणं समाप्तम् ॥

(*c*) महावीरचरितटिप्पणम्.

MAHĀVĪRACARITAṬIPPAṆAM.

Foll. 45*b*—50*a*. Fol. 50*b* is left blank.

Very brief notes on the Mahāvīracarita of Bhavabhūti described under No. 12583 of the D.C.S. MSS., Vol. XXI. The name of the commentator is given as Abhirāma.

Complete.

Beginning :

अथ स्वस्थेत्यादि । अष्टपदेयं नान्दी । नान्दी नाम रङ्गमङ्गलानन्तरस्व-स्त्ययनम् । अथशब्दो मङ्गलाथ—

ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥

स्वस्थाय ।

समदोषस्समाग्निश्च समधातुस्समक्रियः ।
सन्नतश्चेन्द्रियाणां यस्स्वस्थ इत्यभिधीयते ।

देवाय । दिवु क्रीडादिषु युक्तो यः । त्यक्तः क्रमविभागो येन तस्मै । क्रमविभागो देशकालनिबन्धः ।

* * * *

आमुष्यायणः प्रख्यातात् पितुरुत्पन्न आमुष्यायण इष्यते । शिति-कण्ठपदलाञ्छनः । ईश्वरश्च(च)रणाङ्कितः स्वर्णाभरणभूषितः । मित्रधेयं मित्रम् । अङ्गिराः ।

* * * *

Colophon:

इति महावीरचरिते प्रथमोऽङ्कः ।

End:

विश्लिष्यन् पर्वकल्पत्रिभुवनं विघटमानपर्वसमत्रिभुवनम् । सन्धिः पर्वपरुस्तथा । . . . . अमुक्तगह्वरे, भावे निष्ठा, अमोचनगह्वरे । . . . . . प्रतिश्रयं संवादम् । अनुबध्नन्तं माल्यवन्तमित्यर्थः ॥

Colophon:

इति महावीरचरिते पञ्चमोऽङ्कः ॥ अभिरामकृतमहावीरचरितस्य टिप्पणम् ॥

R. No. **2686.**

Paper. 11 × 9¾ inches. Foll. 42. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of the Raja of Chirakkal, Malabar district.

यशोधरचरितव्याख्या.
YAŚŌDHARACARITAVYĀKHYĀ.

Foll. 1*a*—42*a*. Fol. 42*b* is left blank.

A commentary on Vādirāja's Yaśōdharacarita, described under No. 12164 of the D.C.S. MSS., Vol. XXI: by Lakṣaṇa, who mentions in the introductory stanzas Munisuvrata, Vīranandi and Vādirāja. He states that the commentary was written at Kṣēmapura for the delectation of two celebates Padmaṇa and Gulmada. The commentator gives a large number of quotations from various works with the names of their authors in some cases. They are—

कातन्त्रसूत्र.
रघुवंश of Kālidāsa.
अमरकोश.
शाकटायनसूत्र.
विश्वप्रकाश.
वैजयन्ती.
मेघसन्देश of Kālidāsa.
दण्डिन्.
धनञ्जय.
सोमदेवाचार्य.
विश्व.
भागुरि.
चन्द्रप्रभकाव्य of Vīranandi.
कुमारसंभव.
माघ.

वसिष्ठस्मृति.
नैज.
चाणक्य.
नैषध of Harṣa.
सरस्वतीकण्ठाभरण.
त्रिकाण्डशेष.
राघवपाण्डवीय of Dhanañjayācārya.
भारत of Vyāsa.
कविराक्षस.
धर्मशर्माभ्युदय of Hariścandrakavi.

Complete.

Beginning:

मुनिसुव्रतनामानं नमामि जिननायकम् ।
यज्ज्ञानदीपकीलेऽलं मदनश्शलभोऽभवत् ॥
श्रीवीरनन्दी विजयेऽपि भूयाद्विद्वान् विपश्चिज्जनहर्षकारी ।
यदीयकाव्यश्रवणं जनानां कवित्वशक्तिं कुरुते कृतार्थाम् ॥
वादिराजमुनिं नौमि मेदिनीतिलकं कविम् ।
यदीयरसनारङ्गे वाणी नर्तनमातनोत् ॥
अकारयदिमां टीकां चिक्कणो गुणरक्षणः ।
अकरोज्जिनदासोऽयं चिक्कणोद्व(त्क)जलक्षणः ॥
आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम् ॥ इति

नान्दीमुखे मङ्गलार्थमिष्टदेवतानमस्कारमखण्डरूपकालङ्कारस्वरूपेणाह कविः—श्रीमदित्यादि । श्रीरस्यास्तीति श्रीमान् । आरब्धश्चासौ देवेन्द्रश्च । आरब्धः कर्तरि निष्ठा—स्नानभोजनपानाद्याः क्तान्ताः कर्तरि च स्मृताः इति कातन्त्रसूत्रम् । श्रीमदारब्धदेवेन्द्रमयूरस्तस्यानन्दाज्जातं नर्तनं यस्य सः । यदाह कालिदासः—

अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम् ।
वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच ॥ इति ॥

* * * *

सन्ततोत्कृष्टाः काव्यमाणिक्यरोहणाः काव्यमेव माणिक्यं तस्य रोहणाः रोहणाद्रिः रत्नखनिरिति प्रसिद्धिः । श्रीमत्समन्तभद्राद्याः नोऽस्माकं सूक्तिरत्नोत्करप्रदाः सन्तु भवन्तु ।

* * * *

Colophon:

इति श्रीवादिराजकृतयशोधरनामधेयमहाकाव्ये टीकायां लक्षणकृतायां प्रथमस्सर्गः ॥

End:

यदाह हरिश्चन्द्रकविः धर्मशर्माभ्युदये—

कृतार्थी कृतार्थी हितत्वाहितत्वासदानं सदानं दिनं वादिनं वा ।
विभालं विभालं सुधर्मासुधर्मा वितख्यावितख्याति सानौतिसानौ ॥

नयोत्कृष्टधीः नितरामुत्कृष्टबुद्धिर्यशोधरो नरपतिः त्रिवर्गश्रियं धर्मार्थकामसम्पदम् । त्रिवर्गो धर्मकामार्थैरित्यमरः । दीर्घं चिरमासेविष्ट भजते स्म । शार्दूलविक्रीडितम् ।

अकारयदिमां टीकां चिक्कणो गुणरक्षणः ।
अकरोज्जिनदासोऽहं चिक्कणोत्कजलक्षणः ॥

Colophon:

इति श्रीवादिराजकृतयशोधरनामधेयमहाकाव्ये टीकायां लक्षणकृतायां चतुर्थस्सर्गः ॥

वादिराजकृतकाव्यभावयं(नं) साधुजैनमुनिवादसेवनम् ।
वीतरागचरणाब्जलोकनं प्रीतयेऽस्तु मम जन्मजन्मनि ॥
श्रीमत्पद्मणगुलमदेत्यभिहितौ श्रीवर्णिनौ भूतले
भातश्चारुचरित्रवार्धिहिमगुस्तत्प्रीतये लक्षणः ।
मन्दो बन्धुरवादिराजविदुषः काव्यस्य कल्याणदां
टीकां क्षेमपुरेऽकरोद्गुरुतरश्रीनेमिनाथालये ॥

R. No. **2637.**

Paper. 11 × $8\frac{5}{8}$ inches. Foll. 75. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of the Raja of Chirakkal, Malabar district.

रामचम्पूः.

RĀMACAMPŪḤ.

Foll. 1*a*—74*a*. Foll. 74*b* and 75 are left blank.

The story of Rāma as given in the Rāmāyaṇa is herein narrated in the form of a literary composition known as the Campu which consists of poetical stanzas interspersed with prose. The name of the author is not found in this MS.

Contains the Yuddhakāṇḍa almost complete.

Beginning:

श्रुत्वा गिरं श्रवणयोरमृतस्य धारां चूडामणिं हनुमता प्रणिपत्य दत्तम् ।
रामश्चकार हृदये हृदयं प्रियायाः प्रत्यक्षमागतमिव स्मितमंशुजालैः ॥

ततः—

आलोकितुं नयनवारिनदीनिरोधादालिङ्गितुं पुलकदण्डशतव्यवायात् ।
आनन्दगद्गदतया वचसश्च वक्तुं नापारयत्स पवमानसुतं मुहूर्तम् ॥

* * * *

हरिरिव वैनतेयं हनुमन्तमधिरुह्य वालितनयशतबलिकन्धराधिरूढाभ्यां लक्ष्मणसुग्रीवाभ्यामनुगम्यमानो गगनकमलकर्णिकायमाने भगवति भानुमालिनि विजयाभिधाने मुहूर्ते सन्नद्धो बद्धकौक्षेयकोऽक्षयशरभरितशरधिरात्तशरासन-हस्तोऽगस्त्यदिशं प्रति प्रतस्थे ।

* * * *

स्फुरदट्टहासरुचिफेनमण्डला वलमानवालधितरङ्गसंहतिः ।
रुरुचे भगीरथरथानुसारिणी सुरवाहिनीव हरिराजवाहिनी ॥

End:

सीतया कमलया सह गत्वा कोसलेषु निवसन्तमनन्तम् ।
रत्नवत्कनककुम्भजलौघच्छद्मनाम्बुधिरिवाभिषिषे च ॥

सन्ताय(ड्य)मान(मुरज)ध्वनयो महान्त-
स्सौदामिनीवलयकल्पजटाकलापाः ।
रामं तदा क्षितिभृतां पतिमभ्यषिञ्च-
न्नाहृत्य सागरजलानि महर्षिमेघाः ॥

विशङ्कटे शिरसि विशीर्यमाणैः धौतहरिचन्दनादिधातुकर्दमैः प्रकाशित-निशाचरप्रहरणशतव्रणविवरैर्भुजशिखराधित्यकामध्यपादप्रदेशात् प्रक्षालयद्भिः तपनीयकलशजलदजलैरभिषिच्यमानस्सुतरामराजत राममहीधरः ।

R. No. **2688.**

Paper. 11 × 8⅝ inches. Foll. 44. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of the Raja of Chirakkal, Malabar district.

शिशुपालवधव्याख्यानम्.

ŚIŚUPĀLAVADHAVYĀKHYĀNAM.

Foll. 1*a*—42*b*. Foll. 43—44 are left blank.

A commentary on the Śiśupālavadha of Māghakavi, described under No. 1171 of the D.C.S. MSS., Vol. XX. It is called Sandēhaviṣauṣadhi in the colophon of the first Sarga. The commentator's name is not given.

Contains the first two Sargas complete.

Beginning:

यस्य भृङ्गावली कण्ठे . . . . ।
. . . . ॥
. . . . ।
. . . . पायाद्गणाधिपः ॥
अभीष्टफलसम्पत्तिहेतुं स्मृत्वा सरस्वतीम् ।
शिशुपालवधे काव्ये सारटीका विधीयते ॥

. . . . भिलषितसिद्ध्यर्थं मङ्गलादिग्रन्थारम्भे कर्तव्य . . . . श्रियः पतिरिति । हरिः मुनिं ददर्शेति वाक्यार्थः । को हरिरित्याह—श्रियः पतिः लक्ष्मीनाथः । कं मुनिमित्याह—हिरण्यगर्भाङ्गभुवमिति । ब्रह्मणस्तनयं नारदम् । मुनित्वेनाप्यसौ नाज्ञायि ।

* * * *

Colophon:

इति माघकाव्ये सारटीकायां सन्देहविषौषध्याख्यायां प्रथमस्सर्गः ॥

End:

अत्र सदा सन्निहितत्वाच्छ्रियैव केवलं श्रुतां न त्वन्येनेति । तथोच्चकैः महार्थामुद्धवसम्बन्धिनीं वाचं श्रुतवान् हरिः इन्द्रप्रस्थगमनार्थमुदचलदिति ।

Colophon:

इति माघकाव्ये शिशुपालवधे सारसङ्ग्रहे द्वितीयस्सर्गस्समाप्तः ॥

R. No. 2689.

Paper. 11 × 8⅝ inches. Foll. 184. Lines, 20 in a page. Telugu. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Sūryacintāmaṇi Śāstri of Narasapur, Kistna district.

Bound in three volumes.

परशुरामसूत्रम् , सवृत्ति.
PARAŚURĀMASŪTRAM WITH VṚTTI.

Same text as that described under No. 7996 of the D.C.S. MSS., Vol. XV. The commentary is called Saubhāgyōdaya and is by Rāmēśvara, son of Guruvāmbā and Subrahmaṇya of Kāśyapagōtra. The commentator states that he made a critical study of the Sūtras after collecting books from various parts of the country and consulting various Śāstras.

Name of the copyist of the original MS: Upādhyāyula Sūryacintāmaṇi of Narasapur.

Contains one to nine Khaṇḍas complete dealing with the following subjects:—

१. दीक्षाप्रकरणम्.
२. गणनायकपद्धतिः.
३. ललिताक्रमः.
४. श्रीचक्रावाहनप्रकारः.
५. ललितोपास्तिप्रकरणम्.
६. श्यामाक्रमप्रतिपादनम्.
७. वाराहीक्रमप्रतिपादनम्.
८. पराप्रकरणम्.
९. होमप्रकरणम्.

Beginning:

(व्या) श्रीवल्लभापयोधरसंलिप्तालेपरञ्जितोरस्कम् ।
वन्दे गजेन्द्रवदनं बालार्कसहस्रकोटिसच्छायम् ॥
या परशिव स्फुरत्ता पूर्णाहन्तापदेन संश्लिष्टा ।
द्वैतं भावं प्राप्ता पश्चादम्बां परामिमां कलये ॥
या पञ्चप्रेतसंस्था परशिवनिलया शक्तयः कामबुद्धी
कर्मात्या(द्या) यन्मयूखास्समुदयपरिरक्षान्त . . . बभूवुः ।
या पश्यन्त्यादिरूपा सकलजनवचोजालमाविष्करोति
सा मे वाग्देवतेयं विलसतु वदने चित्तमालिन्यहन्त्री ॥
श्रीमद्यशोवतीतिप्रथिताम्बाशोभमानवामाङ्कम् ।
मम विधिसुषिरसरोरुहकलिपतानिलयं नमामि नागेन्द्रम् ॥

यो भृगुवंशे भूत्वा क्षत्रं जह्रे त्रिसप्तकृत्वस्तम् ।
षष्ठं श्रीमद्विष्णोरवतारं नौमि वीरेन्द्रम् ॥
सुब्रह्मण्यं च पितरं गुरुवाम्बां च मातरम् ।
प्रणमामि फलावाप्त्यै तावेव शरणं मम ॥
विचार्य नानातन्त्राणि मीमांसान्यायविस्तरम् ।
नानादेशसमानीतपुस्तकैः परिशोध्य च ॥
जामदग्न्येन रचितं कल्पसूत्रं यथामति ।
विस्तारयति गूढार्थं ललितोपास्तिसिद्धये ॥
रामेश्वरः श्रीललिताप्रेरकः कश्यपोद्भवः ।

इह खलु भगवान् परशुरामः आधुनिकेषु मन्दमतिषु कृपालुः श्रीशिवनिर्मितान्यसङ्ख्यानि तन्त्राणि परिलोड्य सर्वाण्युपसंहृत्य तुरीयपुरुषार्थसाधनं लघु अध्वानं दर्शयन् प्रतिजानीते—अथेति ।

(मू) अथातो दीक्षां व्याख्यास्यामः ॥

तत्राथशब्दो मङ्गलद्योतकः। "ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभा"विति स्मरणात् । अतश्शब्दश्चानन्तर्यद्योतकः । आनन्तर्यस्यावध्यपेक्षायां समीपवृत्तित्वान्मङ्गलाचरणं नानातन्त्रपरिशोधनं वावधित्वेनान्वेति । यद्वा अथात इति मिलित्वा वारम्भद्योतकः । अथातो दर्शपूर्णमासौ व्याख्यास्याम इत्यापस्तम्बसूत्रभाष्ये अथातश्शब्दोऽयं प्रकरणारम्भे प्रायः प्रयुज्यते वृद्धैः । यथा इमे भृगवो व्याख्याताः । अथातोऽङ्गिरसामित्यादौ ।

* * * *

ननु कल्पसूत्रव्याख्यानं वैदिकानामयुक्तम् । तस्य तन्त्रेषु परिगणितत्वेन, तन्त्राणां केवलं लोभैकमूलत्वेनाप्रामाण्यात् । तदुक्तं वातूले भाट्टपादैः—

लोभाधिकरणं चात्र तन्त्रेष्वेव प्रतीयते ।
यस्मिन् सन्निहिते दृष्टे नास्ति मूलान्तरानुमा ॥
शाक्तादयश्च सर्वत्र कुर्यादाधर्मदेशनाम् ।
हेतुजालविनिर्मुक्तां न कदाचन कुर्वते ॥
न च तैर्वेदमूलत्वमुच्यते गौतमादिवत् ।
हेतवश्चाभिधीयन्ते ये धर्माङ्कुरतः स्थिताः ॥

तत एव च एतेषां वाङ्मात्रेणापि नार्चनम् ।
पाषण्डिनोऽपि कर्मस्था हैतुकाश्चैव एव हीति ॥
* * * *

Colophon:

इति श्रीरामेश्वरविरचितायां सौभाग्योदयनाम्नि परशुरामसूत्रवृत्तौ प्रथमखण्डात्मकं दीक्षाप्रकरणं समाप्तम् ॥

End:

पूर्वावाहितचिदग्नेरावाहिताया देवतायाश्चोद्वासनमाह । उद्वासनं खेचरमुद्रया। तद्भस्माग्नेर्भस्म। भस्मधारणे फलमाह—लोकसंमोहनकर इति। अग्निविसर्जनानन्तरं परिस्तरपरिधीनामपि विसर्जनं प्रतिपत्तिसंस्कारस्यानुक्तत्वात् शिवमिति व्याख्यातम् ॥

Colophon:

इति श्रीरामेश्वरविरचितायां परशुरामसूत्रवृत्तौ सौभाग्योदयनाम्नि होमप्रकरणं नवमं खण्डम् ।

R. No. 2690.

Paper. 11 × 9¾ inches. Foll. 22. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of the Raja of Chirakkal, Malabar district.

(*a*) हस्तलक्षणदीपिका.

HASTALAKṢAṆADĪPIKĀ.

Foll. 1*a*—7*a*. Foll. 7*b*—8*b* are left blank.

A treatise on the art of gesticulation and movement of the hands. Contains the first two Paricchēdas complete.

Beginning:

नमितानामिका यस्य पताकः स करः स्मृतः ।
सूर्यो राजा गजः सिंह ऋषभो ग्राहतो रणे ॥
लता पताका वीचिश्च रथ्यापातालभूमयः ।
जघनं भाजनं हर्म्यं सायमाध्यन्दिनं घनम् ॥
वल्मीकमूरुर्दासश्च चरणं चक्रमासनम् ।
अशनिर्गोपुरं शैत्य शकटं सौम्यकुब्जकौ ॥
* * * *

Colophon:

इति हस्तलक्षणदीपिकायां प्रथमः परिच्छेदस्समाप्तः ॥

End:

पापापराधदोषाश्च तार्क्ष्यहंसजटायुषः ।
विलम्बक्रममन्त्राश्च तुल्यहस्तास्समीरिताः ॥
विषादव्याधिदुःखानि समहस्तानि केवलम् ।
अनेकार्थकराः प्रायो दर्शिताः शास्त्रवर्त्मना ॥

Colophon:

इति हस्तलक्षणदीपिकायां द्वितीयः परिच्छेदः समाप्तः ॥

(*b*) उत्तररामचरितव्याख्या.

UTTARARĀMACARITAVYĀKHYĀ.

Foll. 9*a*—21*b*. Fol. 22*a* contains the name of the owner of the MS. from which this was copied. Fol. 22*b* is left blank.

A very short commentary on the Uttararāmacarita, the well-known drama of Bhavabhūti, described under No. 12500 of the D.C.S. MSS., Vol. XXI.

Complete.

Beginning:

स्तुत्वा दूरीकृताघौघं लक्ष्मीचरणपङ्कजम् ।
उत्तरं रामचरितं मया व्याक्रियते लघु ॥

. . . . नमोवाकं नमोवाचः प्रशास्महे प्रकर्षेण वदामः। परमात्मनः कलां ज्ञानम् । काले गीते नृत्तवृद्धौ चन्द्रांशे कलने कला । महाभूतेष्विन्द्रियेषु ज्ञानावयवयोरपि ॥ इति । ननु च पूर्वं देवीं प्रणम्य कविभ्य एव नमस्कारः कथं कृतः । अत्रोच्यते —कविभ्य एव नमस्कारे सरस्वत्यपि नमस्कृताऽधिदेवतात्वेन तदन्तर्वर्तित्वात् । तथापि भक्त्यतिशयेन वाणीमपि नमस्कृतवान् । वन्देमहीति । स्वस्मिन्नाशीरूपेण लिङ्प्रयोगः । द्वादशपदेयं नान्दी । अन्यथा केचित् योजयन्ति। कविभ्य इदं नमो वा कं प्रशास्महे कं प्रशंसामहे तां वाणीं च वन्देमहीति । अद्य चतुर्दशपदा नन्दी। नान्द्या समपदतया भवितव्यम् । पदं व्याकरणम्, वाक्यं मीमांसा, प्रमाणं न्यायः अयोध्यासंभवस्तत्कालसन्निहितश्च, धूमकेतुः उत्पातध्वजः, नान्दीकं स्वस्त्ययनम् । चारणाः वन्दिनः । सन्मानः, आ विषादे । अपत्यकृतिका ।

* * * *

Colophon:

इति प्रथमोऽङ्कस्समाप्तः ॥

End:

अनेन कविकल्पितमिति द्योतितं भवति । अभिनयैराङ्गिकसात्त्विकवाचिकाहार्यैर्विन्यस्तरूपं विन्यस्य दृश्यरूपं दृश्यतयोच्यते । चकारः प्रत्येकं . . . वार्थमूलानि परिभावयन्तो अनुसन्दधतः ॥

Colophon:

इत्युत्तररामचरितटीकायां सप्तमोऽङ्कः समाप्तः ॥ समाप्ता चेयं टीका ॥

R. No. 2691.

Paper. 11 × 9⅝ inches. Foll. 92. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippāḍ, Nareri, Tritala, Malabar district.

(*a*) बालरामायणव्याख्या.

BĀLARĀMĀYAṆAVYĀKHYĀ.

Foll. 1*a*—42*a*.

Short notes on the Bālarāmāyaṇa which is a drama in ten Acts by Rājaśēkhara, described under No. 12569 of the D.C.S. MSS., Vol. XXI. The commentator mentions two, viz., the Viddhasālabhañjikā and the Saṭṭaka, out of the six works referred to in the text as the production of Rājaśēkhara.

Complete.

Beginning:

प्रणतादित्यकोटीरप्रभानीराजिताङ्घ्रये ।
नमो निहन्त्रे विघ्नानां हेरम्बाय महात्मने ॥
बालरामायणं नाम नाटकं राजशेखरः [बद्धवान्] ।
व्याक्रियोद्धृत्य गूढार्थपदवाक्यानि कानिचित् ॥
प्राकृतं सकलं दैव्या सरस्वत्या च लिख्यते ॥

कविप्रवरः प्रारिप्सितनाटकप्रबन्धाविघ्नपरिसमाप्तये विशिष्टैराशीर्नमस्क्रिया वस्तुनिर्देशो वा क्रियत इति तत्प्रस्थानमनुसृत्य विशिष्टगुणरामायणादिमहर्षिप्रबन्धकटाक्षेण सकलजनसाधारणं शब्दब्रह्मैव तावदाशिषं ब्रवीति । तत्रैव हि प्रसत्तिपात्रतादयो गुणा उपपाद्यन्ते—प्रसत्तेरिति । अनेन श्लोकेन कविराशिष-

माशास्ते । प्रसत्तिः प्रसादः । स च शब्दश्रवणानन्तरमेवार्थप्रतीतिद्वारेण प्रसिद्धार्थः । तथोक्तं काव्यादर्शे—

प्रसादवत्प्रसिद्धार्थमिन्दोरिन्दीवरद्युति ।
लक्ष्म लक्ष्मीं तनोतीति प्रतीतिसुभगं वचः ॥

अत्र ह्युदाहरणमिन्दुप्रभृतीनां शब्दानामुच्चारणमात्रादेवार्थप्रतीत्या प्रसिद्धार्थत्वं प्रत्युदाहरणवैपरीत्यं स्पष्टम् । यथा ह्यनर्जुनादब्जसदृक्षाङ्को वलक्षगुरित्यत्र ह्यनर्जुनादीनां नैर्मल्यप्रतीतिः कृच्छ्रादेव भवति। अथ वा प्रसादोऽन्तःकरणस्य नैर्मल्यम्। तथा च भगवता वाल्मीकिना प्रणीतम्—जलं प्रसन्नं कुमुदं प्रसादमिति।

* * * *

किमपि केनापि प्रकारेण । कविवृषा कवीन्द्रः । षट्प्रबन्धानिति। विद्धसालभञ्जिका सट्टकमित्येवमादीन् व्याख्यातान्। प्रख्यातान्(त्) पितुरुत्पन्न आमुष्यायण इष्यते । अलंकृतकतरगोत्रः पवित्रितकतरनामधेयश्च एष कविः ।

* * * *

Colophon:

इति बालरामायणटीकायां प्रथमोऽङ्कस्समाप्तः ॥

End:

लङ्घितसागराद्धनुमतोऽपि दूरदेशदर्शिनी दृष्टिः शीघ्रेति प्रतिभाति । वत्स भरत, उत्थाप्यतां वदनेन्दुः, भवतु आनन्दमन्दपरिस्पन्दा दृष्टिः । वत्स शत्रुघ्न चिरं जीव, जननीजनस्ते क प्रग्रीवो द्वारम् ।

Colophon:

बालरामायणटीकायां दशमोऽङ्कस्समाप्तः ॥

(*b*) मालतीमाधवव्याख्या.

MĀLATĪMĀDHAVAVYĀKHYĀ.

Foll. 42*b*—71*a*.

A brief commentary on the Mālatīmādhava of Bhavabhūti described under No. 12589 of the D.C.S. MSS., Vol. XXI.

Complete.

Beginning:

यस्य प्रसादेन विना न विश्वं प्रवर्तते स्वेषु समीहितेषु ।
तस्मै नमो नित्यमुमाद्दषाङ्कप्रेमैकपात्राय विनायकाय ॥
व्याक्रिया विविधाकारदुर्बोधपरिबोधिनी ।
मालतीमाधवाख्यस्य नाटकस्य विधीयते ॥

सानन्दमित्यादि, मुरवो मृदङ्गः भोगश्शरीरं फणा वा । उड्डीना उद्गता, घट्टनव्यस्तविश्वाः विक्षेपपृथक्कृतविश्वाः । दन्तश्रेणीति । ब्रह्मकपालस्य दन्तश्रेणीषु ।

* * * *

ततः किमिति मालतीममात्यो माधवस्यात्मना स्वयं न प्रतिपादयति, येन चौर्यविवाहेन भगवतीं त्वरयतीति—आश्चर्यम् । न खल्वमात्या नामापि माधवस्य जानातीति निरपेक्षतया लक्ष्यते ।

* * * *

Colophon:

इति मालतीमाधवे प्रथमोऽङ्कस्समाप्तः ॥

End:

क एतस्मिन् समये न नृत्यति । एवंविधं प्रकरणं कुत्रचिदस्ति किम् । कविः स्वप्रकरणं व्याजेन प्रशंसति । कथमिव भगवति किमिति प्रतिपत्तव्यम् । अम्महे संवरणं मदुपक्रमैः मदुपायैः निष्णातः कुशलः ॥

Colophon:

इति मालतीमाधवव्याख्याने दशमोऽङ्कः समाप्तः ॥ समाप्ता चेयं मालतीमाधवटीका ॥

(c) मालविकाग्निमित्रीयटीका.

MĀLAVIKĀGNIMITRĪYAṬĪKĀ

Foll. 71*b*—88*a*. Fol. 88*b* is left blank.

A brief commentary on the Mālavikāgnimitra of Kālidāsa described under No. 12605 of the D.C.S. MSS., Vol. XXI.

Complete.

Beginning:

एकैश्वर्येत्यादि ।

षट्पद्यष्टपदी चापि द्विपदी च चतुष्पदी ।
पदैर्द्वादशभिः षड्भिरष्टाभिर्वाप्यलङ्कृताम् ॥
मध्यमस्वरसंयुक्तां ततो नान्दीमुदीरयेत् ।
न पदं पदमित्याहुर्वाक्यार्थः पदमुच्यते ॥

इयं नान्दी चतुष्पदी । शीघ्रग्रथितवस्तु कविकल्पितेनिवृत्तमित्यर्थः । मा तावत् । तावत्सम्प्रधारणे ।

सम्प्रधारणमर्थानां युक्तिरित्यभिधीयते ।

अयुक्तमित्यर्थः । यावत्तावच्छब्दौ साकल्यसंप्रधारणशैघ्र्यादिषु वर्तेते । क्रियां कृतिं काव्यम् । विवेकभ्रान्तं विवेकरहितम् ।

* * * *

Colophon:

इति मालविकाग्निमित्रव्याख्याने प्रथमोऽङ्कः ॥

End:

अवसितकार्याया भगवत्या न युक्तमस्मान् परित्यक्तुम् । आज्ञापयत्वार्यपुत्रः । किं भूयः प्रियमनुतिष्ठामि ॥

Colophon:

इति मालविकाग्निमित्रव्याख्याने पञ्चमोऽङ्कस्समाप्तः ॥

(*d*) उत्तररामचरितव्याख्यानम्.

UTTARARĀMACARITAVYĀKHYĀNAM.

Foll. 89*a*—92*b*.

Brief notes on the Uttararāmacarita of Bhavabhūti described under No. 12500 of the D.C.S. MSS., Vol. XXI.

Complete.

Beginning:

इदंकविभ्य इत्यादि । इदंकविभ्यः इदानीन्तनेभ्यः कविभ्यः पूर्वेभ्यः पुराणेभ्यः नमोवाकं नमोवाचम् । आत्मनः परमात्मनः कलाम् ।

काले शिल्पे वित्तवृद्धौ चन्द्रांशे कलने कला ।
महाभूते(ष्वि)न्द्रियेषु ज्ञानावयवयोरपि ॥

द्वादशपदेयं नान्दी । पदं व्याकरणं, व्याक्यं मीमांसा, प्रमाणं न्यायः । कुलकेतोः कुलोत्पातस्य ।

* * * *

Colophon:

इत्युत्तररामचरिते प्रथमोऽङ्कस्समाप्तः ॥

End:

शालीनकौपीने अधृष्टाकार्ययोः । पुण्यकृतिः पुण्यमातृका । मधुरेश्वरः शत्रुघ्नः । अभिनयः आङ्गिकवाचिकाहार्यसात्त्विकैः विन्यस्तरूपां विन्यस्तहश्याम् ॥

Colophon:

इत्युत्तररामचरिते सप्तमोऽङ्कस्समाप्तः ॥ समाप्तमिदमुत्तररामचरितटिप्पणम् ॥

R. No. **2692.**

Paper. 11 × 9⅝ inches. Foll. 164. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Drōṇamrāju Calapati Raogāru of Pulla, Kistna district.

भृगुसंहिता.

BHṚGUSAṀHITĀ.

Foll. 1*a*—164*b*. Foll. 160*b*, 162*b*—164 are left blank.

A Vaikhānasāgama work attributed to Bhṛgu. It deals with the conduct of worship of God in Viṣṇu temples.

Contains the Adhyāyas 1, 2, 7 to 44 and 47 to 50 in the Vasādhikāra.

Deals with the following topics:—

१. ऋषिप्रश्नोत्तरम्.
२. कर्षणविधिः.
३-६. Wanting.
७. अक्षिमोचनाधिवासविधिः.
८. क्रियाक्रमः.
९. सर्वहोमानामाधारविशेषः.
१०. कुम्भध्यानवायुधारणन्यासत्रयक्रमभेदः.
११. हौत्रकल्पविशेषः.
१२. सर्वदैवत्यक्रमः.
१३. चतुरहोमपारमात्मकः.
१४. अष्टाशीतिक्रमः.
१५. कालत्रयसर्वबीजाक्षरन्यासः.
१६. प्रतिष्ठाविधिः.
१७. देव्योर्वैवाहिकविधिः.
१८. मत्स्यकूर्मविधिः.
१९. वराहमूर्तिस्थापनम्.
२०. नारसिंहत्रिविक्रमविधिः.
२१. दशरथरामलक्ष्मणप्रतिष्ठामूर्तिभेदः.
२२. कृष्णकल्किबुद्धप्रादुर्भावः.
२३. जयन्तीचतुर्मूर्तिविधिः.
२४. विष्वक्सेनतार्क्ष्यार्चनविधिः.
२५. अनन्तार्चाप्रदक्षिणाचाङ्गसमुच्चयः.
२६. नित्यपूजाविधिः.
२७ द्वारपूजाविग्रहोपचारनिर्णयश्रीभूम्यो राजविग्रहोपचारः.
२८. बलिविधिदर्शनाधिदैवतग्राह्यपुष्पसमुच्चयः.
२९. बलिबेरविधिहविष्पावकविधिनिष्कप्रमाणविधिः.
३०. सन्ध्यारक्षनीराजनविधिः.
३१. न्यासविद्यात्मसंस्कारविधिः.

३२-३४. No colophon.
३५. डोलारोहणविधिः.
३६. स्नपनद्रव्यसमुच्चयस्थापनकमद्रव्यादिनाम.
३७. स्नपनमार्गभेदः.
३८. स्नपनद्रव्यविधिः.
३९. शुद्धस्नानोक्तविधिः.
४०. पवित्रारोपणम्.
४१. सूत्राधिवासहोमक्रमः.
४२. द्वादश्यारोपणविसर्जनप्रायश्चित्तविधिः.
४३. नैवेद्यविनियोगदमनारोपणविधिः.
४४. पुनर्वस्वैकाहिकशान्तिभक्तोत्सवविधिः.
४५-४६. Wanting.
४७. तत्रसङ्कटबालस्थाननिर्देशः.
४८. ध्रुवनिष्कृतिजीर्णालयबेरविधिः.
४९. ध्रुवबेरोत्सवादिहर्म्यनिष्कृतिः.
५०. भृगुप्रोक्तप्रायश्चित्तविधिः.

Beginning :

हयवदनमब्जनेत्रं दिनकरशतकोटितेजसं भक्त्या ।
विद्यावननिधिनावं वन्दे भक्तौघकल्पभूजातम् ॥

ऋषय ऊचुः—

आश्रमे सम्यगासीनं ब्रह्मपुत्रं तपस्विनम् ।
सर्ववेदस्य वेत्तारं सर्वशास्त्रार्थकोविदम् ॥
सुप्रसन्नं मुनिं शान्तमभिगम्य प्रणम्य च ।
भगवन् केन मार्गेण कं देवं पूजयन्ति वै ॥
कान् लोकांश्च गमिष्यन्ति श्रोतुमिच्छाम्यहं प्रभो ॥

भृगुरुवाच—

एतच्छृण्वन्तु मुनयः प्रोक्तं चैवाथ वै मया ।
वैदिकोक्तेन मार्गेण मन्त्रैर्वेदोक्तवन्मया ॥
समाहितमना भूत्वाभ्यर्चयेद्विष्णुमव्ययम् ।
तस्य विष्णोः पदं गच्छेत्कर्तव्यमिति निश्चयः ॥

ऋषय ऊचुः—

किमत्रालयदेशे तु भूमिं किन्तु परीक्षणम् ।
किं रूपं तस्य धाम्नश्च किं वा चैवास्य लक्षणम् ॥
प्राकारगोपुरं किन्तु किमत्र स्थापनक्रमः ।
व्यूहत्रयं कथं किन्तु तस्य भेदः कथन्तु वा ॥

किं तस्य चार्चनं नित्यमुत्सवन्तु कथं पुनः ।
सानृतं चेत्कथं कुर्यादानृतं तु तथैव च ॥
मूर्तानामादिमूर्तं तु आत्मार्थं किं परार्थकम् ।
अन्तर्यागं तु किं प्रोक्तं बहिर्यागं यथाक्रमम् ॥
तथैव निष्फलं किन्तु सकलं चैव किं पुनः ।
अधिगमनं तथा किन्तु उदवधानं कथं पुनः ॥
इज्या चैव कथं प्रोक्ता स्वाध्यायं तु कथं क्रमात् ।
योगक्रमस्तथा किन्तु किमत्राम्रेयसंज्ञिकम् ॥
किमत्र समयो भेदो दीक्षा चैव कुतस्तथा ।
कथनं तु समूर्तन्तु षण्मूर्तं तु कुतस्तथा ॥
किमत्र पञ्चमूर्तं तु बेरस्यैकं कथन्तु वा ।
देव्योश्च सहिता किन्तु तस्य रूपं कथन्तु वा ॥
देवीभ्यां रहितस्थानं कथन्त्वासनकं कथम् ।
शयनं तु कथं प्रोक्तं परिवारक्रमः कथम् ॥
तथैव ज्ञानयोगं तु क्रियाशय्यात्मकं कथम् ।
तत्सर्वं श्रोतुमिच्छामो वद त्वं वदतां वर ॥

भृगुरुवाच—

एतत्सर्वं समाख्यातं शृणुध्वं तु यथाक्रमम् ।
ग्रामे च नगरे वापि पट्टणे पर्वतेऽपि वा ॥
दण्डके कुटिके वापि राजधान्यामथापि वा ।
अरण्ये शैलमूले वा पर्वताग्रे तथैव च ॥
नद्यास्तीरेऽब्धितीरे वा अन्यत्रोद्यानकेऽपि वा ।
एतेष्वालयदेशेषु यथार्हं तत्र कारयेत् ॥

*　　*　　*　　*

Colophon:

इति श्रीवैखानसे भृगुप्रोक्तायां संहितायां वासाधिकारे ऋषिप्रश्नोत्तरं नाम प्रथमोऽध्यायः ॥

End:

पूर्वोक्तेन विधानेन प्रायश्चित्तं समाचरेत् ।
पश्चात्प्रतिष्ठा कर्तव्या इति पूर्वजदर्शनम् ॥

भृगुप्तोद्धृतबिम्बेषु प्रतिष्ठाविधिमाचरेत् ।
प्रतिष्ठायान्तरं नास्ति प्रायश्चित्तं द्विजोत्तमाः ॥
पद्मभृत्यमनुष्याणां पशूनां . . . . . ।
ऐहिकामुष्मिकं सर्वं ददातीति न संशयः ॥

Colophon:

इति श्रीवैखानसे भृगुप्रोक्तायां संहितायां वासाधिकारे भृगुप्तोद्धृतप्रायश्चित्तविधिर्नाम पञ्चाशोऽध्यायः ॥

R. No. **2693.**

Paper. 11 × $9\frac{5}{8}$ inches. Foll. 12. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of the Raja of Chirakkal, Malabar district.

कल्याणसौगन्धिकम्.

KALYĀṆASAUGANDHIKAM.

Foll. 1*a*—10*a*. Fol. 10*b* contains the name of the owner of the MS., from which this was copied. Foll. 11 and 12 are left blank.

A drama in one Act describing the adventures of Bhīmasēna in his attempt to bring the Saugandhika flower to satisfy Draupadī : by Nīlakaṇṭha.

Complete.

Beginning:

नान्द्यन्ते ततः प्रविशति सूत्रधारः ।
सू—आसीद्यः स्वनिवासशैलतुलनात्प्रीतः प्रसादोन्मुखो
लङ्केशस्य ससंभ्रमाचलसुतासंश्लेषसौख्यप्रदात् ।
हव्यं यस्य शरोद्भवे हुतवहे जातं पुराणां त्रयं
सोऽयं मुग्धशशाङ्कमण्डितजटाभारो हरः पातु वः ॥
(परिक्रम्य, नेपथ्याभिमुखमवलोक्य)
आर्ये इतस्तावत् । प्रविश्य नटी । अय्य इअम्हि ।
सू—अहं खल्वार्यमिश्रैरादिष्टः ।
नटी—कहंविअ आदेसाणुग्गहो ।
सू—आज्ञागुणेन गुणवद्भिरभिष्टुतानां कात्यायनीचरणपङ्कजभक्तिभाजाम् ।
षट्कर्मिणां निवसतां परमाग्रहारे प्राप्तप्रसूतिरुपसेवितवान् कविर्नः ॥

तदस्य नीलकण्ठनाम्नः कल्याणसौगन्धिकं नाम निबद्धशरीरमिदमभिनयालङ्कारालङ्कृतमनुसन्दर्शयेति ।

* * * *

सू—भवतु विज्ञातम्—

अगाग्रादप्राप्यं मरुदुपहृतं दिव्यकुसुमं
गुणाढ्यं पश्यन्त्या द्विगुणितमुदा नूतनतया ।
बहूनिच्छामीति द्रुपदसुतया भीममुदितं
प्रयान्तं संरोद्धुं व्रजति सकलत्रो मुनिवरः ॥

निष्क्रान्तौ । प्रस्तावना ।

ततः प्रविशति सकलत्रस्तापसः ।

तापसः—भीमेन खलु न गन्तव्यं ब्राह्मणि एभिर्न ।

End :

(भरतवाक्यम्)—

दोषाश्च नाशमुपयान्तु कृतावमुष्यां भूयोभवं क्षपयतां मम नीलकण्ठः ।
निर्धार्तराष्ट्रनियतिं निखिलां धरित्रीं पायान्नृप . . . . सोऽयमजातशत्रुः ॥

Colophon :

श्रीनीलकण्ठस्य कृतिः कल्याणसौगन्धिकं नामैकोऽङ्कस्समाप्तः ॥

R. No. 2694.

Paper. 11 × 9⅝ inches. Foll. 102. Lines, 20 in a page. Dēvanāgarī and Malayālam. Good.

Transcribed in 1918-19 from a MS. of Dēśamaṅgalam Manakkal, Dēśamaṅgalam, Malabar district.

सूर्यसिद्धान्तः, केरलविवरणसहितः.

SŪRYASIDDHĀNTAḤ WITH MALAYĀLAM MEANING.

Foll. 1*a*—101*a*. Fol. 101*b* contains the name of the owner of the MS. from which this was copied. Fol. 102 is left blank.

Same text as that described under No. 13512 of the D.C.S. MSS., Vol. XXIV, and with meaning in Malayālam.

Complete.

R. No. 2695.

Paper. 11 × 9⅝ inches. Foll. 120. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of the Raja of Chirakkal, Malabar district.

मीमांसासूत्रभाष्यम्.

MĪMĀṀSĀSŪTRABHĀṢYAM.

A commentary by Dēvasvāmin on the Saṅkarṣakāṇḍa which deals in four Adhyāyas with the enquiry relating to the deities referred to in the Mantras of the Vēdas, to whom sacrifices are offered.

Contains the Saṅkarṣakāṇḍa complete.

Beginning:

श्रीमान् वेङ्कटनाथार्यः (. . .) सदा हृदि ।

अथ सङ्कर्षकाण्डः प्रस्तूयते । तदनुपपन्नम् । व्यतिरिक्ताव्यतिरिक्तविकल्पासंभवाद्यतिरेकान्तस्स प्रागेव तन्त्रप्रसङ्गाभ्यामेवेति चेन्न । असाकल्यात् । तथाचाहुः—

सिद्धैस्तु तैः प्रसङ्गान्तैः श्रुतियोगं प्रदर्शयन् ।
लक्षणानि श्रुति(ती)श्चैव सङ्कृष्याधिजजैमि(गे मु)निः ॥

इति । भेदादीनि चत्वारि प्रकृतिविषयाणि ।

* * * *

अनुयजतीत्यनुवषट्कारश्चोद्यते ॥

ज्योतिष्टोमे श्रूयते--सोमस्याग्ने वीहीत्यनुयजतीति । किमैन्द्रवायवादियाग एवायं मन्त्रा गुणो विधीयते ? किं वा प्रयाजानुमन्त्रणवत्कर्मणामनुमन्त्रणम् ? उत कर्मान्तरविधानमिति पूर्वाधिकरणेन सम्बन्धं केचिदाहुः— आर्त्विज्यं ब्राह्मणानामिति कर्तारस्समधिगताः ॥

* * * *

Colophon:

इति सङ्कर्षकाण्डभाष्ये प्रथमस्याध्यायस्य प्रथमः पादस्समाप्तः ॥

End:

कथं नामाध्येतारो बहुयागसम्बन्धिनो भवेयुरिति पशुसम्बन्धं चाधिकरणमन्त्रे न्यस्तमध्येतारस्संप्रैषश्चान्यपदसकलशास्त्रार्थव्यवसायानुष्ठानाविभू(र्भू)ते प्रतिविष्ठे श्रेयसि रम्येरन्निति ॥

Colophon:

इति देवस्वामिनः कृतौ सङ्कर्षकाण्डभाष्ये चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तः । समाप्तश्चाध्यायः सङ्कर्षकाण्डभाष्यं च ॥

R. No. **2696.**

Paper. 11 × 9⅝ inches. Foll. 106. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of the Raja of Chirakkal, Malabar district.

ईश्वरप्रत्यभिज्ञासूत्रविमर्शिनी—लघुवृत्तिः.

ĪŚVARAPRATYABHIJÑĀSŪTRAVIMARŚINĪ : LAGHU-VṚTTIḤ.

A critical commentary on the Īśvarapratyabhijñāsūtra of Utpaladēva which work deals with Śaiva Vēdānta in the form of stanzas and is based on the Śivadṛṣṭi of Bhadra Sōmānanda : by Abhinavaguptācārya, disciple of Lakṣmaṇaguptācārya who was himself the disciple of Utpaladēva, the son of Udayākara.

Complete.

Deals with the following topics :—

आह्निकम्—

ज्ञानाधिकारे.

१. उपोद्घातविवृतिः.	५. ज्ञानशक्तिनिरूपणम्.
२. पूर्वपक्षविवृतिः.	६. अपोहनशक्तिनिरूपणम्.
३. परदर्शनानुपपत्तिनिरूपणम्.	७. एकाश्रयनिरूपणम्.
४. स्मृतिशक्तिनिरूपणम्.	८. माहेश्वर्यनिरूपणम्.

क्रियाधिकारे.

१. क्रियाशक्तिनिरूपणम्.	३. . . . . . .
२. भेदाभेदविमर्शनम्.	४. कार्यकारणतत्त्वनिरूपणम्.

आगमाधिकारे.

१. तत्त्वनिरूपणम्.	२. . . . . . .

तत्त्वार्थसङ्ग्रहाधिकारे.

१. . . . .

Beginning :

निराशंसात्पूर्णादहमिति पुरा भासयति य-

द्द्विशाखामाशास्ते तदनु च विभक्तं निजकलाम् ।

स्वरूपादुन्मेषप्रसरणनिमेषस्थितिजुष-

स्तदद्वैतं वन्दे परमशिवशक्त्यात्मनिखिलम् ।

श्रीत्रैयम्बकसद्वंशमध्यमुक्तामयस्थितेः ।

श्रीसोमानन्दनाथस्य विज्ञानप्रतिबिम्बकम् ॥

अनुत्तरानन्यसाक्षिपुमर्थोपायमभ्यधात् ।

ईश्वरप्रत्यभिज्ञाख्यं यश्शास्त्रं यत् सुनिर्मलम् ॥

तत्प्रशिष्यः करोम्येतां तत्सूत्रविवृतिं लघु ।
बुद्ध्वाभिनवगुप्तोऽहं श्रीमल्लक्ष्मणगुप्ततः ॥
वृत्त्यां तात्पर्यं टीकया तद्विचारः
सूत्रेष्वेतेषु ग्रन्थकारेण दृष्टम् ।
तस्मात्सूत्रार्थं सूक्ष्मबुद्धीन् प्रतीत्थं
सम्यग् व्याख्यास्ये प्रत्यभिज्ञाविविक्त्यै ॥
सर्वत्रात्ममतौ यद्वा कुत्रापि सुमहाधियि ।
नैवान्यत्रापि तु स्वात्मन्येषा स्यादुपकारिणी ॥

ग्रन्थकारोऽपरोक्षात्माद्दृष्टशक्तिकां परमेश्वरतन्मयतां परत्र सञ्चिक्रामयिषुः स्वतादात्म्यसमर्पणपूर्वकमविघ्नेन तत्सम्पत्तिं मन्यमानः परमेश्वरोत्कर्षप्रह्वतापरामर्शे शेषतया परमेश्वरतादात्म्ययोग्यतापादनबुद्ध्या प्रयोजनमासूत्रयति ।

कथञ्चिदासाद्य महेश्वरस्य दास्यं जनस्याप्युपकारमिच्छन् ।
समस्तसम्पत्समवाप्तिहेतुं तत्प्रत्यभिज्ञामुपपादयामि ॥

इह परमेश्वरं प्रति येयं कायवाङ्मनसानां तदेकविषयतया नियोजनलक्षणा प्रह्वता सा नमस्कारस्यार्थः । सा च तदा कर्तुमुचिता प्रामाणिकस्य भवति, यदि सर्वतो नमस्करणीयस्योत्कर्षं पश्येत् ।

* * * *

इत्थं चात्र श्लोके योजना । महेश्वरस्य दास्यं समस्तसम्पल्लाभहेतुं कथञ्चिदासाद्य जनस्यापि कथञ्चित् तत्प्रत्यभिज्ञामासाद्य प्रापय्योपकारं समस्तसम्पल्लाभहेतुभूतं महेश्वरस्य दास्यात्मकमिच्छंस्तामेव समस्तसम्पत्समवाप्तिहेतुकां तत्प्रत्यभिज्ञामुपपादयामि । इति । आसाद्येत्यावृत्त्या योजने द्वौ णिचौ । इयति च व्याख्याने वृत्तिकृता भरो न कृतः ।

* * * *

Colophon:

इति श्रीमदाचार्योत्पलदेवशिष्यश्रीमल्लक्ष्मणगुप्ताचार्यदत्तोपदेशश्रीमदाचार्याभिनवगुप्तनाथविरचितायां श्रीमदीश्वरप्रत्यभिज्ञाविमर्शिन्यामुपोद्घातविवृतिः प्रथमाह्निकम् ।

End:

जनस्यायत्नसिद्ध्यर्थमुदयाकरस्तनूना(सूनुना) ।
ईश्वरप्रत्यभिज्ञेयमुत्पलेनोपपादिता ॥

यस्य कस्यचिज्जन्तोरिति नास्य जात्याद्यपेक्षा काचिदिति सर्वोपकारित्वमुक्तम्। अयत्नेन सिद्धिः परापररूपा यथा स्यादिति महाफलत्वम्। उदयाकरस्य पुत्रः श्रीमानुत्पलदेवोऽस्मत्परमगुरुरिदं शास्त्रमकार्षीदिति तत्प्रसिद्ध्या जनः प्रवर्तत इति प्रवर्तनद्वारेण सोऽनुगृहीतो भवतीत्युभयनामनिर्देशः। इयमिति हृदयङ्गमत्वमुपपत्तिशतैरानीतेति शिवम् ॥

आदितो नवत्यधिकं शतम् ॥

Colophon:

इति श्रीमहामहेश्वराचार्याभिनवगुप्तनाथविरचितायां श्रीमदीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यां तत्त्वार्थसङ्ग्रहाधिकारे प्रथममाह्निकम् ॥

एषाभिनवगुप्तेन सूत्रार्थप्रविमर्शिनी ।
रचिता प्रत्यभिज्ञायां लघ्वी वृत्तिरभङ्गुरा ॥

वाक्यप्रमाणपदतत्त्वसदागमार्था स्वात्मोपयोगमुपयान्त्यमुतस्सुशास्त्रात् ।
भौमान् रसान् जलमयांश्च न सस्यपुष्टौ मुक्त्वा(क)मेकमिह योजयितुं समर्थः ॥

आत्मानमनभिज्ञाय विवेक्तुं योऽन्यदिच्छति ।
तेन भौतेन किं वाच्यं प्रश्नेऽस्मिन् को भवानिति ॥

समाप्तेयं श्रीमदीश्वरप्रत्यभिज्ञासूत्रविमर्शिनी लघ्वी वृत्तिः कृतिः श्रीमत्रिणयनसदोदितचिन्तनलब्धप्रसिद्धिश्रीमदाचार्याभिनवगुप्तनाथपादस्य ।

पूर्णव्याकरणावगाहनशुचिस्सत्तु . . मूलोन्मिष-
त्प्रज्ञाकल्पलताविवेककुसुमैरभ्यर्च्य हृद्देवताम् ।
पीयूषासवसारसुन्दरमहासाहित्यसौहित्यभा-
विश्राम्याम्यहमीश्वराद्वयकथाकान्तासखस्साम्प्रतम् ॥

इन्द्रानन्दमुनिप्रवीरकरुणासंप्रत्यभिज्ञापित-
स्वानन्दानुभवोदयोदितमहासम्पत्समृद्धात्मना ।
योगीशादिकनन्दनामनिधिना या प्रत्यभिज्ञाश्रिता
. . . . ॥

R. No. 2697.

Paper. 11 × 9⅝ inches. Foll. 128. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Tiru. Śrīnivāsavarada Tātācāryar of Villiyambākam, Chingleput district.

आश्वलायनश्रौतसूत्रवृत्तिः.

ĀŚVALĀYANAŚRAUTAŚŪTRAVṚTTIḤ.

Foll. 1*a*—127*a*. Foll. 127*b*—128*a* give the contents of this work. Fol. 128*b* is left blank.

Slightly different from the work described under No. 1032 of the D.C.S. MSS., Vol. II. By Tālavṛntanivāsin or Āṇḍapiḷḷai who has followed the Siddhāntibhāṣya of Dēvasvāmin and the commentary of Nārāyaṇa.

Contains the first six Adhyāyas.

Deals with the following topics :—

पुनराधेयम्.	वाजपेयः.
काम्या इष्टयः.	आग्नेयवपायागः.
आयुष्कामेष्टिः.	माध्यन्दिनम्.
पुत्रकामेष्टिः.	पशुपुरोडाशयागः.
वर्षकामेष्टिः.	सवनीयपुरोडाशयागः.
इष्ट्ययनानि सांवत्सरिकाणि.	अत्यग्निष्टोमः.
सोमवमनेष्टिः.	षोडशी.
पशुबन्धः.	अतिरात्रप्रयोगः.
पशुतन्त्रम्.	अप्तोर्यामः.
सौत्रामणिः.	उशनस्स्तोमः.
प्रायश्चित्तानि.	बृहस्पतिसवः.
सोमप्रयोगः.	ऐकाहिकत्रिकः.
प्रतिसन्धिहोमः.	आयुः.
अग्निष्टोमः.	

Beginning :

समस्तमुनिजातस्य हृत्पद्मनिलयस्थितम् ।
वेदार्थविदुषां ज्ञेयं यज्ञात्मानं नमाम्यहम् ॥

देवस्वामिसिद्धान्ति[ना]नारायणादिव्याख्याकारानुसारेणाश्वलायनसूत्रस्या - दित आरभ्य प्रयोगवृत्तिः क्रियते । अनादेशे होत्रा कर्तव्याः पदार्था अस्मिन् शास्त्रे स होता सूत्रोक्तर्त्विग्लक्षणसहितः यज्ञोपवीती शुचिश्च भवति । कर्मार्थ- मृचं पादग्रहणे सूक्तम् । सूक्तादौ विरने ? पादे आधिके तृचमेतदपि सामान्यं

जपानुमन्त्रणाप्यायिनोपस्वनान्युपांशुमन्त्राश्च कर्मकरणाः । अथ कर्मक्रमः—होतरेहीत्युक्तो होता प्रागुदगाहवनीयादवस्थाय प्राङ्मुखो यज्ञोपवीती भूत्वाचम्य तीर्थेन दक्षिणावृद्भूत्वाहवनीयोत्कारयोरन्तरावेदि श्रोण्या अपरण तिष्ठन्नभये समिध्यमानायेत्युक्तो जपति । नमः प्रवक्त्र इत्युपांशुस्वरेण प्रपद्येऽहमेव मां यज्ञशर्माणामिति ।

* * * *

अथाग्न्याधेयस्य प्रयोग उच्यते—आश्वलायनेन भगवता इष्टित्रित्वमिष्टिद्वित्वमिष्ट्येकत्वं चोक्तम् । तत्रेष्टित्रित्वपक्षे प्रथममुच्यते । सर्वेष्टीनां दर्शपूर्णमासवत् तन्त्रम् । तत्र विशेष उच्यते । प्रथमायामावाहनकाले अग्निमावह ।

* * * *

Colophon:

समाप्तः पुनराधेयः ।

* * * *

अग्निप्रणयनकाले राजन्यस्य त्विमं महे अयमिहेति वैश्यस्य प्रदेवनेऽनयोभयोः ॥

आश्वलायनसूत्रस्य वृत्तिरेषा प्रदीपिका ।
कृता त्रैविद्यवृद्धेन तालवृन्तनिवासिना ॥

समाप्तानि चातुर्मास्यानि ॥

End:

षोडश्यन्तमविकृतं षोडश्यन्तेऽतिरिक्तकम् ।
पशुः षोडशिवत्कार्यो यज्ञपुच्छादि पूर्ववत् ॥
अतिरात्रे सरस्वती पशुः षोडशिसंस्थिने ।
पर्यायात् द्वादशप्रोक्त आश्विनं यज्ञपुच्छकम् ॥
अप्तोर्यामे पशुरेव सारस्वती चोदितं तदिदं पुनः ।
आश्विनान्तेऽतिरिक्तोक्थ्याश्चत्वारो यज्ञपुच्छकम् ॥

Colophon:

पूर्वषट्कं समाप्तम् ॥

R. No. 2698.

Paper. 11 × 9⅝ inches. Foll. 142. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917–18 from a MS. of the Raja of Chirakkal, Malabar district.

चन्द्रप्रभचरितव्याख्या.
CANDRAPRABHACARITAVYĀKHYĀ.

Foll. 1a—141a. Fol. 141b contains the name of the owner of the MS., from which this was copied. Fol. 142 is left blank.

A commentary on the Candraprabhacarita, which is a poem by Vīranandi, describing the life and career of Candraprabha, one of the Tīrthaṅkaras of the Jainas. The name of the commentary is Vidvanmanōvallabha. The last stanza of every Sarga is characterized by the use in it of the word Udaya.

Contains the Sargas 10 to 18 complete, but wants beginning in the 10th Sarga.

Beginning :

परेति । यत् अस्तभूधरः अस्ताचलः । अशीतद्युतिम् । अशीताः द्युतयः कान्तयो यस्य तं सूर्यमित्यर्थः । अस्तमयेऽपि अस्तमनकाले । पक्षे नाशसमयेऽपि । शिरसा मस्तकेन । अदीधरत् धरति स्म । धृञ् धारणे । परकृत्यविधौ । परेषामन्येषां कृत्यस्य प्रयोजनस्य विधौ करणे समुद्यतस्समुद्युक्तः पुरुषः पुमान् कृच्छ्रगतोऽपि कृच्छ्रं कष्टं गतोऽपि प्राप्तोऽपि पक्षे विगतपुण्योऽपि पूज्यते हि महीयते हि । अर्थान्तरन्यासः ।

* * * *

Colophon :

इति श्रीवीरनन्दिकृतावुदयाङ्के चन्द्रप्रभचरिते महाकाव्ये तद्व्याख्याने च विद्वन्मनोवल्लभाख्ये चन्द्रोदयसूर्योदयवर्णनं नाम दशमस्सर्गः ॥

End :

स च चन्दनं च ते प्रभृतीनि येषां तैः संस्कृत्य दहनं विधाय । प्राप्तोरुपुण्योदयाः प्राप्तो लब्ध उरूणां महतां पुण्यानां शुभकर्मणामुदयो यैस्ते स्वर्गिणो देवाः पञ्चमं परिनिर्वाणाख्यं कल्याणं मङ्गलकार्यं प्रविधाय स्वं स्वकीयं पदं स्थानमगुः ययुः ; लुङ् ॥

Colophon :

इति श्रीवीरनन्दिकृतावुदयाङ्के चन्द्रप्रभचरिते महाकाव्ये तद्व्याख्याने च विद्वन्मनोवल्लभाख्ये अष्टादशस्सर्गः ॥

R. No. 2699.

Paper. 11 × 9⅝ inches. Foll. 368. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918-19 from the MS. of the Raja of Nilambūr Kovilagam, Malabar district.

Bound in two volumes.

महाभारतसङ्ग्रहः.

MAHĀBHĀRATASAṄGRAHAḤ.

Foll. 1*a*—367*a*. Foll. 367*b* and 368 are left blank.

Gives briefly in verse some of the stories contained in the various Parvans of the Mahābhārata. This MS. contains only 14 Parvans and the names of the stories summarized in each Parvan are given below.

Contains from the Virāṭaparvan to the end of the Svargārōhaṇaparvan.

Deals with the following subjects :—

विराटपर्व.

१. पाण्डवानां कार्यविचारः.
२. पाण्डवानां विराटनगरप्रवेशः.
३. मल्लयुद्धम्.
४. कीचकवधः.
५. दक्षिणगोग्रहणम्.
६. अर्जुनप्रादुर्भावः.
७. उत्तरगोग्रहणयुद्धप्रवर्तनम्.
८. उत्तरगोग्रहणम्.
९. . . . . .
१०. उत्तराभिमन्युविवाहः.

उद्योगपर्व.

१. इन्द्रोपाख्यानम्.
२. सञ्जयप्रतियानम्.
३. धृतराष्ट्रप्रजागरणम्.
४. सञ्जयप्रतियानम्.
५. कृष्णस्य हस्तिनाप्रवेशः.
६. कृष्णसभाप्रवेशः.
७. डम्भरूपोपाख्यानमातलिवरान्वेषणगालवचरितानि.
८. कृष्णसन्धानविघ्नप्रतियानम्.
९. बलोद्योगः.
१०. रथसङ्ख्याम्बोपाख्यानसैन्यस्थापनम्.

भीष्मपर्व.

१. भुवनकोशकथनम्.
२. बलोद्योगव्यूहकथनम्.
३. गुरूपकथनम्.
४. भगवद्गीता.
५. प्रथमदिवसे उत्तरवधः.
६. व्यूहकल्पनम्.
७. द्वितीयादिवसेसेनापहारः.
८. तृतीय do.
९. चतुर्थ do.
१०. पञ्चम do.
११. षष्ठ do.
१२. सप्तम do.

१३. . . . .
१४. . . . .
१५. नवमदिवससेनापहारः.
१६. सेनायुद्धचन्द्रकलाभिधानम्.
१७. भीष्मशरतल्पशयनम्.

द्रोणपर्व.

१. . . . .
२. . . . .
३. . . . .
४. द्वितीयदिवससेनापहारः.
५. तृतीयदिवसे अभिमन्युवधः.
६ षोडशराजचरितम्.
७. कैलासयात्रा.
८. मन्त्रकवचधारणम्.
९ . . . .
१०. अलम्बुसवधः.
११. जलसन्धवधः.
१२. . . . .
१३. अलम्बिषवधः.
१४. सैन्धववधः.
१५ सोमदत्तवधः.
१६. अलम्बलवधः.
१६ (१७) घटोत्कचवधः.
१८. द्रोणवधः.

कर्णपर्व.

१. . . . .
२. प्रथमदिवससेनापहारः.
३–९. . . . .
१०. दुश्शासनवधः
११. कर्णवधः.

शल्यपर्व.

१. . . . . .
२. शल्यवधः.
३. साल्ववधः.
४. शकुनिवधः.
५–७. . . . . .
८. दुर्योधनोरुप्रहरणम्.
९–१०. . . . .

सौप्तिकपर्व.

१. . . . . . .
२. ऐषीकरुद्रप्रभावकथनम्.

स्त्रीपर्व.

१–२. . . . .

शान्तिपर्व.

१–४. . . . .
५. राजधर्मप्रस्तावः.
६ . . . . .
७. धर्मजपट्टाभिषेकः.
८. . . . . .

आश्वमेधिकपर्व.

१. मरुत्तचरितम्.
२. . . . .

३. उत्तरगीता.
४–१०. . . . . .

आश्रमवासिकपर्व.

१–४. . . . .

मौसलपर्व.

१–२. . . . .

महाप्रस्थानपर्व.

१. . . . .

स्वर्गारोहणपर्व.

१–२ . . . .

Beginning :

ततो द्वैतवनस्थानं प्राप्यैते पञ्च पाण्डवाः ।
एकसंवत्सराज्ञातवासहेतोर्व्यचिन्तयन् ॥
राजोवाच यतीन् सर्वान् धौम्यादींश्च द्विजन्मनः ।
न्यवसाम सुखं सार्धं भवद्भिर्भावितात्मभिः ॥
सुखं नीता द्वादशाब्दा पुराणश्रवणादरात् ।
वत्स्यामः कथमज्ञाता वर्षमेकं त्रयोदशम् ॥

* * * *

इत्युक्तस्सोऽर्जुनः प्राह विषयास्सन्त्यनेकशः ।
मत्स्यदेशो महांस्तत्र स्फीतसर्वगुणान्वितः ॥
विराट इति विख्यातो मत्स्यदेशमहीपतिः ।
स सर्वगुणसंपन्नो निवासस्तत्पुरेऽस्तु नः ॥
मार्दवार्जवकारुण्यसौजन्यविनयान्वितम् ।
किंवेषनामकर्ता त्वं तत्र राज्ये निवत्स्यसि ॥
इत्यर्जुनवचः श्रुत्वा धर्मपुत्रोऽब्रवीद्वचः ।
कङ्काख्योऽहं सभास्थाने भविष्याम्यस्य भूपतेः ॥

* * * *

Colophon :

इति महाभारतसङ्ग्रहे विराटपर्वणि उत्तराभिमन्युविवाहो नाम दशमोऽध्यायः ॥

विराटपर्व समाप्तम् ॥

End:

विघ्नराजेन लिखितं व्यासेन कथितं पुरा ।
स्वविषाणेन हेमाद्रौ शृणुयाद्भारतार्णवम् ।
यज्ञे वैशम्पायनाख्यो मुनीनां मध्ये पृष्टः प्राह पारीक्षिताय ।
सूतः प्राह श्रीमहाभारताख्यं पापघ्नं तं शौनकायेतिहासम् ॥

Colophon:

इति श्रीमहाभारतसङ्ग्रहे स्वर्गारोहणपर्वणि द्वितीयोऽध्यायः ॥

R. No. 2700.

Paper. 11 × 9⅝ inches. Foll. 12. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Satulūri Kṛṣṇamācāryulugāru of Tanuku, Kistna district.

अलङ्कारमीमांसा.

ALAṄKĀRAMĪMĀṀSĀ.

Foll. 1*a*—11*b*. Fol. 12 is left blank.

A treatise on poetics and rhetoric written probably after the model of the Kāvyaprakāśikā. It criticizes the views expressed by Jagannāthapaṇḍita in his Rasagaṅgādhara in regard to Kāvyalakṣaṇa. The author is Kṛṣṇasūri, son and diciple of Gōpālācārya and grandson of Kṛṣṇasūri of Śāntalūri family.

Breaks off in the second Adhikaraṇa.

Beginning:

विद्यानिबन्धबन्धुरमाद्यं गन्धर्वकन्धरं मन्ये ।
सत्यं ज्ञानमनन्तं त्रयीसुबोधं गुणाधिकाबाधम् ॥
अभिनूत्नपुण्डरीके मौक्तिककान्तिस्तुरङ्गवदनोऽयम् ।
अस्मान् शारदजलधरमृगाङ्कबिम्बायितः पातु ॥
यस्य रराज त्रिवेदी त्रिदण्डशाठ्येन यतिपतेः पुंसः ।
कथयितुमिव तत्त्वरसं तं वन्दे देशिकाधिनाथममुम् ॥
श्रीकृष्णार्यविचक्षणस्समुदभूच्छ्रीशान्तलूर्यन्वये
विज्ञाते भुवने वनीपकचये प्रत्यक्षकल्पद्रुमः ।
यस्त्वाम्नायपरम्परागुरुमणिस्त्रग्गन्धषड्दर्शनी-
कक्षारत्नघुटीविकासविलसद्गीवस्सदा राजते ॥

गोपालार्यसुधीमणिस्समभवत्तस्मान्महाकोविदात्
विज्ञातो विधितत्प्रवर्तितमहाधर्मागमप्रक्रियः ।
वारंवारमशेषदर्शनकथालापैरयं तोषयन्
गोष्ठीषु प्रथिता समान् विहरते यः कोविदान् भूभृताम् ॥
काणादे विकृतिः प्रभाकरगुरौ द्वैतं समुज्जृम्भितं
वीप्सा सत्यवतीसुते परिणतिः प्राभाकरे(नैयायिके) पाणिनेः ।
द्वित्वं साङ्ख्यमुनेर्विकल्पनमिति प्राज्ञैस्त्रिलोके जनैः
गोपालार्यसुधीनरेन्द्र इति हि प्रस्तूयते सन्ततम् ॥
तस्मात्प्रौढप्रभावात् कविजनविदुषां रत्नकोटीरभूतां
गोपालाचार्यवर्यात्कविजनमहतामादिमः कृष्णनामा ।
आविर्भूतो हि यस्य क्षरदमृतझरस्फारशुम्भत्तरङ्ग-
द्राक्षामाधुर्यधुर्यस्सरसरसकरो वाग्विलासो विरा(रे)जे ॥
क्वचालङ्कारश्रीर्दुरधिगमतत्त्वार्थनिवहा
क्वचाहं मन्दात्मा पदविषयभेदेऽप्यनिपुणः ।
तथापि प्रावीण्याद्दरदलितशुभ्राम्बुजवत-
द्धयग्रीवस्फूर्तेर्मम मनसि भीतिर्निवसतु ॥
सिद्धान्तयन् वचांसि प्राञ्चर्वाञ्चि च बलान्निराकुर्वन् ।
सोऽहं तनोमि कुतुकाद्विपुलालङ्कारविषयमीमांसाम् ॥

तत्र तावल्लोके धर्मार्थकाममोक्षाणां मध्ये मोक्षस्य परमपुरुषार्थत्वेन तस्य च कर्मज्ञानभक्तिप्रपत्तिरूपोपायचतुष्टयसाध्यत्वाच्चेषामेकैकस्यैव तत्साधनत्वेन ।

* * * *

तथोक्तं काव्यप्रकाशादौ—

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥

* * * *

तथा च काव्यस्य दृष्टादृष्टफलजनकत्वद्वारावश्यापेक्षितत्वे गुणालङ्कारादिभिर्निरूपणीयस्य तस्येतरव्यावृत्तये तल्लक्षणं तावद्विमृश्यते। यत्तु प्राचीनैरनुगृहीतं लक्षणम् । 'अदोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्य''मिति तत्र शब्द-

स्यैव काव्यत्वे वज्रनिर्घोषादौ समुद्रघोषादौ चातिप्रसङ्गः । अतः अर्थ इति । तावन्मात्रोक्तौ घटपटादावतिव्याप्तिः । अतः उभौ ।

* * * *

यदत्र रसगङ्गाधराख्यसन्दर्भे पण्डितराजजगन्नाथेन दूषितं शब्दार्थयुगलं न काव्यशब्दवाच्यम् ।

End:

तदेवमलङ्कारपरिज्ञानस्य काव्यपरिज्ञानपूर्वकत्वात्काव्यस्वरूपं विमृश्येदानीमलङ्काराः प्राप्तावसरा इति विपुलालङ्कारमीमांसा विरच्यते ।

लक्ष्याणि लक्षणानि च प्राच्येव मया विलिख्यन्ते ।
तेषामपि तु विमर्शं करोमि सिद्धान्तपूर्वपक्षोक्त्या ॥

Colophon:

इति श्रीशान्तलूरिवंशपारावारराकासुधाकरस्यानवद्यचतुर्दशविद्यापरिश्रमस्य गोपालाचार्यसूरेः सूनुना तच्चरणपरिचरणपरायणेन तत्कृपालब्धसंरससाहितीपथेन कृष्णसूरिणा विरचितायामलङ्कारमीमांसायां काव्यस्वरूपविमर्शनं नाम प्रथममधिकरणम् ॥

द्वितीयमधिकरणम्—

यथा वा शरावादिभेदैर्विभिन्ना मृदेका परब्रह्म चैकं सुराद्यैः ।
तथैवोपमैकैव भिन्ना चकास्ते परं भ्रान्तिमद्रूपकाद्यैः प्रभेदैः ॥
कटकमकुटादिभेदैः भिन्नम्.

R. No. **2701.**

Paper. 11 × $9\frac{5}{8}$ inches. Foll. 10. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Ampalakāṭ Karuṇākara Menon, B.A., B.L., Chalapuram, Calicut, Malabar district.

प्रबोधपञ्चदशिका, सव्याख्या.

PRABŌDHAPAÑCADAŚIKĀ WITH COMMENTARY.

A treatise in 15 stanzas on the Káshmīrian Śaivādvaita: by Abhinavagupta. The author of the commentary is Avadhūtamuni. Quotations are cited herein from Trikādarśa which is another work of the commentator.

Complete.

Beginning:

यद्बोधादिदं भाति यद्बोधाद्विनिवर्तते ।
नमस्तस्मै परानन्दवपुषे परमात्मने ॥

अकारादिहकारान्तैरक्षरैः कल्पिताह्वयम् ।
अहमित्यन्तरुद्यन्तमर्चयाम्यखिलेश्वरम् ॥

तैलाक्तकाष्ठलोहानि ज्वलितान्यग्निना यथा ।
तथात्मनेद्धान्यङ्गानि तेजिष्ठानि भवन्तु मे ॥

* * * *

प्रणम्याभिनवं नाथं प्रत्यक्षपरमेश्वरम् ।
प्रबोधपञ्चदशिका तत्प्रणीताद्य चर्च्यते ॥

प्रारिप्सितप्रकरणप्रतिपाद्यमर्थं सहेतुकमाचार्यः प्राक् प्रतिजानीते—

अनस्तमितभारूपस्तेजसां तमसामपि ।
य एकोऽन्तर्यदन्तश्च तेजांसि च तमांसि च ॥

स एव सर्वभावानां स्वभावः परमेश्वरः ।
भावभेदहितस्यैव शक्तिरीश्वरता मयि ॥

प्राक्प्रध्वंसाभावशून्या भा चेतयतिधात्वर्थरूपप्रकारो यस्य स्वरूपापरोक्षं तथाविधः एकः सर्वद्वन्द्वसमुद्भावनशीलतया मुख्यः प्रतिबिम्बिततत्तदवभासत्वेऽपि चित्तस्वीकृतनानातया केवलः यः तेजसां स्वकीयप्रकाशरूपाणां प्रमातृरूपाणां तमसां तदपेक्षात्मसद्भावतया स्वयमसत्कल्पानामप्रमेयाणामन्तरात्मतया वर्तते । तानि च तेजांसि च तमांसि च यदन्तः यस्यात्मतया वर्तते स एव परमेश्वरः ।

* * * *

एतद्विषयं श्रीत्रिकादर्शे मदीयं वचनम् । यथा—

ज्ञानं विमर्शघनमेव हि तत्तदर्थ-
सद्भावमात्रमनुभूयत आत्मविद्भिः ।
ये मामवाप्तसकलात्मतयात्मसिद्धि-
रेकावसात्मनि घटेऽपि च वेद्यमाने (?) ॥ इति

आचार्याभिनवगुप्तैरपि विमृष्टम् ।

End:

अथ प्रकरणस्य प्रयोजनकथनेन समाप्तिं प्रथयति—

सुकुमारमतीन् शिष्यान् प्रबोधयितुमञ्जसा ।
इमेऽभिनवगुप्तेन श्लोकाः पञ्चदशोदिताः ॥

अभिनवेनाकालकलिताहंविमर्शघननया साक्षादपरोक्षतयोपलभ्यमानेन गुप्तेन स्वमरीचिचयनिचोलितदुर्निरीक्षमणिवत् स्वोल्लिखितविश्ववपुष्ट्वगूहितयाथात्म्येनाभिनवगुप्तनाम्ना प्रकरणप्रतिपाद्यवस्तुभूतेन परमेश्वरेण प्रकाशेन इमे व्याख्यातार्थाः पञ्चदश श्लोकाः ।

*   *   *   *

प्रबोधपञ्चदशिका नाथाभिनवनिर्मिता ।
अवधूतेन मुनिना चर्चिता प्राभृतं सताम् ॥

Colophon:

इति प्रबोधपञ्चदशिका संपूर्णा ॥

R. No. **2702.**

Paper. 11 × 9⅝ inches. Foll. 98. Lines, 20 in a page. Telugu. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Vēlūri Sītārāma Śāstrulugāru of Gummapūdi, Bhimavaram taluk.

व्रतवल्लरी.

VRATAVALLARĪ.

Foll. 1*a*—87*a*. Foll. 87*b* and 88 are left blank. Foll. 89*a*—97*a* give the contents of this work. Foll. 97*b* and 98 are left blank.

A treatise explaining the different Vratas to be observed on each of the days of the 12 months of a year beginning with the month of Caitra. The author is Sītārāmasudhī, son of Śivarāmasudhī of Satpiḍavarti family and of Kauṇḍinyagōtra. The author says that he enumerates in the beginning the various works consulted by him and these are underlined in the extract given below.

Deals with the following subjects :—

१. उपोद्घातप्रकरणम्.
२. चैत्रमासव्रतनिर्णयः.
३. वैशाखमासव्रतनिर्णयः.
४. ज्येष्ठमासव्रतनिर्णयः.
५. आषाढमासव्रतनिर्णयः.
६. श्रावणमासव्रतनिर्णयः.
७. भाद्रपदमासव्रतनिर्णयः.
८. आश्वयुजमासव्रतनिर्णयः.
९. कार्तिकमासव्रतनिर्णयः.
१०. मार्गशीर्षमासव्रतनिर्णयः
११. पौषमासव्रतनिर्णयः (incomplete).

Beginning:

श्रीमद्विघ्नेश्वरेशाब्जजहरिगिरिजाभारतीश्रीगुहाद्यान्
देवानर्केन्दुभौमाब्जजगुरुकविकोणागु(मन्दाहि)केतुग्रहांश्च ।
न्यग्रोधाधोवसन्तं सदसि मुनिगणान् क्षोभयन्तं स्वतत्त्वं
साम्बं श्रीशादिवन्द्यं स्फटिकमणिनिभं दक्षिणास्यं नतोऽस्मि ॥

श्रीशाजाद्यखिलामरौघविनुतं विघ्नान्धकारच्छटा-
भानुं भक्तजनावनामरतरुं देवं मतङ्गाननम् ।
देवीं क्षीरसुधेन्दुकुन्दधवलां वाणीं विरिंचिप्रियां
गौरीं शङ्करकामिनीमनुदिनं वन्दे रमामब्धिजाम् ॥

यो देवस्स्फटिकेन्दुसुन्दरतनुः कात्यायनीसेवितो
यं वेदादिगिरोऽधिगन्तुमलसाः प्राप्ता निवृत्तिं धिया ।
यस्याज्ञामधिगत्य विश्वमखिलं व्याप्ताब्धिजानायको
यो वेद्यस्सनकादिमौनिनिवहैर्योगैस्तमीडे शिवम् ॥

आस्ते सत्पिडवर्तिवंशतिलकः कौण्डिन्यगोत्रोद्भवः
सीतारामपदारविन्दमकरन्दास्वादने षट्पदः ।
मार्ताण्डार्यभटार्यसोमविधिवासिष्ठादिसिद्धान्तवित्
सत्पूज्यश्शिवरामसूरिरवनौ सद्धर्मशास्त्रार्थवित् ॥

श्रीमत्सोमपदारविन्दमकरन्दास्वादनात्युत्कटा-
नन्दः सूर्यविधातृजैवशशिवासिष्ठार्यादिभट्टादिवित् ।
सीतारामसुधीस्तनोति निखिलस्मृत्यर्थदुग्धोदधेः
मन्थात्सद्व्रतनिर्णयामरलतां तत्सूनुरत्युज्ज्वलाम् ॥

एवं शिष्टाचारप्राप्तं निर्विघ्नपरिसमाप्तिहेतुकं मङ्गलं विधाय कालमाधव, कालादर्श, निर्णयसिन्धु, कालचन्द्रिका, निर्णयकौमुदी, धर्मप्रवृत्ति, तिथिनिर्णय प्रदीपिका, चन्द्रिका, पृथ्वीचन्द्रोदय, दैवज्ञविलासादीनि यानि व्रतादिनिर्णय-पराणि धर्मशास्त्राणि वर्तन्ते तानि सम्यगालोच्य तेष्वभिहितवचनकदम्बके-नैव व्रतादयो निर्णीयन्ते । यथा लोके दण्डचक्रादिकारणसामग्रीं विना घटादि-कार्यस्यानुत्पत्तिस्तथैव व्रतादिनिर्णयरूपकार्यस्य कारणभूततिथ्यादिनिर्णयं विना-नुपपद्यमानत्वादादौ तिथ्यादिनिर्णयः क्रियते—

* * * *

तिथिस्वरूपम्—तिथिर्नाम वर्धमानानां क्षीयमाणानां चन्द्रकलानामेकांशो ऽवः कालविशेषस्सा तिथिः । तथोक्तं स्मृत्यन्तरे—

रवीन्द्वोर्योगविरहौ क्रमादृर्शश्च पूर्णिमा ।
कलाप्रवेशानिर्याणैस्तिथयोऽन्याश्च पक्षयोः ॥ इति ॥

* * * *

Colophon:

इति श्रीव्रतनिर्णयकल्पवल्ल्यामुपोद्घातप्रकरणं समाप्तम् ॥

End:

इति मार्गशीर्षमासः ॥

Colophon:

पौषशुक्लाष्टमी बुधवारयुता चेन्महारुद्रेति ।

तदुक्तं लैङ्गे—

पौषे मासि यदा देवि शुक्लेऽष्टम्यां बुधो भवेत् ।
तदा तु सा महापुण्या महारुद्रेति कीर्तिता ॥

* * * *

अस्यार्थः । पौषान्तगे भूतदिने दर्शे । पौषान्तगे पौषमासान्तिमे भूतदिने चतुर्दश्यां दर्शे अमायां च मघादिगायां प्रतिपद्यमायां माघस्य माघमासस्य.

R. No. **2703.**

Paper. 11 × 9⅝ inches. Foll. 124. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of Śrī Anujan Kuññuṇṇi Rāja of Paḍijññārekōvilagam, Calicut, Malabar district.

हर्षचरितव्याख्या.
HARṢACARITAVYĀKHYĀ.

A commentary on the Harṣacarita of Bāna which work has been described under No. 12428 of the D.C.S. MSS., Vol. XXI: by Raṅganātha, son of Kṛṣṇārya of Gōṣṭikula. The commentator salutes his Guru Nārāyaṇārya, and the commentary is called Marmāvabōdhinī.

Complete.

Beginning:

जननेन यदोर्वंशं वंशं च वदनेन्दुना ।
पुनानं श्रुतिभिर्गीतं गायन्तं कृष्णमाश्रये ॥
निष्कलङ्कशरच्चन्द्रसहस्रसुदृशयति ।

धियं धिनोतु मे वाचामीश्वरं परमं महः ॥
यद्यावच्च मम ज्ञानं तत्सर्वं यत्प्रसादतः ।
वन्दे नारायणार्यं तं नारायणमिवापरम् ॥
न शक्यमतिगाम्भीर्यात्प्रसन्नमधुरास्वपि ।
ज्ञातुं बाणस्य वाणीषु स्फुटं यावद्विवक्षितम् ॥
तत्रापि हर्षचरितं नानावाग्वृत्तिसंयुतम् ।
विदुषामेव साहित्यनिष्ठानां केवलं पदम् ॥
अतोऽस्य व्याक्रिया गोष्ठीकुलजेन यथामति ।
श्रीरङ्गनाथेन कृता श्रीकृष्णार्यस्य सूनुना ॥
स्पष्टार्थानां प्रदेशानां व्याख्यानं निष्फलं यतः ।
अस्पष्टार्थानि वाक्यानि व्याख्यातानि पदानि च ॥
दर्शयन्त्यप्रसिद्धं यन्नाम व्युत्पत्तिं तथा ।
दुर्बोधाख्यानि या व्याख्या नाम्ना मर्मावबोधिनी ॥
नाम्नामिहाप्रसिद्धानां दृश्यमाननिघण्टुषु ।
अदृष्टानामाप्तवाचो मूलव्याख्याश्च पूर्विकाः ॥
यत्र क्वापि प्रमादान्मे स्खलनं यदि संभवेत् ।
तदुपेक्षितुमर्हन्ति गुणैकग्राहिणो बुधाः ॥
आख्यायिकामिहारिप्सुः प्रथमं वाग्विभूतये ।
श्लोकयन् भारतीं देवीं करोति कविराशिषम् ॥
अविरतशब्दमहौघप्रक्षालितसकलभूतलकलङ्का ।
मुनिभिरुपासिततीर्था सरस्वती हरतु दुरितं वः ॥

अत्र सरस्वती वाणी सरस्वत्याख्या नदी च कथ्यते । तत्र वाणी-पक्षे तावदविरतानां नित्यानां शब्दानां महौघेन महता समूहेन प्रक्षालितः शोधितः सकलभूतलकलङ्कः सकलानां भूतलवासिनां पापं यया दैवी हि वाग्यथावद्विदिता यथावत्प्रयुक्ता च सर्वदुरितापहा सकलकामदुधा भवति । यच्छ्रुतिः "एकः शब्दस्सम्यग् ज्ञातस्सुष्ठु प्रयुक्तस्स्वर्गे लोके कामधुग् भवति" । तथा दण्डिनाप्युक्तम्—

गौर्गौः कामदुघा सम्यक्प्रयुक्ता स्मर्यते बुधैः ॥ इति ॥

*   *   *   *

सम्प्रति प्राक्तनमहाकविकाव्यप्रशंसनमुखेन प्रश्रयमुपदर्शयंस्तेषामिव स्वप्रबन्धस्यापि परिग्रहाय लोकमनुरञ्जयति---कवीनामित्यादिभिरष्टभिः श्लोकैः । दर्पो मदः वासवदत्तया गद्यप्रबन्धविशेषेण कर्णगोचरं श्रोत्रविषयम् ।

* * * *

Colophon :

इति श्रीरङ्गनाथविरचिते हर्षचरितव्याख्याने प्रथम उच्छ्वासः ॥

End :

वेताली पिशाची । ऊरुसम्पुटपिष्टः ऊर्वोः मध्येन पिष्टः अधिपतिरर्णसां समुद्रः । मुक्ताशैलचषकः मुक्ताशिलामयश्चषकः । मुद्रानिवेशो मुद्रासन्निवेशः । आयत्या उत्तरकालेन । एतेनोत्तरकालभाविनी सम्पल्लक्ष्यते । श्वेतभानुश्चन्द्रः ॥

Colophon :

इति श्रीरङ्गनाथविरचिते हर्षचरितव्याख्याने अष्टम उच्छ्वासस्समाप्तः ॥

R. No. 2704.

Paper. 11 × 9⅝ inches. Foll. 392. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Vāsireḍḍi Candramaulīśvaraprasād Bahadur of Muktyala, Kistna district.

Bound in two volumes.

सह्याद्रिखण्डः (स्कान्द).

SAHYĀDRIKHAṆḌAḤ (SKĀNDA).

Same work as that described under No. 2287 of the D.C.S. MSS., Vol. IV.

Contains the Pūrvabhāga of the Sahyādrikhaṇḍa in the Sanatkumārasaṁhitā. Although this portion contains 109 Adhyāyas on the whole, the subject-matter is not given in the colophons of many of these Adhyāyas.

Deals with the following subjects:—

१–३.

४. तमोऽसुरवधः.

५–३७.

३८. ताम्रगौर्युत्पत्तिवर्णनम्.

३९. ताम्रगौरीमाहात्म्यम्.

४०.

४१. पितृस्थालीमहिमा.

४२. साविञ्युत्पत्तिः.

४३. नागतीर्थवर्णनम्.

४४–४६.

४७. विश्वामित्रोत्पत्तिः.

४८–५०.

Beginning:

ओङ्कारनिलयं देवं परब्रह्मप्रकाशकम् ।
गजवक्रं महात्मानं वन्दे वाञ्छितसिद्धये ॥
पुरा हिमवतः पार्श्वे केदारं समुपाश्रिताः ।
ज्ञानविज्ञानसम्पन्नास्ततः क्षीणाघसञ्चयाः ॥

* * * *

इत्येवं वर्तमानानां मुनीनां भावितात्मनाम् ।
पुराणश्रवणे बुद्धिरासीत्तत्र महात्मनाम् ॥
संभूयामन्त्रयाञ्चक्रुः सर्वे सिद्धमहर्षयः ।
को वेत्ति च पुराणानि सेतिहासानि कृत्स्नशः ॥

* * * *

एतच्चान्यच्च बहुशः श्रुत्वा वै शौनको मुनिः ॥
उत्थाय तानृषीन् सर्वान् निवार्य मुनिसत्तमः ।
ऊर्ध्वबाहुरुवाचेदं सम्यक्तत्त्वार्थबृंहितम् ॥

Colophon:

इत्यादिमहापुराणे स्कान्दे सनत्कुमारसंहितायां सह्याद्रिखण्डे प्रथमोऽध्यायः ॥

शौनकः—

श्रृण्वन्तु मुनयस्सर्वे महावाक्यं शिवचोदितम् ।
शिवभक्तिमतां नित्यमस्माकं दुर्लभं किमु ॥

* * * *

पुरा तु पार्वते कल्पे तमो नाम महासुरः ।
त्रैलोक्यं तापयामास तदा वै लोककण्टकः ॥
* * * *
तस्माद्धेदं हर क्षिप्रं मा विलम्बितुमर्हसि ।
काश्चयां विधिर्वेदसङ्घान् भूत्वा तपति मानवान् ॥
घोरस्तुघोरवद्गर्जन् प्राप्य तन्निकटं तदा ॥

End:

श्रुत्वा वै सर्वपापेभ्यो मुच्यते जन्मबन्धनात् ।
गोभूहिरण्यदानाद्यैः पुत्रमित्रादिभिर्धनैः ॥
इह लोके सुखं प्राप्य संसाराब्धेः प्रमुच्यते ।
एतत्सकृत्पठेद्धीमान् शृणुयाद्भक्तिपूर्वकम् ॥
विमुक्तस्सर्वपापेभ्यो याति ब्रह्म सनातनम् ।
सत्यं सत्यं पुनस्सत्यमुद्धृत्य भुजमुच्यते ॥

Colophon:

इत्यादिमहापुराणे स्कान्दे सनत्कुमारसंहितायां सह्याद्रिखण्डे पूर्वभागे नवोत्तरशततमोऽध्यायः ॥ पूर्वभागस्समाप्तः ॥

R. No. **2705.**

Paper. 11 × 9¾ inches. Foll. 52. Lines, 20 in a page. Dēvanāgarī and Malayalam. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Ampalakāṭ Karuṇākara Menon, B.A., B.L., Chalapuram, Calicut, Malabar district.

सहस्रयोगः, केरलव्याख्यासहितः.

SAHASRAYŌGAḤ WITH MALAYALAM MEANING.

Foll. 1*a*—52*a*. Fol. 52*b* is left blank.

Similar to the work described under No. 13110 of the D.C.S. MSS., Vol. XXIII. Foll. 42*b*—52*a* contain in Malayalam language the treatment for fever.

Complete.

Beginning:

घनचन्दनशुण्ठ्यम्बुपर्पटोशीरसाधितम् ।
शीतं तेभ्यो हितं तोयं पाचनं तृड्ज्वरापहम् ॥
* * * *

तोयतोयदभूनिम्बपाठाधान्यमहौषधैः ।
कृतः कषायस्सर्वेषां ज्वराणां पाचनः परम् ॥

* * * *

पाठाग्निमन्थबृहतीद्वयनागराणां छिन्नोद्भवामगधमूलकलिङ्गकानाम् ।
वाशामृताम्बुदपटोलमहौषधानां क्वाथं पिबेदिह गरुत्प्रभवे ज्वरे तु ॥

End:

दार्वीकिरामधुकमम्भसि नालिकेरे पक्त्वाष्टभागपरिशिष्टरसं पुनस्तत् ।
सान्द्रं विपाच्य शशिसैन्धवमाक्षिकाढ्यां युञ्ज्याद्दृगार्मतिमिरादिषु पित्तजेषु ॥

R. No. 2706.

Paper. 11 × 9⅝ inches. Foll. 28. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Śātalūri Śōbhanādri Ācāryulugāru of Tanuku, Kistna district.

व्यावहारिकसत्यत्वखण्डनम्.

VYĀVAHĀRIKASATYATVAKHAṆḌANAM.

Foll. 1*a*—28*a*. Fol. 28*b* contains the name of the owner of the MS. from which this was copied.

By Varadācārya. Same work as that described under R. No. 1364(*a*) ante, but with slight difference in the beginning.

Breaks off in the Pramāṇānupapatti.

R. No. 2707.

Paper. 11 × 9⅝ inches. Foll. 46. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippāḍ, Nareri, Tritala, Malabar district.

कुमारसंभवव्याख्या.

KUMĀRASAMBHAVAVYĀKHYĀ.

Foll. 1*a*—45*a*. Foll. 45*b* and 46 are left blank.

A commentary on the Kumārasaṁbhava of Kālidāsa which poem has been described under No. 11494 of the D.C.S. MSS., Vol. XX: by Dakṣiṇāvarta. The commentary is called Dīpikā.

The following is a list of the works and authors quoted in the commentary :—

Raghuvaṁśa.
Buddhapata.
Bhōjarāja.
Amara.

Abhinavagupta.
Bharata.
Yādava.
Brahmāṇḍapurāṇa.
Manu.
Halāyudha.
Mēghasandēśa.
Kēśava.
Āśvalāyana.
Vāsiṣṭha.
Yōgasāra.
Daśarūpaka.
Yājñavalkyasmṛti.
Upasargavṛtti.
Subōdha.
Hōrāśāstra.
Prayōgavṛtti.

Breaks off in the eighth Sarga.

Beginning:

नमः कुमाराय पुरातनानां बालाय विद्यागुरवे गुरूणाम् ।
कविस्तु नालं किल कालिदासो यत्सम्भवं वक्तुमभूदशेषम् ॥

. . . . कठायन . . . स्तु वंशे सा दीपिका दर्शितसर्वभागा ।
स दक्षिणावर्तपतिर्ददाति दीपं कुमारस्य च संभवाय ॥

अत्र प्रबन्धमुखलक्षणेषु वस्तुनिर्देशः क्रियते --अस्तीत्यादिना --उत्तरस्यां दिशीत्यनेन हिमवतो देवभूम्येकदेशत्वमुक्तम् । वक्ष्यति । पितुः प्रदेशास्तव देवभूय इति । देवतात्मा देवतैव आत्मा अधिष्ठाता यस्य सः ।

* * * *

Colophon:

इति दक्षिणावर्तविरचितायां कुमारसंभवदीपिकायां प्रथमस्समाप्तः ॥

End:

Colophon:

इति दक्षिणावर्तविरचितायां कुमारसंभवदीपिकायां सप्तमस्सर्गः ॥

पाणिपीडनविधेरिति, पाणिग्रहणविधेः । भावसाध्वसपरिग्रहात् रत्याख्यभावस्य साध्वसस्य च परिग्रहात् ।

* * * *

सत्वज इति स्पष्टः । भावेति । भावो लीलात्मिका चेष्टा भूत्यभिप्रायजन्तुष्विति यादवः । तामात स्पष्टः । शिष्यतामिति । अनेन प्रतिकृतलाभ उक्तः । दष्टमिति । अनेन विस्रम्भातिशय उक्तः ।

R. No. 2708.

Paper. 11 × 9⅝ inches. Foll. 497. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Kañcibhaṭla Umāmahēśvara Śāstrigāru of Pithapuram, Godavari district.

Bound in three volumes.

कालचन्द्रिका.

KĀLACANDRIKĀ.

Foll. 1*a*—494*a*. Fol. 494*b* is left blank. Foll. 495—497*a* give the contents of the work. Fol. 497*b* is left blank.

Same work as that described under No. 3103 of the D.C.S. MSS., Vol. VI. By Sītārāmacandra of Miṭṭapalli family, whose genealogy is given thus—

Pēddibhaṭṭa of Kauṇḍinyagōtra
|
Nṛsiṁha
|
Dharmābhaṭṭa = Kāmākṣī
|
Sītārāmacandra.

Complete.

Deals with the following topics :—

१. सौरादिसंवत्सरनिर्णयः.
२. अयननिर्णयः.
३. ऋतुनिर्णयः.
४. मासनिर्णयः.
५. शुद्धमासनिर्णयः.
६. अधिकक्षयमासनिर्णयः.
७. पक्षनिर्णयः.
८. तिथ्युत्पत्तिः.
९. तिथिवेधप्रकरणम्.
१०. खण्डाखण्डतिथिनिर्णयः.
११. एकभक्तादिनिर्णयः.
१२. चैत्रशुक्लप्रतिपन्निर्णयः.
१३. भाद्रपदशुक्लप्रतिपन्निर्णयः.
१४. आश्विनशुक्लनवमीनिर्णयः.
१५. नवरात्रिषु देवीपूजाविधानम्.
१६ लोहाभिसारिककर्मविधानम्.
१७. शतचण्डीविधानम्.
१८. सहस्रचण्डीविधानम्.
१९. नवरात्रिपारायणनिर्णयः.
२०. नवरात्रिषु देवीपूजाप्रयोगः.
२१. प्रतिपन्निर्णयः.
२२. सर्वद्वितीयानिर्णयः.
२३. तृतीयानिर्णयः.
२४. चतुर्थीनिर्णयः.
२५. पञ्चमीनिर्णयः.
२६. षष्ठीनिर्णयः.
२७. सप्तमीनिर्णयः.

२८. जन्माष्टमीजयन्तीनिर्णयः.
२९. अष्टमीनिर्णयः.
३०. नवमीनिर्णयः.
३१. दशमीनिर्णयः.
३२. एकादशीनिर्णयः.
३३. द्वादशीनिर्णयः.
३४. त्रयोदशीनिर्णयः.
३५ नरकचतुर्दशीदीपावल्यादिनिर्णयः.
३६. शिवरात्रिनिर्णयः.
३७. चतुर्दशीनिर्णयः.
३८. पौर्णमासीनिर्णयः.
३९. व्रतविषयामावास्यानिर्णयः.
४०. इष्टिकालनिर्णयः.
४१. आग्रयणनिर्णयः.
४२. षण्णवतिश्राद्धप्रकरणे अमावास्याश्राद्धकालनिर्णयः.
४३. मन्वादियुगादिश्राद्धकालनिर्णयः.
४४. सङ्क्रान्तिनिर्णयः.
४५. वैधृतिव्यतीपातनिर्णयः.
४६. महालयश्राद्धनिर्णयः.
४७. अष्टकाश्राद्धकालनिर्णयः.
४८. प्रत्याब्दिकश्राद्धकालनिर्णयः.
४९. वृद्धिश्राद्धनिर्णयः.
५०. ग्रहणनिर्णयः.
५१. समुद्रस्नाननदीरजोनिर्णयः.
५२. अलभ्ययोगप्रकरणम्.

Beginning:

वागीशाद्यास्सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्यास्स्युरतं नमामि गजाननम् ॥
यन्निर्धारणभीरवः श्रुतिशिरस्सङ्घा अभूवन् जग-
ज्जन्मस्थानविरामकारणमभूद्यस्स्वप्रकाशं परम् ।
यत्सत्स्वान्तसरोरुहोदरचरप्रालम्बिभूतं हि तत्
वन्देऽहं तदचिन्त्यवैभवमहं रामाभिरामं महः ॥

* * * *

वन्दे यच्छिवबीजमोहानिधनध्वान्तप्रभातांशुम-
त्सङ्काशं निगमान्तवाक्यजनितब्रह्मैक्यबोधास्पदम् ।
भक्ताभीष्टफलप्रदं सुखमितां निर्वाणमार्गप्रदं
तत्कृष्णेन्द्रगुरूत्तमाङ्घ्रिकमलं चेतोविशुद्ध्यै सदा ॥
वाल्मीक्यत्रिवसिष्ठगौतमशुकापस्तम्बबोधायन-
व्यासागस्त्यपुरस्सरानृषिगणानन्यांश्च दिव्यानृषीन् ।

यन्नामस्मृतिमात्रतो ह्यविरतं विद्वन्मनोरञ्जिनी
सिध्येत्सत्कवितास्तुतिस्सुनियतस्वान्तो भजे तान् सदा ॥
श्रीमत्कौण्डिन्यगोत्रप्रथितपृथुयशा मिट्टपल्यन्ववाये
सञ्जातः पेद्दिभट्टो हरिपदकमलाराधनैकाग्रचित्तः ।
जातस्तस्मान्नृसिंहः प्रविमलधिषणो योगशास्त्रे च तन्त्रे
काणादे चाक्षपादाद्यहिपतिवचनब्रह्मकर्मार्थकेषु ॥
विद्वान् सर्वागमज्ञो विरचितहरितुष्ट्यर्पितावारधीत-
श्रौतस्मार्तैकनिष्ठस्सकलनिगमवाक्योदितार्थावबोधः ।
तस्माज्जातो नृसिंहो(हात्)निखिलगुणगणख्यातकीर्तिस्स विद्वान्
श्रीधर्माभट्टनामा सकलमुनिकृतग्रन्थसारामृताशी ॥
कामाक्षीगर्भसिन्धौ तत उदयमगादागमाचारनिष्ठः
श्रीसीतारामचन्द्रः स्मृतिनिगमपुराणेतिहासावबोद्धा ।
कालस्याद्यन्त . . . . खिलभुवनाधारकश्चेश्वरोऽयं
तस्मात्तन्निर्णयं सन्मुनिमतमखिलं प्रारभे संप्रवक्तुम् ॥
निखिलग्रन्थसन्दोहमालोड्याहं प्रयत्नतः ।
ततस्सारं समुद्धृत्य हृदये तं निधाय च ॥
कालनिर्णयसन्देहनमस्सन्दोहयापिनीम् ।
श्रुतिमार्गानुगां सम्यक् कालणिर्नयचन्द्रिकाम् ॥
यत्र क्वाप्यर्थवैयर्थ्यं भवेद्यदि मनीषिभिः ।
विचार्य शोध्यतां तत्र सम्यङ्निर्णयवेदिभिः ॥

* * * *

अनादिरेव भगवान् कालोऽनन्तोऽजरः परः ।
सर्वगत्वात्स्वतन्त्रत्वात्सर्वात्मत्वान्महेश्वरः ॥

* * * *

कूर्मपुराणविष्णुधर्मोत्तरविष्णुपुराणादिषु कालस्य नित्यत्वाभिधानात्कथं कालनिर्णयः क्रियते । मैवम्—लोकव्यवहारार्थं निमेषाद्युपाधिभेदेन नित्यस्याप्यनित्यत्वव्यवहारात् । अत एव स्मर्यते—

उपाधिभेदादेकोऽपि भवेत्कालोऽप्यनेकधा ।
उपाधयो निमेषादिवत्सरान्ताः प्रकीर्तिताः ॥ इति ॥

स्कान्देऽपि—

एकोऽप्यनेको यः कालस्स्यादुपाधिप्रभेदतः ।
उपाधयस्तु विज्ञेयास्त्रुट्याद्या व्यावहारिकाः ॥ इति ।

व्यावहारिकव्यवहारार्थमुत्पन्नास्त्रुट्याद्याः कालभेदा उपाधय इति विज्ञेयाः । एतदुपाधिभेदादेव कालो नित्योऽप्यनित्यव्यवहारस्स्यादित्यर्थः । तैत्तिरीयकश्रुतावपि निमेषादिभेदेनैव व्यावहारिककालोत्पत्तिरभिधीयते । सर्वे निमेषा जज्ञिरे विद्युतः ।

* * * *

Colophon :

इति श्रीमिट्टपल्लिसीतारामसूरिविरचितायां कालचन्द्रिकायां सौरादिसंवत्सरनिर्णयः ॥

End :

तथा च वृद्धगार्ग्यः—

अलभ्ययोगवारर्क्षे केवलं विहितं व्रतम् ।
तदृक्षवारयोगे च कुर्यान्नैवापरस्तिथौ ॥ इति ।

अत्रालभ्ययोगेषु मूढदोषो नास्ति ।

तथाच स्मृत्यन्तरम्—

ग्रहणालभ्ययोगेषु चातुर्मास्यव्रतेषु च ।
श्रीशैले च गयाक्षेत्रे मूढदोषो न विद्यते ॥

इत्यलं भूयसा ।

शोधयन्तु प्रबन्धेऽस्मिन् गुणदोषान् मनीषिणः ।
अधिकारो हि हंसानां क्षीरनीरविवेचने ॥

Colophon :

इति श्रीमिट्टपल्लि सीतारामसूरिविरचितायां कालचन्द्रिकायामलभ्ययोगप्रकरणम् ॥

मिट्टपल्ल्यन्वयाब्धीन्दुसीतारामविपश्चिता ।
जयत्वाचन्द्रतारार्कं निर्मिता कालचन्द्रिका ॥
श्रीरामानुग्रहेणेयं विद्वज्जनमनोहरा ।
चन्द्रिका रचिता सम्यक्सर्वकालप्रकाशिका ॥

श्रीमिट्टपल्लिकुलकैरवचन्द्रसीतारामेण रामपदपङ्कजषट्पदेन ।
याकारि कालपदपूर्विकचन्द्रिकां तां विद्वच्चकोरनिकराः परिशीलयन्तु ॥

Colophon :

श्रीकालचन्द्रिका समाप्ता ॥

R. No. 2709.

Paper. 11 × 9⅜ inches. Foll. 394. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918–19 from the MS. of M.R.Ry. Tiru Śrīnivāsavarada Tātācāriyar of Villiyambākkam, Chingleput district.

Bound in two volumes.

तत्त्वचिन्तामणिदीधितिरहस्यम्.

TATTVACINTĀMAṆIDĪDHITIRAHASYAM.

By Mathurānātha. Same work as that described under R. No. 1827 ante.

Contains the Saṅgati and the Anumiti.

Beginning :

कुञ्चिताधरपुटेन पूरयन् वंशिकां प्रचलदङ्गुलित्रयम् ।
मोहयन्नखिलवामलोचनाः पातु कोऽपि नवनीरदच्छविः ॥
जगद्गुरोः श्रीरामचन्द्रस्य चरणौ मूर्ध्नि धारयन् ।
तत्सुतो मथुरानाथो दीधितिं स्फुटयत्ययम् ॥

निर्विघ्नं यथा तथा चिकीर्षितग्रन्थसमाप्तिकामनया कृतं भगवन्नमस्कारात्मकं मङ्गलं शिष्यशिक्षार्थमादौ निबध्नाति—ओं नम इति । परमात्मने नमः । अत्र परत्वमुत्कृष्टत्वम् । तच्च सर्वदर्शित्वजगदाराध्यत्वादिकमेव । आत्मपदं तु कृपावदर्थकं नत्वात्मत्वजातिविशिष्टपरम्, समवायिकारणतावच्छेदकत्वेन सिद्धाया आत्मत्वजातेर्भगवदात्मनि मानाभावात् ।

* * * *

आकाशे भूतपदव्यवहारस्तु बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वनिबन्धनो भाक्तः । यदेव भूतत्वं तदेव मूर्तत्वमिति पदार्थखण्डनेऽभिधानात् । शक्त्या भूतपदात् जातिविशेषप्रकारक एव बोधः । बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वप्रकारकबोधस्तु लक्षणयेति शिरोमणेरपि संमतत्वात् ।

* * * *

अनुमाननिरूपणे कर्तव्ये सङ्गतिप्रदर्शनपूर्वकनिरूपणप्रतिज्ञायाः प्रकृतानुपयोगित्वादर्थान्तरतेत्याशङ्कां परिजिहीर्षुस्तादृशप्रतिज्ञायाः प्रकृतोपयोगितां प्रतिपादयति—पूर्वेति ।

End:

घ्राणग्राह्यगुणसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वापेक्षया गुरुत्वेन तदवच्छिन्नान्योन्याभावाप्रसिद्धेरिति सङ्क्षेपः ॥

R. No. 2710.

Paper. 11 × 9⅜ inches. Foll. 134. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Ampalakāṭ Karuṇākara Menon, B.A., B.L., Chalapuram, Malabar district.

प्रक्रियासर्वस्वव्याख्या.

PRAKRIYĀSARVASVAVYĀKHYĀ.

Foll. 1*a*—133*b*. Fol. 134 is left blank.

A commentary on the Prakriyāsarvasva, which is a grammatical treatise written by Nārāyaṇabhaṭṭa, son of Mātṛdatta and disciple of Acyuta, under the patronage of Dēvanārāyaṇa, king of the country lying on the river Ambara. It is stated that the text was begun on 1723201st day of the Kaliyuga and completed on 1723261st day, i.e., at the end of two months. The name of the commentator is not given, but he quotes the following works and authors:—Laghuśabdaratna, Kaustubha, Padamañjarī, Kāśikā, Nyāsa, Manōramā, Kaiyaṭa, Śēkhara, Śabdakaumudī, Sahasranāmavyākhyā, Tattvabōdhinī, Ṭīkāsarvasva, Murāri, Vāsavadattā, Mādhava, Nīlakaṇṭhadīkṣita, Rāmabhadradīkṣita, Vaidyanātha, Kṣīrasvāmin, Śrīharṣa.

Contains the Saṁhitākhaṇḍa complete and the Kṛt incomplete.

Deals with the following topics:—

१. संज्ञापरिभाषानिरूपणम्.
२. तुक्सन्धिः.
३. सुट्सन्धिः.
४. प्लुतसन्धिः.
५. प्रकृतिसन्धिः.
६. हल्सन्धिः.
७. विसर्गसन्धिः.
संहिताखण्डः.
कृत्प्रकरणम्.

Beginning:

चारणोद्गीतचरितं दारणं विघ्नभूभृताम् ।
कारणं जगतामेकं वारणास्यमुपास्महे ॥
पश्यन्त्यादिस्वरूपा पदकमलजुषामान्तरध्वान्तहन्त्री
वीणाकोणाभिरामा दिवि दिविजकुलैस्स्तूयमानापदाना ।

देवी देवासुरालीमकुटतटमणीराजिनीराजिताङ्घ्रिः
कल्या कल्याणदा मे सततमुरुकृपा मानसे लालसीतु ॥
मुनित्रयपदाम्भोजपरागपटली मम ।
विमलीकुरुताच्चेतोमुकुरं मुहुरञ्जसा ॥
नत्वा श्रीगुरुपादाब्जं स्मृत्वा स्मृत्वा च तद्गिरः ।
प्रक्रियापूर्वसर्वस्वव्याख्यास्माभिर्विलिख्यते ॥

अथ ग्रन्थकारः प्रारिप्सितग्रन्थस्य निर्विघ्नपरिसमाप्तये कृतं शिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकं श्रीमन्नारायणस्मरणलक्षणं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्नाति—रासविलासेति । यूयं मुरारेः मनोरमं रूपं स्मरतेति सम्बन्धः । यूयमित्येतद्ग्रन्थे व्याख्यातारोऽध्येतारश्च विवक्षिताः । कीदृशं रूपम् ।

* * * *

इदानीं प्रयोजककर्तुः कीर्त्यनुवृत्तये तस्य ग्रन्थनिर्माणकौशल्याद्युपदेष्टृतया तत्र प्रेक्षावत्प्रवृत्त्युपपत्तये च तं वर्णयति—तिष्ठतीत्यादिना । सोऽयं देवनारायणधरणीपतिः भातीति सम्बन्धः । देवनारायण इत्यम्बरनदीजनपदेश्वरस्य संज्ञा । स च जात्या भूदेवः भाति शोभते ।

* * * *

तस्य प्रकृतोपयोगित्वं दर्शयति—सोऽथेति । अथ कदाचन स राजा स्वस्य गुणैः शौर्यौदार्यादिभिः कर्तरि तृतीया । आकृष्य स्वसमीपं प्रापितम् । यद्वा स्वगुणैरिति करणे तृतीया । स्वस्य गुणैरेव गुणैः सूत्रैराकृष्य । अत्र पक्षेऽतीतमित्यत्र प्रयोजककर्तृत्वं राज्ञ एव स्वगुणश्रवणजनितदिदृक्षया स्वसमीपमागतमित्यर्थः । मातृदत्त इति पितुर्नाम तस्य सूनुं सुतं नारायणनामकं भूसुरमशिषत् । नियुक्तवान् । सर्तिशास्तीत्यङ् ।

* * * *

रूपावतारे रूपावतारग्रन्थे । कौमुद्यादिषु प्रक्रियाकौमुदीप्रभृतिषु च । अत्र व्याकरणग्रन्थेषु । पुनश्शब्दो विशेषे । अखिलं सूत्रं नास्त्येव यतस्तस्माद्धेतोः । अत्र सूत्रम् अत्रत्यसूत्रम् । व्याकरणसूत्रमिति नीलकण्ठदीक्षिताः । त्वया वा नीत्या सम्यग्रूपप्रतिपादनेन समस्तैस्सूत्रैश्च सहितं स्पष्टं स्पष्टार्थं मितं विस्तारशून्यं प्रक्रियासर्वस्वनामकमिदं बुद्ध्या कल्पितं निबन्धनं ग्रन्थः मदुक्तमार्गेण कार्यं कर्तव्यमित्यर्थः । विधौ ण्यत् । उक्तमार्गमेवाह—इह संज्ञेतिद्वाभ्याम् । इह चिकीर्षिते ग्रन्थे । इत्यनेन प्रकारेण विंशतिः खण्डास्स-

न्त्विति सम्बन्धः । तदेवाह—संज्ञेत्यादिना । सर्वोपजीव्यत्वादादौ संज्ञाया निरूपणम् । संज्ञोपजीवकत्वादितरोपजीव्यत्वाच्चानन्तरं परिभाषायाः । तथैवानन्तरं सन्धेः । ततस्सुप्तिङन्तमिति सूत्रे श्रुतक्रमानुरोधात् ।

* * * *

एवं देवनारायणाश्रयादसाध्यवस्तुन्यपि प्रवृत्तत्वानित्यर्थः । उपमयासहायस्यास्यासाध्यत्वप्रयुक्तः प्रवृत्तिप्रतिबन्धो नेति द्योत्यते । इदानीं ग्रन्थकारः स्वप्रक्रियाग्रन्थस्य साफल्यं प्रार्थयते—अयमित्यादिना । अयं ग्रन्थनिर्माणरूपो यत्नः अद्य अच्युताख्यस्य गुरोः कृपया पाणिनिकात्यायनपतञ्जलीनां करुणया च हेतुना फलप्रसूः फलजनकः निर्विघ्नपरिसमाप्तिप्रचयगमनादिरूपफलजनकः स्यादिति प्रार्थनायां लिङ् । कीदृशो यत्नः शब्दमार्गजुषां कृतरागरसः शब्दशास्त्रपरिशीलनशालिनां राग एव रसः रागरसः । रागः इच्छा । कृतः रागरसो यत्र । सर्वशाब्दिकाभिलषणीय इत्यर्थः । अत्र यत्नः फलप्रसूः स्यादिति ग्रन्थारम्भदिने कलिसङ्ख्या कृतरागरसोद्येति ग्रन्थनिर्माणावसानदिने च कलिसङ्ख्येत्यवगन्तव्यम् । इदानीमेतच्छास्त्रप्रवृत्तेः प्रत्याहारमूलकत्वेनोपजीव्यत्वादादौ महेश्वरप्रोक्तचतुर्दशसूत्राणां निरूपणमुचितमिति प्रतिजानीते—इहेति । तत्सूत्राणि । प्रत्याहारसूत्राणि । अइउण् ।

संज्ञासूत्रमिदम् । आदिरन्त्येनेत्यनेन सहैकवाक्यत्वादइउणित्येषामादिरकारः अन्त्येन णकारेण सहितस्सन्नाद्यन्ताभ्यामाक्षिप्तानां मध्यगानां स्वस्य च संज्ञेति हि वाक्यार्थः । एवमुत्तरत्रापि ॥

* * * *

Colophon:

इति संज्ञापरिभाषयोर्निरूपणम् ।

End:

Colophon:

इति संहिताखण्डः ।

संहितैकपदे नित्येति । इयं प्राचां परिभाषा । एकदेशानुमितिद्वारा संहिताधिकारेणैव सूत्रकारेण ज्ञापिता । असंहितायां यणादिनिवृत्त्यर्थो हि संहिताधिकार इति ।

* * * *

इदानीं संहितानिरूपणानन्तरं कृतां निरूपणे सङ्गतिमाह—अथेति ।

अथ संहितानिरूपणानन्तरं कृदादयस्तावत् कथ्यन्त इत्यन्वयः । तत्र हेतुस्सुपामित्यादि ।

*　　*　　*　　*

खकारो मुमर्थः प्रत्ययान्तरकरणमुत्तरार्थम् । द्विषन्तप इत्यत्र ह्रस्वणिलोपौ यथा स्यातां शप् च माभूदिति ।

R. No. **2711.**

Paper. 11 × 9⅝ inches. Foll. 16. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of Raja of the Chirakkal, Malabar district.

त्रिपुरदहनव्याख्या.

TRIPURADAHANAVYĀKHYĀ.

Foll. 1*a*—16*a*. Fol. 16*b* is left blank.

A commentary entitled Padārthadīpinī on the Tripuradahana which poem is described under R. No. 1852(*a*) ante. The author of the text is Vāsudēvakavi. The commentator is the son of Nityapriya.

Breaks off in the second Āśvāsa.

Beginning:

भजामि गोकर्णनिवासमीशं भुजङ्गभोगाभरणाभिरामम् ।
वहन्तमर्धेन तनोर्भवानीं महाबलं बालमृगाङ्कमौलिम् ॥
विचित्रवर्णाभरणाव(दा)ता विधातृवक्त्राम्बुजराजहंसी ।
सदा मदीये रसनाग्ररङ्गे सरस्वती नृत्यतु नर्तकी च ॥
नन्नम्ये गणनायकं त्रिजगतीसम्पत्तिकल्पद्रुमं
प्रत्यूहार्तिनिवृत्तये सिततनुं कारुण्यपारावरम् ।
यत्कारुण्यकटाक्षवीक्षणमृते सृष्टेर्गुरूणामपि
प्रारम्भा विफला भवन्ति सकलास्तं देवताराधितम् ॥
समस्तदुस्तार्किकहस्तिसिंहो मोहान्धकारग्रहवासरेशः ।
विद्यालतालम्बनकल्पवृक्षो व्यासोऽवताद्वः श्रुतिकैरवेन्दुः ॥
पुरदहनाङ्घ्रि नत्वा क्रियुते(कुरुते) नित्यप्रियाख्यमुनितनयः ।
टीकां परा(दा)र्थदीपिन्याख्यां पुरदहननामयमकस्य ।

प्रारिप्सितग्रन्थस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरम्परा-

परिप्रापितकर्तव्यभावमाशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्यालङ्कारिकैरुक्तं वस्तुनिर्देशरूपमङ्गलं करोति—वपुरित्यादिश्लोकत्रयेण ।

वपुः, अतिगौरच्छायम्, जयति, विभोः, अभिदधाति, गौः, अच्छायम्, विषकटुका, येन, अहिश्रेणी, भूषणम्, इव, स्वकाये, अनाहि । इति पदच्छेदः । तत्रैकाक्षरयोजना । विभोरीश्वरस्य वपुः शरीरं जयति । सर्वस्मादुत्कृष्टतया वर्तते । कीदृशं वपुरित्याकाङ्क्षायां विशिनष्टि । अतिगौरच्छायमातश्वेतकान्तीत्यर्थः । "गौरः श्वेतेऽरुणे पीते विशुद्धे धवलेऽप्यथ" इति । छाया स्यादातपाभावे प्रतिबिम्बार्कयोषितोः । अथवा प्रकृष्टः श्वेतबहुलमित्यर्थः । प्रकर्षे बहुलेऽप्यतीति महेश्वरः । छायाबाहुल्येति साक्षिनन्दनः ।

* * * *

End:

Colophon:

इति त्रिपुरदहनव्याख्यायां प्रथम आश्वासः ॥

एवं त्रिपुरवासिभिः दैत्यजनैः पराभूताः देवाः किमकुर्वत इत्यपेक्षायामाह । अथेति । "शिवो महेश्वरश्चैव रुद्रः पशुपति . . । संसारवैद्यस्सर्वज्ञश्शङ्करः शम्भुरव्ययः" ॥ नाम . . . . . अन्ये ।

R. No. 2712.

Paper. 11 × 9⅝ inches. Foll. 10. Lines, 20 in a page. Telugu. Good.

Prepared in 1918-19.

मीमांसानयविवेकदीपिका.

MĪMĀṀSĀNAYAVIVĒKADĪPIKĀ.

Foll. 1*a*—9*a*. Foll. 9*b*—10 are left blank.

Contains the variations in reading of the MS. described under R. No. 1552 ante as compared with the MS. of M.R.Ry. B. Sītārāma Śāstrigāru of Palli, Godavari district.

R. No. 2713.

Paper. 11 × 9⅝ inches. Foll. 613. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Sikha Pullayagāru, Viśvēśvara Agrahāram, Amalapuram, Godavari district.

Bound in four volumes.

Foll. 433*b*—434 and 612 are left blank.

तन्त्ररत्नम्.

TANTRARATNAM.

A commentary by Pārthasārathimiśra on the Ṭupṭīkā of Bhaṭṭakumārila.

Complete, i.e., Adhyāyas 4 to 12.

Beginning:

(सू) अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा ॥

पूर्वाध्याये शेषपर्यायमैदमर्थ्यमेव चिन्तितम् । इहापि क्रतुपुरुषैदमर्थ्यमेव चिन्त्यत इति न लक्षणभेदस्स्यादत आह—तृतीयेनाध्यायेनावधृते शेषत्वे कः क्रत्वर्थः कः पुरुषार्थ इति चिन्त्यत इति सम्बन्धः। एतदेव विवृणोति—विशेषश्चिन्त्यते पूर्वमवधृते सामान्ये। यथा सप्तमेन सामान्यातिदेशे सिद्धे अष्टमेन विशेषातिदेशश्चिन्त्यते, एवमिहापि सामान्यविशेषविषयत्वेन लक्षणभेदः । तदिदमेकदेशिमतं निराकरोति—अथवेति । पूर्वव्यावृत्तौ अथवाशब्दः । न हि सामान्यविशेषभेदेन लक्षणभेदस्संभवति, पूर्वत्रापि विशेषविचारात्। कर्माण्यपि जैमिनिः फलार्थत्वादिति पुरुषार्थत्वमुक्तम्। असंयुक्तं प्रकरणात् इत्यादिना च क्रत्वर्थत्वमुक्तम् ।

* * * *

Colophon:

इति श्रीपार्थसारथिमिश्रविरचिते तन्त्ररत्ने चतुर्थस्याध्यायस्य प्रथमः पादः ॥

End:

तथा भारतेऽपि—

"राजसूयकयाज्येषु यथा दत्तं हविर्नशेत्"। इति हविषो विनाशवचनात् क्रतुवैगुण्यमेव दर्शितम् । लिङ्गानि च दर्शितानि ब्राह्मणानामिदं हविरित्येवमादीनि ।

आर्त्विज्यं न भवेत्कर्म स्वतः क्षत्रियवैश्ययोः ।
ब्राह्मणानां तु विदुषामार्त्विज्यं स्यादिति स्थितम् ॥

इत्यार्त्विज्ये ब्राह्मणमात्राधिकरणं समाप्तम् ।

Colophon:

इत्युपाध्यायश्रीपार्थसारथिमिश्रविरचिते तन्त्ररत्ने द्वादशाध्यायस्य चतुर्थः पादस्समाप्तः ॥

अध्यायश्च संपूर्णः । ग्रन्थश्चायं समाप्तिमगमत् ॥

R. No. **2714.**

Paper. 11 × 9⅝ inches. Foll. 184. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippād, Nareri, Tritala, Malabar district.

ध्वन्यालोकलोचनव्याख्या—कौमुदी.

DHVANYĀLŌKALŌCANAVYĀKHYĀ: KAUMUDĪ.

A commentary on the Dhvanyālōkalōcana of Abhinavagupta which work has been described under No. 12893 of the D.C.S. MSS., Vol. XXII. The commentator is apparently called Uttuṅgōdaya.

Contains the first Uddyōta only.

Beginning:

या सा व्यञ्जकभेदेन बहुधैका विभाव्यते ।
काव्यार्थसारभूतां तामाद्रिये संविदं पराम् ॥
विश्वाविर्भावविश्राणननिपुणनिजोन्मेषमन्तर्विचित्रान्
भेदानव्यक्तमाभासयदभिगमयद्व्यक्तभावं च भूयः ।
प्रत्यक्षार्थानुबोधप्रकटितमहिमस्पष्टमन्तस्समिन्धा-
मन्धीभावं निरुन्ध्यात्किमपि निरुपमं धाम सारस्वतं वः ॥
नवरसमयमन्यद्विश्वमन्यव्यपेक्षाविरहितमपरोक्षं शश्वदुन्मीलयन्ती ।
कविसहृदयसंसन्मानसाम्भोजहंसी विहरतु हृदि नित्यं वाङ्मयी देवता नः॥
यत्प्रज्ञाशिल्पियन्त्रस्फुटघटितविवेकात्मसोपानपङ्क्ति-
प्राप्तोर्ध्वोर्ध्वाधिरोहास्थितमुपरि बुधा विद्यते वस्तुतत्त्वम् ।
वाग्देवीलास्यशिक्षाक्रमपरिकलनापूर्वरङ्गायमाणा-
नाद्यानाचार्यवर्याननुदिनमिह तान् भामहाद्यान् प्रपद्ये ॥
पूर्वैरसञ्चरितमुद्धृतकण्टकं सत्काव्यार्थवर्त्म यदुपज्ञमतः प्रवृत्तम् ।
आनन्दवर्धनमनुत्तममन्वितार्थनामानमेनमहमन्वहमानतोऽस्मि ॥
ध्वनिसमयरहस्यवस्तुतत्त्वप्रथनपटिष्ठगरिष्ठवाक्प्रपञ्चान् ।
अभिमतसुरपादपान् गुरूंस्तानभिनवगुप्तपदाभिधानुपासे ॥

* * * *

काव्यालोकार्थसंयोजितमभिनवगुप्ताह्वयाचार्यपादै-
रात्मीयं लोचनं यत्सुनिशितधिषणैरप्यनामृष्टसारम् ।

तत्सारोद्धारिणीं सम्प्रति विवृतिमहं संविधातुं समीहे
विद्वांसस्तत्परास्तत्परगुणसुखिनस्सन्तु सन्तोषवन्तः ॥

* * * *

आशंसिता रसिकलोकचकोरबृन्दैराविर्भवन्त्युदयतोऽमृतगोरुदारा ।
आचन्द्रतारकमियं नवकौमुदीव प्रीतिं दधातु जगतां विवृतिर्मदीया ॥

अथ सकलजनमहाजनबहुमतमहिमा महामाहेश्वरपरमेश्वरः परमेश्वर एव जगदनुग्रहकृतपरिग्रहविग्रहविशेषः श्रीमानभिनवगुप्ताचार्यः श्रीमदानन्दवर्धनाचार्यविरचितं काव्यालोकं व्याकृतमपि पूर्वैरनुन्मीलिताकूतसारसर्वस्वमत एवाव्याकृतकल्पं मन्वानस्सन्नुपसन्नजनोपचिकीर्षया स्वयं व्याचिकीर्षुश्चिकीर्षितप्रबन्धकीर्तिप्रतिष्ठात्मकप्रयोजनप्रस्तावकतया समासादितसमग्रपुरुषार्थसाधनमविच्छिन्नाचार्यजनाचारपारम्पर्यागतमधिक्रियमाणाभिमतदेवतातत्त्वानुस्मरणस्तुतिनमस्कारलक्षणमङ्गलमादितोऽनुसन्दधानः श्रोतृणामपि तत्कर्तव्यतया नियमावबोधनार्थं ग्रन्थे निवेशयति—अपूर्वं यद्वस्त्विति । अत्र च क्रमेणापूर्ववस्तुप्रथयितृत्वजगत्सारयितृत्वविशिष्टभासयितृत्वात्मकविशेषणत्रयसमर्पकैस्त्रिभिर्यद्वृत्तवाक्ये विशिष्टगुणसङ्कीर्तनरूपस्तुतिलक्षणं मङ्गलमाचरितं तत्कविसहृदयाख्यं सरस्वत्यास्तत्त्वमित्यनेन तत्त्वानुस्मरणलक्षणमखिलप्रतिष्ठास्थानभूतनिजहृदयायतनस्थिरीकरणरूपत्वात्तस्य विजयत इत्यनेन पुनर्नमस्कारलक्षणम् । एवं मानसवाचिककायिकभेदभिन्नं प्रबन्धारम्भसंभावितं मङ्गलं त्रिविधमिहाचार्येणानुसंहितम् ।

End:

वन्द इत्यनेन सर्वोत्कृष्टत्वमिति। एवमुद्द्योतान्ते तत्प्रतिपाद्यार्थसङ्क्षेपः श्रोतृव्याख्यातृसुखग्रहार्थमङ्गलाचारात्मक एवास्मिन् पद्ये लाघविकतया ग्रन्थकारेण मनागुन्मीलित इति सकलमतिमङ्गलम् ।

यत्पादाब्जकुटुम्बिनी परिणता भक्तिप्रसद्वल्लरी
हस्तादेयमिव प्रसौति चतुरं पूर्णान् पुमर्थान् फलम् ।
अध्यासीनमधःस्थलीं वटतरोर्मध्ये महायोगिना-
मुद्भूतानतमोहमस्त सततं तद्धाम हृद्धाम नः ॥
इत्थं मोहतमोनिमीलितदृशां ध्वन्यर्थमार्गे यतां
व्याख्याभासमहोष्मसंज्वरजुषां प्रेक्षावतां प्रीतये ।
उत्तुङ्गादुदयक्षमाभृत उदेयुष्यामसुष्यामयं
कौमुद्यामिह लोचनस्य विवृतावुद्द्योत आद्यो गतः ॥

R. No. 2715.

Paper. 11 × 9⅝ inches. Foll. 54. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippāḍ, Nareri, Tritala, Malabar district.

विद्धसालभञ्जिकाव्याख्या.

VIDDHASĀLABHAÑJIKĀVYĀKHYĀ.

Foll. 1*a*—53*b*. Fol. 54*a* contains the name of the owner of the MS. from which this was copied. Fol. 54*b* is left blank.

By Vāsudēvakavi alias Sāhityamalla, pupil of Karuṇākara. Same work as that described under No. 12681 of the D.C.S. MSS., Vol. XXI, but with difference in the colophon and in the end.

Complete.

Colophon:

इति श्रीमत्करुणाकरशिष्येण साहित्यमल्लापराख्येन वासुदेवकविना विरचितायां विद्धसालभञ्जिकामार्गदर्शिन्यां प्रथमोऽङ्कस्समाप्तः ॥

End:

तत् परिणयत्वार्यपुत्र एनां नात्मनः श्रीरन्यहस्तं सङ्क्रामयितव्या भवति । न चैतदाशङ्कितव्यं किमिति देवी आत्मनस्सापत्न्यैव वर्तत इति ।

यतो महाकुलप्रसूतानां महिलानां भर्तुः प्रियं प्रियं नात्मनः प्रियम् । किञ्च पुनः पुनः परिणायित एव ।

The scribe adds—

साहित्यमल्लकविना निपुणं निबद्धा
सौहित्यहेतुरधिकं विबुधोत्तमानाम् ।
व्याख्या मनोज्ञरसभावविचारचुञ्चुः
व्यालेखि केनचिदियं खलु रामनाम्ना ॥

R. No. 2716.

Paper. 11 × 9⅝ inches. Foll. 64. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippāḍ, Nareri, Tritala, Malabar district.

काव्यप्रकाशव्याख्या.

KĀVYAPRAKĀŚAVYĀKHYĀ.

A commentary on Mammaṭa's Kāvyaprakāśa which work has been described under No. 12816 of the D.C.S. MSS., Vol. XXII: by

Vēdāntācārya, second son of Śrīnivāsādhvarin of Bhāradvājagōtra, the chief of the village, Guruśara. The author wishes long life to Asi-Malla, also known by his conduct as Nūtanadēvarāta and Līlāhariścandra and younger brother of king Rāma. The author had a brother named Sarvajñadēśika Nṛsiṁha. The commentary is called Sarvaṭīkāvibhañjanī and Kāvyaprakāśōttējinī.

Contains the tenth Ullāsa complete.

Beginning:

सङ्गमेशकराम्भोजकलहंसः करोतु मे ।
शब्दब्रह्ममयः शङ्खशशिशुभ्रां सरस्वतीम् ॥
इत्थं निरूप्यालङ्कारान् पूर्वोद्दिष्टगतानथ ।
वक्तुमारभते व्यक्तमलङ्कारानथार्थगान् ॥

इह तावदखिलालङ्कारिकसमयसिद्धान्तसुधाम्बुधिमाथोदितामृतरसायमानाः निरुपमस्वभावाः उपमानन्वयोपमेयोपमोत्प्रेक्षासन्देहरूपकापह्नवश्लेषसमासोक्तिद्विविधनिदर्शनापञ्चविधाप्रस्तुतप्रशंसातिशयोक्तिप्रतिवस्तूपमादृष्टान्तदपिकतुल्य - योगिताव्यतिरेकाक्षेपविभावनाविशेषोक्तियथासङ्ख्यार्थान्तरन्यासविरोधस्वभावो - क्तिव्याजस्तुतिसहोक्तिविनोक्तिपरिवृत्तिद्वयभाविकपर्यायोक्त्युदात्तसमुच्चयद्वयपर्यायानुमानपरिकरव्याजोक्तिपरिसङ्ख्याद्वयकारणमालान्योन्योत्तरसूक्ष्मसारासङ्गति - समाधिसमविषमाधिकप्रत्यनीकमिलितैकावलीस्मरणभ्रान्तिमत्प्रतीपाद्दृतयसामा - न्यविशेषतद्गुणातद्गुणव्याघातसंसृष्टिसङ्करा इति चतुःषष्टिप्रकारा अलङ्काराः तेषामलङ्काराणां स्वरूपं स्फुटतरं क्रमेण प्रदर्शयितुकामः पूर्वोत्तरोल्लासयोरुपोद्घातसङ्गतिं दर्शयति—अर्थालङ्कारानित्यादिना। अर्थैकाश्रयानलङ्कारानित्यर्थः। रूपकाद्यलङ्कारजीवितभूतामुपमां प्राचीनालङ्कारिकोक्तमर्यादया प्रदर्शयति— साधर्म्यमुपमेत्यादिना ।

End:

श्रीरामक्षितिपानुजस्त्रिजगति प्रौढोऽसिमल्लाभिधो
यो वै मानवपारिजात इति यो जोघुष्यमाणो जनैः ।
वृत्त्या नूतनदेवरात इति यो लीलाहरिश्चन्द्र इत्या-
ख्यातो रविमेदिनीपतिरयं जीयादिहायुःशतम् ॥

Colophon:

इति श्रीमद्भारद्वाजकुलजलधितपोनिधिगुरुशरग्रामाधिराजकृतगङ्गास्नानाग्निष्टोमादिनित्यान्नदानसरस्वतीसहोदरश्रीनिवासाध्वर्यवरतनयसर्वज्ञनृसिंहदेशि-

कसहजसर्वतन्त्रस्वतन्त्रषड्भाषाकविशेखरतर्कविद्याभिनवगौतमश्रीवेदान्ताचार्यविरचितायां सर्वटीकाविभञ्जन्यां काव्यप्रकाशोक्तिजन्यां दशम उल्लासः ॥

ये केचिदत्र रसशालिषु सत्कवीनां
सूक्तेषु कर्णपथगामिषु नाद्रियन्ते ।
ते मालतीपरिमलेष्वपि कन्दलत्सु
नासापुटं करतलेन पिदध्युरेवम् ॥

R. No. 2717.

Paper. 11 × 9¾ inches. Foll. 36. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippāḍ, Nareri, Tritala, Malabar district.

अनर्घराघवटिप्पणम्.

ANARGHARĀGHAVAṬIPPAṆAM.

A brief commentary by Pūrṇasarasvatī on the Anargharāghava, the well-known drama of Murārikavi, described under R. No. 132(*b*) ante.

Complete.

Beginning :

प्रणम्य सच्चिदानन्दं पूर्णज्योतिर्निरञ्जनम् ।
अनर्घराघवं नाम नाटकं व्याकरोम्यहम् ॥

प्रारिप्सितप्रबन्धस्याविघ्नपरिसमाप्तिप्रचयगमनशिष्टाचारपरिपालनार्थं कविरिष्टदेवतानमस्काररूपं मङ्गलं करोति—निष्प्रत्यूहमित्यादि ।

यद्यप्यङ्गानि भूयांसि पूर्वरङ्गस्य नाटके ।
तथाप्यवश्यकर्तव्या नान्दी विघ्नप्रशान्तये ॥
देवतादिनमस्कारमङ्गलारम्भपाठनम् ।
नाट्यादौ शस्यते यत्तु सा नान्दी कथिता बुधैः ॥
सूत्रधारः पठेन्नान्दीं मध्यमस्वरसंयुताम् ।
पदैर्द्वादशभिः षड्भिरष्टाभिर्वाप्यलङ्कृताम् ॥ इति ।

नाटकारम्भे विहितां द्वादशपदां नान्दीं कविः प्रयुङ्क्ते । प्रत्यूहाभावाय । नाव्ययीभावादतोम् त्वप . . . . . .

कौमोदकीलक्ष्मणः । कौमोदकया बुद्धिरूपाया अधिष्ठानभूतस्य । तथाच श्रीविष्णुपुराणे—

श्रीवत्ससंस्थानधरमनन्ते च समाश्रितम् ।
प्रधानं बुद्धिरध्यास्ते गदारूपेण माधवम् ॥ इति ।

* * * *

Colophon:

इत्यनर्घराघवटीकायां प्रथमोऽङ्कस्समाप्तः ॥

End:

विभजन्नदशग्रीवोपसर्गम् । रावणनिमित्तोपद्रवरहितं मन्दाकिनी गङ्गा भोगवती • मया हि मन्दाकिनी स्वर्गे, गङ्गा भूमौ, भोगवती पाताले, पुनस्ते पवित्रयन्ति । श्रुतिशष्कुलीवलयितव्योमावगाहि श्रवणरूपेण स्थिताकाशग्राह्यः -

Colophon:

पूर्णसरस्वतीविरचिते मुरारिकविकृतेरनर्घराघवस्य टिप्पणे सप्तमोऽङ्कस्समाप्तः ॥

R. No. 2718.

Paper. 11 × 9⅜ inches. Foll. 96. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from the MS. of the Raja of Chirakkal, Malabar district.

शिशुपालवधव्याख्या.

ŚIŚUPĀLAVADHAVYĀKHYĀ.

By Dēvarājācārya, son of Kṛṣṇadvaipāyana Bhaṭṭa. Same work as that described under No. 11812 of the D.C.S. MSS., Vol. XX.

Contains the Sargas four to nine complete.

R. No. 2719.

Paper. 11 × 9½ inches. Foll. 18. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Nīlakaṇṭhan Nambūdirippāḍ, Karangath-manai, Oorakam post, Cochin State.

भाणः.

BHĀṆAḤ.

Foll. 1*a*—16*b*. Fol. 17*a* contains a few stanzas relating to the author. Foll. 17*b*—18 are left blank.

A peculiar kind of dramatic composition in one Act describing the attachment between Satyakētu and Sārasikā: by Bhāskara of Kērala. This drama is said to have been enacted in the court of Vikramadēva of Kerala country.

Complete.

Beginning :

नान्द्यन्ते सूत्रधारः ।

स्वच्छन्दः परमेष्ठिनं दुहितरि व्यापारयामास यो
मध्येवारिधि बद्धवान् रघुपतिः सेतुं च यत्प्रामवात् ।
प्लुष्टाङ्गोऽपि चकार नष्टतपसं यश्चन्द्रचूडामणिं
सोऽयं चापभृतां वरो विजयते विश्वैकवीरस्स्मरः ॥

अपि च—

इन्दिरामलकटाक्षलोभिनो मन्दमेव गलिता गदाभृतः ।
कुन्दकुड्मलसिता स्मितप्रभा कन्दमुत्खनतु कल्मषस्य वः ॥

सहर्षम्, सर्वथा सिद्धार्थास्स्मः । यद्वयमभिनयगीतवादित्रनृत्तादिरसार्णवनिमज्जनोन्मज्जनस्खलनप्लवनजनितमदमत्तैर्मनीषिभिः . . . . स्य विक्रमभूपतेर्लीलाटिकैः परिपूर्णया परिषदा सबहुमानं समादिष्टास्स्मः । यथा—सखे सकलविधरूपकानिरूपणनिपुणा अधरीकृतामृतधारामधुरमधुनिष्यन्दिनी भगवतो भास्करकवेर्भाणरूपा भारती भवतैवाभिनयविषयीक्रियतामिति । तद्यावदार्यां ताम्रपर्णीमाहूय सङ्गीतकृत्ये नियोक्ष्ये ।

* * * *

सू—आर्ये श्रुतम्, अस्ति केरलेषु भास्करनामा कविवरः । नटी—सादरम्, तेणहि तं एव्व पुडमं वण्णेहि ।

* * * *

श्रीविक्रमदेवेन राजराजोपमेन राजराजेनानेककविभिरानीयोपायनीकृतेषु निर्धार्य नियुक्तमित्यार्यमिश्राणामाज्ञापना ।

* * * *

कथमेवं सति सखा सत्यकेतुरसारसिकासङ्गमलाभं सहते सह्य एव मयासह्यमदनवेदनासन्दह्यमानतनुर्दृष्टः ।

End :

चित्रसेने स्मरसि सुमहान् कोऽपि कार्यभारो वर्तते । चित्रसेनस्य वा . . . . भारा त्वर्यते । किमस्त्यनन्तरं युवयोः ।

* * * *

भूचक्रवालमहितामह . . . .
. . . . . र्गलास्सुललिताः प्रसरन्तु वाचः ।

मूर्ति परामुपगत . . . .
. . . . पार्वते सुरलोक तत्र भवन्तु ॥

इति निष्क्रान्तः—

. . . . . विपश्चिन्निर्बन्धाद्रचितं मया ।
इदं हासैकसक्तानां विदुषामस्तु तुष्टये ॥

अथवा—

श्रेयो हि मे तदिदमद्य महाजनानां
हासास्पदं भवति चेदिदमेव भूयः ।
पूज्यो जडैरिति तु यत्तदपेक्षयापि
हास्यो महद्भिरिति यद्वरमेतदेव ॥

वित्तं यत्र विवर्धतेऽथ विपदित्येतन्न विज्ञायते
वृत्त्या तूपरि वर्तते भुवि भवां विद्या न विच्छिद्यते ।
वित्ते तत्र महाकुले विजयते विप्रोत्तमो विश्रुतः
विद्वद्वृन्दकिरीटकोटिविलसच्छ्रीपादपङ्केरुहः ॥

तत्पादपङ्कजपरागपवित्रितात्मा दुर्विद्वदन्धतमसेषु यथार्थनामा ।
श्रीभास्करः कविवरः कुरुते स्म काव्यं नव्यं सुधाप्रथमवक्त्रविनामहेतु ॥
कैः . ज्यमातसमुदश्चितमात्रमूर्ध्ना स्पर्धोद्गतं सुलघुकुट्टनमट्टयामः ।
सद्युक्त्यजिष्टपथनीतममत्सरोत्थमाशास्महे तदिह चुट्टयतां . . . ॥

R. No. 2720.

Paper. 11 × 9¾ inches. Foll. 59. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa-Nambūdirippāḍ, Nareri, Tritala, Malabar district.

सुभद्राहरणम्, विवरणसहितम्.

SUBHADRĀHARAṆAM WITH VIVARAṆAM.

Foll. 1*a*—59*a*. Fol. 59*b* is left blank.

A poem describing the incidents that lead to the marriage of Subhadrā with Arjuna. The work is composed like the Bhaṭṭikāvya so that the stanzas of the poem contain illustrations of the grammatical Sūtras of Pāṇini's Aṣṭādhyāyī grouped according to the topics dealt with therein. The author of the work, as made out from another MS. thereof, is Nārāyaṇa of Kūḍalūr-mana, son of Brahmadatta.

Contains the Sargas six to eight complete and the ninth incomplete.

Contains the following topics :—

६. अव्ययकृद्विलसितम्.
७. प्राग्दीव्यतीयविवरणम्.
८. प्राग्वहतीयादिविलसितम्.
९. स्वार्थिकप्रत्ययविलसितम्.

Beginning :

(मू.) सोऽपचित्य सुपुष्पौघमनिपातं लतां लताम् ।
मुनीनां पादमापादनम्रोऽग्निवदसेवत ॥

(व्या.) अत्र ल्यसमासपक्षे तयोर्द्विवचनं भवति । व्याप्तौ वीप्सायास्सुप्सु द्विर्वचनमासेवायान्नित्यमाभीक्ष्ण्ये इत्ययं कृत्सु चेति स्मर्यते ।

(मू.) अलङ्कृत्याग्निहोत्राणि कुसुमैस्तैस्तदाहृतैः ।
समिधि द्व्यङ्गुलोत्कर्षं हुतायां जुहुवुर्हविः ॥

अत्राग्निहोत्रशब्दो ज्योतिष्षु वर्तते । ते मुनयोऽग्नीनाहवनीयादींस्तेन पार्थेनाहृतैः कुसुमैरलङ्कृत्य तत्र हुतायां समिधि हविः क्षीरादि जुहुवुः । कथं द्व्यङ्गुलोत्कर्षं कन्याप्रादेशमात्र्या पालाश्यास्समिधो द्व्यङ्गुलेर्भाग उत्कृष्यातिभृत्यादिकमग्रद्व्यङ्गुलेन वा भावेन कस्योपरि द्व्यङ्गुलं समिधो निहत्याग्नीन् जुहोतीति वचनात् । द्वयोरङ्गुलयोस्समाहारे द्विगुः । स नपुंसकमिति नपुंसकत्वम् ।

* * * *

Colophon :

इति सुभद्राहरणे सविवरणेऽव्ययकृद्विलसितं षष्ठस्सर्गः ॥

End :

Colophon :

इति सुभद्राहरणे सविवरणे प्राग्वहतीयादिविलसितमष्टमस्सर्गः ॥

अथ स्वार्थिकान् प्रत्ययानुदाहर्तुमारभते—

(मू.) अथेहिताकारमयैर्वचोभिर्विज्ञाय राजा विजयस्य भावम् ।
महोर्मिमालीव नवैर्मयूखैः कलानिधेर्मण्डलमुल्ललास ॥

* * * *

(मू.) मृगयासु मृगाक्षीं तां सव्यसाची विचिन्तयन् ।
न सपत्राचकारैणान् का निष्पत्राकृतौ कथा ॥

(व्या.) न सपत्राचकारैणानिति । सपत्राणां शराणां कायेषु प्रवेशनेन निजघानेत्यर्थः । का निष्पत्राकृतौ कथेति निष्काय ।

R. No. 2721.

Paper. 11 × 9⅝ inches. Foll. 102. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of Tekkēmaṭham, Trichur, Cochin.

विष्णुसहस्रनामस्तोत्रम्, लघुविवरणसहितम्.

VIṢṆUSAHASRANĀMASTŌTRAM WITH LAGHU-VIVARAṆAM.

Foll. 1*a*—101*b*. Fol. 102 is left blank.

Same work as that described under No. 9008 of the D.C.S. MSS., Vol. XVII, together with a commentary by Nārāyaṇa, son of Brahmadatta of Kūḍalūr-mana, near Pattambi. It follows the Śaṅkarabhāṣya.

Complete.

Beginning:

गणेश्वरं च वाग्देवीं श्रीमदस्मद्गुरूनपि ।
विघ्नशान्तीष्टसिद्ध्यर्थं नमस्यामि कृपानिधीन् ॥
मुकुन्दं सच्चिदानन्दमिन्दिन्दिरसमद्युतिम् ।
वन्दारुजनमन्दारं नन्नमीमीन्दिरापतिम् ॥
कृष्णद्वैपायनं वन्दे यन्मुखेन्दुविनिस्सृतम् ।
सहस्रनामपीयूषं पीयतेऽद्यापि मानुषैः ॥
सूतं विशम्पजं भीष्मं शौनकं जनमेजयम् ।
धर्मजं च भजे वक्तॄन् श्रोतॄन्नामसहस्रके ॥
सहस्रनामव्याख्यातॄन् भगवत्पादपूर्वकान् ।
नत्वा नामसहस्रस्य कुर्वे विवरणं लघु ॥
शङ्करभगवद्भाष्ये पद(द्)व्याख्याचतुष्कलघुवृत्त्योः ।
नाम्नामर्था गदिता नोक्ता शब्दस्वरूपनिर्णीतिः ॥
व्याख्यास्ताः प्रेक्ष्यातः क्रियते तन्निर्णयार्थमिह यत्नः ।
न स्यात्पाठविशुद्धिः नाम्नां खलु शब्दनिर्णयाभावे ॥
व्याख्यास्वनेकधा नाम्नां येषामर्थास्समीरिताः ।
तेषां भाष्योक्तरीत्यैव प्रायो व्युत्पत्तिरुच्यते ॥

* * * *

सहस्रनामव्याख्याने परिभाषा इतीरिता ।

नामोक्तिसङ्गतिश्लोकानाद्यान् व्याचक्ष्महेऽधुना ॥
व्याख्याविचारे नो दाक्ष्यं शब्दशास्त्रे न निर्णयः ।
अतस्तिष्ठे सज्जनेषु तिष्ठन्तां मयि सज्जनाः ॥

पुरा किल भगवान् पाराशर्यमुनिः ऋग्यजुस्सामाथर्वभेदेन वेदं चतुर्धा विभज्य तदर्थोपबृंहणाय महाभारतसंज्ञं पञ्चममितिहासात्मकं वेदं स्वशिष्यो वैशम्पायनस्सर्पसत्रे जनमेजयाय कथयिष्यति ततस्तदनूद्य स्वशिष्यरोमहर्षणपुत्र उग्रश्रवास्सूतो नैमिशारण्ये सत्रयागे दीक्षितेभ्यश्शौनकादिभ्यो वक्ष्यति इति अमुं भाविनमर्थमतीन्द्रियज्ञानेनापेक्ष्य तद्रीत्यैव प्रणिनाय । तत्र चाष्टादशपर्वात्मके आनुशासनिकपर्वणि संसारसागरमग्नानामुद्विग्नानां जनानामनायासेन तदुत्तरणोपायं दिदर्शयिषुः—

चत्वार्येतानि रत्नानि महाभारतसागरे ।
सहस्रनाम गीता च स्तवराजो ह्यनुस्मृतिः ॥

इत्युक्तेः महाभारतसागरे रत्नवत्सारभूतं सहस्रनामाख्यमालामन्त्राणामुत्तममन्त्रं शरशयनगतेन भीष्मेण धर्मजायोपदिष्टप्रकारेणोपादिदेश । तस्य च सहस्रनामोपदेशप्रसञ्जकं प्रश्नं भीष्मं प्रति धर्मजश्चकारेति वैशम्पायनो जनमेजयमब्रवीदिति शौनकादीन् प्रति सूतवचनरूपमिदमादिमं वाक्यं वैशम्पायन उवाचेति—विशम्पस्य मुनेर्गोत्रापत्यं वैशम्पायनः। अश्वादिभ्यः फञ्। उवाच जनमेजयं प्रत्युक्तवान् । किमुक्तवानित्याह—

श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ।
युधिष्ठिरश्शान्तनवं पुनरेवाभ्यभाषत ॥

End :

विलयस्थानम् । प्रभवश्चाप्ययश्च प्रभवाप्ययः पुष्कराक्षं विष्णुं भजन्ति सेवन्ते ते नराः पराभवं न यान्ति बाह्यैराभ्यन्तरैश्च शत्रुभिर . . . अमृतत्वमाप्नुवन्तीत्यर्थः।न ते यान्ति पराभवमिति पादस्य द्विरुक्तिरध्यायसमाप्तिं द्योतयति।

Colophon :

इति सहस्रनामलघुविवरणं समाप्तम् ॥

भारतभाष्यादिगिरां भ(भावा)ज्ञानाच्च शब्दशास्त्रादौ ।
अपरिचितेरपि जातं स्खलितं करुणाकरो हरिः क्षमताम् ॥
कूडलूरुपरि भार्गवनाम्नि प्रापुषा जननमात्मधामनि ।
ब्रह्मदत्ततनयेन गुम्फिता शोध्यतां कृतिरियं बुधोत्तमैः ॥

R. No. 2722.

Paper. 11 × 9⅜ inches. Foll. 76. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of the Dēśamaṅgalam-manai, near Shoranur, Malabar district.

अष्टाङ्गहृदयव्याख्या.
AṢṬĀṄGAHṚDAYAVYĀKHYĀ.

Foll. 1a—75b. Fol. 76 gives the contents of the work.

A commentary on the Aṣṭāṅgahṛdaya of Vāgbhaṭa which work has been described under No. 13072 of the D.C.S. MSS., Vol. XXIII. The commentary is called Vyākhyāsāra.

Breaks off in the seventh Adhyāya in the Sūtrasthāna.

Beginning:

आचार्यः शास्त्रमारिप्सुर्विघ्नोपशमाय शिष्टाचारानुसारेणेष्टदेवतानमस्कारं करोति—रागेत्यादि । राग आदिर्येषान्ते रागादयः । आदिशब्देन द्वेषलोभमद-मात्सर्यडम्भाहङ्कारा गृह्यन्ते । एते च क्रोधादयोऽपीत्यन्ये । अरिषड्वर्गः परिगृहीतो वा । इदं मे स्यादिदं मे स्यादिति भेदविकल्पिता मानसी साध्यविषया वृत्तिरिति कथ्यते ।

प्रचिता सैव कुर्वाणा प्रवृत्तिश्चोत्तरक्षणे ।
तदसिद्धौ विरोधेन तापनी राग उच्यते ॥

रागः कामो वा ।

* * * *

अथात आयुष्कामीयं नामाध्यायं व्याख्यास्याम इत्यष्टपदं वाक्यम् । अथ अतः आयुष्कामीयं नाम अध्या वि... आख्यास्यामः पदच्छेदोऽपि व्याख्याविशेषः ।

आदौ कुर्यात्पदच्छेदं समासं तदनन्तरम् ।
समासे छेदिते पश्चादर्थं ब्रूयाद्विचक्षणः ॥ इति ।

अथशब्द आनन्तर्ये । कस्यानन्तरं? नमस्कारस्य

तदनन्तरभावित्वादानन्तर्ये स्फुटे सति ।
तत्पूर्वमेव कर्तव्यमित्येतेन नियम्यते ॥
तेषान्त्विदादौ ग्रन्थानां वन्दनानुपपत्तितः ।
अकर्तव्यमिति स्याच्चेत्कस्यचित्सा निवार्यते ॥
कायिको वाचिको वास्ति नमस्कारश्च तन्मुखे ।
समाप्तिलिङ्गानुमितो नान्यथा तत्समापनम् ॥

आनन्तर्यार्थोऽपि मङ्गलाधिकारयोरपि प्रसज्यतेऽथशब्दः ।

* * * *

Colophon:

इति व्याख्यासारे प्रथमोऽध्यायः ॥

End:

Colophon:

इति व्याख्यासारे षष्ठोऽध्यायः ॥

अन्नस्य पानस्य च स्वरूपमुक्तमेवं विज्ञातस्वरूपं पथ्यमप्यन्नपानं विषजुष्टं चेद्रोगाय मृत्यवे वा स्यात् । अतस्तद्रक्षणार्थमन्नरक्षाध्यायमाह । अन्नस्य रक्षा सोपदिष्टा यत्राध्याये सोऽप्युपचारादन्नरक्षेत्युच्यते ।

* * * *

अन्ये तु ओदनो मयूरकण्ठतुल्योष्मा तथा मोहादिकृच्चोष्मा घ्राणेनेति वदन्ति । "मयूरकण्ठतुल्योष्मा मोहमूर्च्छाप्रसेककृ"दित्येकपदमोदनवि . ।

R. No. 2723.

Paper. 11 × 9⅜ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Vēmūr Rāmagōvinda Śāstrigāru of Narasapur, Kistna district.

राणकभावनाकारिका, विवरणसहिता.

RĀṆAKABHĀVANĀKĀRIKĀ WITH VIVARAṆA.

Foll. 1*a*—18*a*. Foll. 18*b*—20 are left blank.

A tract of 54 stanzas investigating the meaning of the potential terminations from the Mīmāṁsā standpoint: extracted from Bhaṭṭasōmēśvara's Nyāyasudhā otherwise known as Rāṇaka—Choukhāmba Sanskrit series edition, pages 26 to 29. The author of the commentary is Annaṁbhaṭṭa.

Complete, but wants the beginning.

Beginning:

(व्या) ननु न तावदर्थभावनान्तर्गतिः प्राशस्त्यज्ञानस्य केनचिदिष्यते । न च ततोऽन्या शब्दभावना नाम काचिदुपपत्तिं सहते । शब्दश्रवणानन्तरभाविन्यां हि प्रवृत्तौ हेतुः । प्रवृत्त्युत्पादकत्वाच्छब्दभावना शब्देनाभिप्रेतो न चासौ कश्चित्संभवति तथाहि—

(मू) प्रवर्तको लिङादिर्वा तत्क्रिया वा विलक्षणा ।
अभिधा वाथवाज्ञादिः कार्यं वाथेष्टहेतुता ॥
तत्र शब्दस्स्वरूपेण वायुवच्चेत्प्रवर्तकः ।
प्रमाणत्वं विहन्येत नियमाच्च प्रवर्तयेत् ॥

* * * *

प्रवृत्तिव्यभिचारित्वान्न प्रवर्तकतोचिता ।
इच्छात्वव्यभिचारित्वाद्भवेत्पुंसः प्रवर्तिका ॥
स्वरूपसत्तामात्रेण न तु ज्ञानमपेक्षते ।
अथापि ज्ञायमानासौ कारणं स्यात्त . . . ॥

(व्या) लिङादिः किं वाय्वादिवत्स्वरूपेणैव प्रवर्तयति । किं वा कञ्चिदर्थं ज्ञापयित्वा । द्वितीये योऽपि ज्ञाप्योऽर्थः लिङादिव्यापारो वा, लौकिकी प्रेरणा वा, अभिधा वा, आज्ञादिर्वा, कार्यं वेष्टसाधनत्वं वेति प्रवर्तक, इति श्लोकार्थः । लिङादिरित्यादिना लोडादिसङ्ग्रहः । एवमुत्तरत्र ।

End:

एवं चतुःपञ्चाशच्छ्लोकया आक्षेप . . . . यं प्रदर्श्यार्धेनाक्षेपवार्तिकम्—तदिति । पूर्वपक्षी एवमुक्तं सर्वं मनसा . . . . . निधाय पृच्छति । आक्षिपतीत्यर्थः ।

भावनाकारिकाव्याख्या राणकाश . . दिका ।
अन्नंभट्टेन रचिता विद्व्याख्यानजीविका ॥

Colophon:

इत्यन्नंभट्टविरचितराणकभावनाकारिकाविवरणं संपूर्णम् ॥

R. No. **2724.**

Paper. 11 × 9⅝ inches. Foll. 48. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of Tekkēmaṭham, Trichur, Cochin.

(*a*) क्षुरिकोपनिषद्व्याख्या.

KṢURIKŌPANIṢADVYĀKHYĀ.

Foll. 1*a*—4*a*. Fol. 4*b* is left.

A gloss on the Ksurikōpaniṣad which work is described under No. 418 of the D.C.S. MSS., Vol. I, Part III. The commentary mostly follows that of Śaṅkarānanda.

Complete.

Beginning:

क्षुरिकाख्योपनिषदं भवपाशनिकृन्तनीम् ।
आनन्दात्मावबोधार्थं व्याख्यास्ये योगमार्गगाम् ॥

प्रथममधिकारिप्रवृत्तिसिद्धये विषयप्रयोजने दर्शयति । क्षुरिकां यथा लोही तीक्ष्णधारा क्षुरिका केनचिन्निमित्तेन कस्य चित्पाशशतैर्निबद्धगात्रस्य तद्

न्धनभूतानां पाशानां छेदिनी तज्जन्मादीनां जन्तुमात्रबन्धहेतूनां पाशानामज्ञातसूत्राणामहंममादिग्रन्थीनाम् ।

* * * *

क्षुरिकां धारणां संप्रवक्ष्यामीति व्याख्येयम् । लिङ्गव्यत्ययो वा करणीयम् । इदानीं तज्ज्ञानं सपरिकरमाह । निःशब्दं जडाजडशब्दरहितं देशं प्रदेशं समसूच्यादिलक्षणं मनोऽनुकूलमास्थाय समन्तात् प्राप्य तत्र निश्शब्ददेशे आसनं पद्मस्वस्तिकादिकमन्यतमम् ।

End:

एवंभूतेन शस्त्रेण च्छित्वा । स्पष्टम् । तन्तूनस्याश्वत्थस्य मूलभूतानविद्यादीन्न बध्यते । संसारार्णववर्तिमृत्युवरुणपाशैः बद्धो न भवति । उक्तार्थाभिधानमुपनिषत्समाप्त्यर्थम् ।

Colophon:

इति क्षुरिकोपनिषद्दीपिका समाप्ता ॥

(*b*) अथर्वशिखोपनिषद्दीपिका.

ATHARVAŚIKHŌPANIṢADDĪPIKĀ.

Foll. 5*a*—9*a*.

By Śaṅkarānanda, a pupil of Ānandātman. Same work as that described under R. No. 1478(*i*) ante.

Complete.

(*c*) गोपालतापनीयोपनिषद्दीपिका.

GŌPĀLATĀPANĪYŌPANIṢADDĪPIKĀ.

Foll. 9*b*—29*a*.

A gloss on the Gōpālatāpanīyōpaniṣad which work is described under No. 447 of the D.C.S. MSS., Vol. I, Part III.

Complete.

Beginning:

स जयति भगवान् कृष्णः कंसारिः केलिवर्धनस्सुहृदाम् ।
बृन्दाविपिनविहारी वनमाली सजलजलदाभः ॥

परमकारुणिकतया गुणोपासनक्रमेणाधिकारिजनानर्थनिवृत्तये सच्चिदानन्दस्वरूपश्रीकृष्णात्मावाप्तये च श्रीगोपालविद्यामुपदिशति । तापनीयश्रुतिः श्रोतृणामविघ्नविद्यासिद्धये सदाचारावबोधनाय विषयसौलभ्यप्रकाशनेन तत्प्रवृत्तिसिद्धये च प्रतिपाद्यपरमदैवतप्रणतिलक्षणं मङ्गलं प्रकाशयति—

सच्चिदानन्दरूपाय (. . .) बुद्धिसाक्षिणे ॥

इति । कृष्णाय नम इति सम्बन्धः । कृषशब्दस्सच्चिद्वाचकः णशब्दश्चानन्दवाचक इत्यभिप्रेत्य कृष्णशब्दस्यार्थमाह—सच्चिदिति । सच्चिदानन्दा एव स्वरूपं यस्य सः तस्मै । क्लेशकर्षकत्वं कृष्णशब्दार्थमाह—अक्लिष्टेति ।

End:

हे गान्धर्वि सर्वाय स्वालयान्तिकं स्वाश्रमप्रदेशं प्रति गच्छध्वम् । आद्यं ब्रह्मण इति पदं पूर्वश्लोके योजितम् । नारद इत्यत्र सुपां सुलिगिति सूत्रेण . . . शः । आद्यं तथेति पदं यथेत्यर्थे ।

भवसन्तापसन्तानशातनी कृष्णतापनी ।
तदर्थबोधिनी टीका जनार्दनविनिर्मिता ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरानन्दविरचिता श्रीगोपालतापनीदीपिका समाप्ता ॥

(*d*) पञ्चीकरणवार्त्तिकव्याख्यानम्— वार्त्तिकाभरणम्.

PAÑCĪKARAṆAVĀRTTIKAVYĀKHYĀNAM: VĀRTTIKĀBHARAṆAM.

Foll. 29*b*—47*b*. Fol. 48 is left blank.

Same work as that described under No. 4641 of the D.C.S. MSS., Vol. IX. By Nārāyaṇēndrasarasvatī, a disciple of Jñānēndrasarasvatī who was the disciple of Kaivalyēndrasarasvatī.

Complete, but with a different colophon.

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यैः नारायणेन्द्रसरस्वतीभिर्विरचितं पञ्चीकरणवार्तिकाभरणं समाप्तम् ॥ ओं तत्सदिति ॥

R. No. 2725.

Paper. 11 × 9⅝ inches. Foll. 40. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippāḍ, Nareri, Tritala, Malabar district.

(*a*) शृङ्गारशेखरभाणः.

ŚṚṄGĀRAŚĒKHARABHĀṆAḤ.

Foll. 1*a*—16*a*.

A peculiar kind of drama in one Act describing the love-attachment between Śṛṅgāraśēkhara and Utpalamālā. The drama is said to have been enacted in the vernal festival of God Kāmakōṭivallabha or Valayāṅka, whose shrine is situated on the banks of the river Kampā. The author is Abhinavakālidāsa of Kāśyapagōtra.

Complete.

Beginning :

यमालोक्य स्वस्मिन् मणिमुकुरभाति स्तनतटे
स्फुरद्वक्राकारं कररुहपदाशाङ्कितहृदया ।
सलज्जा हस्ताभ्यां स्थगयति नवोढा मुहुरमा
स बालेन्दुः क्रान्ति हरमुकुटवासी हरतु वः ॥

* * * *

नान्द्यन्ते सूत्रधारः—परिक्रम्यावलोक्य, हन्त फलितमस्मद्व्यवसितेन। यदद्य कम्पातटगृहमेधिनो वलयाङ्क इति प्रथितापरनामधेयस्य भगवतः कामकोटीवल्लभस्य वसन्तयात्रोत्सवप्रसङ्गेन—

अधीतरतितन्त्राणामनङ्गब्रह्मवादिनाम् ।
सोऽयं विदग्धमिश्राणां समाजस्समुपस्थितः ॥

* * * *

अस्ति काश्यपगोत्रतिलकभूतः कश्चिदभिनवकालिदासो नाम कविः—

यस्यामनन्ति कुलदैवतमिन्दुमौलिमेकाम्रमूलनिलयं पतिमम्बिकायाः ।
यस्याग्रजं च कविताकृतचाटुबन्धं साहित्यभूषणमसोढमदं कवीनाम् ॥

तस्य श्रृङ्गारशेखरं नाम भाणं प्रयोगतो दर्शयन्नार्यमिश्रानुपस्थास्ये ।

* * * *

(स्मृतिनाटितकेन) साधु सखे पुष्पसेन त्वमिदानीं मदुपदिष्टमनुष्ठीयते यदद्य चिरनिविष्टां शीलवतीमुत्सृज्य विकस्वरयौवनारम्भामुत्पलमालामुद्वोढुमुद्योगी भवान् ।

End :

सखि किमनङ्गलेखे किमतः परमनुष्ठीयते। तथापीदमस्तु (भरतवाक्यम्)—

अनितररसाधीनं भूयादनङ्गपदं पदं
हृदयमसकृच्छृङ्गाराद्वैतशृङ्खलितं नृणाम् ।
शशधरकलापीडं श्यामामयं करुणामयं
शमयतु पुनर्जन्मक्लेशं ममापि परं महः ॥

Colophon :

श्रृङ्गारशेखरं नाम भाणस्समाप्तः ॥

(b) पादताडितकम्.

PĀDATĀḌITAKAM.

Foll. 16b—22a.

This Bhāṇa describes the love-attachment between Madanasēnā and Viṣṇunāga. By Ārya-Śyāmilaka, son of iśvēśvaradatta.

Incomplete.

Beginning:

नान्द्यन्ते ततः प्रविशति सूत्रधारः ।

देहत्यागेन शम्भोर्नयनहुतवहे मानितो येन कोपः
सेन्द्रा यस्यानुशिष्टिं स्रजमिव विबुधा धारयन्त्युत्तमाङ्गे ।
पायात्कामस्स युष्मान् प्रविततवनितालोचनापाङ्गशार्ङ्गो
बाणा यस्येन्द्रियार्था मुनिजनमनसां साधका भेदकाश्च ॥

* * * *

एवमार्यमिश्रान् शिरसा प्रणिपत्य विज्ञापयामि । यद्वयमार्यश्यामिलकस्य कृतिं पादताडितकं नाम भाणं प्रयोक्तुं व्यवसिताः । तत्तस्य कवेर्मतिपरिश्रमाव धानेनानुग्रहीतुमिच्छामः । कुतः ?

इदमिह पदं मा भूदेवं भवत्विदमन्यथा
कृतमिदमयं ग्रन्थेनार्थो महानुपपादितः ।
इति मनसि यः कार्यारम्भे कवेर्भवति श्रमः
सनयनजलो रोमोद्भेदः सतां तमपोहति ॥

* * *

(नेपथ्ये)

जयति मदनस्य केतुः कान्तं प्रत्युद्यतो विलासिन्याः ।
शिरसा प्रार्थयितव्यस्सालक्तकनूपुरः पादः ॥

निष्क्रान्तः । स्थापना ।

* * * *

किं ब्रवीषि प्रत्यक्षमेतदप्यतीतेऽहनि तत्रभवत्या सुराष्ट्राणां वारमुख्यया समदनया मदनसेनिकया तत्रभवतां विष्णुनागश्चरणकमलेन शिरस्यनुगृहीत इति । सुष्ठु खल्विदमुच्यते—एति जीवन्तमानन्दो नरं वर्षशतैरपीति । विष्णु-नागोऽपि नामैव सर्वकामिजनसाधारणश्चरणताडनसंज्ञं शिरस्यभिषेकं प्राप्त-वान् किम् ।

See under the next number (2726(b)) for the end.

(c) पद्मप्राभृतकम्.
PADMAPRĀBHṚTAKAM.

Foll. 22*a*—35*a*.

By Śūdraka. Same work as that described under the next number (2726(*c*)).

Wants the beginning; otherwise complete.

Colophon:

इति शूद्रकविरचितः पद्मप्राभृतको नाम भाणस्समाप्तः ॥

(d) उभयाभिसारिका.
UBHAYĀBHISĀRIKĀ.

Foll. 35*b*—40*a*.

By Vararuci. Same work as that described under the next number.

Incomplete.

R. No. 2726.

Paper. 11 × 9⅝ inches. Foll. 36. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Trichur, Cochin.

(a) उभयाभिसारिका.
UBHAYĀBHISĀRIKĀ.

Foll. 1*a*—10*a*.

A Bhāṇa describing the passion of love between Kubēradatta, son of Sāgaradatta, and Nārāyaṇadattā: by Vararuci.

Complete.

Beginning:

नान्द्यन्ते ततः प्रविशति सूत्रधारः ।
कोऽसि त्वं मे का वाहं ते विसृज शठ मम निवसनं मुखं किमपेक्षसे
नव्यग्राहं जाने ही हि तव सुभग दशनवसनं प्रियादशनाङ्कितम् ।
या ते रुष्टा सा ते नाहं व्रज चपल हृदयनिलयां प्रसादय कामिनी-
मित्येवं वः कन्दर्पार्ताः प्रणयकृतकलहकुपिता वदन्तु वरस्त्रियः ॥

एवमार्यमिश्रान् विज्ञापयामि । अये किं नु खलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग पश्यामि ।

(नेपथ्ये)

वसन्तप्रमुखे काले लोध्रवृक्षो गतप्रभः ।
मित्रकार्येण संभ्रान्तो दीनो विट इव स्थितः ॥

(निष्क्रान्तः । स्थापना)

ततः प्रविशति विटः ।

विटः—अहो वसन्तसमृद्धिः—कुतः ।

* * * *

सर्वजनमदनजनने लोककान्ते वसन्त एवं विजृम्भमाणे सागरदत्तश्रेष्ठिपुत्रस्य कुबेरदत्तस्य नारायणदत्तायाश्च कश्चित्कलहाभिनिवेशः संवृत्तः । एतत्कारणात् कुबेरदत्तेनात्मनः परिचारकः सहकारको नाम मां प्रति प्रेषितः—भगवतो नारायणस्य भवने मदनसेनया मदनाराधने सङ्गीतके यथारसमभिनीयमाने ततो मामतीत्य सा त्वया प्रशस्तेति तत्सङ्क्रान्तमदनानुरागशङ्कया परिकुपिता नारायणदत्ता चरणपतनमप्यनवेक्ष्य स्वभवनमेव गता । तद्गतमदनानुरागतप्तहृदयस्य यथा ममेयं रजनी सहस्रवन्न व्यतिगच्छेत् । तथाचास्य नगरस्य सर्वकालवसन्तभूतेन भाव वेशिकाचले(जने)न कृतां सन्धिमिच्छामीति ।

End:

(भरतवाक्यम्)

व्याकोचाम्भोजकान्तं मदमृदुकथितं चारुविस्तीर्णशोभं
जातस्त्वं प्रीतियुक्तः प्रिययुवतिमुखं वीक्षमाणो यथाद्य ।
एवं सस्यर्द्धियुक्तां जलनिधिरशनां मेरुविन्ध्यस्तनाढ्या
प्रीतिं प्राप्नोतु सर्वां क्षितिमधिकगुणां पालयन्नो नरेन्द्रः ॥

इति निष्क्रान्तो विटः ॥

Colophon:

इति वररुचिमुनिकृतिरुभयाभिसारिकां नाम भाणस्समाप्तः ॥

(b) पादताडितकम्.

PĀDATĀḌITAKAM

Foll. 10b—19b.

Same work as that described under the previous number, wherein see for the beginning.

Complete.

End:

एते विटास्साधुवादानुयात्रा एतदेव प्रायश्चित्तमिति वादिनः सभाजयन्ति विटमहत्तरं भट्टिजीमूतम् । एष सर्वथानुगृहीत इत्युक्त्वा प्रस्थितस्तौ-

ण्डिकोर्किविष्णुनाग एष मामाह्वयति विटमहत्तरो भट्टिजीमूतः । अयमस्मि । किमाह भवान । अनुष्ठितमिदम् । किन्ते भूयः प्रियमुपहरामीति । भोः श्रूयताम् ।

कुट्टिन्यश्चतुरकथा भवन्त्वरोगा धूर्तानामधिकशताः पणा भवन्तु ।
भूयासुः प्रियविटसङ्गमाः पुरेऽस्मिन् वारस्त्रीप्रणयमहोत्सवाः प्रदोषाः ॥

निष्क्रान्तो विटः ॥

Colophon:

इति कवेरुदीच्यस्य विश्वेश्वरदत्तपुत्रस्यार्यश्यामिलकस्य कृतिः पादताडितकं नाम भाणस्समाप्तः ॥

(c) पद्मप्राभृतकम्.

PADMAPRĀBHṚTAKAM.

Foll 20a—34b. Foll. 35 and 36 are left blank.

This Bhāṇa describes the love-attachment between Karṇīputra an. Dēvadattā. By Śūdraka.

Complete.

Beginning:

नान्द्यन्ते ततः प्रविशति सूत्रधारः ।

सू—

जयति भगवान् स रुद्रः कोपादथवाप्यनुग्रहाद्येन ।
स्त्रीणां विलासमूर्तिः कान्ततरवपुः कृतः कामः ॥

अपि च—

पुष्पसमुज्ज्वलाः कुरवका नदति परभृतः
कान्तमशोकपुष्पसहितं चलति किसलयम् ।
चूतसुगन्धयश्च पवना भ्रमररुतवहा-
स्संप्रति काननेषु सधनुर्विचरति मदनः ॥

* * * *

इत्थं च मदनशरसम्पातकर्कशो बलवानृतुरयम् । यद्देवदत्तासुरतसुप्रतिविहितयौवनोत्सवस्य कर्णीपुत्रस्योन्मुच्यमानबालभावयौवनावतारकोमलां मदनमञ्जरिकां देवसेनाचूतयष्टिमतिलङ्घयते मदनभ्रमरः ।

* * * *

परिक्रम्य (स) इदानीं देवसेनासमुत्थं मदनामयमतिव्यायामकृतं ज्वरमुद्दिश्य हारतालवृन्तचन्दनोपनीयमानदाहप्रतीकारस्तत्समागमाशाकृतप्राणधार-

णः (शयनपरायणः) कथश्चिद्वर्तते । अथ तु प्रागहरेव पुष्पाञ्जलिको नाम देव-
दत्तायाः परिचारकः सोपचारमुपक्रम्य कर्णीपुत्रमुक्तवान् ।

End:

कथं कटाक्षपातेनैतदनुज्ञातमनया । हन्त प्रतिगृहीतं प्राभृतम् । सुरत-
सत्यङ्कारस्य यावदनेनौषधेन कर्णीपुत्रं सञ्जीवयामि । गृहीत्वोत्थाय स्थित्वा
प्रस्थितोऽस्मि । सुखं भवत्यै । सुभगे गृह्यतामाशीः ।

भयाद्र्तमसूयितप्रचलमेखलानूपुरं
सशङ्कशिथिलोपगूहमवमुक्तनीवीपथम् ।
स्वयं समभिवाह्यत्वयमुदात्तरागायुध-
स्तव प्रथमचोरिकासुरतसाहसं मन्मथः ॥

इति निष्क्रान्तो विटः ॥

Colophon:

पद्मप्राभृतकं नाम भाणः समाप्तः ॥

वररुचिरीश्वरदत्तश्यामिलकश्शूद्रकश्चत्वारः ।
एते भाणा(न्) बभणुः का शक्तिः कालिदासस्य ॥

R. No. 2727.

Paper. 11 × 9¼ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of the Raja of Chirakkal, Malabar district.

(*a*) **कामप्राभृतकम्.**

KĀMAPRĀBHṚTAKAM.

Foll. 1*a*—5*a*.

A brief and introductory treatise on erotic matters. It is apparently based on the Kāmasūtra of Vātsyāyana. By Kēśava.

Complete.

Beginning:

नमत भवानीनाथं तारापतिखण्डमखण्डितकपदम् ।
चारणगणवन्दितचरणं किन्नरगन्धर्वसेवितं वन्दे ॥
कान्तां कुवलयनयनां विमलां ललनाललामभूतां ताम् ।
लीलालोलां सुदतीं नमत रतिं हृच्छयां शिरसा ॥

नास्ति हि कामेन विना लोकोत्पत्तिर्विनाशश्च ।
तस्मात्कामेनेदं ध्रियते विश्वात्मना विश्वम् ॥
जयति वसन्तसुगन्धिः शिवमूर्तिर्विश्वकर्मसाधयिता ।
सुललितवेषविलासस्त्रीजननाथोऽव्ययो मदनः ॥
कामप्राभृतसंज्ञं कामिजनानां हिताय वै यत्नात् ।
क्रियते शास्त्रं ललितं सङ्क्षेपात्केशवेनेदम् ॥

तत्र—

आदौ भेदास्त्रीणामुपलक्ष्य यथाक्रमेण लक्ष्यन्ते ।
यासां ज्ञात्वा चतुराः पूज्यन्ते कामुका जना लोके ॥

तद्यथा—पद्मिनी चित्रिणी शङ्खिनी नागिनी चेति । तासां लक्षणमप्युपदिश्यते—तत्कथम् ।

संरक्ताङ्गी मानिनी चारुवक्त्रा लज्जालोला सूक्ष्मकेशद्विजा या ।
शुद्धा प्रिया सुस्तनी वारिजाक्षी साम्ना वश्या पद्मिनी सुस्वरा स्यात् ॥

End:

आहृत्यैकं कामतन्त्रादनेकाच्छास्त्रं किञ्चिद्याहृतं कामुकानाम् ।
न्यूनं मार्गे यद्यपि स्यादमुष्मिन् तत्क्षन्तव्यं सद्भिरुद्भूतरोषैः ॥

Colophon:

इति कामप्राभृतं वात्स्यायनप्रकरणम् ॥

(*b*) कामानन्दः.

KĀMĀNANDAḤ.

Foll. 5*b*—14*a*.

Similar to the work described under No. 3894 of the D.C.S. MSS., Vol. VIII. By Varadārya, son of Īśvarādhvarin of Kauṇḍinyagōtra. The subjects dealt with in the work are briefly indicated in two stanzas in the beginning.

Complete in three Paṭalas.

Beginning:

यत्पादपद्मरजसा गौतमः प्राप्तवान् प्रियाम् ।
तं वन्दे जानकीनाथं सर्वाभीष्टफलप्रदम् ॥
(आलोड्य काम)शास्त्राणि सर्वाणि मतिवैभवात् ।
करोमि बालबोधार्थं कामानन्दाभिधां कृतिम् ॥

सङ्क्षिप्य सारमादाय सर्वेषामुपकारकम् ।
जातयश्च स्वभावाश्च प्रथमे पटलेऽधुना ॥
प्रकृतिश्च तथा सत्त्वं द्वितीये परिकीर्त्यते ।
तृतीये चौषधं चापि पूर्वाचार्यानुसारतः ॥
हरिणीव . . . . . . त्रिधा ।
पुरुषाश्चापि कथ्यन्ते त्रिविधा इति सूरिभिः ॥
शशश्चैव वृषश्चापि नूनमश्व इति क्रमात् ।
उच्यते लक्षणं तासां तेषां च ऋषिसम्मतम् ॥
वृत्तशीर्षा वक्रकेशी नितम्बाढ्या कृशोदरी ।
. . . . द्वारसुनासा च पक्ष्मलाक्षी मनोहरा ॥

* * * *

Colophon:

इति श्रीवरदाचार्यविरचिते कामानन्दे प्रथमः पटलः ॥

End:

सिद्धिं गच्छति नारीषु नान्यथा मुनिभाषितम् ।
तस्मान्नरोऽतिचतुरः साधयेदौषधान सदा ॥
इति कौण्डिन्यगोत्राब्धिसुधांशुः कामतन्त्रवित् ।
जानकीनाथपादाब्जमत्तभृङ्गस्सदग्रणीः ॥
ईश्वराध्वरिणः पुत्रो वरदार्याभिधस्सुधीः ।
कृतवान् चन्द्रतारार्कस्थायी सर्वहितं कृतिम् ॥

Colophon:

इति श्रीवरदार्यविराचिते कामानन्दे तृतीयः पटलः ॥

(*c*) रतिचन्द्रिका.

RATICANDRIKĀ.

Foll. 14*b*—20*b*.

Similar to the work described under No. 3895 of the D.C.S. MSS., Vol. VIII.

Complete in four Khaṇḍas.

Beginning:

प्रकृत्योरुभयोरैक्यं श्रीनिवासेषुतापि च ।
यस्मिन् प्रभवतीशानस्पर्धये जयतीव सः ॥

पद्मिनी चित्रिणी चापि शङ्खिनी हस्तिनीति च ।
स्त्रीभेदेषूत्तमाद्योक्ता हीयतेऽन्याप्यतः क्रमात् ॥
अन्त्यमध्यादियामेषु निशि शश्वद्रतोत्सुका ।

* * * *

Colophon :

इति रतिचन्द्रिकायां प्रथमः खण्डः ॥

End :

स्वदेशकालावस्थानमवेक्ष्योपांशु तृप्यते ।
मिथुनं येन केनापि वर्ण्यते स विधी रते ॥

* * * *

Colophon :

इति श्रीरतिचन्द्रिकायां चतुर्थः खण्डः ॥

R. No. 2728.

Paper. 11 × 9¾ inches. Foll. 170. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of the Raja of Chirakkal, Malabar district.

नैषधव्याख्या.

NAIṢADHAVYĀKHYĀ.

A commentary on the Naiṣadha of Śrīharṣa, which work has been described under No. 11543 of the D.C.S. MSS., Vol. XX: by Sarvajñamādhavasudhī, son of Nārāyaṇācārya of Vasiṣṭhagōtra and Bhavānī, daughter of Kēśava. The commentary is called Kāmadhēnu.

Contains the Sargas 3 to 16 complete, but wants 82 stanzas in the beginning of the third Sarga.

Beginning :

संप्रति दूत्यं कारयितुं प्रार्थयति। नवभिः प्रोत्साहयति—सञ्चीयतामिति। किमीप्सितं ते विदध इति यदाश्रुतं प्रतिज्ञातं तस्य रक्षणादुत्थं मत्प्राणदानजं च पुण्यं त्वया सञ्चीयतामुपार्ज्यताम्। भो आर्य वृथा निर्हेतुका शङ्का निवार्यताम्। भद्रे परोपकाररूपे मङ्गलेऽपि कर्तव्ये केयं मुद्रा? वैमुख्यमिति यावत्। इ(उ)त्थमिति। सुपि स्थ इति कः। उदः स्थेति पूर्वरूपत्वम्।

* * * *

Colophon :

इति श्रीमद्वसिष्ठकुलतिलककविराजप्रज्ञसर्वज्ञमाधवसुधीश्वररचिते नैषधचरितनिबन्धने कामधेनुनाम्नि तृतीयस्सर्गस्समाप्तः ॥

* * * *

यं प्रासूत वसिष्ठवंशतिलकश्रीप्रज्ञनारायणा-
चार्यः श्रीकविराजकेशवबुधोद्भूता भवानी च यम् ।
तेनाशेषविदा कृते नलकथाकाव्याशयव्यञ्जिनि
ग्रन्थे कामदुघाह्वये सुललितस्सर्गोऽगमत्सप्तमः ॥

End:

शिरोगृहं चन्द्रेण शालते श्लाघत इति चन्द्रस्य शालेति वा सान्वयत्वम् । यथा . . . . प्रतीच्छन् स्वीकुर्वन् इतीति । प्रणिदधुरिव । उद्यमं चक्रुरिव । न तु तात्पर्येण गन्तुमिच्छास्ति । यथा भैमी नलेक्षणे तृप्त्यभावात् । श्रीहर्षमिति । काश्मीरैः देशवासिभिर्महिते पूजिते चतुर्दशमयी प्रकाराः तस्मात् श्रीहर्षात् भूरुत्पत्तिर्यस्य तस्मिन् तद्भुवि ॥

Colophon:

इति षोडशस्सर्गस्समाप्तः ॥

R. No. 2729.

Paper. 11 × 9⅝ inches. Foll. 342. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of Dēśamaṅgalam Manakkal, Dēśamangalam, Malabar district.

Bound in two volumes.

नैषधव्याख्या.

NAIṢADHAVYĀKHYĀ.

Foll. 1*a*—341*b*. Fol. 342*a* contains the name of the owner of the MS. from which this was copied. Fol. 342*b* is left blank.

A commentary on the Naiṣadha of Śrīharṣa : by Viśvēśvarabhaṭṭa. The commentary is called Padavākyāpañcikā.

Contains the Sargas 3 to 22 complete, but wants beginning in the third Sarga.

Beginning:

. . . . . पुंवद्भावः प्रकृते । एक इति । हे दमयन्ति सुधांशुस्तव नयनद्वयस्य कथञ्चन केनापि प्रकारेण तृप्तौ . . . .
. . . .
ासेचनकस्तृप्तिकरोऽस्तु । तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनादित्यमरः ।

अर्थो इति । द्वाभ्यां सन्दानितकं नलीयं नलसम्बन्धि वा नामधेयस्य वृद्धसंज्ञायां वृद्धाच्छः । त्वत्पाणिजानां त्वन्नखानामग्रैः शिखाभिः स्फुरन्ती अङ्कुरस्य श्रीः शोभा यस्य सः । तपस्सुकृतमेव कल्पतरुः । अहो आश्चर्ये ।

* * * *

अश्रान्तप्रसभं वितन्वति सुधासौभ्रात्रभाजां गिरां
हर्षे हर्षकवौ समस्तसुमनस्सुत्रामतामास्थिते ।
प्रायैस्सर्वपथीनताध्वनि भरादामोदयद्भिर्मनः
स्थानासूत्र . . . विलसितैर्नामण्डि भूमण्डली ॥

Colophon:

इति नैषधटीकायां तृतीयस्सर्गः ॥

End:

नवसाहसाङ्कस्य नूतनविक्रमादित्यस्य चरिते चम्पूं गद्यपद्यमयीं वाणीं करोति यस्तस्य तादृशस्य तस्य श्रीहर्षस्य कृतौ नलीयचरिते महाकाव्ये निसर्गोज्ज्वलोऽयं द्वाविंशस्सर्गः गतः समाप्तः ॥

श्रीहर्षस्य विराजतः कृतिरभूत्सा कापि लोकोत्तरा
यस्याः खेलनभूर्मनीषिहृदयप्रासादशृङ्गस्थली ॥
नेपथ्यस्य विधिर्नवार्थघटनास्सख्यो रसव्यक्तयः
शीलं शब्दनयस्स्वयंवरपतिश्चैष स्वयं नैषधः ॥

Colophon:

इत्याचार्यविश्वेश्वरभट्टविरचितायां नैषधचरितटीकायां पदवाक्यपञ्चिकायां द्वाविंशस्सर्गः ॥

R. No. **2730.**

Paper. 11 × 9⅝ inches. Foll. 67. Lines, 20 in a page. Telugu. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Paravastu Vēṅkaṭaraṅganāthācārya of Vizagapatam.

भगवद्भक्तिरत्नावली, आन्ध्रपद्यसहिता.

BHAGAVADBHAKTIRATNĀVALĪ WITH TELUGU POETICAL RENDERING.

Foll. 1*a*—66*b*. Fol. 67 is left blank.

By Viṣṇupurī. Same work as that described under No. 5144 of the D.C.S. MSS., Vol. XI, but with a Telugu rendering in verse by Śrīnivāsa, son of Lakṣmaṇācārya, disciple of Vēṅkaṭācārya of Bhāradvājagōtra.

Contains the Āśvāsas one to three, but wants the beginning.

Colophon:

इति श्रीमद्रामानुजाचार्यकृपाविभवलब्धकविताधुरन्धरभारद्वाजवंशमुक्तायितश्रीविङ्कटाचार्यचरणसमाश्रयणधन्यलक्ष्मणाचार्यपुत्रश्रीनिवासाभिधानप्रणीतभक्तिरत्नावलीग्रन्थे तृतीयाश्वासः ।

R. No. 2731.

Paper. 11 × 9¾ inches. Foll. 20. Lines, 20 in a page. Telugu. Good.

Transcribed in 1918–19 from a MS. of the Arsba Library, Vizagapatam.

निपाताव्ययोपसर्गवृत्तिः, सव्याख्या.

NIPĀTĀVYAYŌPASARGAVṚTTIḤ WITH COMMENTARY.

Foll. 1*a*—19*a*. Foll. 19*b* and 20 are left blank.

A grammatical treatise by Kṣīrasvāmin explaining the Nipāta (particles) Avyaya (indeclinables) and Upasarga (prepositions). It is followed by a commentary written by Tilaka.

Incomplete.

Beginning:

नत्वेशं क्षीराब्धिप्रसूताव्ययरत्नमालया विदुषः ।
निजकुलतिलकस्तिलकस्तिलकयति निदर्शनैरेव ॥

द्योतका निपाताः ।

नामाख्यातयोर्धर्ममात्रव्यञ्जकाः ।

अत ऊर्ध्वं चादयो निपाता अधिक्रियन्ते, यतः—

प्रायशो द्योतकाश्चाद्या निपाता द्रव्यवृत्ति तु ।
स्वराद्यमव्ययं प्राद्या न धात्वर्थविशेषकाः ॥
कर्मप्रवचनीयास्तु क्रियासम्बन्धभेदकाः ।
ऊर्याद्या गतयो वृत्तौ कार्यार्थं सर्वमव्ययम् ॥

किञ्च—

इयन्त इति सङ्ख्यैषामर्थेयत्ता च नास्ति वै ।
प्रयोजनवशादेत्य निपतन्ति परे पदे ॥

च समुच्चयान्वाचयतुल्ययोगिताहेतुषु ॥

च समुच्चये, गार्ग्यो वात्स्यश्चागतौ, पचति च पठति च चैत्रः । समाहारेतरेतरयोगविनियोगास्समुच्चय एव, अनेकस्यैकत्र प्रचयात् ।

End :

बलात्प्रसह्यव(ह्यार्य)हलं हठे ॥

अहो बलात्कारः, प्रसह्यघाती । आर्य[व]लहं(हलं)गृह्णाति । हठात्कण्ठाश्लेषेति हेतौ ङसिः ।

आराद्दूरान्तिकयोः ॥

दूरे—आराद्यातः । अन्तिके—रसं पीतं स्थापयेदारात् ।

R. No. 2732.

Paper. 11 × 9⅜ inches. Foll. 150. Lines, 20 in a page. Dēvanāgarī and Malayalam. Good.

Transcribed in 1918–19 from a MS. of an oil-monger in Calicut.

शिशुपालवधव्याख्या.

ŚIŚUPĀLAVADHAVYĀKHYĀ.

Foll. 1*a*—149*b*. Fol. 150 is left blank.

A commentary on the Śiśupālavadha of Māgha, which work has been described under No. 11719 of the D.C.S. MSS., Vol. XX, by Śrīkaṇṭha, son of Śrīkaṇṭha and grandson of Śrīkaṇṭha. He was born in the family of one Rudra of the Vāriyar caste, who lived in Jayasiṁhamaṅgala on the banks of the Dakṣiṇagaṅgā. His teacher was Śrīkaṇṭhācārya. The commentary is called Bālabōdhikā.

Contains the Sargas one to three complete.

Beginning :

आनन्दकन्दलितमङ्गलभृङ्गमालागानामृतस्तुतमनोहरमाधुरीकम् ।
. . . . वो वैनायकं मदजलं कुशलं तनोतु ॥

* * * *

पारेदक्षिणगङ्गमस्ति महितस्स्वस्तिप्रदो देहिनां
देशः कोऽपि शशाङ्कचूडरमणीसान्निध्यनित्योत्सवः ।
वैतानाग्निविलोलधूमपटलीसौगन्ध्यनैरन्तरी-
मङ्गल्यो जयसिंहमङ्गलमिति क्षोणीसुरैराश्रितः ॥

विद्यते तत्र साहित्यविद्याभ्यासखल्लरिका ।
विश्वपारशवेन्द्रस्य विश्रुतं भवनोत्तमम् ॥
पारम्पर्येण जायन्ते ये तत्र सुकृतोदयात् ।
आचार्या एव ते सर्वे केरलक्ष्माजुषां नृणाम् ॥
रुद्राभिधाना तत्रासीद्भारत्याः पुरुषाकृतिः ।
वरक्रोडस्थलाक्रीडरुद्रतादात्म्यमुद्रिता ॥
आपञ्चाशत्समास्सोऽयं श्रीपञ्चाक्षरजीवनम् ।
चकारासेव्य साहित्यविद्यां स्वकुलवर्तिनीम् ॥
परस्परोपमौ शान्तौ तद्वंशे सार्वलौकिकौ ।
श्रीकण्ठाख्यावुभौ जातौ साहित्यैकपरायणौ ॥
अथात्मना सुसंबद्धं देवश्चन्द्रार्धशेखरः ।
श्रीवरक्रोडवास्तव्यस्तत्कुलं वीक्ष्य हृष्टवान् ॥
स तत्र जन्मलाभाय कुतुकी परमेश्वरः ।
श्रीकण्ठात्पितृतुल्याङ्गो द्वितीयादुदभूत्स्वयम् ॥
स बाल्यात्प्रभृति श्रीमान् साहित्यसुरपादपः ।
अतिगम्भीरवाग्गुम्भसुभगंभावुको बभौ ॥
श्रीकण्ठाख्यावि(ख्य इ)ति स्पष्टनिजाविर्भावकौतुकः ।
असूत जगतां भूत्यै शिष्यकल्पद्रुमानसौ ॥
ज्ञानेन वाचा वयसा प्रवृद्धत्वमुपेयिवान् ।
सोऽभजत्पलिताभोगं पुण्याङ्कुरमिवोदितम् ॥
यथा यथा वयो यातं तस्य ज्ञानगरीयसः ।
तथा तथा समायाता स्वच्छता मनसस्तनोः ॥
शीतलीकृतचित्तस्य श्रीकोल्लरगिरीन्द्रजा ।
प्रविवेशान्तरात्मानं शिवस्येवास्य निर्वृता ॥
जयसिंहादिमङ्गल्यवास्तव्यः श्रीमहेश्वरः ।
अनेन सौहृदमधात्प(द्व)रक्रोडेश्वरेच्छया ॥
सदाशिवपदाम्भोजभक्तिभाररसायनम् ।
मूर्ध्ना वहन्नसावुच्चैरानतो . . . . ॥

अङ्गस्याङ्गस्य तस्यास्य स्मारंस्मारं कुतूहली ।
किन्तु वक्ष्ये ततो जातः तन्नामाहं सतां मतः ॥
गुरोरनन्तरं सोऽहं कारुण्येनास्य भूयसा ।
बालकोऽपि प्रयत्नेन कुलविद्यामुदूढवान् ॥
मनुस्कराम्बुजस्थास्नुगुरुभूतनियोगतः (?) ।
अहं पुनर्याज्यशिक्षादक्षो देशिकतामगाम् ॥
गुरोर्नियोगाद्याज्यानां शश्वत्प्रार्थनयापि च ।
चतुष्टयादिग्रन्थानां व्याख्या बह्वचः कृता मया ॥
सोऽहं माघकवेः काव्यपारावारतितीर्षया ।
वितनोमि सुविस्तीर्णां व्याख्यानौकां विचक्षणः ॥

अथ प्राचीनजनिसहस्रसततसमुपासितसकलविद्यासत्त्वविभूतिस्स्वयंप्रभूतसमीचीनवासनावैभवप्रभववैदुषीविशेषविभूषितशेमुषीसमुद्धेषः परमभागवतः कविकुलपरमेश्वरः परमेश्वरचरितचातुरीविलसितकलासर्वस्वकुलभूतं शिशुपालवधाभिधानं (प्र)बन्धं निबन्धुं प्रक्रममाणस्तावदादौ वस्तुनिर्देशं वितनोति—श्रियः पतिरित्यादिना । त्रिविधं हि प्रबन्धमुखप्रतिष्ठा । आशीर्नमस्क्रिया वस्तुनिर्देशश्चेति ।

* * * *

श्रियः लोकमातुः भगवत्याः भर्ता ; श्रीरिन्दिरायां शोभायां स्यात्सम्पत्तिलवङ्ग्योरिति वैजयन्ती । अनेन विष्णुरेवात्र विवक्षितः । नार्कवासवादयः ।

* * * *

Colophon:

इति श्रीकण्ठाचार्यशिष्येण श्रीकण्ठेन विरचिते बालबोधिकानामनि माघव्याख्याने प्रथमस्सर्गः समाप्तः ॥

End:

केवलस्यैव तुरङ्गस्य जन्ममात्रसम्बन्धिनः तथैवैकेन भूभृता भृशं मथिता चिरापेतश्रियश्च सलिलनिधेराधिक्यकथनाद्यतिरेकोऽलङ्कारः ॥

नजभजजा जरौ हरमतिकथिता भुवि पञ्चकावली इत्युक्तलक्षणं पञ्चकावलीवृत्तम् । रुचिरेति केचित् । नजभगणास्ततस्त्री जगणा रगणो रुचिरां विजानते इति हि लक्षणम् ।

Colophon:

इति माघव्याख्याने तृतीयस्सर्गस्समाप्तः ॥

R. No. 2733.

Paper. 11 × 9⅞ inches. Foll. 26. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of Mānavikrama Anujan Kuññuṇṇi Rāja of Padiññārekōvilagam (3rd Raja), Malabar district.

अलङ्कारग्रन्थः.

ALAṄKĀRAGRANTHAḤ.

Foll. 1*a*—25*a*. Foll. 25*b* and 26 are left blank.

A treatise on rhetoric and figures of speech. The name of the author is not given.

Wants the beginning and end.

Beginning:

अथ शब्दार्थोभयाश्रितानलङ्कारान् प्रदर्शयितुकामः शब्दद्वारार्थप्रतीतेश्शब्दस्यान्तरङ्गत्वात् प्रथमं तदाश्रितानलङ्कारान् प्रतिपादयितुं तेषाञ्च पौनरुक्त्यनिबन्धनत्वात् पौनरुक्त्यस्य तावद्धेयोपादेयत्वेन द्वैविध्यं प्रदर्श्योपादेयांशेऽलङ्कारान् स्थापयति । पौनरुक्त्यं त्रिधा—

* * * *

आमुखे त्ववभासश्चेदन्ते पुनरतोऽन्यथा ।
पुनरुक्तवदाभासाद्यलङ्कारसमुत्थितिः ॥

पौनरुक्त्यं तावच्छब्दगतत्वेनार्थगतत्वेन शब्दार्थोभयगतत्वेन च त्रिधा भवति । तत्र शब्दार्थोभयगतयोः पौनरुक्त्ययोरापर्यन्तं तदवस्थत्वे दोषरूपतैव ।

* * * *

अर्थालङ्कारप्रकरणमारभ्यते । तत्राप्यनेकालङ्कारबीजभूतेति प्रथममुपमोच्यते—

उपमा यत्र साधर्म्ये भेदाभेदतुलास्थितौ ।
धर्माद्युक्तेरनुक्तेश्च पूर्णा लुप्तेति सा द्विधा ॥

उपमानोपमेययोर्भेदाभेदतुल्यत्वे साधर्म्यमुपमालङ्कारः ।

End:

लोकन्याये प्रत्यनीकप्रतीपमिलितसामान्यतद्गुणातद्गुणोत्तरसूक्ष्मव्याजोक्तिवक्रोक्तयः यथास्थितवर्णने स्वभावोक्तिभाविके तद्विपर्यय उदात्तम । मिथो

नैरपेक्ष्ये संसृष्टिः । अन्यथा तु सङ्करत्रयम् । इमे शब्दार्थगता रसोपकारिणो विभावानुभावाः पृथग्य . . . ।

R. No. 2734.

Paper. 11 × 9¼ inches. Foll. 16. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of the Arsha Library, Vizagapatam.

नानार्थसङ्ग्रहः.

NĀNĀRTHASAṄGRAHAḤ.

Foll. 1*a*—16*a*. Fol. 16*b* is left blank.

A lexicon of homonymous words arranged alphabetically: by Ajayapāla.

Contains from अकारादि to the end of झकारादि.

Beginning:

जयन्ति शास्तुः पदपङ्कजाङ्कुरा नखांशवश्चन्द्रमरीचिकोमलाः ।
विनम्रदेवासुरमौलिषु श्रियं वहन्ति ये प्रस्फुटमालतीस्रजः ॥
वीक्ष्य पूर्वकविग्रन्थानकाराद्यादिभिः पदैः ।
क्रमादजयपालेन कृतो नानार्थसङ्ग्रहः ॥
सर्वत्रादावनेकार्थः प्रथमान्तोऽत्र दर्शितः ।
वर्तमानस्सप्तम्यन्ते सप्तम्यन्तैरभेदिते ॥
त्रिष्वेव बहुवचनं कृतं न चतुरादिषु ।
विना लिङ्गं विशेषेण नैवात्र पुनरुक्तता ॥
अमृतं हृद्ये पीयूषे यज्ञशेषेऽप्ययाचिते ।
मुक्तातोयेऽमृता धात्र्यां गुडूचीपथ्ययोरपि ॥

* * * *

Colophon:

इत्यकारादिः ।

End:

झञ्झरिः केशचक्रे च शुद्धे क्लेदेऽपि दृश्यते ।
झिल्ली किटान्ते स्थालीलग्नदग्धान्धसि स्मृता ॥
झसा नागबलायां स्याज्झषो मत्स्ये झषं खिले ;

Colophon:

इति झादिः ।

R. No. 2735.

Paper. 11 × 9½ inches. Foll. 45. Lines, 20 in a page. Telugu. Good

Transcribed in 1918-19 from a MS. of Sanskrit Library, Bobbili, Vizagapatam district.

Foll. 15*b* and 24*a* are left blank.

कर्मर्षिप्रमाणसङ्ग्रहः.

KARMARṢIPRAMĀṆASAṄGRAHAḤ.

Foll. 1*a*—43*b*. Fol. 44 gives the contents of the work. Fol. 45 is left blank.

A collection of authoritative stanzas giving details, such as the time and the particular mode of performance, etc., of various religious rites: by Rāmacandra.

Complete. Contains the following topics:—

१. उपवीतिप्राचीनावीतिविचारः.
२. कर्मारम्भवन्दनकथनम्.
३. लेखनदर्भविसर्जनदन्तकाष्ठविसर्जनदिङ्निर्णयः.
४. कर्मणां लौकिकाग्निवैदिकाग्निकार्याकार्याणि.
५. ज्वालादिरूपतत्तदवयवज्ञानम्.
६. दर्भनिर्णयः.
७. कुशोत्पाटनिर्णयः.
८. निन्द्यदर्भस्वरूपम्.
९. पात्रसादनदर्भनिधानलक्षणम्.
१०. अङ्गुलनिर्णयः.
११. इध्मदारुनिर्णयः.
१२. निषिद्धसमिधः.
१३. दर्वीसंस्कारः.
१४. परिधिनिधानम्.
१५. मुखाहुतिः.
१६. आहुतिप्रमाणम्.
१७. स्वाहाकारलक्षणम्.
१८. समित्सन्नहनहोमः.
१९. परिधिप्रहरः.
२०. प्रायश्चित्ताहुतयः.
२१. प्रणीतामार्जनम्.
२२. ब्रह्मोद्वासनम्.
२३. आशीर्वचनम्.
२४. तप्तकृच्छ्रम्.

Beginning:

शुभकर्मकालाः—

श्रौतस्मार्तक्रियाणां च सवषामादितस्सदा ।
कार्यमग्निमुखं वक्ष्ये यथोक्तं मुनिभिर्वरैः ॥
गाङ्गेयवाक्तमोमग्नं दुर्बोध्यं(धं) मूढचेतसाम् ।
अर्थं प्रकाशयाम्यद्य वागीशेन कपर्दिनाम् ॥

अत्र कपर्दिनामिति बहुवचनमितरमुनिग्रहणार्थम् । तस्य प्रधानत्वात्तद्ग्रहणं प्रथमत उक्तम् । ततस्सार्वकालिकविधानं परिहरति मनुः—

सर्वकर्मसु पूर्वाह्णे उत्तरायणगे रवौ ।
पूर्वपक्षशुभाहर्क्षेषूपक्रान्तिर्विधीयते ॥

एतत्तु नियतनिमित्तविवाहादिविषयम् । जातकर्माद्यनियतनिमित्तकर्मसु निमित्तानन्तरविधानात् ।

* * * *

(श्रु) निवीतं मनुष्याणां प्राचीनावीतं पितृणामुपवीतं देवानामिति ।

मनुष्याणां गाङ्गेयोऽपि यज्ञोपवीतिना प्रदक्षिणमिति तत्रादौ स्वस्य गृहस्यावश्यकत्वमुच्यते ।

End:

द्वितीयपुरुषस्तु अग्नये पथिकृते स्वाहा । तथा त्यागः । अग्नये स्विष्टकृते स्वाहा । अग्नये स्विष्टकृत इदम् । इति स्वकीयाग्नौ चरुं श्रपयित्वा एवं कुर्यात् ॥

Colophon:

इति रामचन्द्रविरचितः कर्मर्षिप्रमाणसङ्ग्रहः समाप्तः ॥

R. No. **2736.**

Paper. 11 × 9⅜ inches. Foll. 40. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Ampalakat Karuṇākara Menon, Chalapuram, Calicut, Malabar district.

वृत्तरत्नाकरव्याख्या.

VṚTTARATNĀKARAVYĀKHYĀ.

Same work as that described under No. 1792 of the D.C.S. MSS., Vol. III, but with additional stanzas in the beginning and slightly different readings in the end.

Complete.

Beginning:

शुक्लाम्बरधरं विष्णुं (. . .) सर्वविघ्नोपशान्तये ॥
कस्त्वं गोपालसूनुर्निशि पशुपसुतस्यात्र किं गच्छ गोष्ठं
बाले रामानुजं मामव रमय सतीमूर्मिलां निर्मलाङ्ग ।
पद्मे पद्मेक्षणोऽहं किमु मम दयितो बाढमित्येवमुक्ते
द्वाराण्युद्घाट्य नासापुटनिहितकरा पातु सा तत्समेता ॥

कस्त्वं दैत्यारिसूनुः कथय कथमिह प्राप्तवान् गोरनष्टः
शम्भोः कोऽहं सुशीले तदिह ननु मया पृच्छचते मदशुभाङ्गि । ?
वर्णाः किं वा वदन्ति द्रुहिणमिह शुभे विद्धि मामित्थमुक्ते
प्रीत्याभ्येत्योपगूढा प्रियमतिसुखदा सा तु वाणी भवेन्नः ॥
कस्त्वं भद्रे गिरीशः किमु मम जनकस्सोऽस्मि नागेन्द्रकन्या-
भर्ता गच्छाद्य भद्रां तदिह खलु मया प्राप्तमम्भोरुहाक्षि ।
किं वा जिष्णोः प्रियाहं नहि किमिह मम प्राणनाथारिजिष्णोः
शम्भोरित्थं गिरीशे निगदति मुदिता सा तु दद्याच्छुभन्नः ॥

End:

मो भूमिस्त्रिगुरुः श्रियं वितनुते भः पूर्वगुश्चन्द्रमाः
कीर्तिं योऽभ्युदयं च यः प्रथमलो नः स्वश्चिरायुस्त्रिलः ॥
वायुस्सोऽन्तगुरुर्विदेशगमनं शून्यं नभस्तोऽन्तलः
रोऽग्निर्मध्यलघुर्मृतिं दिनमणिर्मध्येगुरुर्जो रुजम् ॥
यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद्व्यवहाराकाले ।
सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति ना(चा)पशब्दैः ॥

इति गुरुचरणारविन्दकलिकामुखविगलितमकरन्दबिन्दुकणिकाकणशीकरः करोतु मानसपरमानन्दम् ॥

Colophon:

इति वृत्तरत्नाकरे छन्दश्शास्त्रे षष्ठोऽध्यायः समाप्तः ॥

R. No. 2737.

Paper. 11 × 9⅝ inches. Foll. 48. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918-19 from a MS. of the Raja of Chirakkal, Malabar district.

अष्टाक्षरदीपिका.

AṢṬĀKṢARADĪPIKĀ.

Foll. 1*a*—48*a*. Fol. 48*b* is left blank.

Same work as that described under No. 5194 of the D.C.S. MSS., Vol. XI.

Contains one to six Adhyāyas complete.

R. No. 2738.

Paper. 11 × 9⅝ inches. Foll. 20. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Rāmagōvinda Śāstri of Narasapuram, Kistna district.

(*a*) एवकारवादार्थः.

ĒVAKĀRAVĀDĀRTHAḤ.

Foll. 1*a*—2*b*.

A discussion, according to the Naiyāyikas, of the meaning signified by the expression एव when found along with a noun, adjective or verb.

Complete.

Beginning:

एवकारस्त्रिविधः—विशेष्यसङ्गतः, विशेषणसङ्गतः, क्रियासङ्गतश्चेति । तत्र विशेष्यसङ्गतस्यैवकारस्यान्ययोगव्यवच्छेदोऽर्थः । पार्थ एव धनुर्धर इत्यादौ विशेषणे धनुर्धरे पार्थान्ययोगव्यवच्छेदबोधनात् । धनुर्धरपदस्योत्कृष्टधनुर्धरे लाक्षणिकत्वात्तथैव तात्पर्यात् ।

End:

अन्ययोगव्यवच्छेदैकदेशे अन्यत्वे पार्थादेरन्वयो निष्कलङ्कः । अधिकमस्मत्कृतपदार्थमालाप्रकाशे इत्यलमतिविस्तरेण ॥

Colophon:

इत्येवकारवादस्संपूर्णः ॥

(*b*) गङ्गायां घोष इति क्रोडपत्रम्.

GAṄGĀYĀṀ GHŌṢA ITI KRŌḌAPATRAM.

Foll. 3*a*—7*a*. Fol. 7*b* is left blank.

A discussion of the meaning of the expression गङ्गायां घोषः in accordance with the Naiyāyika school.

Complete.

Beginning:

ननु गङ्गायां घोष इत्यादौ गङ्गादिपदे तीरविषयोपस्थितिजनकतावच्छेदकशक्तिः प्रतीयते । घोषादिपदे च तीरविषयकबोधजनकतावच्छेदकशक्तिः स्वीक्रियते । वाचकत्वं च तद्विषयकशान्दबोधजनकतावच्छेदकशक्तिमत्त्वे सति तद्विषयकोपस्थितिजनकतावच्छेदकशक्तिमत्त्वम् ।

End:

एवं च वृत्त्यनुपस्थापितस्यापि संसर्गस्य शाब्दबोधोपगमे व्यभिचार(रा)प्रसक्त्या न किञ्चिद्बाधकमिति किं त्व(त)त्र वृत्तिकल्पनेनेति ॥

Colophon:

इति क्रोडग्रन्थः ।

(c) सिद्धान्तलक्षणक्रोडपत्रम्.

SIDDHĀNTALAKṢAṆAKRŌḌAPATRAM.

Foll. 8a—20b.

Similar to the work described under No. 4333 of the D.C.S. MSS., Vol. VIII.

Incomplete.

Beginning:

अथाभावीयविशेषणताविशेषसम्बन्धेन साध्यवदवृत्तिर्योऽभावस्स एव लक्षणघटक इत्यनेनैव तद्व्यक्तित्वावच्छिन्नाभाववारणादलमनवच्छेदकानुसरणमिति। न च वह्निमान् धूमादित्यादावव्याप्तिः, घटाभावस्यापि लक्षणाघटकत्वादिति वाच्यम्, वह्न्यभावाभावस्यैव लक्षणघटकत्वात्।

End:

हेतुतावच्छेदकोभयत्वे द्रव्यादिनिष्ठाधेयतावच्छेदकत्वस्य सर्वस्वीकृतत्वादिति चेदत्र केचित्। यन्निष्ठाभावप्रतियोगितावच्छेदकं तथाविधस्याधिकरणं वाच्यमतो न तत्रातिव्याप्तिः। न च द्रव्यं संयोगादि . . .

R. No. 2739.

Paper. 11 × $9\frac{5}{8}$ inches. Foll. 6. Lines, 20 in a page. Telugu. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Kāsīnātha Bhairavamūrtigāru of Elakarru, Kistna district.

(a) चरलिङ्गप्रतिष्ठा.

CARALIṄGAPRATIṢṬHĀ.

Foll. 1a—3b. Fol. 4 is left blank.

Similar to the work described under No. 5441 of the D.C.S. MSS., Vol. XI.

Complete; as found in the ninth Adhyāya of the Sarvāgamasudhārṇava.

Beginning:

अथ संस्थापनं वक्ष्ये चरलिङ्गस्य पद्मज।
धन्यं यशस्यमायुष्यं पुत्रपौत्रप्रवर्धनम्॥
शैलरत्नजलोपेतं चरलिङ्गस्य लक्षणैः।
अङ्गुल्यादिवितस्त्यन्तं चरलिङ्गं तु कारयेत्॥
मासे मार्गशिराषाढे श्रावणे वा विशेषतः।
प्रशस्तानि च मासानि युक्तान्यन्यानि सम्प्रति॥

युक्तमासेषु सर्वेषु शुक्लपक्षे शुभे दिने ।
शुभवारादिभिर्युक्ते स्थापनं तु समाचरेत् ॥
प्रतिष्ठादि न पूर्वे तु कारयित्वाङ्कुरार्पणम् ।
यागार्थं मण्टपं कुर्याद्गृहे देवालये तथा ॥
सप्तषट्पञ्चहस्तैर्वा चतुष्करमथापि वा ।
मण्टपं कारयेद्धीमान् षोडशस्तम्भसंयुतम् ॥

End:

एवं यः कुरुते भक्त्या लिङ्गस्य स्थापनं सुधीः ॥
ऐश्वर्यमतुलं प्राप्य पुत्रैः पौत्रैश्च संयुतम् ।
इहैव धनवान् श्रीमान् सोऽन्ते शैवं पदं व्रजेत् ॥

Colophon:

इति सर्वागमसुधार्णवे चरलिङ्गप्रतिष्ठाविधिर्नाम नवमोऽध्यायः ॥

(*b*) पञ्चाक्षरीयन्त्रोद्धारः.

PAÑCĀKṢARĪYANTRŌDDHĀRAḤ.

Foll. 5*a*—6*b*.

Transcribed in 1918-19 from a MS. of Ivaṭūri Nāgabhūṣaṇam Pantulugāru of Masulipatam.

On the drawing of a diagram in a copper plate and of the syllables of the Pañcākṣarīmantra and on the efficacy of such a consecrated diagram.

Incomplete.

Beginning:

अथ यन्त्रं प्रवक्ष्यामि भोगमोक्षफलप्रदम् ।
आयुर्वृद्धिकरं वश्यं जयरक्षाकरं शिवम् ॥
सर्वसिद्धिकरं पुण्यमणिमादिगुणप्रदम् ।
अपमृत्युजयं श्रीदं सर्वदोषनिकृन्तनम् ।
अपस्मारक्षयकरं सर्वव्याधिप्रभञ्जनम् ।
सर्वदौर्भाग्यदलनं ततस्संसारतारकम् ॥

* * * *

ताम्रपत्रे तथा यन्त्रं पुष्पगन्धसमन्वितम् ।
शुभैर्वा कारकैर्वापि दूर्वायां पूर्वजन्मुखम् (?) ॥
उत्तराभिमुखो भूत्वा विधिवद्यन्त्रमालिखेत् ।
मध्ये पञ्चदलाख्यं च केसराद्यं सकर्णिकम् ॥

End:

ईशान्ये वश्यबीजं च गायत्रीमन्त्रयन्त्रकम् ।
उदीच्यां मन्त्रगायत्रीं यन्त्रगायत्रि दक्षिणे ॥
प्राणप्रतिष्ठा नैरृत्यां वायव्ये भूतपञ्चकम् ।
दिक्पालभूतबीजानि यन्त्रस्याङ्गानि वै दश ॥

R. No. **2740.**

Paper. 11 × 9⅜ inches. Foll. 15. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Ampalakat Karuṇākara Menon, Chalapuram, Calicut, Malabar district.

कृष्णगीतिव्याख्या.

KṚṢṆAGĪTIVYĀKHYĀ.

Foll. 1*a*—15*b*. Fol. 16*b* is left blank.

A commentary by Anantanārāyaṇa Śāstrin on the Kṛṣṇagīti which is a poem dealing with the leading incidents in the life of Lord Kṛṣṇa. The commentary is called Hlādinī.

Contains the ninth Sarga only.

Beginning:

अथारिष्टवधं विज्ञापयति अर्धेन—आयान्तमिति । अथ त्वं जातु कंसप्रेरणया त्वत्प्रहारार्थमायान्तं भद्रात्मकमप्यभद्रात्मकमिति विरोधाभासः । बलीवर्दरूपं मङ्गलस्वभावं चेत्यर्थः । उक्षा भद्रो बलीवर्दः । शिवं भद्रं कल्याणं शुभमिति चामरः । तं प्रख्यातमरिष्टं तत्संज्ञमसुरं गोष्ठे सार्द्रमार्द्रसहितम् । आर्द्रशब्दो भावप्रधानः । वसनमिव पादेनाक्रम्य निष्पीडयामासिथ । निष्पीडितवानसीत्यर्थः ॥

End:

द्विचत्वारिंशता पद्यैर्नवमेऽस्मिन् त्रिभिः पदैः ।
सर्गेऽक्रूरप्रसादान्तं हरेः कर्मानुवर्णितम् ॥
भगवद्दर्शनौत्सुक्यमक्रूरस्यादिमे पदे ।
ततः पराभ्यां स्तवनं हरेरक्रूरकर्तृकम् ॥

Colophon:

इत्यनन्तनारायणशास्त्रिकृतायां ह्लादिन्याख्यायां कृष्णगीतिव्याख्यायां नवमस्सर्गस्समाप्तः ॥

R. No. 2741.

Paper. 11 × 9¾ inches. Foll 190. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918–19 from a MS. of Dēśamaṅgalam Manaikkal of Dēśamaṅgalam, Malabar district.

लघुमानसम्, सव्याख्यानम्.

LAGHUMĀNASAM WITH COMMENTARY.

Foll. 1a—186b. Foll. 187a—188a give the contents of the work. Foll. 188b and 190 are left blank.

The text is the same as that described under No. 13475 of the D.C.S. MSS., Vol. XXIV. The commentary is by Sūryadēva-Sōmasut of Naidhruvagōtra. The commentator in an instructive introduction states that the text was previously commented upon by Praśastadharācārya of Kāshmīr and that in his work he gives the Vāsanā which was omitted by the previous commentator. He also comments in the beginning on five stanzas written in the Āryā metre by Muñjālakācārya or Mañjulācārya, the author of the text, as an introduction to his work. In the first of these stanzas the Śaka date is mentioned as 854. In the course of the commentary on the first stanza of the text proper the commentator states that Mañjula's work consists of 60 stanzas and that he wrote at first another Laghumānasa as well as a Mahāmānasa. From the concluding portion of the commentary extracted below from another MS. brought to the Library, it is seen that Sūryadēva wrote also the following works:—Bhāskarācāryamahātantravivaraṇa (called Gōvindasvāmya), Bhaṭaprakāśa (a commentary on the Āryabhaṭa's work), a commentary on Varāhamihira's Mahāyātrā, a commentary on the Jātakapaddhati of Śrīpati.

विश्वेशशाककुम्भार्कहस्तज्ञर्क्षाप्तजन्मना ।
कथिता सूर्यदेवेन ग्रहास्तोदयवासना ॥

इति पूर्वं मया कृता ग्रन्था अनुक्रम्यन्ते भास्कराचार्यमहातन्त्रविवरणं गोविन्दस्वाम्यं प्रथमं व्याख्यातम् । अत्रार्यभटीयस्य शास्त्रस्य भटप्रकाशाख्यं संक्षिप्तं भाष्यं कृतम् । ततो वराहमिहिरकृता महायात्रा सङ्क्षेपतो व्याख्याता । इदं मानसाख्यं करणं मूलवासनासहितसङ्क्षेपवासनाप्रदर्शनार्थं विस्तरेण विवृतम् । इदानीं श्रीपतिकृता जातकपद्धतिर्व्याख्याता । तावद्देवी सरस्वती पूरयिष्यति सिद्धम् ॥

इत्थं मानसकरणं व्याख्यातं सूर्यदेवसोमसुता ।
श्रीसूर्यदेवनाम्नो मातृभ्रातुः प्रसादेन ॥

Colophon:

इति सूर्यदेवसोमसुद्विरचिते मानसव्याख्याने ग्रहोदयास्तमयाधिकार-श्चतुर्थः ॥

Breaks off in the fourth Adhyāya.

Beginning:

अध्यात्मविद्यामुपदेशयन्तं दृढं प्रपन्नाय धनञ्जयाय ।
प्रतोदहस्तं प्रगृहीतरश्मिं देवं प्रपद्ये वसुदेवसूनुम् ॥
स्कन्धत्रयार्थविदुषा सूर्यदेवेन यज्वना ।
मानसाख्यग्रहज्ञानवामनाद्य प्रदर्श्य(काश्य)ते ॥

धर्मं जिज्ञासमानानां साक्षात्परम्परयाऽर्थधर्मज्ञानोपायभूतानि चतुर्दश-विद्यास्थानानि स्मर्यन्ते ।

* * * *

तथा च वृद्धगर्गः—

गणितं जातकं शाखां यो वेत्ति द्विजपुङ्गवः ।
त्रिस्कन्धज्ञोऽपि निर्दिष्टस्संहितापारगश्च सः ॥

तत्र कालक्रियाख्यस्य ग्रहगतिग्रहणादेर्गोलाख्यस्य (ज्योतिश्चक्रग्रहभ्रमण-धरित्रीसंस्थानैश्च प्रतिपादकः) ज्योतिश्शास्त्रांशो गणितस्कन्धः । जननकाल-कर्मानुष्ठानकालयोरुदयलग्नग्रहसंस्थानादिवर्गाज्जातस्य कर्मानुष्ठातुश्च शुभाशुभ-प्रतिपादको ज्योतिश्शास्त्रांशो होराजातककालमुहूर्तविधानादिशब्दवाच्यो जा-तकस्कन्धः । ग्रहचारोत्पातादिवशाज्जगच्छुभाशुभसूचको ज्योतिश्शास्त्रांश-श्शाखासंहितादिशब्दवाच्यः शाखास्कन्धः ।

* * * *

तत्र सिद्धान्तोऽपि पञ्चविधः । यथा वराहमिहिरः—

पौलीशरोमशवासिष्ठसौरपैतामहास्तु सिद्धान्ताः ।
पञ्चभ्यो द्वावाद्यौ व्याख्यातौ लो(ला)मदेवेन ॥

पौलीश इति स्फुटोऽसौ तस्यासन्नश्च रोमशः प्रोक्तः । स्पष्टतर-स्सावित्रः । परिशेषौ दूरविभ्रष्टौ । एते च पूर्वकालीनास्सिद्धान्ताः । काल-दैर्घ्यायत्तग्रन्थविप्लवादिना दृग्गणितविसंवादादुपेक्षिताः । इदानीन्तु सु(आ)र्य-भट्टी(टी)यब्रह्मगुप्तकृतब्रह्मसिद्धान्तमयमतसूर्यसिद्धान्तसिद्धान्तशेखरादीन्युदा-हरणानि चतुर्युगग्रहभगणाद्युपदेशपूर्वं कलिगताहर्गणो(णेन) शास्त्रीयगुणहारै-र्वर्तमानवर्षगताहर्गणादिभिस्सङ्क्षिप्तगुणहारैश्च ग्रहगत्यादिप्रतिपादकं शास्त्रं

महातन्त्रम् । तत्र शिष्यधीवृद्धिदमहाभास्करीयाण्युदाहरणानि । चतुर्युगभगणान्युपदेशे पूर्वमेव कलिगतेनैवाहर्गणेन शास्त्रीयगुणहरैरेव ग्रहगत्यादिप्रतिपादकं शास्त्रं तन्त्रम् । तत्र लघुभास्करीयप्रभाकरगणितयोगीश्वरकृततन्त्रप्रदीपान्युदाहरणानि । कलिगतेऽभीष्टकालेऽर्कादिमध्यमानयनाय ध्रुवादीन्निबध्य ध्रुवकालपतनेनाहर्गणेन शास्त्रीयगुणहारैस्संक्षिप्तेन वा तेन सङ्क्षिप्तैरेव गुणहरैर्ग्रहगत्यादिप्रतिपादकं शास्त्रं करणम् । तत्र पञ्चसिद्धान्तिकाखण्डखाद्यकपरहितमानसलोकालोकगणितान्यनेकान्युदाहरणानि । तत्र मानसाख्यं करणमुत्तरदेशस्थप्रकाशाख्यपत्तनवासिना सर्वज्योतिश्शास्त्रगणितस्कन्धपारगेण मुञ्जालकाचार्येण कृतन्तदिदं करणं काश्मीरवासिना प्रशस्तधराचार्येण सोदाहरणं व्याख्यातम् । तत्र मूलवासना सङ्क्षेपवासना वा न प्रदर्शिता । उभयविधवासनाप्रदर्शनार्थमस्माभिरुदाहरणप्रदर्शनपुरस्सरं विस्तरेण व्याख्यायते । तत्र तावन्मञ्जुलकाचार्यः शास्त्रशरीराननुप्रविष्टं ध्रुवकं मानसाख्यं करणं चिकीर्षुरादावेव पञ्चभिरार्यासूत्रैः ध्रुवकान्निबध्य-(बन्ध) । तानि प्रथमं व्याख्यायन्ते ।

तत्राद्याभ्यामार्यासूत्राभ्यां ध्रुवककलिशकाब्दाद्युपदेशपूर्वकं रव्यादीनां सप्तानां ग्रहाणामार्यभटादिसिद्धान्तसिद्धान् ध्रुवभूतान्मध्यमानाह—

कृतशरवसुमितशाके चैत्रादौ सौरिवारमध्याह्ने ।
राश्यादिरजनृपार्को रविरिन्दुर्भवधृतिर्द्वियमाः ॥
द्व्युत्कृतिखानि युगोत्कृतिकराब्धयः खाष्टनवदशं त्रिसुराः ।
गोष्ठा विंशतितानाः कुजादयस्सूर्यभगणान्ते ॥

कृतशरवसुमितशाके चतुष्पञ्चाशदुत्तरशताष्टकपरिच्छिन्ने शकेन्द्राणामब्दे ततश्चैत्रादौ चित्रया युक्ता पौर्णमासी चैत्री सा यस्मिन् मासे स चैत्रो मासः चन्द्राब्दस्य प्रथमो मासे इत्यर्थः ।

* * * *

एवमुपोद्घातं प्रदर्श्य शास्त्रं व्याख्यायते । तत्र तावदाचार्यो मुञ्जालं(लः) स्वनिवासकीर्तिगोत्रजातिप्रयोजनोक्तिपुरस्सरं लघुमानसाख्यकरणस्यारम्भमाद्येन श्लोकेन प्रतिजानीते—

प्रकाशादित्यवत्ख्यातो भारद्वाजो द्विजोत्तमः ।
लब्धपूर्वस्फुटोपायं वक्ष्येऽन्यल्लघुमानसम् ॥ इति ।

उत्तरदेशे कस्मिंश्चित्प्रकाशाख्यं पत्तनं विद्यते । तत्र भगवानादित्य· प्रतिष्ठापितस्वप्रतिमायां सन्निहितः तद्देशीयैस्सर्वैर्जनैस्समाराध्यते । स यथा सर्वासु दिक्षु ख्यातः तथादित्यवत् ख्यात इत्यनेन प्रारभ्यमाणस्य करणस्य अविघ्नसमाप्तिप्रचयगमनप्रयोजनमिष्टदेवतास्तुतिरूपं मङ्गलाचरणं मया कृतमिति शिष्यशिक्षार्थं प्रदर्शयति । तथा देशेषु प्रसिद्धः सर्वगणितः शास्त्रवित् ब्राह्मणवर्यो भरद्वाजगोत्रः मुञ्जालनामाचार्यस्तस्मिन्नेव पत्तने प्रतिवसति । स महामानसाख्यं गणितशास्त्रम् अन्यानि च बहूनि शास्त्राणि दृष्ट्वा तदुक्तं गणितं संक्षिप्य षष्ठ्यानुष्टुब्भिर्लघुमानसाख्यं करणं कृत्वा तत्रत्याय राज्ञे दर्शयितुं सशिष्येण केनचित् विशदं लेखयामास ।

स दुष्टात्मा शिष्यः तं श्लोकमुपादाय राज्ञस्सकाशं गत्वा लघुमानसाख्यं करणं मया कृतमिति राज्ञे कथयामास । स तु राजा धीमान् युष्मदाचार्ये सन्निहिते दर्शयेत्यवादीत् । ततो राजदर्शनार्थं गते मुञ्जाले भवच्छिष्येणानेन किं लघुमानसाख्यं करणं कृतमिति अपृच्छत् । मुञ्जालस्तु तदनन्तरं हासमकार्षीत् । ततो राजा हासकारणं पप्रच्छ । त्वयि राजनि सर्वे(र्वैः)सर्वं कर्तुं शक्यमित्यनेनाभिप्रायेण हासः कृतः इति मुञ्जालः प्रत्यवादीत् ।

ततो (रा)जा तत्त्वज्ञानोपायः कथ्यतामित्यवादीत् । इदं करणं त्वत्सकाशे तिष्ठतु । त्वद्रक्षिताभ्यामद्यैव करणान्तरं क्रियतामिति मुञ्जालेनोक्तः द्वयोरपि राजा गृह एव रक्षां चकार । ततो मुञ्जालः स्वल्पेनैव कालेन गुणहारभागहारादीन् पूर्वस्मात्स्मृतार्थी लक्षणया रीत्या संक्षिप्यान्य(त्) लघुमानसं करणं कृत्वा राज्ञे दर्शयामास । शिष्येण तु न किञ्चित्कृतमासीत् ।

तत आचार्यद्रोहात्कुपितेन राज्ञा स शिष्यः स्वराष्ट्रान्निर्वासितः । आचार्यं मुञ्जालं दानमानादिना सन्तोष्य पूर्वकरणं विनाश्य द्वितीयमेवेदं करणं लोके प्रसारयामास । अतोऽस्यान्यदिति विशेषणं कृतम् । तथाहि महामानसव्यावर्तके लघुशब्दे विद्यमानेऽन्यदिति विशेषणं सजातीयलघुमानसान्तरमेव व्यावर्तयति इति निश्चीयते । नन्वन्येषु ग्रहगत्यादिप्रतिपादकेषु बहुषु शास्त्रेषु सत्सु किं पुनस्तद्विषयग्रन्थकरणमित्याशङ्क्याह—लघ्वपूर्वस्फुटोपायमिति । ग्रन्थतोऽङ्गतः प्रक्रियातश्च लघु, ग्रन्थतो लाघवं षष्ठ्यनुष्टुप्श्लोकात्मकत्वात् ।

अङ्कतो लाघवं प्रमाणफलेच्छाराशीनामतिसङ्क्षेपात्प्रक्रियातो लाघवमनेकयत्न-साध्यानामल्पयत्नेन साधनात् ।

एतत्सर्वं तत्र तत्र प्रदर्शयिष्यते । शास्त्रान्तरेषु स्फुटीकरणाद्यर्थमेकैकस्य भुजाराशेरष्टौ ज्याः परिकल्प्य कृत्स्नविदे चतुर्विंशतिज्याः कल्पिताः । अस्मिस्तु करणे एकैकस्य राशेरेकैकज्योतिः एकस्मिन्पदे तिस्र एव ज्याः कल्पिताः ।

भौमजीवशनीनां कर्मचतुष्टयेन बुधशुक्रयोः कर्मत्रयेण स्फुटीकरणं शास्त्रान्तरेषु प्रदर्शितम् । इह तु पञ्चानां द्वौ द्वौ स्फुटीकरणमुक्तम् । भुजफलानयनं च केवलभागहारेण कृतमित्यपूर्वं स्फुटोपायत्वम् । एवमन्यान्यपि बहूनि सन्ति । तानि तत्र तत्र प्रदर्शयिष्यन्ते अतः प्रयोजनवानेव करणारम्भ इति तात्पर्यार्थः ।

* * * *

Colophon:

इत्थं निध्रुवगोत्रेण सूर्यदेवेन यज्वना ।
मानसप्रथमाध्यायवासना सम्यगीरिता ॥

इति सूर्यदेवसूनु(सोमसुत्)विरचिते मानसवासनाप्रकाशे प्रथमोऽध्यायः ॥

* * * *

Colophon:

निध्रुवदेवसूर्यदेवसोमसूरि(सुत्)विरचिते मानसवासनाप्रश्ने(काशे)त्रिप्रश्नाध्यायः ॥

End:

Colophon:

सूर्यदेवसोमसूरि(सुत्)विरचिते मानसवासनाप्रश्ने(काशे) ग्रहणाध्यायस्तृतीयः ॥

अथोदयास्तमयाध्यायवासना प्रकाश्यते—चन्द्रादीनां षण्णां ग्रहणामुदयास्तमयश्च प्रत्येकं द्विविधः—चक्रभ्रमण(कृ)तोऽर्ककृतश्चेति ।

* * * *

सूर्याष्टिविश्वरुद्राष्टतिथिशब्दैः खखाग्निभिः ।
प्राग्भोदयास्तैर्युक्तो नो ग्रहोऽस्तार्कशशाङ्कतः ॥

सूर्याः द्वादश, अष्टिः षोडश, विश्व त्रयोदश, रुद्रा एकादश, अष्ट अष्टौ, तिथिः पञ्चदश एते चन्द्रादीनां षण्णां क्रमात् दृश्यादृश्यकालभागाः विनाडि-

काभिः दशभिरेको भाग इत्यर्थः । तथा च भास्कराचार्यः—

कालभागा दिगभ्यस्ता विज्ञेयास्तु विनाडिकाः ।

R. No. 2742.

Paper. 11 × $9\frac{5}{8}$ inches. Foll. 142. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of the Raja of Chirakkal, Malabar district.

शिल्पिरत्नम्.

ŚILPIRATNAM.

Foll. 1*a*—141*b*. Fol. 142 is left blank.

A treatise on Śilpaśāstra dealing with the making of images, with their consecration, with the construction of temples, etc., as shown in the list given below: by a disciple of Ṣaḍānanayati whose place of residence is given as Sētūrdhvakānana. The author belongs to the Bhārgavagōtra and salutes his father. He also states that the work was written at the instance of the king Dēvanārāyaṇa. The introduction gives the topics dealt with in the 46 Adhyāyas of the former part (vide the list noted below) and in the 35 Adhyāyas of the latter part (vide the extract given below).

Contains 1 to 46 Adhyāyas in the Ādyabhāga, the topics dealt with therein being—

१. गुर्वादिलक्षणम्.
२. मानसाधनम्.
३. भूलक्षणम्.
४. भूपरिग्रहः.
५. ग्रामादिलक्षणम्.
६. पदविन्यासः.
७. वास्तुपूजाविधानम्.
८. द्वारविन्यासः.
९. देवालयस्थाननियमनम्.
१०. खातविधिः.
११. दिक्परिच्छेदः.
१२. गर्भस्थापनम्.
१३. वास्तुमर्मविधानम्.
१४. शिलादार्वादिसाधनलक्षणम्.
१५. आयादिलक्षणम्.
१६. प्रासादलक्षणम्.
१७. पादाधिष्ठानाद्युन्नतिनियमनम्.
१८. उपपीठलक्षणम्.
१९. अधिष्ठानलक्षणम्.
२०. नाललक्षणम्.
२१. भित्तिवेदिकास्तम्भलक्षणम्.
२२. द्वारलक्षणम्.
२३. तोरणलक्षणम्.
२४. जालकलक्षणम्.

२५. कूटकोष्ठविधानम्.
२६. पञ्जरकरणम्.
२७. वृत्तस्फुटितलक्षणम्.
२८. कुम्भलताविधानम्.
२९. उत्तरलक्षणम्.
३०. प्रस्तरविधानम्.
३१. गलविन्यासः.
३२. शिखरलक्षणम्.
३३. स्तुपालक्षणम्.
३४. मूर्धेष्टकाविन्यासः.
३५. नासिकालक्षणम्.
३६. स्तूपिकालक्षणम्.
३७. शान्तिकादिनियमः.
३८. वृत्तषडश्रादिप्रासादलक्षणम्.
३९. मण्टपविधानम्.
४०. पञ्चप्राकारलक्षणम्.
४१. गोपुरविधानम्.
४२. परिवारविधानम्.
४३. बलिपीठलक्षणम्.
४४. ध्वजलक्षणम्.
४५. सन्धिलक्षणम्.
४६. चित्रलक्षणम्.

Beginning :

मायावैभवकल्पिता गुणमया लोकास्त्रयस्सेश्वराः
जीवौघास्तदधिष्ठिताश्च विविधा यस्मिंस्थिता यन्मयाः ।
आत्मानं परमं त्वमौपनिषदैर्वाक्यैस्सदास्थोत्थितै-
रन्विष्टं भुवनैकनाथममलं वन्दे विरिञ्चाभिधम् ॥

पारुष्यागो येन चादौ युगानां वा . . . . त्सृष्टा स्निग्धतां प्रापितोक्तः ।
नित्यं देवैरर्चितो विश्वकर्मा सोऽयं भूयात्सर्वलोकोदयाय ॥

त्रिपुरत्रयरचना यत्करयोः कर्म चातुरी जपता ।
शिल्पिवरं तदनुजैरर्चितचरणं मयं वन्दे ॥

नानाविशाल . . . . . शिल्पशास्त्राद्युत्पत्तिमुख्यभुवमद्भुतविक्रमाढ्याम् ।
सेतूर्ध्वकानननिवासकृताधिवासां वन्दे षडाननयतिं परदेवतां मे ॥

येऽन्ये मतङ्गभृगुकाश्यपकुम्भजातमुख्या मुनीन्द्रपतयो मयि सुप्रसन्नाः ।
शिल्पागमाम्बुनिधिपारगता मदीयचित्तप्रबोधनकरा गुरवोऽप्यमेयाः ॥

संपूज्यते सदसि भार्गवसृष्टभूयागेऽस्मिन् बुधैस्सकलशिल्पकथासु योऽसौ ।
तं मे नमामि पितरं भृगुवंशजातं शश्वत्स्वपुत्रहितपूरणजागरूकम् ॥

ब्राह्मं क्षात्रं च तेजोऽप्यहमहमिकया वर्धते यत्र वीरे
तस्य श्रीदेवनारायणधरणिपतेराज्ञयाज्ञाकरोऽहम् ।
मन्दोऽप्यत्यन्तमोहादतिविपुलतरेभ्योऽथ शिल्पागमेभ्यः
संक्षिप्तं शिल्पिरत्नं प्रलिखितुमधुना प्रक्रमे तत्क्रमेण ॥

* * * *

षट्चत्वारिंशदध्यायशिल्परत्नाख्यसङ्ग्रहे ।
अथातो बिम्बलिङ्गादिसाधनस्वीकृतिक्रमः ॥
लिङ्गस्य लक्षणं पश्चाल्लिङ्गलक्षणलक्षणम् ।
बिम्बायामविधिं पश्चादुत्तमं दशतालकम् ॥
मध्यमं दशतालं चाप्यधमं दशतालकम् ।
उत्तमं नवतालं च मध्यमं नवतालकम् ॥
अधमं नवतालं चाप्यष्टतालस्य लक्षणम् ।
सप्ततालं च षट्तालं पञ्चतालं तथैव च ॥
चतुस्तालं पुनः पश्चाद्भूषायुधविधिः पुनः ।
शूलसंस्थापनं पश्चाद्रज्जुबन्धक्रमं पुनः ॥
मु(मृ)ल्लेपनं तथा देवि लक्षणं वाहलक्षणम् ।
ध्याने शैवप्रकरणं वैष्णवं शक्तिमार्गणम् ॥
इन्द्राद्यं बिम्बदोषं च पीठलक्षणमेव च ।
प्रतिष्ठायाः क्रमं पश्चाज्जीर्णोद्धारं ततः परम् ॥
लिङ्गप्रासादकरणं मानुषालयलक्षणम् ।
कूपप्रश्नं तथा पश्चादासनादिपरिच्छदम् ॥
कर्मकारजनस्यास्य वेतनाकल्पनक्रमम् ।
क्षुरिकालक्षणं [त्वेवं] पञ्चत्रिंशाध्यायसमन्वितम् ॥
एवं चेदुत्तरं भागं सज्जनेभ्यो नमो नमः ॥

अत्र पूर्वमाचार्यलक्षणम्—

ग्रामादिकं वानु . . . . . गृहादिकं वापि बुधालयं वा ।
यः कर्तुमिच्छत्यथ संवृतस्ते न स्याद्गुरुश्शिल्पिभिरेतदर्हम् ॥
विप्रः कुलीनः कृतसत्क्रियौघस्त्वधीतवेदागमतत्त्ववेत्ता ।
वर्णाश्रमाचारपरोऽधिदीक्षो दक्षस्तपस्वी गुरुरास्तिकोऽस्तु ॥

* * * *

Colophon:

इति शिल्परत्ने गुर्वादिलक्षणं नाम प्रथमोऽध्यायः समाप्तः ॥

End:

तच्च चित्रमिति ख्यातं नालमाकारमात्रतः ।
शृङ्गारादिरसो यत्र दर्शनादेव गम्यते ॥

एवं हर्म्यादिभित्त्यादौ लक्ष्यलक्षणसंयुतम् ।
लेखनीयमिदं चित्रं सर्वदृष्टिमनोहरम् ॥
इत्थं श्रीदेवनारायणमतिविवृतं शिल्पिरत्नाद्यभागं
षट्चत्वारिंशदध्यायकयुतमतिमन्दात्मबोधप्रदं यत् ।
नानाग्रामादिदेवालयनरभवनं युक्तिलक्ष्मप्रकाशं
संपूर्णं जातमस्मिन्निखिलबुधजनास्सन्तु सन्तुष्टचित्ताः ॥

Colophon:

इति शिल्पिरत्ने चित्रलक्षणं नाम षट्चत्वारिंशोऽध्यायः ॥
शिल्पिरत्नाद्यभागस्समाप्तः ॥

R. No. **2743.**

Paper. 11 × 9⅝ inches. Foll. 50. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of the Raja of Chirakkal, Malabar district.

शिशुपालवधव्याख्या.

ŚIŚUPĀLAVADHAVYĀKHYĀ.

Foll. 1*a*—49*b*. Fol. 50 is left blank.

A commentary on the Śiśupālavadha of Māghakavi which work has been described under No. 11719 of the D.C.S. MSS., Vol. XX: by Vidagdhamādhava. The commentary is called Māghakāvyaprakāśikā.

Contains the Sargas five and six complete and the seventh incomplete.

Beginning:

उक्तं वसन्ततिलकं तभजा जगौ ग इति लक्षणयुक्तेन वसन्ततिलकवृत्तेन रचितं पञ्चमसर्गं व्याख्यातुमारभे(भते) — इत्थमिति। अव्यलीकः, व्यलीकमप्रियं प्रोक्तमलीकमनृतं विदुः । अप्रियरहिताः निरपराधाः प्रियतमा इव लक्ष्यमाणा व्यलीकाः अलीकशून्याः सत्या इत्यर्थः । सूततनयस्य दारुकस्य इत्थमुक्तप्रकाराः गिरः स हरिस्तदा शुश्राव । श्रुत्वा किं कृतवानित्याह — ततः पश्चादासां गिरामवसाने निरन्तरं वनराजिपटं वनराजिरेव पटस्तं वसाने तस्मिन् गिरौ रन्तुं क्रीडितुमियेष ऐच्छत् । चकारः क्रियासमुच्चयार्थः ।

* * * *

Colophon:

इति श्रीमत्कवितिलकेन विद्यामाधवपण्डितेन विरचितायां माघकाव्यप्रकाशिकायां सेनानिवेशो नाम पञ्चमस्सर्गः ॥

End:

इति शिशुपालवधे माघकाव्यप्रकाशिकायामृतुवर्णनं नाम षष्ठस्सर्गः ॥

अथोद्यानवनक्रीडा वर्ण्यते—

अयुजि नयुगरेफतो यकारो युजि तु नजौ जरगाश्च पुष्पिताग्रा इति पुष्पिताग्राख्येनार्धसमवृत्तेन विरचितं सप्तमसर्गं व्याख्यातुमारभते—अनुगिरमिति ।

* * * *

प्रतीति । द्युलोकभाजामपि लोचनानि क्षणमीलितानि यथा भवन्ति तथा स्वर्गवासिनामपि नेत्राणि प्रभया प्रतिघ्नतीभिः क्षणप्रकाशाभिरिव विद्युद्भिरिव गरुत्मतां संहति.

R. No. **2744.**

Paper. 11 × 9⅝ inches. Foll. 26. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Tippan Nambūdirippāḍ of Ponnūrkoṭṭa-mana, Perumbavūr post, Travancore State.

शुकसन्देशः, सव्याख्यः.

ŚUKASANDĒŚAḤ WITH COMMENTARY.

Foll. 1*a*—25*b*. Fol. 26 is left blank.

The text is the same as that described under No. 11900 of the D.O.S. MSS., Vol. XX. By Lakṣmīdāsa. The commentary is called Varavarṇinī and is by Dharmagupta.

Wants 15 stanzas in the beginning; otherwise complete.

Beginning:

आदितः पञ्चदश श्लोकाः । एवं तावदहमवश्यं दूतो भूत्वा त्वत्कार्यं साधयामीत्येवं रूपेणात्र पत्रिणि दूतभावो योजितः । इदानीं तु प्राज्यानि वक्तव्यतया वर्तन्ते । यत उक्तं निरन्तरमेव गौरीपतेरगारं प्राप्तव्यमिति तत्प्राप्तिश्च प्रयाणसव्यपेक्षा । प्रयाणं च सुनिमित्तसहायसम्पदादिषु स्वाङ्गेष्ववधृतेष्वेवोपपद्यत इति। तत्र प्रथमं तावत् सुनिमित्तसहायसम्पदादिषु स्वाङ्गेष्ववधृतेष्वेवोपप[द्य]त्त्यभावादुद्भावयति—

अप्रध्मातं ध्वनति मधुरं कम्बुयूथं पयोधौ
रन्ध्रं व्योम्नः पिदधति रवैरूर्मिभिर्यो गभीरैः ।

अम्भोजिन्या(म)विरलवलन्मारुतोद्भ्राम्यमाणाः
शब्दायन्ते सरसिजरजःकाहलाश्चालिगर्भाः ॥

इति । पयोधौ सेतुवृष्टिस्थितयोरावयोः पार्श्ववर्तिनि समुद्रे कम्बूनां शङ्खानां यूथस्समूहः । यूथशब्दस्तिर्यक्समूहवाची । अप्रध्मातं प्रध्मातरूपम् ।

* * * *

Colophon:

इति व्रज्याङ्गदेशनाविवरणं नाम तृतीयः परिच्छेदः ॥

End:

सर्वत्रापि सतां कर्माणि काव्यनिर्माणादीनि मङ्गलोपक्रमाणि मङ्गलमध्यानि मङ्गलपर्यन्तान्यप्येव भवन्तीति मङ्गलदेवतावाचकं लक्ष्मीशब्दमादिमध्यावसानेषु प्रयुञ्जानस्य महाकवेराशय इति शिवम् ।

लक्ष्मीदासपदेन लोकविदितः काव्येषु लब्धश्रमो
भारत्या सह वश्यया परिलसन्यस्य प्रबन्धा कविः ।
शृङ्गारस्य च गोचरस्सहृदयश्लाघ्यो रसग्रामणी-
स्सर्वोत्तीर्णतयेदमुल्लसति नस्सन्देशकाव्यामृतम् ॥

Colophon:

इति धर्मगुप्तविरचितायां शुकसन्देशव्याख्यायां वरवर्णिन्यां प्रमेयप्रतिष्ठापनविवरणं नाम त्रयोदशः परिच्छेदः ॥

R. No. **2745.**

Paper. 11 × $9\frac{5}{8}$ inches. Foll. 70. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippāḍ of Nareri, Tritala post, Malabar district.

काव्यप्रकाशव्याख्या, साहित्यदीपिका.

KĀVYAPRAKĀŚAVYĀKHYĀ: SĀHITYADĪPIKĀ.

Foll 1*a*—69*b*. Fol. 70*a* gives the name of the owner of the MS. from which this was copied. Fol. 70*b* is left blank.

A commentary on the Kāvyaprakāśa of Mammaṭa, which work has been described under No. 12816 of the D.C.S. MSS., Vol. XXII: by Bhāskarasūri. The commentary is called Sāhityadīpikā.

Complete.

Beginning:

स्तनन्धयसुधाधामधाम्ने धाम्ने हि मन्यवे ।
एकतोऽन्यत्र कण्वादिदारिणे दारिणे नमः ॥

न ते टीकाकाराः परिगलदविद्यान्धतमसं
प्रमेयं शास्त्राणां प्रतिफलति येषां न मतिषु ।
न टीकायास्तासां विलसितमनालोकविषयान्
गभीरान् शब्दार्थान् गमयति न सिद्धाञ्जनमिव ॥
टीकाः काव्यप्रकाशस्य कामं सन्तु परश्शताः ।
किं ताभिस्सुगमग्रन्थमात्रव्याख्यानचुञ्चुभिः ॥
यद्यस्ति तत्र सारांशस्सोऽपि संगृह्यते मया ।
तेन टीकान्तरालोककौतुकं त्यज्यतांतमाम् ॥
साहित्यदीपिका नाम टीका भास्करसूनुना(रिणा) ।
मधूद्वहानां काव्यानां तेजनीयं विरच्यते ॥

इह तावदादिमेन श्लोकेन नमस्कारस्य वा प्रेक्षावत्प्रवृत्तेरङ्गभूतस्य प्रयोजनस्य वा काव्यलक्षणस्य वा प्रतिपादनं युज्यते । न पुनस्सर्वोत्किर्षेण वृत्तेः । तदयन्नियांतिकृतेत्यादेरुपन्यासो न सङ्गच्छते इत्याशङ्क्याह—ग्रन्थारम्भ इत्यादि । अत्र परामर्शो नाम सर्वोत्किर्षेण स्थितिः; न पुनरनुसन्धानम्, तस्य स्मरणरूपत्वात्, नियतिकृतेत्यादौ तद्घटनात । यत्र सर्वोत्कृष्टत्वं तत्र नमस्कार्यत्वमिति व्याप्तेर्नमस्काराक्षेपकार्यत्वाच्छ्लोकस्य तत्परता गम्यते। तथा च वक्ष्यते । जयत्यर्थेन नमस्कार आक्षिप्यते । तां प्रत्यस्मि प्रणत इति लभ्यते ।

* * * *

Colophon:

भास्करमिश्रविरचितायां काव्यप्रकाशदीपिकायां साहित्यदीपिकायां प्रथम उल्लासः ॥

End:

इत्येष मार्ग इत्यादि । विदुषां ध्वनिकारादीनां विभिन्नो विकीर्णोऽप्यभिन्नरूप एकत्र सङ्कलितः प्रतिभासत इति यत्र विचित्रम् । यद्यस्मात्कारणात् अमुत्र ग्रन्थे सम्यक् विनिर्मिता सङ्घटनैव हेतुः । येन ग्रन्थेन विकीर्णं प्रमेयजातं सङ्कलय्य प्रतिपाद्यते स ग्रन्थस्सन्दर्भः कृत इत्यर्थः । तेषु तेषु ग्रन्थेषु विकीर्णानां प्रमेयाणामेकत्र सङ्कलनमेव ग्रन्थस्य प्रयोजनमिति तात्पर्यार्थः ।

Colophon:

इति भास्करमिश्रविरचितायां काव्यप्रकाशदीपिकायां साहित्यदीपिकायां दशम उल्लासः ॥

समाप्तोऽयं ग्रन्थः ॥

R. No. **2746.**

Paper. 11 × 9⅝ inches. Foll. 116. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Ampalakat Karuṇākara Menon, B.A., B.L., Chalapuram, Calicut.

काव्यादर्शव्याख्या—श्रुतानुपालिनी.

KĀVYĀDARŚAVYĀKHYĀ; ŚRUTĀNUPĀLINĪ.

A commentary on the Kāvyādarśa of Daṇḍin which work has been described under No. 12830 of the D.C.S. MSS., Vol XXII. The commentary is called Śrutānupālinī and was written by Vādighaṅghala.

Wants the beginning in the first Paricchēda and breaks off in the third Paricchēda.

Beginning:

एवमुदाहृत्योदाहरणार्थस्योदारत्वमाह—

इति त्यागस्य वाक्येऽस्मिन्नुत्कर्षस्साधु लक्ष्यते ।
अनेनैव पथान्यत्र समानन्यायमूह्यताम् ॥ इतीति ।

इत्युक्तेन प्रकारेणोत्कर्षोऽतिशयः । साधु शोभनं लक्ष्यते प्रतीयते । क अस्मिन् वाक्ये । कस्य त्यागस्योत्कर्षं प्रदर्श्यान्यत्राप्येवमेव ज्ञातव्यमित्याह—अनेनैव पथेति । एतेनैवोपायेन । अन्यच्चेतरदपि । समानस्तुल्यो न्यायः यस्य वीर्याद्युत्कर्षस्येति विग्रहः । ऊह्यतामिति तर्क्यताम् ।

* * * *

Colophon:

इति श्रुतानुपालिन्यां काव्यादर्शटीकायां मार्गविभागपरिच्छेदः प्रथमः ॥

End:

इति श्रुतानुपालिन्यां वादिघङ्घलकृतौ द्वितीयः परिच्छेदः ॥

वैदर्भगौडीयमार्गविभावनापरिच्छेदे माधुर्यमाचिख्यासुनाचार्येण तद्रूपादिपदासत्तिस्सानुप्रासा रसावहेत्यनुप्रासप्रसङ्गेन वर्णावृत्तिरनुप्रासः पादेषु च पदेषु चेत्यनुप्रासविशेष एव यमकम् ।

* * * *

वञ्चितमुदाहरति—कुब्जामिति । सुरसुन्दरी प्रतिस्पर्धिनीत्यत्र कुब्जाशब्दोऽन्यत्र ह्रस्वाङ्गायां दीर्घजिह्वायां योषिति प्रसिद्धः । तेन कन्याकुब्जा नगरी वञ्च(श्य)ते तेन कुब्जां कन्यां कुब्जां नगरीमासेवमान इत्ययमर्थोऽपि विवक्षितः ।

व्युत्क्रान्तमुदाहरति—दण्डे चुम्बतीति ।

R. No. 2747.

Paper. 11 × 9½ inches. Foll. 62. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of the Raja of Chirakkal, Malabar district.

(*a*) पत्रपरीक्षा.

PATRAPARĪKṢĀ.

Foll. 1*a*—7*a*.

A discussion as to whether the five steps of a syllogism, viz., Pratijñā, Hētu, Udāharaṇa, Upanaya and Nigamana, are indispensably necessary for drawing a logical inference. The author Vidyānanda is of opinion that the last two steps, viz., the Upanaya and Nigamana, are quite unnecessary for the inference.

Complete.

Beginning:

श्रीवर्धमानमानुत्य स्याद्वादन्यायनायकम् ।
प्रबुद्धाशेषतत्त्वार्थं पत्रवाक्यं विचार्यते ॥
नैकान्तवादिनां पत्रवाक्यं संभवदर्थकम् ।
तत्तत्त्वाधिगमोपायप्रकाशरहितत्वतः ॥
यत्तु संभवदर्थात्म न तत्ताद्दक्षमीक्षितम् ।
यथा स्याद्वादभृद्वाक्यं तादृक् चेदं न तत्तथा ॥
प्रसिद्धावयवं वाक्यं स्वेष्टस्यार्थस्य साधकम् ।
साधुशुद्धपदप्रायं पत्रमाहुरनाकुलम् ॥
मुख्यं शब्दात्मकं वाक्यं लिप्यामारोप्यते जनैः ।
पत्रस्थत्वात्तु तत्पत्रमुपचारोपचारतः ॥
त्रायन्ते वा पदान्यस्मिन् परेभ्यो विजिगीषुणा ।
कुतश्चिदिति पत्रं स्याल्लोके शास्त्रे च रूढितः ॥

* * * *

न चैवंलक्षणं पत्रमक्षपादस्य युज्यते ।
प्रसिद्धावयवत्वस्य विरहात्सुगतादिवत् ॥
पत्रस्यावयवाः पञ्च प्रतिज्ञादय इत्यसत् ।
पत्राभावेऽपि सद्भावात्तेषां त्रैरूप्यमात्रवत् ॥
तदभावेऽपि पत्रस्य स्वार्थसाधनतेक्षणात् ।
हेतोस्साध्याविनाभावनियमात्मकतो यथा ॥

सत्सत्सदिति सङ्क्षेपात्साध्यसाधनदर्शनम् ।
व्याप्त्या सामर्थ्यतस्सर्वनाम(मा)भावेऽपि निश्चितम् ॥

End:

इति प्रपञ्चतः प्रोक्तमन्यत्रेहावगम्यताम् ।
सर्वं पत्रपरीक्षायां सद्भिरित्युपरम्यते ॥
जीयान्निरस्तनिःशेषसर्वथैकान्तसाधनम् ।
सदा श्रीवर्धमानस्य विद्यानन्दस्य शासनम् ॥
सूक्ताभ्यासो भवति भवतस्तावदुत्तारहेतुः
स्वस्यान्येषां गुरुतरतमा श्रीश्च मध्यस्थभाजाम् ।
तन्मत्वैवं विपुलमतिभिस्तत्र यत्नो विधेयो
नानन्दायाखिलखलधियां तर्हि कः कर्तुमीशः ॥

Colophon:

इति विद्यानन्दस्वामिविरचितपत्रपरीक्षा समाप्ता ॥

(b) आप्तपरीक्षा.

ĀPTAPARĪKṢĀ.

Foll. 7b—13b.

An investigation of the meaning of the expression आप्त (credible person) from the Jaina point of view: by Vidyānanda.

Complete.

Beginning:

प्रबुद्धाशेषतत्त्वार्थबोधदीधितिमालिने ।
नमः श्रीजिनचन्द्राय मोहध्वान्तप्रभेदिने ॥
श्रेयोमार्गस्य संसिद्धिः प्रसादात्परमेष्ठिनः ।
इत्याहुस्तद्गुणस्तोत्रं शास्त्रादौ मुनिपुङ्गवाः ॥
मोक्षमार्गस्य नेतारं भेत्तारं कर्मभूभृताम् ।
ज्ञातारं विश्वतत्त्वानां वन्दे तद्गुणलब्धये ॥
इत्यसाधारणं प्रोक्तं विशेषणमशेषतः ।
परसङ्कल्पिताप्तानां व्यवच्छेदप्रसिद्धये ॥
अन्ययोगव्यवच्छेदान्निश्चिते हि महात्मनि ।
तस्योपदेशसामर्थ्यादनुष्ठानं प्रतिष्ठितम् ॥

तत्रासिद्धं मुनीन्द्रस्य भेत्तृत्वं कर्मभूभृताम् ।
ये वदन्ति विपर्यासात्तान् प्रत्येव वदाम्यहम् ॥
प्रसिद्धस्सर्वतत्त्वज्ञस्तेषां तावत्प्रमाणतः ।
सदा विध्वस्तनिःशेषबाधकात्स्वसुखादिवत् ॥
ज्ञाता यो विश्वतत्त्वानां स भेत्ता कर्मभूभृताम् ।
भवत्येवान्यथा तस्य विश्वतत्त्वज्ञता कुतः ॥

End:

श्रीमत्तत्त्वार्थशास्त्राद्भुतसकलनिधे . . . . द्भवस्य
प्रोत्थानारम्भकाले सकलमलभिदे शास्त्रकारैः कृतं यत् ।
स्तोत्रं तीर्थोपमानं प्रथितपृथुपथं स्वामिमीमांसितं त-
द्विद्यानन्दैस्स्वशक्त्या कथमपि कथितं सत्यवाक्येऽर्थसिद्धौ ॥
इति तत्त्वार्थशास्त्रादौ मुनीन्द्रस्तोत्रगोचरा ।
प्रणीताप्तपरीक्षेयं विवादविनिवृत्तये ॥

(*c*) **प्रमाणव्यवस्था.**

PRAMĀṆAVYAVASTHĀ.

Foll. 14*a*—15*b*.

A discussion from the Jaina point of view as to what the Pramāṇas are. Herein it is stated that Pratyakṣa, Anumāna and Śabda alone constitute the so-called Pramāṇas (instruments of knowledge).

Complete.

Beginning:

प्रमाणं स्वपराभासि ज्ञानं बाधविवर्जितम् ।
प्रत्यक्षं च परोक्षं च द्विधा मेयविनिश्चयात् ॥
प्रसिद्धानि प्रमाणानि व्यवहारश्च तत्कृतः ।
प्रमाणलक्षणस्योक्तौ ज्ञायते न प्रयोजनम् ॥
प्रसिद्धानां प्रमाणानां लक्षणोक्तौ प्रयोजनम् ।
तद्व्यामोहनिवृत्तिस्स्याद्व्यामूढमनसामिह ॥
अपरोक्षतयार्थस्य ग्राहकं ज्ञानमीदृशम् ।
प्रत्यक्षमितरं ज्ञेयं परोक्षं ग्रहणेच्छया ॥
साध्याविनाभुवो लिङ्गात्साध्यनिश्चायकं स्मृतम् ।
अनुमानं तदभ्रान्तं प्रमाणत्वात्समक्षवत् ॥

End :

प्रमातास्वाद्यनिर्भासि कर्ता भोक्ता विवृत्तिमान् ।
संवेदनसंसिद्धो जीवः क्षित्याद्यनात्मकः ॥
प्रमाणानां व्यवस्थेयमनादिनिधनात्मिका ।
सर्वसंव्यवहातृ(हर्तॄ)णां प्रसिद्धोऽपि प्रकीर्तिता ॥

(*d*) आप्तमीमांसा.
ĀPTAMĪMĀṀSĀ.

Foll. 16*a*—21*b*.

An investigation as to what qualities in a person would make him an Āpta so as to give authority to his words. The work is also called Dēvāgamastōtra. By Samantabhadrācārya.

Complete.

Beginning :

देवागमनभोयानचामरादिविभूतयः ।
मायाविष्वपि दृश्यन्ते नातस्त्वमसि नो महान् ॥
अध्यात्मं बहिरप्येष विग्रहादिमहोदयः ।
दिव्यस्सत्यो दिवौकस्स्वप्यस्ति रागादिमत्सु सः ॥
तीर्थकृत्समयानां च परस्परविरोधतः ।
सर्वेषामाप्तता नास्ति कश्चिदेव भवेद्गुरुः ॥
दोषावरणयोर्हानिर्निश्शेषास्त्यतिशायनात् ।
क्वचिद्यथा स्वहेतुभ्यो बहिरन्तर्मलक्षयः ॥
सूक्ष्मान्तरितदूरार्थाः प्रत्यक्षाः कस्यचिद्यथा ।
अनुमेयत्वतो ज्ञादिरिति सर्वज्ञसंस्थितिः ॥

End :

इतीयमाप्तमीमांसा विहिता हितमिच्छता ।
सम्यङ्मिथ्योपदेशार्थं विशेषप्रतिपत्तये ॥
जयति जगति क्लेशावेशप्रपञ्चहिमांशुमान्
विहितविषमैकान्तध्वान्तप्रमाणनयांशुमान् ।
यतिपतिरजो यस्या दृष्टात्मताम्बुनिधेर्लवान्
स्वमतमतयस्तीर्थ्या नाना परे समुपासते ॥

Colophon :

इति श्रीसमन्तभद्राचार्यकृतिरियं देवागमस्तोत्रं समाप्तम् ॥

(e) आप्तमीमांसा, सव्याख्या.

ĀPTAMĪMĀṂSĀ WITH COMMENTARY.

Foll. 22a—55a.

Same text as the above, but it is here divided into ten Paricchēdas. The commentary, as well as the text, has been printed in the Sanātanajainagranthamālā, wherein this commentary is attributed to Vidyānandi.

Complete in Paricchēdas one to ten.

Beginning:

उद्दीपीकृतधर्मतीर्थमचलज्योतिर्ज्वलत्केवला-
लोकालोकितलोकलोकमखिलैरिन्द्रादिभिर्वन्दितम् ।
वन्दे त्वा परमार्हतां समुदयं गां सप्तभङ्गीविधिं
स्याद्वादामृतगर्भिणीं प्रतिहतैकान्तान्धकारोदयाम् ॥
तीर्थं सर्वपदार्थतत्त्वविषयस्याद्वादपुण्योदधि-
र्भव्यानामकलङ्कभावकृतये प्राभाविकाले कलौ ।
येनाचार्यसमन्तभद्रयतिना तस्मै नमस्सन्ततं
कृत्वा विव्रियते स्तवो भगवतां देवागमस्तत्कृतिः ॥

देवागमेत्यादि मङ्गलपुरस्सरस्थविषयपरमार्थगुणातिशयपरीक्षामुपक्षिपतैव स्वयं श्रद्धागुणज्ञतालक्षणं प्रयोजनमाक्षिप्तं लक्ष्यते । तदन्यतरापायेऽर्थस्यानुपपत्तेः । शास्त्रे न्यायानुसारितया तथैवोपन्यासात् ।

देवागमनभोयान (. . .) नातस्त्वमसि नो महान् ।

आज्ञाप्रधाना हि त्रिदशागमादिकं परमेष्ठिनः परमात्मचिह्नं प्रतिपद्येरन् । नास्मदादयस्तादृशो मायाविष्वपि भावादागमाश्रयः ।

अध्यात्मं बहि . रागादिमत्सु सः ॥

बहिरन्तश्शरीरादिमहोदयोऽपि पूरणादिष्वसंभवव्यभिचारिस्वर्गिषु भावादक्षि(क्षी)णकषायेषु ततोऽपि न भवान् परमात्मेति स्तूयते ।

* * * *

Colophon:

इति प्रथमः परिच्छेदः ॥

End:

अस्तीत्यादिविधेयमभिप्रेत्य विधानात् नास्तित्वादिभिराविरुद्धं विधिप्रतिषेधयोरन्योन्याविनाभावलक्षणत्वात्सार्थज्ञानवत् तद्विधेयप्रतिषेध्यात्मविशेषात् स्याद्वाद प्रतिक्रियते सप्तभङ्गीसमाश्रयात् ।

इतीयमाप्तमीमांसा विहिता हितमिच्छताम् ।
सम्यङ्मिथ्योपदेशार्थं विशेषप्रतिपत्तये ॥

इति स्वोक्तपरिच्छेदविहितेयमाप्तमीमांसा सर्वज्ञविशेषपरीक्षानिःश्रेयसकामिनामभव्यानां तदनुपयोगात्तत्त्वेतरपरीक्षां प्रति भव्यानामेव हि नियधाति-(ताधि)कृतिः ॥

Colophon:

इति दशमः परिच्छेदः ॥

(*f*) जैनमतविषयः.

JAINAMATAVIṢAYAḤ.

Foll. 55*b*—61*a*. Foll. 61*b* and 62 are left blank.

An investigation into the nature of Īśvara (God), Jīva (the individual soul), Mōkṣa (salvation), etc., from the Jaina standpoint.

Incomplete.

Beginning:

यतः परमाणुर्नास्ति स परमाणुरत एव नित्यो द्रव्यत्वे सत्यनवयवत्वादाकाशवत् । ईश्वरो बद्धो वा मुक्तो वा । न तावद्बद्धः, बन्धसमाख्यातस्य दुःखहेतोः क्लेशादेरसम्भवात् । मुक्तोऽपि न भवति, बन्धविच्छेदपर्यायानुक्तेः । नित्यमुक्तस्तु स्यात् । यदाह भगवान् पतञ्जलिः—क्लेशकर्मविपाकाशयैरपरामृष्ट ईश्वरः ॥

*   *   *   *

तथा सौगतानां सर्वथा सर्वशून्यवादोऽपि न घटते; शून्यं तत्त्वमहं साधयामीति वचनविरोधप्रसङ्गात्

आनन्दो ज्ञानमैश्वर्यं वीर्यं परमसूक्ष्मया ।
एतदात्यन्तिकं यत्र स मोक्षो जिनशासने ॥ इति सुखबोधिप्रमेयम् ॥

End:

ननु मीमांसकानां वेदबाह्यत्वे के नामान्ये वैदिका भवेयुः ? किं तु सर्वेऽपि वेदबाह्या एव स्युः ।

तथा चावैदिकं जगदापद्येतेति चेत्तर्हि नार्हतानां वेदबाह्यत्वम् । सम्यक् वेदादि(धी)तिबोधाचरणप्रचारणत्वेन सम्यक् वैदिकत्वस्यैव भावाधि.

R. No. 2748.

Paper. 11 × 9½ inches. Foll. 18. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of the Library at Dēśamaṅgalam-manakkal, Desamangalam, Malabar district.

लक्षणामृतम्.

LAKṢAṆĀMṚTAM.

Foll. 1*a*—17*a*. Foll. 17*b* and 18 are left blank.

A treatise stating the symptoms exhibited according to the portion of the body affected with poison, the curative medicines and measures to be adopted, the nature of the inferences that may be drawn regarding the life of a person affected with poison under certain astrological conditions, etc: by Bhaṭṭasundarācārya.

Complete in one to ten Paṭalas.

Beginning:

चूडाचन्द्रविनिष्यन्दिसुरयाभूत्प्रसाधनम् ।
गरः कण्ठे परं यस्य स पायाद्भुवनं भवः ॥
वन्देऽनन्तादिनागेन्द्रपरिकल्पितभूषणम् ।
विनतानन्दसन्दोहहेतुं भूतगुरुं परम् ॥
विमथ्य पूर्वतन्त्राब्धिं गरक्लेशिनां नृणाम् ।
इदं प्राणोपकारार्थं गृह्यते लक्षणामृतम् ॥

* * * *

दष्टानां तारकादीनि स्थानं मर्म च लक्षणम् ।
दंशश्चेष्टेति वक्ष्यन्ते लक्षणान्यपि रक्षणम् ॥
चित्रास्वातीमखाश्लेषाज्येष्ठाश्रवणकृत्तिकाः ।
भरण्यार्द्राविशाखाश्च मूलं पूर्वात्रयं तथा ॥
अश्विनी भरणी चेति योगा मरणसंज्ञकाः ।
दग्धयोगाश्च सर्वत्र दष्टानामतिनिन्दिताः ॥

* * * *

Colophon:

इति सुन्दरविरचिते लक्षणामृते प्रथमः पटलः ॥

End:

इति जगतामुपकारकं विषाणां परिहरणं प्रति लक्षणामृताख्यम् ।
विरचितमिह शास्त्रमेतदस्मिन् अनुसरणाय सभा(दा) भवन्तु सन्तः ॥

वामोद्यत्कटकोपवीतरशनाहारस्फुरत्कुण्डलो-
त्तंसोरःकलिताष्टनागविथ(ल)सद्धामे सुधोऽहिं तुदन् ।
चञ्च्वाग्रेण हिरण्मयोऽखिलजगत्या(द्व्या)पी सुरक्तेक्षणः
तार्क्ष्यस्तानिह पातु काममवशं क्ष्वेलं क्षिपत्रक्षकः ॥
ह्रीङ्कारस्सोमबिम्बे धृतकरविलसत्पुण्डरीकच्छदाना-
मन्तर्बिन्दुस्सुराढ्यस्सुधवलविगलत्सान्द्रपीयूषधाराम् ।
आनीतो मेघपुष्पैर्घटभुवि घटनावामहस्तेन पाया-
दाशु क्ष्वेलोदपायादपि सकलगदात्सर्वदात्सर्वदो वः ॥

Colophon:

इति भट्टसुन्दराचार्यविरचिते लक्षणामृते दशमः पटलः ॥

R. No. **2749.**

Paper. 11 × 9¾ inches. Foll. 56. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippāḍ, Nareri, Tritala, Malabar district.

कर्पूरमञ्जरीव्याख्या—पदार्थदीपिका.

KARPŪRAMAÑJARĪVYĀKHYĀ: PADĀRTHADĪPIKĀ.

Foll. 1*a*—55*a*. Foll. 55*b* and 56 are left blank.

A commentary on the Karpūramañjarī of Rājaśēkharakavi. The commentary is called Padārthadīpikā and is by Anantadāsa, pupil of Kṛṣṇaśaṅkaraguru. For another commentary see under No. 12510 of the D.C.S. MSS., Vol. XXI.

Complete in four Acts.

Beginning:

यत्पादपद्मयुगले विहितः प्रणामो विघ्नान्धकारहरणे तरुणार्कभावम् ।
आयाति देवपितृमानवमाननीयो विघ्नेश्वरो विजयते स महानुभावः ॥
सेवामहे* तुहिनभूधरजन्मभूमिं* दिव्यौषधिं* निखिलदोषहरानुभावाम्* ।
सेवाबलेन महतां पुरलीश्वराणामत्यादरात्कृतमृदङ्गधराधिवासाम् ॥
शब्दार्थज्ञानसिद्ध्यर्थं शब्दार्थैकस्वरूपिणौ ।
उमामहेश्वरौ वन्दे वाङ्मयी(ङ्नदी)तीरवासिनौ ॥
चेल्लूरेश नमस्तेऽस्तु देवदेव दयानिधे ।
अस्मदीयहृदम्भोजे सदा सन्निहितो भवेः ॥

राजशेखरकवीन्द्रनिर्मितं सट्टकं विबुधबृन्दवन्दितम् ।
व्याकरोमि तदुदारमानसाः शोधयन्तु विबुधाः कृतादराः ॥
श्रीकृष्णशङ्करगुरूत्तमपादयुग्मस्वर्लोकवृक्षमकरन्दमधुव्रतस्य ।
श्रीराजशेखरगभीरवचोमधूलीपाने बताद्य खलु लोलतरं मनो मे ॥
राजशेखरकवेः क भारती काहमल्पमतिरल्पवागपि ।
आनिनीषुरहमस्मि काञ्चनक्ष्माधरं निजगृहं भुजाबलात् ॥
तथापि गुरुभक्त्या च प्रसादेन च धीमताम् ।
पूर्वव्याख्यानुसारेण व्याख्या कापि विलिख्यते ॥
पूर्वव्याख्याभिरेतस्य न स्यादनुपयोगिता ।
विशेषोऽस्या यतः स्पष्टस्सट्टकार्थावधारणे ॥

अथ तावन्महाकविः श्रीराजशेखरः प्रारिप्सितस्य प्रबन्धस्य रूपकविशेषत्वात्तदारम्भे पूर्वरङ्गविधानात् तस्य च पूर्वरङ्गस्य—

यद्यप्यङ्गानि भूयांसि पूर्वरङ्गस्य नाटके ।
तथाप्यवश्यकर्तव्या नान्दी विघ्नप्रशान्तये ॥

इति नान्दीरूपस्यैवाङ्गस्यावश्यकर्तव्यत्वोक्त्या नान्दीद्वारेण आशीर्नमस्क्रिया वस्तुनिर्देशो वापि, तन्मुखमित्यत्राशिषस्तावत्प्रथमपरिगृहीतत्वादाशीर्वचनसंयुक्तेति नान्दीलक्षणवचनाच्च प्रबन्धमुखोचितामाशिषमेव प्रयुङ्क्ते, भद्दं होउ इत्यादिना ।

*   *   *   *

अत्रादौ तावन्महाकविना महामङ्गलरूपो भद्रशब्द एव प्रयुक्तः । तथा धात्रीदैवतश्रीलाभनिमित्तो मगणोऽपि । तेन स्वप्रबन्धाभिनेतणां सामाजिकानां च सकलमनोरथावाप्तेस्सर्वदा निर्वृतिर्भूयादित्याशासितम् । सरस्वत्यै भद्रं भवतु इति सम्बन्धः । सरस्वत्यै वैखर्यै । वैखरीस्वरूपं तु तत्र तत्राप्युक्तम् । तथापि किञ्चिदत्रोच्यते—या किल शब्दब्रह्मणः परापश्यन्तीमध्यमावैखरीरूपासु चतसृष्ववस्थासु प्रथमावस्थायामनाद्यविद्यावासनोपप्लवमानशब्दार्थावबोधरहितपरब्रह्मशब्दवाच्या, अनन्तरमविद्योपाधिवशात् विवर्तमानेषु सकलेषु त्रिष्वपि रूपकेषु यत् तृतीयं चतुर्वर्गप्रवृत्त्युपायतया सकलजनोपकारकं रूपं तदेवात्र वैखरीशब्देनोच्यते ।

*   *   *   *

निर्भरदेवः चतुष्षष्टिकलावल्लभः तस्योपाध्यायो राजशेखर इति यस्य माहात्म्यं श्रोत्रपरम्परया आरूढं लोके प्रसिद्धत्वेनास्थितं स एष श्रीराजशेखरः

* * * *

कुन्तलाधिपसुता कर्पूरमञ्जरी। उपसंहरति—तस्मादनन्तरकरणीयं सम्पादयावः।

* * * *

Colophon :

इति श्रीकृष्णशङ्करपादयोरन्तेवासिना अनन्तदासेन विरचितायां कर्पूरमञ्जरीव्याख्यायां पदार्थदीपिकायां प्रथमं यवनिकान्तरं समाप्तम् ॥

End :

तस्मात् क्रियतामग्निकार्यम्। सज्जोऽस्मि सन्नद्धोऽस्मि! भो वयस्य गृहाणोत्तरीयग्रन्थिं हस्तेन च हस्ताङ्गुष्ठं कर्पूरमञ्जर्याः चमत्करोतीति किं घनसारमञ्जरी कर्पूरमञ्जर्येव ॥

Colophon :

इति चतुर्थं यवनिकान्तरं समाप्तम् ॥

R. No. **2750.**

Paper. 11 × 9½ inches. Foll. 26. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of Rāmatīrtham Library, Rāmatīrtham, Vizagapatam district.

व्यवहारशिरोमणिः.

VYAVAHĀRAŚIRŌMAṆIḤ.

Foll. 1*a*—25*b*. Fol. 26 is left blank.

A digest of Hindu law compiled from several Smṛti works: by Nārāyaṇa, pupil of Vijñānēśvara, apparently the celebrated commentator on Yājñavalkyasmṛti.

Contains the following Kāṇḍas :—

१. आवेदनकाण्ड.
२. व्यवहारमातृकाकाण्ड.
३. प्रमाणकाण्ड.
४. ऋणादानप्रकरण.
५. निक्षेपोपनिधिप्रकारकाण्ड.
६. संभूयसमुत्थानम्.

७. दत्ताप्रदानिकम्.
८. अभ्युपेत्यशुश्रूषा.
९. वेतनानपाकरणम्.
१०. अस्वामिविक्रय.
११. विक्रयासम्प्रदानम्.
१२. क्रीत्वानुशयः.
१३. समयानपाकरणम्.
१४. सीमापरिच्छेदः.
१५. स्त्रीपुंसयोगः.
१६. दायविभाग (incomplete).

Breaks off in the Dāyabhāga.

Beginning :

समस्तजगदाधारं सच्चिदानन्दविग्रहम् ।
शुद्धस्फटिकसङ्काशमुमारमणमाश्रये ॥
सर्वविद्योपदेष्टारं विज्ञानेश्वरयोगिनम् ।
प्रणौमि परया भक्त्या गणेशं च सरस्वतीम् ॥
अधीत्य धर्मशास्त्राणि विज्ञानेश्वरसद्गुरोः ।
समस्तव्यवहाराणामनायासेन सिद्धये ॥
नारायणो वितनुते व्यवहारशिरोमणिम् ॥
कृतिर्मम गुरोर्भूरिव्यवहारप्रवर्तनी ।
तथापि बालबोधार्थं तत्रोक्ताच्छिष्यते च यः ॥
व्यवहारस्तस्य सिद्ध्यै संप्रत्यस्माकमुद्यमः ।
लेख्यं न त्यज(ज्य)ते क्वापि नालेख्यं कचिदुच्यते ॥

शातातपः—

मनुर्महीपतिर्यस्मिन् काले राज्यमपालयत् ।
तदा धर्मपरास्सर्वे पुरुषास्सत्यसङ्गराः ॥
व्यवहारस्तदा नाभून्न च विद्वेषमत्सरौ ।
नरेषु नष्टधर्मेषु व्यवहारो ह्यपेक्षितः ॥
न्यायस्य तस्य द्रष्टा च क च धारयिता नृपः ।

धर्मपराः धर्मासक्ताः तदानीं सर्वेषामेव धर्मासक्तचित्तत्वाद्व्यवहारकारणीभूतद्वेषमत्सरहेत्वधर्माभावान्नास्त्येव व्यवहारः ; कलौ तु कालदोषवशात्पुरुषाणां प्रायेणाधर्मैकप्राधान्यात् तन्निबन्धनान्यायाप्रवृत्त्यर्थं व्यवहाराख्यो न्यायः मन्वादिभिश्शिष्टैरपेक्षितोऽभिमतः व्यवस्थाप्यत्वेनाङ्गीकृत इति यावत् । तस्य न्यायस्य द्रष्टा अन्यायमार्गप्रवृत्तानां दण्डस्य धारयिता च मन्वादिभिः राजा कृतः ।

नारदः—

दिदृक्षुर्व्यवहारांस्तु नृपतिर्ब्राह्मणैस्सह ।
मन्त्रिभिर्धर्मकुशलैर्विनीतस्संसदं विशेत् ॥

* * * *

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविज्ञानेश्वरचरणारविन्दसेविनो नारायणस्य कृतौ व्यवहारशिरोमणौ आवेदनकाण्डः ॥

End:

Colophon:

इति श्रीव्यवहारशिरोमणौ स्त्रीपुंससम्बन्धाख्यं विवादपदं समाप्तम् ॥

अथ दायविभागाख्यं विवादपदमुच्यते; तत्र नारदः—

विभागोऽर्थस्य पित्र्यस्य तनयैर्यः प्रकल्प्यते ।
दायभाग इति प्रोक्तं व्यवहारपदं बुधैः ॥

* * * *

अथ गौणपुत्राणामपि तत्तदानुगुण्येन केषाञ्चिद्दायग्रहणमुक्तम्—

षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात् ।
औरसो विभजेद्दायं पित्र्यं पञ्चममेव च ॥ इति ।

मनुः ।

R. No. **2751.**

Paper. 11 × $9\frac{3}{4}$ inches. Foll. 12. Lines, 20 in a page. **Grantha.** Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. A. Nārāyaṇa Śāstri Avargal, Sanskrit Pandit, Calicut, Malabar district.

राजयोगद्विशती.

RĀJAYŌGADVIŚATĪ.

Foll. 1*a*—11*b*. Fol. 12 is left blank.

A treatise on Rājayōga consisting of 200 stanzas in the Āryā metre: by Mīnākṣīśa, son of Jñānāmbā and Rāma of Śrīvatsagōtra. The author salutes Pūrṇānandaguru in the beginning. The work is said to have been written in Śaka 1755 expired (1832-33), Vijaya year.

Complete.

Beginning:

श्रीपूर्णानन्दगुरुं[1] श्रितजनवरदानकल्पतरुम् ।
प्रणतभवशरधिसेतुं प्रणमामि परामृताब्धिसद्धेतुम् ॥
नत्वा श्रीपदयुगलीं मोक्षश्रीगेहदोहलीं च गुरोः ।
ध्यात्वा दक्षिणकालीं वक्ष्ये श्रीराजयोगविधिपालीम् ॥
धर्मार्थकाममोक्षेष्वन्तिम [2]एकाकिनित्यपुरुषार्थः ।
आत्मज्ञानेन विना साधककोट्या न संभवेदेषः ॥
तदवाप्तये जगत्यां शास्त्राण्यखिलानि संप्रवृत्तानि ।
पुरुषाधिकारभेदात्त्रिश्रेण्यारोहणक्रमतः ॥

* * * *

ज्ञात्वा श्रीगुरुकृपया दृष्ट्वा विविधानि योगशास्त्राणि ।
उद्धृत्य सारभूतं रचयाम्येतत्सुसाधकहिताय ॥
मन्त्रलयशिवहठाद्या योगाः कथिताः शिवेन पुरा ।
भक्तानुग्रहबुद्ध्या गुरुणा लोकस्य चन्द्रचूडेन ॥
विविधा भवन्ति योगा गहनसदक्षा निरर्थकाः श्रमदाः ।
तेषां श्रेष्ठः फलदो जयति श्रीराजयोगोऽयम् ॥
शिवराजयोगयोरिह न हि किञ्चिद्वस्तुतो भेदः ।
स तथाप्युपासकानामिष्टार्थं पूर्वसूरिभिर्गदितम्[3] ॥
वस्तुनि विमले नित्ये चिद्रूपे महति संविदाकाशे ।
अजहरिरुद्रादीनां तच्छक्तीनां च कल्प्यते ध्यानम् ॥
सोऽपि त्रिविधस्साङ्ख्यं तारकयोगोऽमनस्क इति ।
षट्त्रिंशत्तत्त्वानां ज्ञानं साङ्ख्यमिति कथ्यते विबुधैः ॥

End:

यो नास्तिकश्चतुष्पात् जल्पति नास्तीति तस्य नास्त्येव ।
आस्तिकपुरुषश्रेष्ठः विन्दति परमं सुखं निखिलम् ॥
इषुशरमुनिचन्द्रोत्तरविजयाख्ये शालिवाहशकवर्षे ।
आर्याद्विशतीमेनां विदधे योगीन्द्रगणमनोहृद्याम् ॥
मीनाक्षीशोऽभिधया योगधिया कालिकानन्दः ।
श्रीवत्स(त्सान्वय)तिलको ज्ञानाम्बायां कृतोदयो रामात् ॥
आर्याद्विशतीमेकां प्रत्यहमुत्थाय भक्तियुक्तो यः ।
प्रविचिन्तयेदथार्थं विन्दति भक्तिं शिवे जगति ॥

---

[1] बोधानन्द इति पाठान्तरम्. [2] एकोहि इति पाठान्तरम्. [3] सूरिभिः कथितः.

प्रत्यहमुषसि ज्ञात्वा भक्तियुतस्साधयेद्देवम् ।
गुरुपादपद्मनिरतः मतिमान् स भवेत्क्रमाद्योगी ॥

The scribe adds—

श्रीमानवेदनाम्ना पश्चिमपुरवासकेन लिखितमिदम् ।
भवतु सदा विबुधानां सुखकरणायात्र भूलोके ॥
श्रीमानवेदनाम्ना पश्चिमपुरवासकेन भक्तेन ।
लिखितोऽयं भवतु सदा विबुधानां कारणस्समोदानाम् ।

Colophon:

अथ (इति) राजयोगद्विशती समाप्ता ॥

R. No. **2752.**

Paper. 11 × 9⅝ inches. Foll. 46. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1917-18 from a MS. of the Raja of Chirakkal, Malabar district.

रुक्मिणीपरिणयम्.

RUKMIṆĪPARIṆAYAM.

Foll. 1*a*—44*a*. Foll. 44*b*—46 are left blank.

By Cakrakavi, son of Lōkanātha and Ambā and the younger brother of Patañjali and Rāmacandra. Same work as that described under No. 11715 of the D.C.S. MSS., Vol. XX, wherein see for the beginning.

Contains the Sargas 4 to 12 complete.

End:

इत्थं विदर्भवसुधाधिपतेः कुमारीं
लब्ध्वा श्रियः पतिरवाप्तसमस्तकामः ।
रेमे तया विमलरत्नविनिर्मितासु
प्रासादपङ्क्तिषु सुरासुरगीतकीर्तिः ॥

यं प्रासूत स लोकनाथसुमतिर्विद्वद्वतंसीभव-
त्सूक्तिश्चक्रकविं सतीजनशिशोर्भू(रोमू)षा तथाम्बाभिधा ।
यत्सूनुः कवितासुधाजलनिधिः श्रीरामचन्द्रस्सुधीः
काव्ये तस्य हि रुक्मिणीपरिणये सर्गोऽजनि द्वादशः ॥

R. No. 2753.

Paper. 11 × 9⅝ inches. Foll. 88. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Nīlakaṇṭha Nambūdirippāḍ, Karangattu-manai, Oorakam post, Malabar district.

नैषधव्याख्या—श्रीधरीया.

NAIṢADHAVYĀKHYĀ : ŚRĪDHARĪYĀ.

A commentary on the Naiṣadha of Śrīharṣa: by Vidyāśrīdharadēvasūri of Markibhaṭṭa family and son of Sāvitrī and Kēśava of Vāsiṣṭhagōtra. The author and his elder brother, Gōvindasūri, were Pandits in the court of Sālvamalla who is given the attribute Grahagaṇitaratnākara (the ocean of astronomy). The commentator salutes two ancestors of his family, viz., Vidyāmahāmādhava and Vidyādhara, as well as two preceptors, Kumārasvāmin and his son Kēśava, in the beginning and makes mention of a short commentary by Viśvēśvara alias Sarvajña. The following introduction, in which the above details of information are given, is not found in the MS. but is extracted from another copy recently got to the Library on loan.

Contains the commentary on Sargas one, three and four.

शरणागतगीर्वाणपरित्राणपरायणः ।
करुणामृतपर्जन्यः पायाद्गुणवतीश्वरः ॥

श्रियं दिशतु वो देवः श्रीमान् गुणवतीश्वरः ।
कारुण्यामृतसन्दोहसिन्धुरिन्दुविभूषणः ॥

* * * *

अस्मद्वंशगुरुं नमामि महतो विद्यामहामाधव-
श्रीविद्याधरपण्डितौ च पितरं श्रीकेशवार्यं तथा ।
आचार्यं च कुमारसर्व(शब्द)मुदितस्वाम्याख्यमेतत्सुतं
सूरिं केशवसंज्ञितं मम गुरुं विद्यानिधींस्तानिमान् ॥

* * * *

लक्ष्मीलक्ष्मीकृताङ्गः श्रितकृतिजनतापारिजातप्रभावः
प्रह्वप्रौढक्ष्माभृद्धृतिकृदनिकृतिर्धर्मशर्मैकहेतुः ।
वर्धिष्णुर्भूष्णुरीड्यस्त्रिभुवनभवनप्रस्फुरत्कीर्तिपूर्ति-
स्सन्मूर्तिस्सत्यभामापतिरिव रमते साल्वमल्लावनीन्द्रः ॥

* * * *

तस्यास्थानगतो बुधो विजयते गोविन्दसूरिर्महान्
विद्याश्रीधरदेवसूरिरपरो ह्येतत्कनीयानहम् ।

स श्रीमद्गुणवत्यधीशचरणाम्भोजालिमौलिं महान्
त्रिस्कन्धार्थविशारदोरुजनतामानान्धकारारुणः ॥
वेदव्याकरणाश्रयस्सुकवितावेदान्ततर्कस्मृति-
च्छन्दोऽलङ्कृतिकाव्यनाटकपुराणाम्नायशैवाम्बुधिः ।
ज्योतिस्तन्त्रसुमन्त्रनीतिभरतश्रीयोगवैद्याङ्गभूः
विद्याश्रीधरपण्डितो विजयते श्रीमर्किभट्टान्वये ॥
यं प्रासूत वसिष्ठवंशतिलकः श्रीकेशवार्यस्सुधीः
सावित्री च वधूरधूतविभवं विद्यानिधिं श्रीधरम् ।
सोऽहं श्रीगुणवत्यधीशकरुणासम्प्राप्तवाग्वैभवो
वक्ष्ये चाक्षरदीपिका(कां) नळकथाकाव्यार्थसम्बोधिनी(म) ॥
विश्वेश्वराख्यद्विजपुङ्गवेन सर्वज्ञसंज्ञेन तथापरेण ।
व्याख्यातमेतत्खलु नैषधीयं काव्यं विभिन्नार्थमविस्तरेण ॥
तद्बालबोधाय मया यथावत्प्रकाशितार्था स्फुटरीतिवृत्त्या ।
व्याख्यायते चाक्षरदीपिकाख्या व्याख्या च मुख्या समलङ्कृतान्या ॥
नलकथामृतसिन्धुविमज्जनान्मम गिरं कलुषामपि निर्मला(म्) ।
प्रविदधे नितरामिति मे मतिः विलसतीह न शास्त्रमदादिति ॥

* * * *

करोमि तच्चाकरवं करिष्ये काव्यं रसस्यन्दि मनोऽनुकूलम् ।
तथापि लोकादृतनैषधीयकाव्यार्थमुद्बोधयितुं यतिष्ये ॥
विद्याश्रीधरपण्डितरचितं व्याख्यानरत्नजीवातुम् ।
आदाय नैषधीये काव्ये जीवन्तु सज्जनास्सततम् ॥

Beginning :

अथ तत्र तावदमन्दरसमन्दिरमानन्दशब्दाङ्कितसकलसज्ञातं कान्त श्रव्यं काव्यमारभमाणो राजा श्रीहर्षकविः काव्यानामादौ "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुख"मित्याप्तवचनानुरोधाच्च—

कवेरल्पापि वाग्वृत्तिर्विद्वत्कर्णावतंसति ।
नायको यदि वर्ण्येत लोकोत्तरगुणोत्तरः ॥

इति सरस्वतीकण्ठाभरणे भोजराजेन प्रदर्शितत्वात् । आसीद्राजा नलो नाम वीरसेनसुतो बली इत्यादिना महाभारते महता सन्दर्भेण सकललोको-

त्तरगुणशालितया पुण्यश्लोकतया च नलस्याख्यापितत्वात् सकलप्रयोजनमौलिभूतशिवेतरक्षतये च नायकान्तरं विहाय तमेव काव्ये कथानायकमुररीकृत्य काव्यस्याविघ्नपरिसमाप्तिशिष्यप्रशिष्यप्रचयगमनार्थं वस्तुनिर्देशमेव महन्मङ्गलमाचरत्याद्येन—निपीयेति । स नलः आसीदिति क्रियाकारकयोजना । यत्तदोर्नित्यसम्बन्धात्स इति तच्छब्देन निर्दिष्टं यच्छब्देन परामृशति—यस्येति । यस्य क्षितिरक्षिणो भूपालस्य कथामाद्रियन्ते तथा सुधां नाद्रियन्त इत्यर्थः । सारासारं विजानन्तस्ते बुधा अपि सुधा अमरत्वदायिनी नलकथा त्वानन्दघनत्वदायिनीति नलकथामेवादरतः स्तुवन्तीति ।

* * * *

Colophon:

इति श्रीगुणवतीचरणसरसीरुहषट्पदायमानविविधविद्यानिधानग्रहगणितरत्नाकरश्रीसाल्वमहीमहेन्द्रास्थानभूषामाणिक्यायमानश्रीविद्याधरपण्डितेन्द्रकुलतिलकविद्यामहाश्रीधरेन्द्रपण्डितेन्द्रविरचितायां नैषधचरितटीकायां श्रीधरीयाभिधानायामक्षरदीपिकायां प्रथमस्सर्गस्समाप्तः ॥

End:

श्रीहर्षमिति । स्थैर्यविचारणं नाम प्रकरणग्रन्थविशेषः तस्य भ्रातरि सोदरे तस्यापि श्रीहर्षकृतत्वाद्भ्रातृत्वाध्यवसायः । तस्य महाकाव्ये नलस्य चरिते अयं निसर्गोज्ज्वलः तुर्यसर्गोऽप्यगलत् पूर्णोऽभूदिति ।

शब्दार्थोभयमूलशक्तिकलिता सद्वृत्तबन्धोज्ज्वला
नानातर्कशिफाच्छलच्छदवृता भावप्रसूनाञ्चया(वृता) ।
शृङ्गारैकफला रसौघविलसत्पका जगज्जीविका
श्रीहर्षोक्तिमयी महौषधिलता यस्येविकरतंजयेत् ॥ ?

Colophon:

इति श्रीगुणवतीचरणसरसीरुहषट्पदायमानग्रहगणितरत्नाकरश्रीसाल्वमल्लमहीमहेन्द्रास्थानभूषामाणिक्यायमानश्रीविद्याधरपण्डितेन्द्रविरचितायां नैषधचरितटीकायां श्रीधरीयाभिधानायामक्षरदीपिकायां चतुर्थस्सर्गः ॥

R. No. **2754**.

Paper. 11 × 9⅝ inches. Foll. 216. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of Dēśamaṅgalam-anaikkal, Dēśamaṅgalam, Malabar district.

Bound in two volumes.

(*a*) लीलावती, सव्याख्या.

LĪLĀVATĪ WITH COMMENTARY.

Foll. 1*a*—212*a*.

By Bhāskarācārya. Same work as that described under No. 13477 of the D.C.S. MSS., Vol. XXIV. The name of the commentator is not given.

Breaks off in the Kṣētravyavahāra.

Beginning:

विश्वोत्पत्तिविनाशसंस्थितिविधौ यस्य प्रसादं मुहुः
काङ्क्षन्ते कमलासनाद्रितनयानाथाब्धिजावल्लभाः ।
नित्यं यत्पदपङ्कजे प्रणमतामिष्टार्थसिद्धिर्नृणां
तद्विघ्नौघविघातदक्षचरितं वन्दे गजास्यं महः ॥

* * * *

नारायणं जगदनुग्रहजागरूकं
श्रीनीलकण्ठमपि सर्वविदं प्रणम्य ।
व्याख्यां क्रियाक्रमकरीं रचयामि लीला-
वत्याः कथञ्चिदहमल्पधियां हिताय ॥

अथ विदितसर्वलोकवृत्तः परिशीलितनिखिलशास्त्रार्थवस्तुतत्त्वालोचना-विमलीकृतचित्तवृत्तिर्भगवान् भास्कराचार्यः स्कन्धत्रयात्मकेषु पुरातनेषु ज्योति-श्शास्त्रेषु गणितस्कन्धप्रतिपादकेभ्यस्तत्प्रकरणेभ्यो लोकशास्त्रगतं द्विविधं गणितप्रपञ्चं पृथक् समुद्धृत्य सङ्क्षेपेणैकत्र दर्शयितुं सिद्धान्तशिरोमणिं नाम प्रकरणं कतिपयैः पद्यैः प्रणिनाय । अथ तस्यातिविततगहनगम्भीरार्थतया दुर्विज्ञेयतामाशङ्क्य स्वयमेव परमकृपाविधेयहृदयतया सङ्क्षेपेण तदर्थकथन-पूर्वकं सोदाहरणं तद्विनियोगं प्रदर्शयितुं तद्गतसङ्ख्यान्यासस्थानक्षेत्रविशेषादि-प्रदर्शनपरं लीलावतीसंज्ञितं वृत्तिरत्नं विधास्यंस्तस्याविघ्नपरिसमाप्तिफलमिष्टदे-वतानमस्काररूपं मङ्गलाचरणं विधाय श्रोतृप्रवृत्त्यङ्गतया प्रयोजनमनुवदन् स्वचिकीर्षितं प्रतिजानाति—

प्रीतिं भक्तजनस्य (. . .) लालित्यलीलावतीम् ॥

इह खलु स्मर्यमाणतया विघ्नविघातकत्वलक्षणं भक्तानां प्रीतिजनकत्वं लोकातिक्रान्तचरितम(मे)यमीश्वरोत्कर्षहेतुकं यद्वृत्तेन प्रथममनूद्य स्वात्मनः प्रह्वीभावोऽपि तद्विषय एवोचित इत्यभिप्रायेण तच्छब्दोपादानम् ।

* * * *

प्रस्फुटामिति । प्रकर्षेण स्फुटतया झटित्येव सर्वस्यापि हृदयकमलमनुप्रविशतीं यस्मात् सक्षिप्ताक्षरैः कोमलैरमलैश्च पदैर्यल्लालित्यं ललितत्वं तत्कार्यभूतो य उचितो विलासस्तेन नित्ययुक्तां येनासौ लीलावतीत्याख्यायत इत्यनेन प्रयोजनमुक्तम् । तच्च श्रोतृप्रवृत्त्यङ्गम् ।

End:

सैवोभयगुणकस्स्यादष्टानामेव चास्ति तादृशता ।
अष्टार्धस्य चतुर्णां वर्गः षोडश तदर्धमष्टैव ॥
पञ्चषडाद्यर्थकृतिर्न दलार्हा द्वादशार्धवर्गार्धम् ।
अष्टादश नव द्वादश तेनाष्टकमेव सर्वगुणपूर्णम् ॥

(*b*) लाटादिपञ्चकम्, लघुवृत्तिसहितम्.

LĀṬĀDIPAÑCAKAM WITH LAGHUVṚTTIḤ.

Foll. 212*a*--214*b*. Foll. 215 and 216 are blank.

A treatise dealing with लाट, वैधृति, वेध, क्रान्त, शलाका, which are given in a Hindu calendar. The commentary is apparently by the same author as that of the commentary described under the previous sub-section.

Incomplete.

Beginning:

भास्वन्तमन्धतमसप्रध्वंसप्रथितत्विषम् ।
अन्तरज्ञानतिमिरसमुच्छेदाय संश्रये ॥
समस्तान्यपि कर्माणि निष्प्रत्यूहं समाप्नुयुः ।
यस्य प्रसादात्तं वन्दे गजवक्त्रं महस्सदा ॥
यत्प्रसादात्कवीन्द्रत्वं मन्दोऽपि लभते क्षणात् ।
तां शारदेन्दुस्वच्छाङ्गीं वन्दे देवीं सरस्वतीम् ॥
शक्त्या शश्वन्निखिलसुमनस्संहतिस्तद्विपक्षं
जित्वा सद्यो निजनिजपदे स्थापिता यस्य भाति ।

अक्षोभ्यस्सन्निखिलजगतां वन्द्यपादस्सुशीलः
सुब्रह्मण्यस्स जयतितमां नीलकण्ठावलम्बी ॥
नारायणं जगदनुग्रहजागरूकं
विद्वत्तमं गुणनिधिं सुहृदं प्रणम्य ।
लाटादिपञ्चकविबोधकरस्य पञ्च-
बोधस्य चारुविवृतिं विलिखामि लघ्वीम् ॥

ग्रन्थकारश्शिष्टाचारमनुसरन्नुचितदेवताप्रणामपुरस्सरं चिकीर्षितं प्रतिजानाति—

सर्वेषां ज्योतिषामाद्यं नमस्कृत्य दिवाकरम् ।
लघूकृत्य विधास्यामि व्यतीपातादिबोधनम् ॥ इति ।

इह खल्वादित्यरश्मिप्रतिफलन . . . . क्रमेणैव सर्वेषां ग्रहनक्षत्राणां ज्योतिश्शब्दवाच्यत्वम् ।

End:

सायनस्यार्कस्फुटस्य या केवला क्रान्तिर्या च सायनस्य स्फुटेन्दोर्विक्षेपसंस्कृता तयोस्साम्ये सति तौ लाटवैधृताख्यौ दोषौ स्यातम् । तत्रापि लक्षणसद्भाव एव न पुनस्सर्वत्र ।

तदुक्तम्—

R. No. **2755.**

Paper. 11 × 9⅝ inches. Foll. 200. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Puliyannūr-manai, Tiruppaṇitturai post, Cochin state.

बृहदारण्यवृत्तिसम्बन्धोक्तिः.

BṚHADĀRAṆYAVṚTTISAMBANDHŌKTIḤ.

An introductory commentary on the Bṛhadāraṇyakavārtika of Surēśvarācārya which work gives in the form of stanzas what is stated in the Bṛhadāraṇyakabhāṣya of Śaṅkarācārya: by Viśvānubhava, (as found in another copy of the MS.) pupil of Pratyagbōdhapūjyapāda.

Breaks off in the fourth Brāhmaṇa of the third Praśna.

Beginning:

वियदादि पृथिव्यन्तं जगद्यस्मात्समुद्गतम् ।
तस्मै नमोऽस्तु रामाय चित्तवृत्तिसाक्षिणे ॥

यैरिदं मोक्षदं ज्ञानं मुमुक्षुभ्यः प्रकाशितम् ।
कृपया वार्तिकालोकैस्सुरेशाख्यान्नमामि तान् ॥
प्रत्यग्गीःपूर्वको बोधध्वनिर्यत्र यथार्थकः ।
तानहं सर्वदा वन्दे गुरून्मन्मोहभेदिनः ॥
आरण्यवृत्तिश्लोकानां सम्बन्धोक्तिमविस्तराम् ।
करोमि श्रद्धया शक्त्या न तु स्वल्पज्ञहेतुतः ॥

* * * *

नमस्कारव्याजेन श्रोतृणां सुखप्रबोधनार्थं सङ्क्षेपतो वृत्त्यर्थं दर्शयत्यनेन श्लोकेन—वृत्त्यर्थः क इति । उच्यते—प्रत्यगात्मनि स्वाविद्यया अहंकर्तृप्रमुखद्वैतप्रपञ्चोऽध्यस्ते । न तु पारमार्थिकः । प्रत्यगात्मा तु नित्यशुद्धबुद्धमुक्तस्वभावः सर्वप्रमाणाविषयोऽनुदितानस्तमिताद्वयानन्दब्रह्मैवेत्ययमर्थ उक्तश्लोके प्रतीयते । नमस्कारस्तु चिकीर्षितविवरणस्याविघ्नेन परिसमाप्त्यर्थः ।

* * * *

अरण्याध्ययनाच्चैतदारण्यकमितीर्यते ।
बृहत्त्वाद्ग्रन्थतोऽर्थाच्च बृहदारण्यकं मतम् ।

अनेन बृहदारण्यकनामव्युत्पत्तिं कथयति । अर्थतः कथं बृहत्त्वमुच्यते । प्रतिपाद्यं ब्रह्म तावद्देशतः कालतो वस्तुतश्चानवच्छिन्नं तज्ज्ञानसाधनानि च श्रवणादीन्यत्र प्रतिपाद्यन्ते । उपासनानि बहूनि कर्माणि च क्रमेण तज्ज्ञानसाधनानि । अथार्थतो[1] बृहत्त्वमित्यादिनामव्युत्पत्तिच्छद्मना प्रकृतोचित[2]सर्वोपनिषदामाह मुक्तिमात्रं प्रयोजनम् । उपनिषद्बृहदारण्यकनामव्युत्पत्त्या ब्रह्मविद्यायाः सहेतुकसकलसंसारनिवृत्तिः निरतिशयानन्दावाप्तिश्च प्रयोजनमुक्तमित्यर्थः । इति इत्थम् आदौ नामव्युत्पत्तिग्रन्थादौ नामव्युत्पत्तिच्छद्मनेत्यर्थः ।

मिथो विरोधसिद्ध्यर्थं कर्मज्ञानाधिकारिणोः ।
संसारनिविवृत्सुभ्य इत्युक्तिं भाष्यकृज्जगौ ॥

* * * *

Colophon:

तृतीयस्य प्रथमं ब्राह्मणम् ॥

End:

Colophon:

तृतीयं ब्राह्मणम् ॥

---

[1] अतोऽर्थतः. [2] तोचितं इति पाठान्तरम्.

तद्भेदमित्यतः प्राक्तनग्रन्थस्य स्थूलतात्पर्यार्थमाह—

ज्ञानकर्मफलश्चैतत्कर्मकाण्डप्रचोदितम् ।
आत्मैवेत्यादिशास्त्रेण द्दष्टयादौ कर्तृतोच्यते ॥ इति ॥

* * * *

अत्रापि मन्वादिसृष्टेरित्याकाशादिसृष्टेरित्यर्थः। पुरुषविधवाक्यस्यार्थकथनायाह—एतावद्वास्तवं वृत्तमिति। पुरुषविधवाक्यस्यार्थं सङ्क्षेपतो दर्शयति—मोहोत्थं भण्यतेऽधुनेति । एतत्प्रपञ्चयति । कोशपञ्चकताम्.

R. No. 2756.

Paper. 11 × 9⅝ inches. Foll. 80. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippāḍ, Nareri, Tritala, Malabar district.

रामायणव्याख्या.

RĀMĀYAṆAVYĀKHYĀ.

Foll. 1*a*—79*b*. Fol. 80 is left blank.

A commentary on the Rāmāyaṇa of Vālmīki: by Varadarāja of Uḍāli family.

Contains from the 25th Sarga of the Kiṣkindhākāṇḍa to the end of the fourth Sarga of the Yuddhakāṇḍa, but wants the beginning.

Beginning:

न काल इत्यादि । कर्म पौरुषं कालादधिकं कर्म कर्तुं न शक्यम् । नियतिः कालस्वभावे काले तस्य लोकस्य परायणं शरणम् । . . . . न काल इत्यादि । कालः कालं नात्येति । यस्मिन् दिवसमासादौ स्वांशे काले जन्तुस्सुखदुःखमनुभवति । तं कालं कालो नातिक्रामति न कालः परिहीयते न विलम्बते । तस्मात् कालादर्वाङ् न भवतीत्यर्थः ।

* * * *

Colophon:

इति किष्किन्धाकाण्डे पञ्चविंशस्सर्गः ।

* * * *

Colophon:

इत्युडालिकुलसम्भवेन वरदराजेन रचितं श्रीमत्किष्किन्धाकाण्डव्याख्यानं समाप्तम् ॥

End:

रत्नौघजलसन्नादं रत्नौघजलयोस्सन्नादौ यस्मिन्। विषक्तमिव वायुना एकीभूतमिव वायुना यदक्रूरं जलचरं सत्त्वं वाताहतजलाशयं वाताहतह्रदम् ।

Colophon:

इति युद्धकाण्डे चतुर्थस्सर्गः ॥

R. No. **2757.**

Paper. 11 × 9⅝ inches. Foll. 16. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of the Raja of Chirakkal, Malabar district.

(*a*) लघुचाणक्यम्.

LAGHUCĀṆAKYAM.

Foll. 1*a*—6*b*.

By Cāṇakya. Similar to the work described under No. 12054 of the D.C.S. MSS., Vol. XX.

Complete in eight Adhyāyas.

Beginning:

प्रणम्य शङ्करं देवं ब्रह्माणं च जगद्गुरुम् ।
विष्णुं प्रणम्य शिरसा वक्ष्यामि शास्त्रमुत्तमम् ॥

चाणक्येन स्वयं प्रोक्तं नीतिशास्त्रसमुच्चयम् ।
तदहं संप्रवक्ष्यामि नराणां बुद्धिवर्धनम् ॥

अर्थोऽर्थे विकृते शास्त्रे कीर्तिर्लोके प्रजायते ।
कीर्तिमान् पूज्यते लोके परत्रेह च मानवः ॥

वलीपलितकायोऽपि कर्तव्यं शास्त्रसङ्ग्रहम् ।
न तत्र धनिनो यान्ति यत्र यान्ति बहुश्रुताः ॥

श्रुत्वा धर्मं विजानाति श्रुत्वा त्यजति दुर्मतिः(म्)।
श्रुत्वा ज्ञानमवाप्नोति श्रुत्वा मोक्षं च गच्छति ॥

* * * *

Colophon:

इति श्रीलघुचाणक्ये राजनीतिशास्त्रे प्रथमोऽध्यायः ॥

* * * *

धर्मस्य मूलं राजानः तपोमूलं च साधवः ।
साधवो यत्र पूज्यन्ते तत्र धर्मस्सनातनः ॥
राज्ञि धर्मिणि धर्मिष्ठाः पापे पापस्समे समः ।
राजानमनुवर्तन्ते यथा राजा तथा प्रजाः ॥

End:

लिखिता चित्रगुप्तेन ललाटेऽक्षरमालिका ।
न सा मार्जयितुं शक्या पण्डितैस्त्रिदशैरपि ॥
भवितव्यं यथा येन न तद्भवति चान्यथा ।
नीयते तेन मार्गेण स्वयं वा तत्र गच्छति ॥
पुराकृतं तल्लभते मनुष्यः किं कारणं दैवमलङ्घनीयम् ।
तस्मान्न शोचामि न विस्मयो मे त(य)दस्मदीयं न हि तत्परेषाम् ॥
वने रणे शत्रुजलाग्निमध्ये महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा रक्षन्ति पुण्यानि पुराकृतानि ॥

Colophon:

इति श्रीलघुचाणक्ये राजनीतिशास्त्रे अष्टमोऽध्यायः सम्पूर्णः ॥

(*b*) वृद्धचाणक्यम्.

VṚDDHCĀṆAKYAM.

Foll. 6*b*—16*a*. Fol. 16*b* is left blank.

Similar to the work described under No. 12054 of the D.C.S. MSS., Vol. XX.

Complete in eight Adhyāyas.

Beginning:

प्रणम्य शिरसा विष्णुं त्रैलोक्याधिपतिं प्रभुम् ।
नानाशास्त्रोद्धृतं वक्ष्ये राजनीतिसमुच्चयम् ॥
अधीत्येदं तथा शास्त्रं नरो ज्ञास्यति तत्त्वतः ।
धर्मोपदेशे विज्ञानं कार्याकार्यं शुभाशुभम् ॥
तदाहं सम्प्रवक्ष्यामि नराणां हितकाम्यया ।
येन विज्ञानमात्रेण सर्वज्ञत्वं प्रजायते ॥
मूर्खशिष्योपदेशेन दुष्टस्त्रीधरणेन च ।
द्विषतां सम्प्रयोगेण पण्डितोऽप्यवसीदति ॥

* * * *

Colophon:

इति श्रीवृद्धचाणक्ये राजनीतिशास्त्रे प्रथमोऽध्यायः ॥

End:

राज्यमानं धनाढ्यं च विद्यावन्तं तपस्विनम् ।
रणे शूरं च दातारं कनिष्ठं ज्येष्ठमुच्यते ॥
नास्ति वेदात्परो धर्मः नास्ति मातृसमो गुरुः ।
न च दानात्परं क्लिष्टमिह लोके परत्र च ॥

Colophon:

इति श्रीवृद्धचाणक्ये राजनीतिशास्त्रे अष्टमोऽध्यायः ॥

R. No. **2758.**

Paper. 11 × 9⅝ inches. Foll. 236. Lines, 20 in a page. Grantha Good.

Bound in two volumes.

Transcribed in 1918–19 from a MS. of the Sanskrit Library, Bobbili, Vizagapatam district.

काशीखण्डव्याख्या—पदयोजना.

KĀŚĪKHANḌAVYĀKHYĀ: PADAYŌJANĀ.

By Veṅkaṭanārāyana. Same work as that described under Nos. 2293 and 2294 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Adhyāyas 1 to 32.

R. No. **2759.**

Paper. 11 × 9⅝ inches. Foll. 76. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippāḍ, Nareri, Tritala, Malabar district.

रघुवीरचरितम्.

RAGHUVĪRACARITAM.

Foll. 1*a*—74*b*. Foll. 75—76 are left blank.

A poem describing the incidents in the life of Rāma from the time he entered the Daṇḍakā forest to probably his coronation. The name of the author is not given.

Breaks off in the 12th Sarga.

Beginning :

श्रियः शिवं धाम सदारसोदरः प्रविश्य रामः पितृवाक्यगौरवात् ।
(रक्षो नि)हन् दण्डकमाश्रयस्सतां तपस्विनामाश्रमजातमैक्षत ॥
अनुल्बणस्कन्धनिषण्णवल्कलाः सहिष्णवस्तापहिमाभ्रपाथसाम् ।
लसन्ति यत्र प्रतिपन्नगौरवा द्रुमा मुनीनां परिचारका इव ॥

* * * *

Colophon :

इति श्रीमद्रघुवीरचरिते महाकाव्ये प्रथमस्सर्गः ॥

End :

Colophon :

इति श्रीमद्रघुवीरचरिते महाकाव्ये एकादशस्सर्गः ॥

सलम्बमुच्चैरतिलङ्घ्य शृङ्गं विलम्बितस्वर्णगिरिप्रभावम् ।
अवेलसंपज्जितनाकलोकं सुवेलमापद्यत यत्र लङ्का ॥

* * * *

द्वारप्रवेशं परिहृत्य धीमानुत्सार्य लङ्काश्रियमुन्नतेहः ।
उत्तुङ्गमुल्लङ्घ्य सुवर्णसालस्तामभ्युपेतस्तनुतां विविश्वान ॥
स वीक्षमाणो.

R. No. **2760.**

Paper. 11 × 9⅝ inches. Foll. 130. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Nigamānta Kṛṣṇa-cakravartyācārya of Ketandapatti, North Arcot district.

अद्वैतचिन्तामणिः.

ADVAITACINTĀMAṆIḤ.

Fol. 130*b* is left blank.

A treatise in refutation of Dvaita-Vēdānta and in support of Advaita-Vēdānta : by Sundarēśa. According to a colophon at the end the work is also called Vēdāntanyāyasaṅgraha.

Contains the following six Paricchēdas :—

१. अधिकारिनिरूपणम्.
२. विषयनिरूपणम्.
३. साधननिरूपणम्.
४. फलनिरूपणम्.
५. परमतनिराकरणम्.
६. मतान्तरेण परमतनिराकरणम्.

Beginning :

श्रीमान् वेङ्कटनाथार्यः (. . .) सदा हृदि ॥
. . . ब्रह्म जगतो निरस्यात्यन्तभिन्नताम् ।
असत्यं जगती(दि)त्येके सत्यमाहुस्तथापरे ॥
नाभिन्नं ब्रह्मणेत्याहुर्द्वयेऽपि द्वैतवादिनः ।
अद्वैतं श्रुतय(ः प्राहुः) (पुरा)णस्मृतयोऽपि च ॥
तस्माद् द्वैतनिरासेन स्फुटमद्वैतमुच्यते ।
अन्यानि भाष्याणि विलोक्य सूत्रश्रुतिस्मृतिन्यायपथातिगानि ।
अद्वैत . . . . मपास्तदोषं श्रीसुन्दरेशो . . . मातनोति ॥

अथातो ब्रह्मजिज्ञासा—

इति वेदान्तमीमांसाशास्त्रस्येदमादिमं सूत्रम् । अनेन चाधिकारिविषयसम्बन्धप्रयोजनानि सूत्रितानि । तत्राथशब्देन धर्मविचारानन्तर्याभिधायिना तत्रत्याधिकार्येवात्राप्यधिकारीति सूच्यते । नच तदानन्तर्ये मानाभावः । . . . . नन्तप्रत्ययं चोदनाद्यविशेषात् । नानाशब्दादिभेदात् । लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि । प्रदानवदेव तदुक्तम् । कुशाच्छन्दस्तुत्युपगान . . . . व तन्त्रार्थोपजीवने तदानन्तर्यावश्यवक्तव्यत्वात् । तत्र च अथातो धर्मजिज्ञासेति अथशब्देन . . . . स्योक्तत्वात् । अधीतवेदो जीवोऽधिकारीतीहापि स एवाधिकारी । ब्रह्मजिज्ञासेति जिज्ञासासूत्रेण ब्रह्मणो ज्ञाततया विषयत्वं ब्रह्मज्ञान . . . . . पुरुषार्थसिद्धिश्च सूच्यते । तत्र प्रथममधिकारी निरूप्यते । जीवो नाम ज्ञानाश्रयो देहेन्द्रियादिव्यतिरिक्तोऽणुः कर्ता ।

* * * *

Colophon :

इति श्रीसुन्दरेशविरचिते अद्वैतचिन्तामणौ अधिकारिनिरूपणं नाम प्रथमः परिच्छेदः ॥

End :

अत एवाचार्यवाचस्पतिनापि परस्परपराहतार्थत्वात् कृत्स्न एव वेदः प्रामाण्यमपजह्यात् । इत्याशाविद्याविद्यावत्पुरुषभेदेन काण्डद्वयस्यापि प्रामाण्यमुपपादितम् । तदेवं श्रुतेरद्वैतबोधने सामर्थ्याभावादुपजीव्यप्रत्यक्षविरोधात् प्रयोजनाभावाच्च नाद्वैतपरत्वमिति प्रमाणाभावात् ब्रह्मणो नाद्वितीयत्वमिति ।

Colophon:

इति श्रीमत्सुन्दरेशविरचिते अद्वैतचिन्तामणौ मतान्तरेण परमतनिराकरणं नाम षष्ठः परिच्छेदः ॥

सुन्दरराजीयवेदान्तन्यायसङ्ग्रहस्समाप्तः ॥

R. No. **2761.**

Paper. 11 × 9⅝ inches. Foll. 151. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of Raja of Nilambūrkōvilagam, Malabar district.

युधिष्ठिरविजयव्याख्या.

YUDHIṢṬHIRAVIJAYAVYĀKHYĀ.

Foll. 1*a*—151*a*. Fol. 151*b* is left blank.

Same commentary as that described under No. 11635 of the D.C.S. MSS., Vol. XX. By Śokkanātha, son of Āccāmbā and Sudarśanabhaṭṭa of Bhāradvājagōtra and a disciple of Hastigiribhaṭṭa of Vatsagōtra.

Contains the Āśvāsas two to six complete.

R. No. **2762.**

Paper. 11 × 9⅝ inches. Foll. 225. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Ampalakat Karuṇākara Menon, B.A., B.L., Chalapuram, Malabar district.

Bound in two voluems.

खण्डनखण्डनखाद्यटीका.

KHAṆḌANAKHAṆḌANAKHĀDYAṬĪKĀ.

Foll. 1*a*—224*b*. Fol. 225 is left blank.

A commentary on the Khaṇḍanakhaṇḍanakhādya which is a critical investigation by Śrīharṣa of the definitions, which the Naiyāyika gives, of the main categories of reality and the main cognitional activities.

Contains the first Paricchēda incomplete.

Beginning:

जयति जगतामाद्या माद्यन्मुनीन्द्रमधुव्रत-
प्रवरपरिषत्सेव्यस्वादुप्रफुल्लपदाम्बुजा ।

गिरिवरगुहागेहे संवित्सुखाद्वयविग्रहा
विपुलकृपया काश्मीरेषु श्रिता किल शारदा ॥
संसारसर्पपरिदष्टविनष्टजन्तुसञ्जीवनाय परया कृपयोपपन्नः ।
ब्रह्मावबोधपरमौषधमुद्वहन् यस्तं शङ्करं परतरं भिषजं भजामि ॥
श्रुत्यन्तसिन्धोर्मथनात्तदर्थमन्थाद्रिमीमांसनवासुकिभ्याम् ।
अद्वैतबोधामृतमाद्यसिद्धमास्वाद्यमार्यैरमृतत्वसिद्ध्यै ॥

इह ग्रन्थारम्भे तत्प्रत्यूहविहतये शिष्टाचारसिद्धामिष्टदेवताप्रणतिं प्रकरोति—अविकल्पेति । आचारानुमितवैदिकनमस्कारविधिरयम् । न नित्यः फलसम्बन्धा . . . . . . न च कथितम् । प्रयोजनं विघ्नोपशम इति । न च विश्वजिन्न्यायात्स्वर्गः नियमेन कर्मान्तरारम्भेऽनुष्ठीयमानत्वात् स्वर्गार्थत्वेऽन्यदापि कदाचिदनुष्ठीयेत । आरम्भकाले च विघ्नविहतेरपेक्षितत्वाद्विघ्नोपशमार्थापरानुमितवैदिकनमस्कारविधिरित्थं विघ्नोपशमकाम इष्टदेवतां नमस्कुर्यादिति ।

End:

प्रतिज्ञामात्रादेवाप्तवचनाच्छिष्यस्यार्थनिश्चयोपपत्तेः वेदवचनवदथेति मन्यस इति सम्बन्धः । अपिशब्दाच्छिष्यसमुच्चयः । यत्रेति । परार्थानुमानरूपे लक्षणवाक्यस्य विशेष उक्तः । लक्षणेति । प्रयोजकमिति बोधकमित्यर्थः ।

R. No. 2763.

Paper. 11 × 9⅝ inches. Foll. 26. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of the Raja of Chirakkal, Malabar district.

वृत्तिदीपिका.
VṚTTIDĪPIKĀ.

Foll. 1*a*—26*a*. Fol. 26*b* is left blank.

Same work as that described under No. 1522 of the D.C.S. MSS., Vol. III, wherein see for the beginning. By Kṛṣṇabhaṭṭa of Mauni family and disciple of Mādhavēndrasarasvatī.

Complete.

Beginning:

ध्यात्वा व्यासं गुरुं नत्वा माधवेन्द्रसरस्वतीम् ।
मौनिश्रीकृष्णभट्टेन तन्यते वृत्तिदीपिका ॥

End:

तदेवेदं घटपदं तदेवेदं वाक्यम् एकं पदमेकवाक्यमित्यबाधितप्रतीत्या तत्सिद्धिः । अन्यथा घटपदादीनामप्यवयवातिरिक्तावयव्यसिद्धिप्रसङ्गः । न चेष्टापत्तिः; भवत्सिद्धान्तभङ्गापत्तेः । इत्थं निरूपिताः पञ्च व्यक्तिस्फोटाः । वोपदेवेन तु शक्ततावच्छेदिका जातिरेव वाचिकेत्युक्तम् । जातिश्चाविद्यको धर्मविशेषः । तथा च वर्णजातिस्फोटः, पदजातिस्फोट, (वाक्यजातिस्फोट) इति तन्मते स्फोटत्रयं सिद्धम् ॥

Colophon:

इति मौनिकुलतिलकायमानभट्टात्मजरघुनाथभट्टसुतश्रीकृष्णभट्टविरचिता वृत्तिदीपिका समाप्ता ॥

R. No. **2764.**

Paper. 11 × 9½ inches. Foll. 38. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Kūḍalūr-manai, Nareri, Malabar district.

चन्द्रिकाकलापीडम्.

CANDRIKĀKALĀPĪḌAM.

Foll. 1*a*—37*b*. Fol. 38 is left blank.

A drama in five Acts describing the love and the marriage between Candrikā and Kandarpaśēkhara. It is said to have been staged on the occasion of the Caitra festival of God Nīlakaṇṭha in Cellūr. By Rāmavarman whose maternal uncles were Kēralavarma Rājā of Kollam and Ravivarman.

Complete.

Beginning:

आपीनस्तन . . . . दृष्ट्वा स्फुटं बिम्बितां
कोटीरेन्दुकलां नखक्षतधिया सञ्छादयन्ती मुहुः ।
पाणिभ्यां दरनम्रवक्त्रकमलामीशो नवोढामुमा-
मालिङ्गन् घन . . . . . ततनुः स्मेराननः पातु वः ॥
. . . .
. . . . रत्नप्रदीपायितम् ।

उन्मूर्च्छत्तिमिर . . . . ननविलापातातिमुग्धज्जग-
द्रक्षादक्षिणविभ्रमाद्भुततमं वेदैकवेद्यात्मकम् ॥

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्र--(नेपथ्याभिमुखमवलोक्य) आर्ये इतस्तावत् । प्रविश्य नटी अय्य इयं मि ।

सू—आर्ये सुन्दरिके आदिष्टोऽस्मि समस्तसुरासुरचक्रवर्तिचक्रविशङ्कट-मकुटतटघटितनानाविधानर्घरत्ननिर्यत्ननिर्यत्करनिकरकेसरितचरणसरोरुहस्य

* * * *

मान्धातृप्रमुखराजर्षितपःप्रकाण्डविवर्तस्य चेल्लूरपुरवासिनो निगमवननीलकण्ठस्य चैत्रयात्रोत्सवसमागतै . . . . ॠैरार्यमिश्रैः सबहुमानमानीय विशिष्टसहायेन सकलप्रयोगातिकुशलेन भवता ननु भूतपूर्वमभिनवरसभाव-निर्भरं रूपकमभिनेतव्यमिति ।

* * * *

हरिश्चन्द्ररन्तिदेवप्रमुखराजर्षिनिषेविताल्यपरिचङ्क्रमणधुरन्धरस्य महाराजस्य श्रीरविवर्मणः कनीयसो मूर्तस्येव कोलभूभागधेयस्य श्रीकेरलवर्मणः सहोदरी-सञ्जातेन जगन्निवासपादाम्बुजमधुव्रतेन सरस्वतीरमाकृपाकटाक्षपात्रीभूतेन रामवर्माभिधेयेन कविराजेन विरचितं शृङ्गाररसभूयिष्ठं चन्द्रिकाकलापीडं नाम नाटकं सप्रयोगमभिनीयार्यमिश्रानुपास्महे ।

* * * *

प्रस्तावना ।

ततः प्रविशति कञ्चुकी—आदिष्टोऽस्मि देव्या लीलावत्या कलापक- . . . . . रिचये सूडप्रमुखान् प्रबन्धानतिक्रम्य परेषु कीदृशीं कुशलतामधिगता चन्द्रिकेति । आर्यवैणिकाचार्यं सङ्गीतसागरं पृष्ट्वा त्वरितमागम्यतामिति ।

* * * *

शुद्धविष्कम्भकः ॥

ततः प्रविशति मन्त्रशालाभ्यन्तरे भद्रासनस्थस्सन्देशपत्रिकापाणिना सचिवेनान्वास्यमानो राजा ।

रा—भूरिभूते कलिङ्गाभिप्रायस्तव मनसि कीदृशः ।

भू—स्वपरबलविचाररहिता मन्दधियो दर्पादात्मविप्लवं न पश्यन्ति ।

रा—भवतु तावत् । अधुना सन्देशमाकर्णयामः ।

अमा—एवं तेन प्रतिलिखितम् । मान्येनाहमादिष्टः भवता निरस्तो भवद्भिन्नोदरावरजः कन्दर्पशेखरो द्राक्षारामस्थो मदालोकनकाम्यया विन्ध्यमार्गेण मगधानुपगतवान् । तदा भवच्छ्वशुरो मगधाधिपो भवन्नियोगेन फल्गुनीतीरे विगृह्य तं बन्दीकृत्य भवदन्तिकं प्रेषयामास । अतो मदपेक्षया मत्समीपं स सकुटुम्बः प्रेषणीय इति । पूज्येनात्र नयमार्गापेक्षा कृता । राज्ञां कार्यविनिमयापेक्षी खलु सामोपायः । तस्मात्तटस्थभावः पूज्येनावलम्बितव्यः । तनया पुनरमुष्यावस्कन्दोपप्लववशाद्वियुक्ता । तद्गवेषणार्थमुद्योगं विधास्ये । तथा सर्वात्मना मान्येन कन्दर्पशेखरो मोचयितव्यो यदि सन्धिराकर्ण्यताम् । मालवामात्यं मदनमित्रं सुबाहुं निरुद्धं मान्यो विसृजति चेदहमपि कन्दर्पशेखरं बन्धनाद्विसृजामि ।

* * * *

Colophon:

इति प्रथमोऽङ्कः ।

End:

तथापीदमस्तु (भरतवाक्यम्)—

देवि प्रसन्नहृदया सततं मयि स्याः
स्वाचारमग्नमनसस्सकलाः प्रजास्स्युः ।
ब्रह्मावलोकरसिका मुनयो भवन्तु
राज्ये वसेत् स्थिरतरानुपमा च लक्ष्मीः ॥

इति निष्क्रान्तास्सर्वे ॥

इति पञ्चमोऽङ्कः ॥

Colophon:

चन्द्रिकाकलापीडं नाम नाटकं समाप्तम् ॥

R. No. **2765.**

Paper. 11 × 9⅝ inches. Foll. 350. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of Rajaśrī Mānavikrama Anujan Kuññuṇṇi Rājā of Paḍiññārekōvilagam, 3rd Raja of Calicut, Malabar district.

Bound in two volumes.

नामलिङ्गानुशासनबृहद्वृत्तिः, सुबोधिनी.

NĀMALIṄGĀNUŚĀSANABṚHADVṚTTIḤ : SUBŌDHINĪ.

Foll. 1*a*—349*b*. Fol. 350 is left blank.

Same work as that described under R. No. 1844 ante, wherein see for the beginning.

By Jātavēda Dīkṣita, son of Yājñika Dēvaṇabhaṭṭōpādhyāya who is said to be the author of the Mīmāṁsābhāṣyavivaraṇa.

Contains from the beginning of the Manuṣyavarga to the end of Paravalliṅgaśēṣa in the third Kāṇḍa excepting the Śūdravarga in the second Kāṇḍa.

Colophon :

इति श्रीमीमांसाभाष्यविवरणकृद्याज्ञिकदेवणभट्टोपाध्यायात्मजजातवेददीक्षितकृतायां सुबोधिन्याख्यायाममरकोशबृहद्वृत्तौ वैश्यवर्गोक्तनामलिङ्गविवेचनम् ॥

End :

Colophon :

इति परवल्लिङ्गशेषः ।

अथ वाच्यलिङ्गशेषः । अर्थान्ताः । परोपगा इत्युत्तरवाक्यस्थं पदं सिंहावलोकनन्यायेनेहानुषज्यते ।

अर्थः शब्दो येषां चतुर्थीसमासशब्दानां ते अर्थान्ताः ।

अर्थान्ताश्चतुर्थीसमासशब्दाः परोपगाः अभिधेयलिङ्गा भवन्तीत्यर्थः ॥

* * *

निष्क्रान्तो मर्यादायाः निर्मर्यादः पुमान्, निर्मर्यादा स्त्री, निर्मर्यादं दुर्जनकुलम् । निरादयः क्रान्ताद्यर्थे पञ्चम्येति वक्तव्यसूत्रेण तत्पुरुषसमासः । अलंपूर्वो यथा । अलंजी ।

R. No. 2766.

Paper. 11 × 9⅝ inches. Foll. 26. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of Veṅkāṭṭūr-manaikkal, Cālassēri, Malabar district.

कौमुदीमहोत्सवम्.

KAUMUDĪMAHŌTSAVAM.

A drama describing the love and the subsequent marriage between Kalyāṇavarman, king of Pāṭaliputra, and Kīrtimatī, daughter of Kīrtiṣēna, lord of Sūrasēna. A few unconnected stanzas like the folloing are found at the beginning :—

कोलाङ्कोऽभून्मृगाङ्को न वसति कमले श्रीरिति श्रीवराहः
प्राप्तो नैषा प्रियस्योरसि रतिविरतौ लग्नगण्डं प्रसुप्ता ।

इत्यालापे सखीनां सपदि सकुतुकं सस्पृहं सानुतापं
पाणिभ्यां त्वद्रिपुत्री गणपतिनृपते गण्डपालीं विधत्ते ॥
* * * *

Complete.

Beginning:

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः—

श्रीमद्वैयाघ्रचर्मा स्मररचिततले स्थण्डिले सन्निषण्णः
कृत्वा पर्यङ्कबन्धं फणमणिकिरणक्षारिणा तक्षकेण ।
नानात्वग्ग्रन्थिभेत्रीं धियमिव वितरन् दन्तकान्तिच्छलेन
ब्रह्मव्याख्याननिष्ठस्तव भवतु तमःकृत्तये कृत्तिवासाः ॥

(परिक्रम्य) अये अयं समुपस्थितस्सर्वजनसामान्यमहोत्सवभूतश्शरत्समयसमवतारः ।

* * * *

तदिदानीमत्रभवतः पाटलिपुत्राधिपतेस्सुगृहीतनाम्नो देवस्य कल्याणवर्मणः प्रतिनवराज्यलाभसंवर्धितहृष्टिवृद्धिवर्धसङ्कुलेऽपि राजकुले पुनरयमपरः प्रत्यासीदति कौमुदीमहोत्सवारम्भः । तदहमपि स्वकुलोचितेन सङ्गीतकसेवाधिकारेण लब्धावसरो राजकुलं प्रविशामि । (प्रविश्य)

प्रयुक्तपूर्वेषु पूर्वसूरिसूक्तविशेषेषु का पुनरभिनवरमणीया कृतिरभिनेतव्या । भवतु, यत्तदस्यैव राज्ञस्समतीतं चरितमधिकृत्य यन्निबद्धं नाटकं तदिदानीमग्रतः कृत्वा मगधराजान्तःपुरमवतरामि ।

* * * *

(परिक्रम्य)—अये अयं काश्यपायनः । (आकाशे) किमाह भवान्, कौत्स कुतो भवानागच्छतीति । कुलपतिनिर्देशादभितश्चाण्डिकायतनं पम्पासरस्समीपवर्तिनि कुलक्रमागतस्य सख्युः कुञ्जरकस्य परिग्रहभूते व्याधकिष्किन्धना(म्नि)दुर्गस्थाने प्रतापावसरप्रतिक्षयः । प्रच्छन्नोषितं कुमारं कल्याणवर्माणं सुखमहर्विहारं पृष्ट्वा प्रतिनिवृत्तोऽस्मि । किमाह भवान् कथमितः प्रथ(म)तरमेव वैरिवर्गाधिष्ठितराज्यप्रत्यानयनोपायचिन्तकः पाटलीपुत्रं गतो नाद्यापि व्रतान् वावसरमापादितवान् मन्त्रगुप्त इति ।

* * * *

कुमारः—श्रूयते शूरसेनाधिपतिः कीर्तिषेणो देवः स इदानीं मध्यमो मध्यमलोकपालानाम् । ततस्ततः ।

काञ्चुकीयः—ततस्तस्येयमेका दुहिता प्राणेभ्योऽपि गरीयसीति कीर्तिमती नाम ।

* * * *

Colophon :

प्रथमोऽङ्कस्समाप्तः ॥

* * * *

परि—(आत्मगतम्) उभावपि म(दु)त्सङ्गसंवर्धितौ परस्परं कामातुरौ कीर्तिमती कल्याणवर्मा च । तदनयोर्वागर्थयोरिव समवायं करिष्यामि । (प्रकाशम्) ममायमभिसन्धिः ।

End :

नृत्तारम्भप्रविततशिखश्रेष्टतां नीलकण्ठो
भृङ्गाघ्रातं सुरभि ककुभः पुष्पमाविष्करोतु ।
प्रत्यावृत्ताः पुनरभिमतास्साधु सीमन्तिनीनां
गण्डाभोगव्यतिकरवतीः वेणिमुद्वेष्टयन्तु ॥

इति निष्क्रान्तास्सर्वे ॥

Colophon :

पञ्चमोऽङ्कस्समाप्तः ॥
समाप्तश्च कौमुदीमहोत्सवः ॥

R. No. 2767.

Paper. 11 × $9\frac{5}{8}$ inches. Foll. 170. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Kūḍalūr-mana, Nareri, Malabar district.

धर्ममीमांसाभाष्यव्याख्या.

DHARMAMĪMĀṀSĀBHĀṢYAVYĀKHYĀ.

Foll. 1*a*—169*a*. Foll. 169*b*—170 are left blank.

A commentary on the Mīmāṁsāsūtrabhāṣya of Śabarasvāmin written in accordance with Kumārila's views: by Gōvindāmṛtamuni, also called Dēvēndrasarasvatī, disciple of Nārāyaṇāmṛtapūjyapāda.

Breaks off in the second Pāda of the second Adhyāya, but wants the first Pāda of the first Adhyāya.

Beginning :

यस्मादाविरभूद्विश्वं यत्र च प्रविलीयते ।
तत्त्वतस्सच्चिदानन्दं नमस्यामः परं महः ॥
प्रणमामि गणेशानं देवीं वाचं तथा गुरून् ।
यत्कृपालोकनादेव मनो मे शुद्धतामगात् ॥
श्रीमच्छाबरभाष्यस्य मया शिष्यहितैषिणा ।
कुमारिलोक्तभावस्य क्रियते विवृतिर्मिता ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ॥

अस्याधिकरणस्य विषयमाह—सोऽरोदीदित्यादिना । सङ्गतयस्त्वेवं द्रष्टव्याः । अथातो धर्मजिज्ञासेति प्रमाणादिभिर्धर्मे जिज्ञास्यतया प्रतिज्ञाते किं तत्र प्रमाणमित्यपेक्षायां प्रथमेऽध्याये प्रमाणं निरूप्यते । तेनार्थवादादिप्रामाण्यनिरूपणस्यापि धर्मप्रमाणविचारत्वादस्त्यध्यायसङ्गतिः । पादसङ्गतिस्तु प्रथमे सूत्रे समस्तस्य वेदस्य विवक्षितार्थतया प्रामाण्यप्रतिज्ञायां सत्यामप्यर्थवादादिप्रामाण्यस्य विधिप्रामाण्याधीनत्वाद्विधिभागस्यैव धर्मे प्रामाण्यं प्रति ज्ञाय प्रसाधितं प्रथमे पादे । अधुना धर्मप्रमितावर्थवादादीनामुपयोगतद्विशेषाभावेनाप्रामाण्यमाशङ्क्य तत्प्रतिपादनेन प्रामाण्यं प्रतिपाद्यत इत्येवं मन्तव्या ।

* * * *

Colophon :

इति श्रीमन्नारायणामृतपूज्यपादशिष्यदेवेन्द्रसरस्वत्यपरनामधेयश्रीगोविन्दामृतमुनिविरचिते धर्ममीमांसाभाष्यविवरणे प्रथमस्याध्यायस्य द्वितीयः पादः ॥

End :

गम्यते हीति । वाक्यशेषस्य गच्छतामित्यस्य तन्त्रभावः साधारण्यं न सम्भवतीत्यर्थः । कथं तर्हि उभयत्र वाक्यपूरणम्? तदाह—तस्मादिति ।

Colophon :

इति श्रीमन्नारायणामृतपूज्यपादशिष्यश्रीगोविन्दामृतमुनिविरचिते शाबरभाष्यविवरणे द्वितीयस्याध्यायस्य प्रथमः पादः ॥

शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात् । गतेयमुपोद्घातप्रसक्तानुप्रसक्तादिचिन्ता । अथेदानीं लक्षणार्थश्शब्दान्तरादिभिः कर्मभेदश्चिन्त्यते ।

* * * *

पूर्वपक्षमुपसंहरति—तस्मादिति । सिद्धान्तसूत्रमवतार्य प्रतिज्ञां व्याचष्टे—एवमित्यादिना । कथं सङ्ख्यया भेदावगतिरित्याशङ्क्यावयवान्तरं

व्याचष्टे—पृथक्त्वे हीति । पृथक्त्वेन सहैकार्थनिवेशित्वादिति सूत्रार्थः । ननु पशुसङ्ख्यया पशुभेदेऽपि कथं कर्मभेदस्तत्राह—तच्चेति । ननु बहूनामपि द्रव्याणां समुदितानां प्रजापतिना संयोगस्यैकत्वाद्यागैक्यं स्यादिति पृच्छति-कथमिति ।

R. No. 2768.

Paper. 11 × 9⅛ inches. Foll. 98. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of Tekkēmaṭham, Trichur, Malabar district.

मीमांसान्यायसङ्ग्रहः.

MĪMĀṀSĀNYĀYASAṄGRAHAḤ.

Foll. 1a—97a. Foll. 97b—98 are left blank.

A brief treatise explaining the Mīmāṁsāsūtras in accordance with the views of Prabhākara: by Gōvindabhaṭṭa.

Contains from the second Pāda of the first Adhyāya to the fifth Pāda of the third Adhyāya which is incomplete.

Beginning:

नमस्सकलसंभूतिस्थितिविप्लवहेतवे ।
अपरोक्षीकृताशेषवस्तुने विश्वमूर्तये ॥
अङ्गार्धमङ्गजारातेर्यन्मूर्त्या जगदीशितुः ।
पूर्यतेऽस्यै जगन्मात्रे गिरिजायै सदा नमः ॥
निबन्धमण्डलोद्गीर्णसहस्रन्यायरश्मिभिः ।
प्रबोधितजगत्पद्मं प्रणमामः प्रभाकरम् ॥
निर्मलामृतगोराजत्प्रभाकरसुदर्शने ।
सन्मानसत्कृतानन्दे शिवो नो धीयतां मनः ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते । सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वं, स आत्मनो वपामुदखिदत्, देवा वै देवयजनमध्यवसाय दिशो न प्राजानन्, वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावतीत्येवमादयोऽर्थवादा उदाहरणम् ।

विध्युद्देशैकवाक्यत्वे सिद्धार्थानां स्थिते सति ।
स्तुत्या हेतुतया वेति तत्प्रकारोऽत्र चिन्त्यते ॥

भिन्नवाक्यत्वचिन्तायां न प्रतिज्ञार्थसङ्गतिः ।
तत्रैवं पूर्वपक्षार्थश्रुतेर्हेत्वन्वयो भवेत् ॥
स्तावकत्वे हि लक्ष्येत प्राशस्त्यं तन्न युज्यते ।
लक्षणा कारणाभावाद्वाक्यार्थे चाभ्यनन्वयात् ॥
लक्षितस्यापि तस्येह प्राशस्त्यस्य विधिं प्रति ।
नियोगाननुबन्धित्वात्सम्बन्धानुपपत्तितः ॥
तस्माद्धेत्वन्वयो युक्तस्ततस्सापेक्षतावशात् ।
अपेक्ष्यमाणाभावाच्च कृत्स्नवेदे प्रमाणता ॥

* * * *

Colophon:

इति श्रीमत्प्राभाकरगोविन्दभट्टीये मीमांसान्यायसङ्ग्रहे प्रथमस्याध्यायस्य चतुर्थः पादः परिसमाप्तः ॥

भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते । प्रथमेऽध्याये प्रमाणलक्षणमुक्तम् ।

* * * *

Colophon:

इति श्रीमत्प्राभाकरगोविन्दभट्टीये मीमांसान्यायसङ्ग्रहे द्वितीयस्याध्यायस्य चतुर्थः पादः परिसमाप्तः । समाप्तश्चाध्यायः ॥

अथातश्शेषलक्षणम् ।

शेषलक्षणमारभ्य न वेत्येतत्प्रसिद्धये ।
श्रुत्यादिचोदनागम्या शेषता नाम काचन ॥

End:

Colophon:

इति श्रीगोविन्दभट्टीये मीमांसान्यायसङ्ग्रहे तृतीयस्याध्यायस्य चतुर्थः पादः परिसमाप्तः ॥

आज्याच्च सर्वसंयोगात् । स्तो दर्शपूर्णमासौ तत्र श्रूयते उत्तरार्धात्स्विष्टकृते समवद्यतीति । तथेडामुपह्वयतीति तथान्यानि शेषकार्याणि ।

आज्यादुपांशुयाजार्थाच्छेषकार्यक्रियेति किम् ।
किं वा नेत्यस्य सिद्ध्यर्थं शेषस्तत्रास्ति वा नवा ॥

* * * *

तावन्मात्रप्रयोगेऽपि यागकर्तृत्वसंभवात् ।
अनपा(वा)नश्रुतेश्चापि याज्यैकविषयत्वतः ॥

तस्माद्धेतुर्वषट्कारनिमित्तं भक्षणं भवेत् ।
सिद्धान्तोऽत्र वषट्कारो व्यपनीयेत होतृता ॥
यत्र हि प्राप्यते होता तत्र यष्टा . . . ।

R. No. 2769.

Paper. 11 × 9⅝ inches. Foll. 406. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Subrahmaṇya Rājā of Eḍapalli.

Bound in two volumes.

भागवतव्याख्या—कृष्णपदी

BHĀGAVATAVYĀKHYĀ : KṚṢṆAPADĪ.

Foll. 1*a*—405*a*. Fol. 405*b* contains the name of the owner of the MS. from which this was copied. Fol. 406 is left blank.

A commentary on the Bhāgavata; by Rāghavānandamuni, disciple of Kṛṣṇānandapūjayapāda.

Contains the Adhyāyas 1 to 90 in the tenth Skandha.

Beginning:

यत्कारुण्यकटाक्षवीक्षणलवश्रद्धालवस्साधवः
त्यक्त्वा पुत्रकलत्रवित्तधरणीगेहादिकं दूरतः ।
ग्रामात्काननमभ्युपेत्य विजनं भीमं तपः कुर्वते
तस्मै सात्वतपुङ्गवाय हरये कुर्वे नमस्यां सदा ॥

उक्ताः परे गतैस्स्कन्धैरवताराः परात्मनः ।
वासुदेवावतारोऽस्य दशमेन प्रकाश्यते ॥

अध्याया अत्र नवतिस्त्रिविधं तस्य चेष्टितम् ।
गोकुले मधुरायां च द्वार्वत्यां चोत्थितं क्रमात् ॥

* * * *

जातो गतः पितृगृहादिति श्लोकद्वयेन नवमान्ते सङ्गृहीतं कृष्णचरितं विस्तरतः श्रोतुकामो राजा पृच्छति— कथित इति त्रयोदशभिः श्लोकैः । हे मुनिसत्तम भवता सोमसूर्ययोः वंशविस्तारः कथितः । उभयवंश्यानामुभयोर्वंशे भवन्तीत्युभयवंश्यास्तेषां राज्ञां परमाद्भुतं चरितं च कथितम् । नितरां धर्मशीलस्य धर्माभ्युदयस्य निश्रेयसनिमित्तं पुण्यापूर्वं तदर्थं शीलमाचरितं यस्य तस्य यदोर्वंशश्च कथित इत्युक्तानुवादच्छलेनानुकथैव त्वया वर्णिता न हरेः कथेति व्यञ्जितम् ।

* * * *

Colophon:

इति श्रीभागवतव्याख्यायां कृष्णपद्यां दशमस्कन्धे प्रथमोऽध्यायः ॥

End:

चित्रमिति । उरुगायविचित्रलीला उरुगायस्य विचित्रा अत्याश्चर्यरूपा लीला स्त्रीणां च दुस्त्यजकृतान्तजपापवर्गं मृत्युभयविमोक्षं प्रीतिस्स्यादिति यदेतन्न चित्रम् । यतो विध्वस्तकल्मषकदम्बकमुक्तिरूपम् । विध्वस्तं कल्मषकदम्बकं यैस्तेषां मुक्तेः स्वरूपमव्यभिचारितं तत्साधनं भवति । अस्य मुमुक्षुताधिकारत्वादित्यर्थः । भगवत्सेवार्थिभिः गृहात्प्रव्रजनमवश्यानुष्ठेयमिति सूचयितुं पुनर्वचनम्। ग्रामाद्वनं क्षितिभुजोऽपि ययुर्यदर्थाः । इति य उरुगाय एव प्राप्योऽर्थः । अत्र संभोगविप्रलम्भशृङ्गारसङ्करः ।

अलं कमललोचनः स्वजनसम्पदे जृम्भते
सदेति बहुभाषया यदधुनापि भक्तानसौ ।
बिभर्त्युभयमद्वयं सुखमखण्डमापादयन्
मनस्यमलतां गते चरणचिन्तनेनात्मनः ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीकृष्णानन्दपूज्यपादशिष्यस्य श्रीमद्राघवानन्दमुनेः कृतौ श्रीभागवतव्याख्यायां श्रीकृष्णपद्यां दशमस्कन्धे नवतितमोऽध्यायः ॥

R. No. **2770.**

Paper. 11 × $9\frac{5}{8}$ inches. Foll. 281. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Kṛṣṇacakravartyācāriyar of Ketandapatti, North Arcot district.

Bound in two volumes.

बृहत्पाण्डवपुराणम्.

BṚHATPĀṆḌAVAPURĀṆAM.

Foll. 1*a*—280*b*. Fol. 281*a* gives the contents of the work. Fol. 281*b* is left blank.

Similar to the work described under R. No. 1388 ante. The work is also called Mahābhārata and is divided into 25 Parvans, the subjects dealt with therein being given below. It was composed at Śrīpura in Śākavaṭa by Śrī-Śubhacandra and revised and written by his disciple

Brahma Śrīpāla. The author has written other works, viz., Candranātha-carita, Padmanābhacarita, Jīvakacarita, Pārśvanāthakāvya, Adhyātma-padyavṛtti, Cintāmaṇi (a grammatical work), Candanākathā, Nāndīśvarī, etc. He was the head of a Jaina Mutt previously occupied by

Padmanandi
|
Sakalakīrti
|
Bhuvanakīrti
|
Vijayakīrti

A stanza at the end gives the date of the composition of the work. Complete in 25 Parvans which treat of the following topics:—

१. श्रेणिकस्य जिनवन्दनोत्साहवर्णनम्.
२. जयस्य सेनापतिपदप्राप्तिवर्णनम्.
३. जयसुलोचनोपाख्यानम्.
४. शान्तिनाथभवषट्कवर्णनम्.
५. शान्तिनाथपुराणव्यावर्णनम्.
६. कुन्थुजिनपतिपुराणप्ररूपणम्.
७. अरनाथकर्णकुमारोत्पत्तिवर्णनम्.
८. पाण्डवकौरवोत्पत्तिकथनम्.
९. पाण्डुमाद्रीपरलोकप्राप्तिधृतराष्ट्रप्रश्नवर्णनम्.
१०. भीमविघ्नविनाशार्जुनशब्दवेधविद्याप्राप्तिवर्णनम्.
११. यादवद्वारकाप्रवेशनेमीश्वरोत्पत्तिवर्णनम्.
१२. पाण्डवलाक्षागृहप्रवेशज्वलनप्रच्छन्ननिर्गमनं, गङ्गासमुत्तरणे तुण्डिकानामजलदेवतावशीकरणवर्णनम्.
१३. पाण्डवपुरदेशगमनयुधिष्ठिरकन्यालाभवर्णनम्.
१४. भीमपाण्डवकन्याद्वयप्राप्तिघटकसुतोत्पत्तिगजवशीकरणगदालाभवर्णनम्.
१५. पार्थद्रौपदीविवाहहस्तिनापुरसमागमवर्णनम्.
१६. पाण्डवद्यूतक्रीडाकरणवनवासगमनवर्णनम्.
१७. पाण्डवानां कृत्योपद्रवनाशनविराटगमनद्रौपदीशीलरक्षणकीचकविनाशवर्णनम्.
१८. पाण्डवानां विराटनगरे कौरवभङ्गप्रापणगोकुलविमोचनाभिमन्युविवाहद्वारवतीप्रवेशवर्णनम्.

१९. कृष्णजरासन्धसङ्गरवर्णनगाङ्गेयसंन्यासग्रहपञ्चमस्वर्गगमनवर्णनम्.

२०. कौरवजरासन्धवधवर्णनम्.

२१. द्रौपदीहरणविष्णुपाण्डवतद्द्वीपगमनद्रौपदीप्राप्तिवर्णनम्.

२२. नेमिनाथकेवलोत्पत्तिद्वारिकादहनकृष्णपरलोकगमनबलदेवदीक्षाग्रहण-वर्णनम्.

२३. पाण्डवभवान्तरद्वयवर्णनम्.

२४. द्रौपदीभवान्तरवर्णनम्.

२५. पाण्डवोपसर्गसहनकेवलोत्पत्तिमुक्तिसर्वार्थसिद्धिगमनश्रीनेमिनाथनिर्वा-णगमनवर्णनम्.

Beginning :

सिद्धं सिद्धार्थसिद्धस्वं सिद्धिदं सिद्धसत्पदम् ।
प्रमाणनयसंसिद्धं सिद्धज्ञं नौमि सिद्धये ॥
वृषभं वृषभं भान्तं वृषभाङ्कं वृषोन्नतम् ।
जगत्सृष्टिविधातारं वन्दे ब्रह्माणमादिमम् ॥
चन्द्राभं चन्द्रशोभाढ्यं चन्द्राच्र्यं चन्द्रसंस्तुतम् ।
चन्द्रप्रभं सदा चन्द्रमीडे सच्चन्द्रलाञ्छनम् ॥
शान्तिं शान्तेर्विधातारं सुशान्तं शान्तकिल्बिषम् ।
तं नमामि निरस्ताघं मृगाभं षोडशं जिनम् ॥
नेमिर्धर्मरथोन्नेमिश्शास्त्रशंसितशासनः ।
जगज्जगत्त्रयीनाथो निर्जितानङ्गसम्मदः ॥
वर्धमानो महावीरो वीरः सन्मतिनामभाक् ।
सम्पातु भगवान विश्वं येन बाल्ये जितस्स्मरः ॥
गौतमो गौतमो गीष्यो(ष्पो) गणेशो गणनायकः ।
गिरा गणनतो नित्यं भानुभाभारभूषितः ॥
युधिष्ठिरं कर्मशत्रुं युधि स्थिरं स्थिरात्मकम् ।
दधे धामा(धर्मा)र्थसंसिद्धं मानसे महिमं(तं) मुदा ॥
भीमं महामुनिं भीमं पापानि(नां)क्षयकारिणम् ।
संसारास्सा(ला)तशान्त्यर्थं दधे हृदि धृतोन्नतिम् ॥
अर्जुनस्य प्रसिद्धस्य विशुद्धस्य जितात्मनः ।
स्मरामि स्मरमुक्तस्य स्मररूपस्य सुस्मृतेः ॥

नकुलो वै सदा देवैस्सेवितश्शुद्धशासनः ।
सहदेवो बली कौश्यमलनाशी विभाति च ॥
भद्रबाहुर्महाभद्रो महाबाहुर्महातपाः ।
स जीयात्सकलं येन श्रुतं ज्ञानं(तं) कलौ विदा ॥
विशाखो विश्रुताशाखः सुशाखो यस्य पातु माम् ।
स भूतले मिलन्मौलिहस्तभूलोकसंस्तुतः ॥
कुन्दकुन्दाग(ग्र)णीः धेनोर्जयन्ति गिरिमस्तक ।
सोऽवतार्द्धिदिता ब्राह्मी पाषाणघटिताकुलौ ॥
समन्तभद्रो भद्रार्थो भातु भारणभूषणः ।
देवागमेन येनात्र व्यक्तो देवागमः कृतः ॥
पूज्यपादस्सदा पूज्यपादपूज्यै(ज्यः)पुनातु माम् ।
व्याकरणार्णवो येन तीर्णो विस्तीर्णसद्गुणः ॥
अकलङ्कः कलङ्कस्स कलौ कलयतु श्रुतः ।
पादेन ताडिता येन मायादेवी घटस्थिता ॥
जिनसेनयतिर्जीयाज्जिनसेनः कृतं वरम् ।
पुराणपुरुषाख्यार्थपुराणं येन धीमता ॥
गुणभद्रभदन्तोऽत्र भगवान् भातु भूतले ।
पुराणाब्धौ प्रकाशार्थं येन सूर्यायितं लघु ॥
तत्पुराणार्थमालोक्य धृत्वा सारस्वतं श्रुतम् ।
मानसे पाण्डवानां हि पुराणं भारतं ब्रुवे ॥
पुराणाब्धिः क गम्भीरः क मेऽत्र धिषणा लघुः ।
अतोऽतिसाहसं मेने स . . . रदायकम् ॥
जिनसेनादयोऽभूवन् कवयश्शास्त्रपारगाः ।
तदङ्घ्रिस्मरणानन्दात्करिष्ये तत्कथां पराम् ॥

*　　*　　*　　*

षड्विधाख्यायते व्याख्या विख्यातैस्तत्र मङ्गलम् ।
निमित्तं कारणं कर्ताभिधानं मानमेव च ॥
इतिहाससमुद्रेऽस्मिन् मङ्गलं गदितं पुरा ।
यज्जिनेन्द्रगुणस्तोत्रं मलक्षालनयोगतः ॥

यन्निमित्तमुपादाय मीयते शास्त्रसञ्चयः ।
तन्निमित्तं मतं मान्यैः पापपङ्कनिवारकम् ॥
कारणं कृतिभिः प्रोक्तं भव्यबृन्दं समुद्धतम् ।
यथात्र श्रुतिसन्धानः श्रेणिकः श्रेयसे श्रुतः ॥
कर्ता श्रुतौ श्रुतस्तत्र मूलकर्ता जिनेश्वरः ।
गौतमोऽप्युत्तरः कर्ता कृतिनां संमतो मुदा ॥
उत्तरोत्तरकर्तारो विष्णुनन्द्यपराजिताः ।
गोवर्धनो भद्रबाहुर्बहवोऽन्ये तदादयः ॥
नाम्ना पुराणमर्थाद्यं(ढ्यं) पाण्डवानां सुपण्डितैः ।
मतं पाण्डुपुराणाख्यं पुरुष्पौरुषसङ्गतम् ॥
सङ्ख्याय चार्थतोऽनन्तं सङ्ख्याताक्षरसङ्ख्यया ।
सङ्ख्यातं क्षिप्रमाख्यातं पुराणं पूर्वसूरिभिः ॥

* * * *

द्रव्यं क्षेत्रं तथा तीर्थं काले भावस्तथा फलम् ।
प्रकृतं सप्त चाङ्गान्याहुरमूनि कथा मुने ॥
इत्याख्याय कथासारं पुराणं पावनं परम् ।
पुराणपुरुषाणां हि प्रोच्यते भारताभिधम् ॥
अथ जम्बूमति द्वीपे विस्तीर्णे विबुधैर्जनैः ।
भारतं सस्यमाभाति भारतीभारभूषितम् ॥
धैर्यवर्यार्यखण्डेऽस्मिन्नार्यखण्डे सुमण्डिते ।
अखण्डाखण्डलाकारैर्जनैर्जीवनदायिभिः ॥
विदेहविषयो भाति विशिष्टैर्देहसद्गुणैः ।

* * * *

कुण्डाख्यं मण्डनं भूमेः पत्तनं तत्र राजते ।
सत्तमैः सकलैः पूर्णं राजराजपुरोपमम् ॥
सिद्धार्थसिद्धसर्वार्थसिद्धसाध्यस्सुसिद्धिभाक् ।
नाथवंशोद्भवो नाथो भूनाथः पाति तत्पुरम् ॥
चेटकाद्रिसमुत्पन्ना सिद्धार्थाब्ध्यवगाहिनी ।
तटिनी वरसेनस्य प्रियाभूत्प्रियकारिणी ॥

* * * *

सा सुप्ता शयने शान्ता मातङ्गं गां हरिं रमाम् ।
दाम्नि चन्द्रदिवानाथं मीनौ कुम्भौ सरोवरम् ॥
वार्धिं सिंहासनं व्योमयानं भूमिगृहं पुनः ।
रत्नौघमग्निमैक्षिष्ट स्वप्नान् षोडश चेत्यमून् ॥

*   *   *   *

जज्ञेऽस्यास्सुतश्चैत्रे त्रयोदश्यां सु(सि)तेऽहनि ॥
चतुर्दश्यां सुतो लेभे मेरौ स्नानं सुरेन्द्रतः ।
वर्धमानाख्यया ख्यातः क्षितौ क्षिपु(प्त)रिपूत्करः ॥

*   *   *   *

Colophon:

इति श्रीपाण्डवपुराणे महाभारतनाम्नि भट्टारकश्रीशुभचन्द्रप्रणीते ब्रह्म-श्रीपालसाहाय्यसापेक्षे श्रेणिकस्य जिनवन्दनोत्साहवर्णनं नाम प्रथमपर्व ॥

End:

श्रीमूलसङ्घेऽजनि पद्मनन्दी तत्पट्टधारी सकलादिकीर्तिः ।
कीर्तीकृता येन च मर्त्यलोके शास्त्रार्थकीर्तिस्सकला पवित्रा ॥
भुवनकीर्तिरभूद्भुवनाधिपैर्भुवनभासनचारुमतिस्तुतः ।
वरतपश्चरणोद्यतमानसो भवभयाहिखगेट् क्षितिपक्षमी ॥
चिद्रूपवेत्ता चतुरश्चिरं तच्चिद्भूषणश्चर्चितपादपद्मकः ।
सूरिश्च चन्द्रादिचयैश्चिनोतु वै चारित्रशुद्धिं खलु तत्प्रसिद्धिदाम् ॥
विजयकीर्तियतिर्मुदितात्मको जिततताम्यमतस्सुगतैस्स्तुतः ।
अवतु जैनमतस्सुमतो मतो नृपतिभिर्भवितोभयतो विभुः ॥
पट्टे तस्य गुणाम्बुधिर्व्रतधरो धीमान् गरीयान् वरः
श्रीमान् श्रीशुभचन्द्र एष विदितो वादीभसिंहो महान् ।
तेनेदं चरितं विचारसुकरं चाकारि चञ्चद्रुचां
पाण्डोः श्रीशुभसिद्धिसातजनकं सिद्ध्यै सुतानां सदा ॥
चन्द्रनाथचरितं चरितार्थं पद्मनाभचरितं शुभचन्द्रः ।
मन्मथस्य महिमानमतन्द्रो जीवकस्य चरितं च चकार ॥
चन्दनायाः कथा येन दृब्धा नान्दीश्वरी तथा ।
आशाधरकृतार्चावृत्तिस्सद्वृत्तिशालिनी ॥

त्रिंशच्चतुर्विंशतिपूजनं यः सद्वि(द्वृ)द्धसिद्धार्चनमाव्यधत्त ।
सारस्वतीयार्चनमत्र शुद्धिचिन्तामणीयार्चनमुच्चरिष्णुः ॥
श्रीकर्मदाहविधिबन्धुरसिद्धसेवानानागुणौघगणनाथसमर्चनं च ।
श्रीपार्श्वनाथवरकाव्यसुपञ्चिकां च यस्सश्चकार शुभचन्द्रयतीन्द्रचन्द्रः ॥
उद्यापनमदीपिष्ट पल्योपमविधेश्च यः ।
चारित्रशुद्धितपसश्चतुस्त्रिर्द्वादशात्मनः ॥
संशयवदनविदारणमपशब्दसुखण्डनं परं तं ज्ञां(ज्ञानम्) ।
सत्तत्त्वनिर्णयं परस्वरूपसम्बोधिनीं वृत्तिम् ॥
अध्यात्मपद्यवृत्तिं सर्वार्थां पूर्वसर्वतोभद्रम् ।
योऽकृत सद्याकरणं चिन्तामणिनामधेयं च ॥
कृता येनाङ्गप्रज्ञप्तिस्सर्वाङ्गार्थप्ररूपिका ।
स्तोत्राणि च पवित्राणि षड्वादाः श्रीजिनेशिनाम् ॥
तेन श्रीशुभचन्द्रदेवविदुषा सत्पाण्डवानां परं
दीव्यद्वंशविभूषणं शुभभरभ्राजिष्णुशोभाकरम् ।
शुम्भद्भारतनाम निर्मलगुणं सच्छब्दचिन्तामणिं
पुष्यत्पुण्यपुराणमत्र सुकरं चाकारि प्रीत्या महत् ॥
शिष्यस्तस्य समृद्धिबुद्धिविशदो यस्तर्कवेदी वरो
वैराग्यादिविशुद्धिबृन्दजनकः श्रीपालवर्णी महान् ।
संशोध्याखिलपुस्तकं वरगुणं सत्पाण्डवानामिदं
तेनालेखि पुराणमर्थनिकरं पूर्वे वरे पुस्तके ॥
श्रीपालवर्णिना येनाकारि शास्त्रार्थसङ्ग्रहे ।
साहाय्यं स चिरं जीयाद्वरविद्याविभूषणः ॥
ये शृण्वन्ति पठन्ति पाण्डवगुणं सल्लेखयन्त्यादरा-
ल्लक्ष्मीराज्यनराधिपत्यसुरतां चक्रित्वशक्रेशिना(ता)म् ।
भुक्त्वा भोगमिदं पुराणमखिलं संबोभवीत्युन्नता
मुक्तौ ते भवभीमनिम्नजलधिं सन्तीर्य सातङ्गताः ॥

* * * *

श्रीमद्विक्रमभूपतेर्द्विकहतस्पष्टाष्टसङ्ख्ये शते
रम्येऽष्टाधिगवत्सरे सुखकरे भाद्रे द्वितीयातिथौ ।

श्रीमद्वाखरनीप्रतीदमतुलं(?) श्रीशाकवाटे पुरे
श्रीमच्छ्रीपुरधाम्नि वै विरचितं स्थेयात्पुराणं परम् ॥

Colophon:

इति श्रीपाण्डवपुराणे महाभारतनाम्नि भट्टारकश्रीशुभचन्द्रप्रणीते ब्रह्मश्रीपालसाहाय्यसापेक्षे पाण्डवोपसर्गसहनकेवलोत्पत्तिमुक्तिसर्वार्थसिद्धिगमनश्रीनेमिनाथनिर्वाणगमनवर्णनं नाम पञ्चविंशतितमं पर्व ॥

The scribe adds—

संवत् १९१९ राक्षसवर्षे पूर्वपक्षे तिथौ रविवासरे श्रीमूलसङ्घे सरस्वतीगच्छे बलात्कारगणे श्रीकुन्दकुन्दाचार्यान्वयभट्टारकश्रीभुवनभूषणदेवतत्पट्टे भट्टारकश्रीधर्मचन्द्रतत्पट्टे भट्टारकश्रीदेवेन्द्रकीर्तिदेवतत्पट्टे ब्रह्मश्रीमहतिसागरस्वामिदेवतदुपदेशात् दोसींखुशालभेमजीभार्याराजीबाइ उभयपुत्रप्रथमवीरचन्द्रद्वितीयपुत्रमोजीतिचन्द्रतृतीयपुत्रपूलचन्द्रचतुर्थपुत्रमाणचन्द्रखुशालहुंबडज्ञातिलघुशाखायामुत्तरेश्वरगोत्रश्रीआदिनाथचैत्यालये श्रीफलटणग्रामे श्रीआदिनाथचैत्यालय इदं ग्रन्थं ज्ञानावरणीयकर्मक्षयार्थं लिखितं सांहीराचन्द्रामुलखश्रीमत्पञ्चमगुरुभ्यो नमो नमः ॥

अयं ग्रन्थः राक्षसनामसंवत्सरे कार्तिकशुद्धपौर्णमासीतिथौ आदिवासरे कृत्तिकानक्षत्रे लेखनसमाप्तिमगमत् ॥

R. No. 2771.

Paper. 11 × 9⅜ inches. Foll. 164. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Raṅgarāmānujācārya of Pallakacheri, South Arcot district.

आगमप्रदीपः.

ĀGAMAPRADĪPAḤ.

Same work as that described under R. No. 2219 ante, wherein see for the beginning.

Contains the Prakaraṇas six to nine complete and ten incomplete, the topics dealt with therein being—

६. अग्निकार्यप्रयोगः.
७. उद्वाहविधिः.
८. नित्ययागविधिः.
९. गृहाराधनविधिः.
१०. स्नपनविधिः.

End:

सकृदाचम्य शुचिनि देशे मूलमनुं तथा ॥
द्वादशाक्षरविद्यां च गायत्रीं वैष्णवीमपि ।
यथाशक्ति स्वयं जप्त्वा प्रणम्य परमेश्वरम् ॥
दत्वा द्विजेभ्यस्ताम्बूलीं स्वयं कुर्याच्च चर्वणम् ।
इज्याविधिरयं ब्रह्मन्नितस्स्वाध्याय उच्यते ॥
इत्यन्तेनोक्तेज्यां पूर्वोक्तक्रमेण समापयेत् ।

Colophon:

इत्यागमप्रदीपे गृहाराधनविधिर्नाम नवमप्रकरणम् ॥

अथ स्नपनविधिः प्रारभ्यते—

ब्रह्मा—

राज्ञो राष्ट्रस्य मर्त्यानां यदभ्युदयसाधनम् ।
यच्चोत्पातप्रशमनं व्याधीनां चापनोदनम् ॥
यदभिप्रेतमखिलं साधयत्यविलम्बितम् ।
कुर्वतां भगवन् तन्मे तदर्चनमनुत्तमम् ॥
कथ्यतां मयि चेदस्ति दया परमपूरुष ।
रहस्यमपि तन्मह्यमाख्येयं जगतो हितम् ॥

* * * *

श्रीभार्गवतन्त्रे श्रीरामोक्तस्नपनविधिः—

स्नपनं देवदेवस्य बहुधा परिकीर्त्यते ।
तत्र ब्राह्मं विशेषं स्यात्सर्वकर्मसु योजयेत् ॥
अथवा वैष्णवं स्नानं यद्वा पुण्यं समाचरेत् ।
श्रेष्ठमध्यकनिष्ठानि त्रिविधानि महामुने ॥

* * * *

सप्तलोहम्—

सुवर्णं रजतं ताम्रं सीसकं त्रपुक तथा ।
कांस्यमायससारं च सप्तलोहघटोदके ॥

R. No. 2772.

Paper. 11 × 9⅝ inches. Foll. 74. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇan Nambūdirippāḍ, Nareri, Malabar district.

सेतुबन्धव्याख्या.
SĒTUBANDHAVYĀKHYĀ.

Foll. 1*a*—73*b*. Fol. 74*a* contains the name of the owner of the MS. from which this was copied. Fol. 74*b* is left blank.

A commentary called Sētu by Vaidikacūḍāmaṇi Mādhavayajvan on the Prākṛt poem called Sētubandha or Daśamukhavadha of Pravarasēna dealing with the destruction of Rāvaṇa by Rāma. The text has been printed together with the commentary of Rāmadāsa in the Kāvyamāla. Therein the work is said to be complete in 15 Āśvāsas whereas in the MS. under notice the 16th Āśvāsa is also found. There are other differences also noticeable between this MS. and the printed copy.

Contains the Āśvāsas 1 to 16 complete, but without the 12th Āśvāsa.

Beginning:

प्रणम्य जगतो हेतुं सेतुं संसारवारिधेः ।
सेतुदम्पतितात्पर्यव्याख्या सेतुर्निबध्यते ॥
गृहीत्वा खा(स्वा)दितस्सर्वो यासां तात्पर्यमस्फुटम् ।
संस्कृतैर्निर्दिशन् देशीर्गाथास्ता व्याकरोम्यहम् ॥

प्रबन्धादावविघ्नपरिसमाप्तिकामः कविर्नमतेत्यस्य विध्यर्थतया प्रणामापरपर्यायस्य भगवदुपासनस्य सकलसहितसाधनाभिधानद्वारेण तदुपासनयितोत्कीर्तनरूपमविगीतसदाचारसमधिगतं मङ्गलं कुर्वन् श्रोतृणामपि तत्कर्तव्यताबोधनार्थं ग्रन्थेन निबध्नाति नमहेत्यादि । अवंढ्डिएत्यादि । द्वौ विचित्रौ नाम स्वाभाविकत्वं विभावनालङ्कारः । यथोक्तम्—

प्रसिद्धहेतुव्यावृत्त्या यत्किञ्चित्कारणान्तरम् ।
यत्र स्वाभाविकत्वं वा विभाव्यं सा विभावना ॥

* * * *

तंति असेत्यादि । यदेवंगुणवत्काव्यप्रयोजनवत् यद्वास्मदीयमेवंगुणवत् तत्तस्मादित्यर्थः । आयुर्घृतमितिवत् रावणवधस्य तत्साधनतयोपचारात् । त्रिदशवन्दी । मोक्षादिरूपत्वे विवक्षिते तदभिधाय तस्यास्य काव्यस्यापि तत्तद्विशेषणसामानाधिकरण्यमुपपन्नमित्यवसेयम् ।

अहेत्यादि । अहिसारि ए अभिसृते रामसुग्रीवसख्यमिह योग्यतया पूर्ववृत्तं तदनन्तरमित्यर्थः । अपहस्तिततारादिहितोपदेशतयाङ्गीकृतविरोधे

वाल्येव हृदयं वालिहृदयं तस्मिन् वालिनो हृदय इति च स्फुरति । वव साअ इत्यादि । घनसमयो दाशरथेः कथं कथमपि गतः तेन कृच्छ्राद्गमितमित्यर्थः ।

* * * *

Colophon :

वादिकविचूडामणिमहोपाध्यायश्रीमन्माधवयज्वमिश्रविरचितायां सेतुनाम्नि सेतुव्याख्यायां प्रथम आश्वासः ॥

End :

एत्थ इत्यादि । आश्वासानामवसानेष्वनुरागशब्दाङ्कितरावणवधाख्यमेतत्काव्यमन्वर्थतया रावणवधमात्र एव समापितम् । श्रोत्रवतां कवीनां प्रबन्धांशमात्रेणैव सुखहेतुत्वात् सीताया(ला)भावसानिकतया हृदयोत्सवहेतुत्वाच्चेत्यर्थः ॥

Colophon :

इति वैदिकचूडामणिमहोपाध्यायमाधवयज्वमिश्रविरचितायां सेतुनाम्नि सेतुतात्पर्यटीकायां षोडश आश्वासः ॥

R. No. **2773.**

Paper. 11 × 9⅝ inches. Foll. 78. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918–19 from a MS of M.R.Ry. Ampalakat Karuṇākara Menon Avargal, B.A., B.L., Chalapuram, Malabar district.

वृत्तारत्नाकरः, सव्याख्यः.

VṚTTARATNĀKARAḤ WITH COMMENTARY.

Foll. 1*a*—77*b*. Fol. 78 is left blank.

A commentary on the Vṛttaratnākara of Kēdārabhaṭṭa which work has been described under No. 1782 of the D.C.S. MSS., Vol. III: by Karuṇākaradāsa, son of Kulapālikā and Kamlēkṣaṇa, a Śrī-Vaiṣṇava, who refers to the king Rājarāja of Kēraḷa. It is stated in Malayālam in the MS. that it was copied in Kollam 1091 by Sēramukkil Vārayattu Uṇṇikaṇḍan who was probably the scribe of the original.

Complete.

Beginning :

गम्भीरं नौमि हैरम्बं बृंहितं विश्वबृंहणम् ।
प्रत्यूहव्यूहसन्नाहप्रत्यूहप्रतिपत्तये ॥

* * * *

अस्ति श्रीराजराजाख्यः केरलेषु महीपतिः ।
यत्प्रतापबृहद्भानोर्विस्फुलिङ्गायते रविः ॥
यत्कीर्तिकलशीसिन्धौ सन्ध्यानृत्तोद्धुरभ्रमिः ।
मथनोद्धतमन्थाद्रिमुद्रां धत्ते महानटः ॥
वदान्यं वासवाचार्यं वाग्मिनं च सुरद्रुमम् ।
यन्निर्मितवता धात्रा लम्भिता भाति कुम्भिनी ॥
*　　　*　　　*　　　*
अभूत्कश्चन निश्शेषगुरुसात्कृतसम्पदः ।
सर्वविद्यानिधेस्तस्य साहित्यदिशि देशिकः ।
श्रीवैष्णवकुलोद्भूतश्शेवधिः कविसम्पदाम् ।
करुणाकरदासाख्यः कमलेक्षणनन्दनः ॥
कुलपालिकया मात्रा कुशाग्रीयमनीषया ।
संशिक्षिताक्षरतया साक्षरैरभिराधितः ॥
सहस्र . . . . सद्वृत्तैः श्लोककर्णकैः ।
विद्वद्गोष्ठ्यां विहरता व्याहृतस्स महीभृता ॥
बह्वचो विलोकिता व्याख्या वृत्तरत्नाकरस्य ताः ।
अशक्तेर्वा प्रणेतॄणां प्रमादाद्वा न सुस्थिताः ॥
अतो व्याख्या निबद्धव्या श्लाघ्या प्रेक्षावतां त्वया ।
दयालवः पदार्थे हि यतन्ते हृदयालवः ॥
यल्लक्षणात्मकतया लक्ष्यस्यात्र विजिज्ञता ।
तदुदाहरणं चान्यत्प्रतिलक्ष्म प्रकाश्यताम् ॥
यद्यद्युपनिषच्चिन्ताद्यत्यन्तमुपयुज्यते ।
प्रकृते तत्प्रसङ्गानुप्रसङ्गादपि तन्यताम् ॥
ततः कवयतां प्रायो व्याख्येयमुपकारिणी ।
कविचिन्तामणिरिति ख्यातिरस्या भविष्यति ॥
इति शैलार्णवेन्द्रस्य वचनामृतसेचनात ।
व्याचिख्यासा प्ररूढान्तरेवमस्योदजृम्भत ॥

अनवरतनिरुपाधिकभक्तिभारसुरभीकृतसपर्यासंविधानसम्पादितपरमेश्वरप्र-सादोऽप्याचार्यः परमकारुणिकतया कविसहृदयपदसमारोहणनिश्रेणिकायमान-

नानाविधगद्यपद्यनिर्माणविचारणापरिशीलनप्रथमभूमिकाभूतस्य वृत्तविज्ञानस्योपायविचयनविसंस्थुलहृदयानामनायासव्युत्पत्तिजनकं कमपि ग्रन्थं ग्रथितुमारभमाणस्वत्सौकर्यसाफल्यनिरवग्रहपरिकरसामग्रीप . . . हाभिलाषको विशेषतस्तदनुगुणगुणोत्कर्षाभिमानसमुद्धाटनवीचकोपहारेण परमेश्वरसांमुख्यं करोति ।

सुखसन्तान (. . .) लोकशङ्करम् ॥

* * * *

अभिधित्सितं प्रति नियतयति—पिङ्गलेत्यादि । पिङ्गलादिभिराचार्यैर्यल्लौकिकं छन्दः मात्रावर्णविभेदेन द्विधोक्तमिह तत्कथ्यत इत्यन्वयः। पिङ्गलः पिङ्गलनागमुनिः । आदिशब्दाद्यास्कसैतवकाश्यपादयो गृह्यन्ते । तेन न केवलं सर्वत्र पिङ्गलप्रस्थितैव पद्धतिरनुरुध्यते इति सूच्यते ।

* * * *

Colophon :

इति कुलपालिकासूनुविरचितायां कविचिन्तामणौ वृत्तरत्नाकरटीकायां प्रथमोऽध्यायः ॥

End :

एभिः प्रस्तारादिभिः वृत्तानां परिमाणादिकं प्रतीयते निश्चीयते इत्येतानि छन्दोविचितिषु षट्प्रत्यया इति व्यपदिश्यन्ते । प्रतीयतेऽस्मादिति प्रत्ययः ॥

अस्ति चेदस्मदुक्तेषु यत्किञ्चिदसमञ्जसम् ।
अनुग्रहेण साधूनां सर्वं भवति मङ्गलम् ॥

Colophon :

इति कुलपालिकासूनुविरचितायां वृत्तरत्नाकरटीकायां कविचिन्तामणौ षष्ठोऽध्यायः ॥

R. No. **2774.**

Paper. 11 × 9⅝ inches. Foll. 116. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippāḍ, Nareri, Malabar district.

नाट्यशास्त्रव्याख्या.

NĀṬYAŚĀSTRAVYĀKHYĀ.

Foll. 1*a*—115*b*. Fol. 116 is left blank.

By Abhinavaguptācārya. Same work as that described under R. No. 2478 ante, wherein see for the beginning.

Contains the Adhyāyas 29 and 30 complete and the 31st incomplete.

Colophon:

इति श्रीमहामाहेश्वराभिनवगुप्ताचार्यविरचितायां नाट्यवेदविवृतौ अभिनवभारत्यां सुषिरातोद्यविधानं नाम त्रिंशोऽध्यायः ।

End:

यस्यां कला काललयाद्यभावात् साम्यं परं भाति जगत्क्रियाणाम् ।
मायात्मिकां तां तनुमष्टमूर्तेः वन्दे त्रिधा भागपदं दधानाम् ॥

ननु स्वकृतं वीणावंशयोरिवावनद्धोऽप्युत्पद्यते । घने विदानात्मना स्वरस्य शब्दत्वेन नित्यव्याप्तता दातश्चैव कदावनद्धे मार्जनानां स्वरविशेषयोजनात्मनां वक्ष्यमाणत्वात् ।

* * * *

आदित्यसोमपवना इत्यादि । अत्रापि प्रतापाह्लादकत्वशैघ्रचाद्यवान्तरराजेरन्वेष्यम् । एवं सर्वत्र ग्राह्या जीवादयः उक्तवृषगास्त्रिव्यादयः काला इति शस्यगाहुः ।

R. No. 2775.

Paper. 11 × 9⅜ inches. Foll. 15. Lines, 20 in a page. Dēvanāgarī. Good.

(*a*) धूर्तानन्दः.

DHŪRTĀNANDAḤ.

Foll. 1*a*—7*a*. Fol. 7*b* is left blank.

Transcribed in 1918-19 from a MS. of M.R.Ry. Tippan Nambūdirippāḍ of Ponnūr Kōṭṭa-mana, Travancore State.

A collection of erotic stanzas. The work is divided into Paddhatis; and the topics dealt with in the four Paddhatis contained in this MS. are given below.

Contains the following Paddhatis :—

१. चुम्बनपद्धतिः.	३. उपरिसुरतपद्धतिः.
२. सुरतपद्धतिः.	४. सुरतसङ्ख्यापद्धतिः.

Beginning:

रजन्यां परिवृत्तायां वात्स्यायनरहस्यवित् ।
उपर्यलिन्दमध्यास्ते कविरेकः प्ररोचनः ॥

सुरतानि वदेदानीं विशेषसहितानि मे ।
इत्येवमन्यः पप्रच्छ तमुद्दिश्येदमुच्यते ॥
कल्याणरूपविभवानुगुणप्रवृत्तिस्सर्वेषु जन्तुषु विशुद्धगुणा वसन्ति ।
तारापथश्शशिकलेव तमो निहत्य प्रादुर्भवेदमृतसारमयी कला नु ॥
* * * *

Colophon:

इति चुम्बनपद्धतिः ।

End:

वचसि वपुषि नान्यो भूतमात्रानुबन्धव्यसनशतनिदानो मोक्षदानैकधर्मा ।
* * * *

. . . . . श्रुतिरियं केन प्रमाणीकृता ॥
मानसे ताण्डवं कुर्यात् तरुणानां मनोभवः ।
तेषां विलासिनीनां च करोतु घटनामपि ॥

Colophon:

इति धूर्तानन्दो नाम सुरतसङ्ख्या समाप्ता ॥

(*b*) शाकुन्तलव्याख्या.
ŚĀKUNTALAVYĀKHYĀ.

Foll. 8*a*—15*a*. Fol. 15*b* is left blank.

Transcribed in 1918-19 from a MS. of M.R.Ry. Subrahmaṇya Raja of Eḍapalli, Travancore State.

A brief and running commentary on the Abhijñānaśākuntala of Kālidāsa: by Dakṣiṇāvartanātha, son of Sūrya.

Complete.

Beginning:

शारदां शरणं यामश्शारदाम्भोदसन्निभाम् ।
यस्याः प्रसादादभवत् कालिदासः कवीश्वरः ॥

आरिप्सितस्य ग्रन्थस्याविघ्न(परिसमाप्तये)शिष्टाचारपरिपालनार्थं च मङ्गलाचारं करोति । आद्या सृष्टिः अप एव ससर्जादौ इत्यादिवचनात् आपः । वहति विधिहुतं या अग्निः ।

End:

महीयतां वर्धताम् । कण्ड्वादिभ्यो यक् । मही इति प्रातिपदिकम् । सभाजयति । पूजायां वृद्धावपि महीयते । अंपडिअरहा अप्रतिहतरथाः । उपविसथ उपविशतः । मन्युः कोपः । प्राज्यं भूरि ॥

Colophon :

इति सप्तमोऽङ्कः ॥

दक्षिणावर्तनाथेन रचितं सूर्यसूनुना ।
समाप्तं टिप्पणं शाकुन्तलस्य सुमनःप्रियम् ॥

R. No. **2776.**

Paper. 11 × 9⅝ inches. Foll. 137. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. V. R. T. Tātācāriyar of Paṭṭukōṭṭa, Tanjore district.

सेश्वरमीमांसा.

SĒŚVARAMĪMĀṀSĀ.

Fol. 137*b* is left blank.

By Vēdāntadēśika. Same work as that described under No. 4512 of the D.C.S. MSS., Vol. IX, wherein see for the beginning. The colophon gives also the name of the scribe of the original MS.

Contains from the beginning of the second Pāda of the second Adhyāya to the end of the same Adhyāya.

End:

विरोधिनां च संयोगादैककर्म्ये तत्संयोगाद्विधीनां सर्वप्रत्ययस्स्यात् ॥

ऐककर्म्ये सति विधीनां विधिपदोक्तानां सर्वशाखास्थाङ्गानां तत्संयोगात् तेनैवैकेन कर्मणा संयोगावगतः विरोधिनां क्रमकालपरिमाणानामसंयोगात् शिष्टाकोपाधिकरणोक्तरीत्या संयोगाभावात् सर्वप्रत्ययः । सर्वशाखास्वेकस्यैव कर्मणः प्रत्ययस्स्यादित्यर्थः । नचैवं शिष्टाकोपाधिकरणेनैतस्य सूत्रपौनरुक्त-(क्तच)मिति वाच्यम् । इह साधितस्याविरोधि(नः) तस्य तत्र हेतुत्वेनोपादानात् । तस्मात् सिद्धं सर्वशाखाप्रत्ययमेकं कर्मेति ॥

Colophon :

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु सेश्वरमीमांसाख्ये धर्ममीमांसाभाष्ये श्रीतातदेशिकपदपद्माश्रितेन परकालगुरुकृपालब्धोभयवेदान्तसम्पदा श्रीमद्वेदान्तदेशिकप्रतीतेन श्रीनिवासपरकालयतिना विलिखिते द्वितीयस्याध्यायस्य चतुर्थः पादः ॥

समाप्तश्चाध्यायः ॥

R. No. **2777.**

Paper. 10¾ × 9½ inches. Foll. 96. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of Veṅkattu-mana, Chalasseri, Malabar district.

अभिरामचित्रलेखम्.

ABHIRĀMACITRALĒKHAM.

A drama, technically called Prakaraṇa, describing the love and the marriage between Abhirāma and Citralēkhā, daughter of Citraśēkhara or Bhujaṅgarāja. It is said to have been enacted in the vernal festival of God Raṅganātha. By Kavivallabha.

Complete in ten Aṅkas.

Beginning :

अत्यर्थव्याप्तिवैचित्र्यं यदद्यापि विवर्तते ।
प्रणवेन्दोः कलामाद्यां वन्दे तन्नाम वैष्णवम् ॥

अपि च—

नित्यं लक्ष्मीकपोलस्तनकलशयुगन्यस्तकस्तूरिकाङ्का
श्चत्वारश्चक्रपाणेर्विदधतु चतुरो बाहवस्ते पुमर्थान् ।
लब्धुं यद्भोगकेलीमितर इव भुजाः कौतुकादुद्भवन्तः
कान्तिं केयूरनीलोपलनिबिडरुहो बिभ्रते रश्मिदण्डाः ॥

(नान्द्यन्ते सूत्रधारः)

सू—(नेपथ्याभिमुखमवलोक्य) अये इतस्तावत् ।

* * * *

तदुपसृत्य विज्ञापयामि परिषदम् । (उपसृत्य) अये कवेरकन्यकापुलिनकलहंसस्य कमलाविलोचनकमलकालाञ्जनायमानमधुरलावण्यस्य दक्षिणसागरतरङ्गरभसदूरोपनीतमहानीलचिन्तामणिविभ्रमस्य भगवतो रङ्गनाथस्य वासन्तिकयात्रामहोत्सवसमुदिताः साम्प्रतमार्यमिश्राः शृण्वन्तु भवन्तः प्रश्रयवतीमिमां मे विज्ञापनाम् ।

* * * *

परिषदं प्रति ।

अभिरामचित्रलेखं कविवल्लभहृदयरसपरीवाहम् ।
नवनाटकं प्रयोक्ष्ये युष्मानानन्दसात्कर्तुम् ॥

* * * *

नटी—(स्मित्वा) इदो एंव अभिवंटनीए भट्टिणीए समं खु एंथ अम्मेहिं सहं ठा उणज्जुं तंता ओसराम ।

(निष्क्रान्तौ) प्रस्तावना ।

(ततः प्रविशति सावशेषमदविकारा वासन्तिकी यथानिर्दिष्टा मधुकरिका च)

मधु—भंटिणि को णाम भूक ओ भंटिणा ।

End:

भुजङ्गराजः—(जामातरं प्रति) किं ते भूयः प्रियमुपहरामि ।

यो विश्वम्भरमाबिबर्ति पुरुषं स्वात्मानमेव स्वयं
जाता तस्य कुले सहस्रशिरसः कन्या कलत्रीकृता ।
दंष्ट्रायामिव पोत्रिणः स्थितिमती बुद्ध्यां महीमन्त्रिणः
किं भूयः प्रियमस्ति किं च सहसा देवी प्रसन्ना च मे ॥

तथापीदमस्तु (भरतवाक्यम्)—

अन्योन्यप्रणयेन कामिमिथुनं मोदेत दातुर्व(र्भ)वे-
द्वित्तं धाम्नि वसुन्धरा विजयतां धर्मो विना छद्मना ।
बोद्धृणामवधायि(नि)सत्कविकृतौ निर्मत्सरं स्यान्मनः
संपश्येत मुनिः समाधिविलये वीतान्तरायः सुखम् ॥

(निष्क्रान्ताः सर्वे) ॥

Colophon:

कविवल्लभस्य कृतावभिरामचित्रलेखे दशमोऽङ्कः ॥

R. No. **2778.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 98. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Kūḍalūr, Nārāyaṇa Nambūdirippāḍ, Nareri, Tritala, Malabar district.

अभिज्ञानशाकुन्तलव्याख्यानम्.

ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀNAM.

A commentary on the Abhijñānaśākuntala of Kālidāsa. The name of the commentator is not given.

Breaks off in the sixth Aṅka.

Beginning:

सारं यन्निगमस्य यत्र(त्क)तुभुजामाहुः क्रतुश्रा(श्वा)क्षुषं
यस्यायं शिवया शिवेन च पुनः सम्यक् प्रयोगः कृतः ।
ब्रह्मास्वादसहोदरो रसविदां यस्मात्प्रमोदो महा-
न्यत्रार्थाः पुरुषस्य सन्ति सुलभास्तन्नाट्यमुत्कृष्यते ॥
कवीन्द्रोऽयं कालीपदयुगलनालीकविगल-
न्मधुस्रोतःकेलीनियतनिरताली विजयते ।
परिस्फूर्जद्वाणीरसभरितवेणीमधुरिमो-
न्मिषत्सूरिश्रेणीस्फुरितरमणीयेन यशसा ॥
गुणदोषविभागज्ञाः सदा गुणपरायणाः ।
सचेतसो निरीक्षन्तामिदं नाट्यनिरूपणम् ॥

इह खलु वाङ्मयेषु साहित्यानि निर्भरं स्वदन्ते । तत्रापि चित्रप्रबन्धाः तेष्वपि नाटकानि नाटकेष्वपि शाकुन्तलादीनि । तदुक्तम् ।

नाटकेषु गुणैर्युक्ता ये हरन्ति सतां मनः ।
क्व तेषां दृष्टमुत्थानं कालिदासकवेः कृतौ ॥
कालिदासस्य सर्वस्वमभिज्ञानशकुन्तलम् ।
तत्रापि च चतुर्थोऽङ्को यत्र याति शकुन्तला ॥ इत्यादि ।

तत्र तावन्नान्द्यन्ते ततः प्रविशति सूत्रधारः इत्ययं ग्रन्थः प्रथमश्लोकात्पूर्वं किमुपपद्यते, उतानन्तरम् । उभयथापि दर्शनात्संशयः । श्लोकानन्तरमुपपद्यते । पूर्वं चेत्प्रथमश्लोकस्य नान्दीत्वं न स्यात् ।

* * * *

या सृष्टिरित्यादि—स्रष्टुराद्या सृष्टिरापः । अत्र मनुः—

अप एव ससर्जादौ तासु वीर्यमवासृजत् ।

इति । श्रुतिः श्रोत्रेन्द्रियं तस्य विषयः शब्दः ।

Colophon:

कालिदासस्य सर्वस्वे रसनिष्यन्दिनाटके ।
चर्चितः पञ्चमाङ्कोऽयमभिज्ञानशकुन्तले ॥

End:

एवं तीक्ष्णदण्डस्य "त्वां कारयामि कमलोदरबन्धनस्थ"मित्युक्तस्य को न भेत्स्यति । आक्षेपगर्भमभिधानम् ।

उभाभ्यामपि हस्ताभ्यामन्योन्यं पार्श्वसंग्रहात् ।
हस्तः कपोतको नाम कर्म चास्य निबोधकः ॥

R. No. **2779.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī and Malayālam. Good.

Transcribed in 1918-19 from a MS. of the Raja of Chirakkal, Calicut.

तालविधानम्, केरलटीकासहितम्.

TĀLAVIDHĀNAM WITH MALAYĀLA MEANING.

A treatise dealing in the portion contained herein with different kinds of musical instruments, including cymbals.

Contains the Adhyāyas 81, 80, again 80, 84 and 85.

Incomplete.

Beginning :

देवी उवाच—

अमलममलदेवं विश्वमानन्दमूर्तिं
भवभयहरमीशं त्वां प्रणम्याद्य पृच्छे[त्] ।
पटहविमलतालैः पञ्चघोषस्य तन्त्रैः
कथयति नरलोके काम्यमङ्गल्यवाद्यम् ॥

भगवानुवाच—

कथयामि महादेवि वाद्यं सर्वार्थसाधकम् ।
पुरा ब्रह्मेण संस्मृत्य संग्रहं नन्दिकेश्वरम् ॥
तत्तद्विधिकृतैस्तन्त्रैरिष्टापूर्ते द्विधा खलु ।
तच्छिष्यैश्चतुरो भेदा नन्दनो नन्दपालकः ॥
चन्द्रवर्मा क्षेत्रवर्मा चतुर्थो नाम तन्त्रकः ।
तत्र द्वे द्वे प्राह तन्त्रैरष्टधा भेद्य भूतले ॥
असारकर्मैर्वाद्यानां भूतलेऽष्ट विधीयताम् ।
तत्र तन्त्रादितन्त्रोक्तमुच्चरेत्सारतन्त्रतः ॥
अयमोड्डीशमन्त्राख्यं वाद्यलक्षणमुच्यते ।
प्रथमं तालनिलयं द्वितीयं सल्लरीं तथा ॥
तृतीयं पटहं विद्याच्चतुर्थं मद्दलं तथा ।
पञ्चमं भेरिविज्ञा च षष्ठन्तु रिमिला तथा ॥

सप्तमं तु हुडुक्का च तथाष्टममिटक्कथा ।
नवमं डमरुश्चैव दशमं मुरवि(व)स्तथा ॥
एकादशाङ्गुलिस्फोंघं(टं)द्वादशं वीणया तथा ।
आलामणिस्तथा वाद्यं त्रयोदशमतः परम् ॥
चतुर्दशं च संप्रोक्तं ज्ञेयो रावणहस्तकम् ।
पञ्चादशकमुद्यन्तं विद्याद्घोषवतीं तथा ॥
षोडशं ब्रह्मकं कालमेतैरध्यायषोडशैः ।
क्रमेण वाद्यविज्ञानं विस्तरेण वदेदथ ॥

Colophon:

इत्योड्डीशमहामन्त्रोदये तालवाद्यविधानेषु महाभाग एकाशीतितमोऽध्यायः ॥

Colophon:

इति भेरीवाद्यविधाने पञ्चाशीतितमोऽध्यायः ॥

अतः परं प्रवक्ष्यामि तिमिलावाद्यमुत्तमम् ।
हस्तप्रमाणदीर्घं च मध्ये तन्वीं द्विधा बृहत् ॥

* * * *

इति परमरहस्यतालमात्रा भवति महीतलमन्दिरं विशेषैः ॥
कृत इति विविदन् यो हस्तपाण्योः प्रदेशैः
श्रुत इव सुरबृन्दैः सूचयन् संपदस्तत् ॥

Colophon:

इत्योड्डीशमहामन्त्रोदये तालवाद्यविधाने . . . . . ॥

* * * *

End:

श्यामलं रम्यरूपं च त्रिनेत्रं ज्ञानरूपिणम् ।
कुण्डलौ हेमरत्नाढ्यं छन्दवीरोपवीतिनम् ॥
श्रीमद्भूतेश्वरं देवं वाद्यानामधिदेवताम् ॥

नमो भगवते । मम हस्तेषु विशदविलासं सर्वजनश्रवणमनसां विस्मयं कुरु कुरु स्वाहा ॥

R. No. **2780.**

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 178. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918–19 from a MS. of the Raja of Chirakkal, Malabar district.

प्रयोगसारः.

PRAYŌGASĀRAḤ.

Foll. 27*b* and 178 are left blank.

This work in Mantraśāstra is divided into two Bhāgas or parts, each containing 27 Paṭalas. The subjects dealt with in each of these Bhāgas are given below. The author Gōvinda says that he has consulted the Tantrasāra in writing his treatise.

Complete. The contents of the first part are—

१. सृष्टिप्रकरणम्.
२. दीक्षाधिकारः.
३. दीक्षाङ्गानि.
४. दीक्षालक्षणम्.
५. योगलक्षणम्.
६. शिवपूजा.
७. मातृकामन्त्रसाधनम्.
८. हृल्लेखा.
९. वागीशाकल्पः
१०. श्रीपूजा.
११. रुद्रपूजा.
१२. ब्राह्मीपूजा.
१३. विष्णुपूजा.
१४. अग्निहृदयम्.
१५. सौराराधनम्.
१६. सोमाराधनम्.
१७. प्रासादशिवपूजा.
१८. शास्त्रपूजा.
१९. स्कन्दाराधनम्.
२०. विघ्नेश्वरपूजा.
२१. क्षेत्रपालार्चनम्.
२२. मृत्युञ्जयमन्त्रविधानम्.
२३. पवित्राराधनम्.
२४. अङ्कुरारोपणम्.
२५. बलिहरणम्.
२६. शङ्कुलक्षणम्.
२७. स्वप्नदर्शनम्.

The second part contains the following Paṭalas. Wants the latter portion of the first Paṭala, the whole of the second and the third Paṭalas and the former portion of the fourth Paṭala.

१. चिकित्सितम्.
२. . . . .
३. . . . .
४. सहजोन्मादचिकित्सा.
५. आगन्तुकोन्मादचिकित्सा.
६. ग्रहचिकित्सा.
७. सामान्यबलिविधानम्.
८. महाग्रहबलिविधानम्.
९. शान्तिबलिविधानम्.
१०. विषोत्पत्तिः.
११. मन्त्रागमः.
१२. द्रव्यागदः.
१३. सर्वागदः.
१४. ज्वरचिकित्सा.

१५. सर्वरोगचिकित्सा.
१६. वैद्यविज्ञानम्.
१७. त्वरिताविधानम्.
१८. धूमावतीविधानम्.
१९. भद्रकालीविधानम्.
२०. भेलरुवीविधानम्.
२१. मातङ्गीविधानम्.
२२. दुर्गाविधानम्.
२३. सुदर्शनविधानम्.
२४. क्रोधाग्निविधानम्.
२५. यन्त्रविधानम्.
२६. षट्कर्मविधानम्.
२७. शकुनप्रकरणम्.

Beginning:

मायामौलिप्रबन्धा प्रणवनवमुखी ऋग्यजुःसामनेत्रा
हस्तोद्यद्योगसाङ्ख्या स्तनभरविलसत्कल्पशीक्षासनाथा ।
छन्दोमध्या निरुक्तप्रकठितजघना न्यायतर्कान्वितोरू
व्याख्यानाख्या पुराणस्मृतिनुतचरणा भारती वः पुनातु ॥
आदौ प्रणम्य सर्वज्ञान्गुरूनाज्ञाप्रबोधकान् ।
प्रयोगसारं वक्ष्यामि नानाविज्ञानसाधनम् ॥
तन्त्रसारं समालोच्य स्वसामर्थ्यानुरूपतः ।
बालानां बोधसिद्ध्यर्थं क्रियते सारसंग्रहः ॥
नित्यः सर्वगतः सूक्ष्मो निरानन्दो निरामयः ।
विकाररहितः साक्षी शिवो ज्ञेयः सनातनः ॥
तस्माद्विनिर्गता नित्या सर्वगा विश्वसम्भवा ।
सुषुप्तिरूपिणी शक्तिर्नित्यानन्दा गुणालया ॥

End:

शुभग्रहानि(धि)ष्ठितदिक्षु सस्वरं शुभोदये चापि सुशोभनं फलम् ।
अथोऽन्यथा चेत्फलमन्यदुच्चकैर्विमिश्रके चापि विमिश्रकं फलम् ॥
इति शास्त्रवशाद्विविच्य मार्गे शकुनानीह विचिन्त्य कीर्तितानि ।
अमुनैव शुभाशुभं विदित्वा तदधीनं विदधीत कार्यजातम् ॥
पूज्यासितोक्तप्रवरेण यत्नाद्गोविन्दनाम्ना रचितो हिताय ।
स्थेयादयं ख्यातिमवाप्य लोके प्रयोगसारः सदनुग्रहेण ॥

Colophon:

इति प्रयोगसारे सप्तविंशतिः पटलः ॥

R. No. **2781.**

Paper $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 84. Lines, 20 in a page. Malayālam. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Kūḍalūr-mana, Nareri, Tritala, Malabar district.

Fol. 84 is left blank.

चिकित्साग्रन्थः, केरलभाषाटीकासहितः.

CIKITSĀGRANTHAḤ WITH MALAYĀLAM MEANING.

Similar to the text described under No. 13118 of the D.C.S. MSS., Vol. XXIII. It is accompanied with meaning in Malayalam.

Incomplete.

Beginning :

स्नेहपाके त्वमानोक्तौ चतुर्गुणविवर्धितम् ।
कल्कस्नेहदिवं योज्यमधीते शौनकः पुनः ॥
स्नेहे शुध्यति शुद्धाम्बु निष्क्राथस्वरसैः क्रमात् ।
कल्कस्य योजयेदंशं चतुर्थं षष्ठमष्टमम् ॥
युक्तं च शास्त्रकारेण कुर्यादूहं स्वयं धिया ।
व्याख्यानमुपदेशं च तन्त्रयुक्तिश्च कीर्तिते ॥
तत्रोपदेशवचनं यं (यत्) प्रोक्तं शास्त्र एव हि ।
विशेषेण यदाख्यानं तद्व्याख्यानमिहेष्यते ॥
द्विविधं च तदाख्यानं प्रसिद्धमनिबन्धनम् ।
वृद्धवैद्योऽधिकं तद्धि व्याख्यानमितसंज्ञितम् ॥
आगमस्थैर्यमाणोऽयं नैव शास्त्रनिबन्धनः ।
तस्मात् स्मरणमेवात्र यथा वैद्यक्रमागतम् ॥
तथैव भिषजा कार्यः दिव्योदकपरिग्रहः ।
पञ्चषड्दिवसैः क्वाथे दिव्यं वीर्यं विमुञ्चति ॥
कल्कदिव्ययुतं स्नेहं पीडयेत् पञ्चभिर्दिनैः ।
द्वादशाहं तु साराणां वल्लीनां तु त्र्यहं स्मृतम् ॥
सप्ताहं सर्वमूलानां सर्वेषां पाक इष्यते ।

End :

हरीतकीलोध्र(क)मष्टपत्रं चूतत्वचो दाडिमवल्कलं च ।
एषोऽङ्गरागः कथितोऽङ्गनानां जङ्घाप्रकर्षस्य नराधिपानाम् ॥

गोमूत्रपिष्टो विनिहन्ति कष्टं वर्णोज्ज्वलं गोपयसा च युक्त्या ।
कक्षादिदौर्गन्ध्यहरः पयोभिश्शस्तं वशीकृद्रजनीयुगेन ॥

Colophon:

इति स्थौल्यचिकित्सा ॥

R. No. 2782.

Pa er. $10\frac{7}{8} \times 9\frac{3}{8}$ inches. Foll. 112. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of Dēśamaṅgalam-mana, near Shoranur, Malabar district.

भाष्यरत्नप्रभाव्याख्या.

BHĀṢYARATNAPRABHĀVYĀKHYĀ.

Fol. 112*b* is left blank.

A commentary on the Bhāṣyaratnaprabhā which work has been described under Nos. 4679 and 4680 of the D.C.S. MSS., Vol. IX: by Acyutakṛṣṇānandatīrtha, disciple of Svayamprakāśānandasarasvatī.

Contains from the beginning up to the end of Īkṣatyadhikaraṇa.

Beginning:

ब्रह्मविष्णुमहेशाख्यमूर्तिभिर्यो गणाधिपः ।
जगत्सर्गादि तनुते तं वन्दे विघ्नशान्तये ॥
यं प्रपन्ना जगन्नाथं लेभे वस्त्रपरम्पराम् ।
कृष्णा पार्थस्य महिषी तं प्रपद्ये हरिं सदा ॥
स्वरूपानन्दसाम्राज्ये विहरन्तं कृपानिधिम् ।
प्रणवस्य प्रवक्तारं सर्वेश्वरमहं भजे ॥
यो मे गुरुर्गुरुः साक्षाज्जगतामप्यशेषतः ।
माधवस्यापरा मूर्तिस्तं भजे स्वप्रभं सदा ॥
गुरोरपि गरीयान्मे यः कलाभिरलङ्कृतः ।
अद्वैतानन्दवाण्याख्यस्तं वन्दे शमवारिधिम् ॥
ओतं प्रोतमिदं सर्वं यस्मिन् सच्चित्सुखात्मके ।
पर्यवस्यन्ति वेदान्ता यत्र चाहं तदक्षरम् ॥
जिज्ञासासूत्रमारभ्य प्रागानन्दमयोक्तितः ।
भाष्यरत्नप्रभानाम्नीं व्याकुर्वे भक्तितः कृतिम् ॥

श्रीमत्स्वयंप्रकाशाख्यगुरोर्लब्धात्मवेदनम् ।
सुशोधयितुमारब्धा व्याख्येयं नान्यहेतुतः ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यादिसिद्ध्यर्थं मङ्गलमाचरति—यमिह कारुणिकमिति । शास्त्रप्रतिपाद्यं विषयं शास्त्रप्रयोजनं च मुखतो निर्दिशन्नधिकार्यादिकमप्यर्थात्सूचयति—यदज्ञानेति । यस्य निर्विशेषचैतन्यस्य अज्ञानं यदज्ञानम् ।

* * * *

Colophon:

इति श्रीमत्स्वयंप्रकाशानन्दसरस्वतीशिष्यस्याच्युतकृष्णानन्दतीर्थस्य कृतौ भाष्यरत्नप्रभाव्याख्यायां समन्वयसूत्रं समाप्तम् ॥

End:

सगुणवाक्यविचारापवादसङ्गत्या चानन्दमयाद्यधिकरणेषु निर्गुणविचारप्रवृत्तिरिति निर्गुणविचारस्यापि करिष्यमाणस्यास्मिन्नध्याये नासङ्गतिरिति सर्वमनवद्यम् ॥

भाष्यरत्नप्रभाभागो व्याख्यातो यो विवक्षितः ।
श्रीकृष्णचरणद्वन्द्वभूषणायास्त्वियं कृतिः ॥
प्रपन्नाभयदातृत्वव्रतं यस्य हि तं वयम् ।
प्रपन्नाराममनिशं साम्बहृत्पद्मभूषणम् ॥
येनानन्देन पौलस्त्यो रक्षितो ब्रह्मशक्तितः ।
द्वितीयमन्तरात्मानं रामचन्द्रस्य तं भजे ॥
राक्षसानां वधे यत्तं रामं रघुकुलोत्तमम् ।
रक्षणे दीक्षितं साधोः आदरेण भजे सदा ॥
यं प्रपन्ना जगन्नाथं लेभे वस्त्रपरम्पराम् ।
कृष्णा पार्थस्य महिषी तं प्रपद्ये हरिं सदा ॥

Colophon:

इति भाष्यरत्नप्रभायाः समन्वयसूत्र(ईक्षत्यधिकरण)पर्यन्तं व्याख्यानं समाप्तम् ॥

R. No. 2783.

Paper. $10\frac{7}{8} \times 9\frac{3}{4}$ inches. Foll. 162. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Kuḍalūr-mana, Nareri, Tritala, Malabar district.

Foll. 161*b*—162 are left blank.

पातञ्जलयोगसूत्रभाष्यविवरणम्.
PĀTAÑJALAYŌGASŪTRABHĀṢYAVIVARAṆAM.

A commentary by Śaṅkarācārya on the Pātañjalayōgasūtrabhāṣya which is itself a commentary by Vyāsa on Patañjali's Yōgasūtras—vide No. 4349 of the D.C.S. MSS., Vol. IX. From the introductory passages of the commentator it is seen that, according to him, Patañjali wrote a work in Cikitsāśāstra.

Complete.

Beginning:

यस्मिन्न स्तः कर्मविपाकौ यत आस्तां
क्लेशा यस्मै नालमलङ्घ्या निखिलानाम् ।
नावच्छिन्नः कालदृशा यः कलयन्त्या
लोकेशस्तं कैटभशत्रुं प्रणमामि ॥
यः सर्ववित्सर्वविभूतिशक्तिर्विहीनदोषोपहितक्रियाफलः ।
विश्वोद्भवान्तास्थितिहेतुरीशो नमोऽस्तु तस्मै गुरवे गुरोरपि ॥

अथ योगानुशासनम् । अथेत्यादि पातञ्जलयोगशास्त्रविवरणमारभ्यते । तत्रानाख्यातसंबन्धप्रयोजनं न पुरुषप्रवृत्तिनिवृत्तिभ्यां पर्याप्नोतीति सूत्रकाराभिप्रेते पुरुषप्रवृत्तिनिमित्तभूते संबन्धप्रयोजने पूर्वं प्रकटीक्रियेते । तत्र प्रयोजनं तावच्चिकित्साशास्त्रे तच्चतुर्व्यूहश्च प्रदर्शनचारेण व्याख्यातः । तद्यथा—चिकित्साशास्त्रं चतुर्व्यूहम् । रोगो रोगहेतुरारोग्यं भैषज्यमिति विधिप्रतिषेधनियमचारेण चतुर्व्यूहविषयव्याख्यानपरम् । एवमिहापि परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिन इत्यारभ्य चतुर्व्यूहत्वं शास्त्रस्य प्रदर्शितम् ।

End:

या तु गुणापरिणामकता पुरुषस्य विमिश्रिता वृत्तिस्वरूपता सा कार्यकारणात्मकानां पुरुषार्थशून्यानां गुणानां प्रतिसंसर्गान्निमित्तादपगच्छतीति निमित्तमेव प्रतिप्रसवाख्यं कैवल्यशब्देनोपरचितं पूर्वं द्वितीयं तन्तुगुणप्रतिप्रसवनिमित्तभावि यत्स्वरूपावस्थानं पुरुषस्य गुणैरमिश्रिता(तत)या तत्कैवल्यमिति विशेषः । गुणपुरुषान्तरस्वरूपतत्त्वनिर्धारणेन च कैवल्यान्तराणि[नि]वेदितव्यानि । तत्र ओङ्कारो मङ्गलार्थः प्रयुक्तः । परमेश्वरनामाङ्कितमस्तकतया तन्त्रप्रचयार्थं शान्त्यर्थं वा वेदारण्यकवदित्योमिति ।

ओङ्कारो यस्य वक्ता समचरत फलैः कर्म यस्मादशेषं
निष्कर्मक्लेशपाको घटयति सकलं यः फलेन क्रियाणाम् ।
ईशानामीश्वरोऽयं स्थितिभवनिधनप्रक्रियाणां विधाता
ध्यायन्नः शुक्लिमानं व्यपनुदतु तरां कृष्णिमानं स कृष्णः ॥
फलरत्नौघाविद्योति . . . . . द्युनभोदिशे ।
योगेन्द्राय फणीन्द्राय तत्पतञ्जलये नमः ॥
वदनाहितपूर्णचन्द्रकं गुरुमीशानमभूतिभूषणम् ।
प्रणमाम्यभुजङ्गसंग्रहं भगवत्पाद(म)पूर्वशङ्करम् ॥

Colophon:

गोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य शङ्करभगवतः कृतौ पातञ्जलयोगशास्त्रभाष्यविवरणे चतुर्थः पादः ॥ समाप्तं चेदं विवरणम् ॥

* * * *

यस्तताम भवमार्गलङ्घिनां क्लेशकर्ममयघर्मनुत्तये ।
धर्ममेघमुखयोगतोय . . . . ॥

The owner of the original MS. is mentioned—

श्रीकेशवप्रका(श)भट्टारकाणां शिष्यस्य सत्यानन्दस्येयं पतञ्जलिटीका ॥

R. No. **2784.**

Paper. $10\frac{7}{8} \times 9\frac{1}{4}$ inches. Foll. 22. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Kūḍalūr-mana, Nareri, Tritala, Malabar district.

वीणावासवदत्तम्.

VĪṆĀVĀSAVADATTAM.

Foll. 21*b* and 22 are left blank.

A drama having for its plot the marriage of Vāsvadattā with Vatsarāja. The name Vīṇāvāsavadatta is not given in the work itself.

Breaks off in the fourth Act.

Beginning:

(नान्द्यन्ते ततः प्रविशति सूत्रधारः.)

सूत्र—

जयति गिरिसुतास्तनावमर्दप्रविरलभस्मविराजिपीनवक्षाः ।
स्वशरहुतवहे हुतासुरश्रीः पितृवनरङ्गमहानटस्त्रिनेत्रः ॥

(परिक्रम्य नेपथ्याभिमुखमवलोक्य) आर्ये इतस्तावत् । प्रविश्य नटी—अय्य इअंहि ।

सू—आर्ये त्वद्गीतप्रसादिते रङ्गे किञ्चिन्नाटकमारब्धुमिच्छामि ।

* * * *

यद्येवं व्रतनियमोपवासैर्भगवन्तं महेश्वरमाराध्य तदभिप्रेताय दास्यामि । कुतः—

नृपमौलितलस्थाङ्घ्रोजिषु रक्षौहिणीपतिः ।
. . . तावत्प्रद्योतः कर्तुमारब्धवान्यथा ॥

(निष्क्रान्तौ) स्थापना ।

(ततः प्रविशति शालकायनो वसुवर्मा च)

शाल—वसुवर्मन्, सर्वेष्वपत्येषु वासवदत्तां प्रत्यतिस्नेहता महाराजस्य ।

End:

संप्रति हि—

उपागतं वमदिव दिङ्मुखैस्तमो निशामुखं परभृतकर्णमेचकम् ।
परिक्षरत्तिमिरपरीतमम्बरं शनैः शनैरवतरतीव मेदिनीम् ॥

(निष्क्रान्तः)

तृतीयोऽङ्कः ॥

(ततः प्रविशति डिण्डिकवेषो हंसकः)

हंस—ससमुद्दले सळरुक्कसमुलासुणसिद्धणायं घन्वधंमाघादेहाणं एक्केण विणा सएलोअं । (विचिन्त्य) अज्ज खु मए सअला उज्जइणी परिब्भमिदा मुहुत्तअं इमं सीसुदेप उले विस्सामिस्सं । (परिक्रम्य) इदं मे ।

R. No. 2785.

Paper. $10\frac{7}{8} \times 9\frac{7}{8}$ inches. Foll. 52. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Kūḍalūr-mana, Nareri, Tritala, Malabar district.

नाट्यशास्त्रव्याख्या—अभिनवभारती.

NĀṬYAŚĀSTRAVYĀKHYĀ : ABHINAVABHĀRATĪ.

Foll. 51*b* and 52 are left blank.

Same work as that described under R. No. 2478 ante.

Contains the Adhyāyas 20 to 27 complete and the 28th incomplete.

२०. वृत्त्यध्यायः.
२१. आहार्याध्यायः.
२२. सामान्याध्यायः.
२३. वैशिकाध्यायः.
२४. स्त्रीपुंसोपचारः.
२५. चित्राभिनयः.
२६. प्रकृतिविकल्पाध्यायः.
२७. सिद्ध्यध्यायः.
२८. (गेयाधिकारः ?)

R. No. 2786.

Paper. 10⅝ × 9⅜ inches. Foll. 12. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Kūḍalūr-mana, Nareri, Malabar district.

चम्पूसंक्षेपः.

CAMPŪSAṀKṢĒPAḤ.

Foll. 10*b*, 11 and 12 are left blank.

A poem summarizing in verse the story of the Mahābhārata apparently as narrated in a Campukāvya on the subject. The portion contained in this MS. gives the incidents from the time of Kuru to the coronation of Vicitravīrya by Bhīṣmācārya.

Begins from the middle of the fifth Sarga and ends with the seventh Sarga.

Beginning:

. . . . मित्रो महामतिः ।
. . थेत्युक्त्वा तत्पदाब्जे प्रणिपत्य . . . ॥
गृहीताज्ञे गतेऽमात्ये कृतकृत्यतया नृपः ।
. . . . . बृहन्मनो भूविक्रियोऽभवत् ॥
नवोढा त . . . हृद्यैः पीयूषवर्षिभिः ।

* * * *

Colophon:

इति चम्पूसङ्क्षेपे पञ्चमः सर्गः ॥

End:

पारत्रिकेऽथावसिते विधाने भ्रातुर्यथाविध्यमरोपमेन ।
भीष्मेण संस्थाप्य विचित्रवीर्यो भद्रासने रत्नमयेऽभिषिक्तः ॥
तस्मिन्महीं शासति मानवेन्द्रे विचित्रवीर्ये महितप्रभावे ।
परार्थदारेषु रतिर्जनानामभून्न दानाद्यनुरञ्जितानाम् ॥

राजासौ महनीयकीर्तिरखिलक्षोणीन्द्रमौलिस्फुर-
त्पादाम्भोजयुगः क्षरन्मधुगिरा चेष्टार्थदानेन च ।
भूदेवान्सकलान्प्रजाश्च सकलाः संमोदयन्पालय-
न्भूमिं सागरमेखलामनुदिनं पुर्यामतिष्ठत्सुखम् ॥

Colophon:

इति चम्पूसङ्क्षेपे सप्तमः सर्गः ॥

R. No. 2787.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 228. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Kūḍalūr-mana, Nareri, Malabar district.

Bound in two volumes.

तन्त्रटीकानिबन्धनम्—अजिता.

TANTRAṬĪKĀNIBANDHANAM: AJĪTĀ.

By Paritōṣamiśra. Same work as that described under R. No. 368 ante, wherein see for the end.

Contains from the beginning of the second Pāda of the first Adhyāya to the end of the second Adhyāya.

Beginning:

सिद्धप्रमाणभावस्य धर्मे वेदस्य सर्वशः ।
विद्ध्यर्थवादमन्त्राणामुपयोगोऽधुनोच्यते ॥ इति ॥

वृत्तवर्तिष्यमाणकथनेनार्थवादादिविचारस्य संगतिमाह । का पुनरसौ । ननु चोदनाप्रामाण्यं प्रतिज्ञातम् । प्रसाधितं च सर्वप्रकारं तत्प्रामाण्यप्रतिज्ञयैवेतरेषामप्रामाण्यमाविष्कृतम् । तेनानभ्युपगताप्रस्तुतार्थवादादिप्रामाण्यस्याक्षेपो न प्रमाणलक्षणविषयत्वेन परिगृहीतमर्थं दूषयति। समाधानं वा न समादधाति। तस्मादसङ्गतिरिति ।

R. No. 2788.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 56. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Kūḍalūr-mana, Nareri, Tritala, Malabar district.

ध्वन्यालोकलोचनव्याख्या.

DHVANYĀLŌKALŌCANAVYĀKHYĀ.

Fol. 56*b* is left blank.

A commentary on the Dhvanyālōkalōcana of Abhinavaguptācārya which work has been described under No. 12895 of the D.C.S. MSS., Vol. XXII. The commentator Dāśarathi says in the course of the commentary on the first stanza that he has followed the Kāvyaprkāśikā and other works on rhetoric.

Contains the first Uddyōta incomplete.

Beginning :

व्याख्यानलीलया यो मुनिमुख्यानां मुहुर्मुदं तनुते ।
वटतलनिवासिनं तं वरदं शम्भुं दयानिधिं वन्दे ॥

अथ श्रीमानभिनवगुप्ताचार्यः काव्यालोकं व्याख्यातुमारभमाणः स्वप्रवृत्तेर्विषयादिकं भट्टेन्दुराजेत्यादिना पद्येन पश्चात्प्रतिपादयिष्यन्प्रथमं व्याचिख्यास्यमानलक्षणग्रन्थलक्ष्यस्य काव्यस्य विशिष्टार्थक्रियाकारित्वं नान्तरीयकतासम्पादितकान्तासंमितोपदेशपरमानन्दप्रमुखप्रयोजनविशेषं साक्षादभिदधत्सामर्थ्याच्च तस्योपादेयतां तत्प्रतिपादकस्य लक्षणग्रन्थस्य तन्मुखेन तद्व्याख्यानस्य च स्वयं क्रियमाणस्योपादेयतासिद्धिहेतुं प्रकटयन्समुचितेष्टदेवतात्मनस्तस्यैव नमस्काराक्षेपकविजयोक्तिं मङ्गलरूपां विघ्नविघातफलां शिष्टाचारानुसारेणात्मना कृतां श्रोतृजनशिक्षार्थं ग्रन्थे निवेशयति—अपूर्वं यद्वस्त्विति । एतद्ग्रन्थपरिशीलनशालिभिः काव्यप्रकाशकारादिभिः प्रणीतेषु ग्रन्थेषु प्रथमश्लोकानां तात्पर्यं पर्यालोच्य तदनुसारेणामुं श्लोकं व्याकुर्मः । तच्चोत्तरत्र स्पष्टीभविष्यति ।

* * * *

दाशरथिदुग्धसिन्धोरुदितमिदं लोचनाद्यपद्यस्य ।
व्याख्यानामृतममलं कस्मै विबुधाय जगति न स्वदते ॥

भट्टेति—इन्दुराज इति गुरोः संज्ञा, भट्टशब्दः पूज्यपर्यायः ॥

End :

कर्मषष्ठ्यन्तस्य प्राचुर्यशब्दस्य दृक्छब्देन समासः । प्राचुर्यस्य दृष्टत्वादिष्टत्वादित्यर्थः ।

R. No. 2789.

Paper. $10\frac{7}{8} \times 9\frac{4}{8}$ inches. Foll. 72. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Kūḍalūr-mana, Nareri, Tritala, Malabar district.

वाक्यपदीयटीका.
VĀKYAPADĪYAṬĪKĀ.

A commentary on the Vākyapadīya of Bhartṛhari which work has been described under No. 1483 of the D.C.S. MSS., Vol. III: by Vṛṣabha, son of Dēvayaśas and a dependant of Viṣṇugupta.

Breaks off in the first Kāṇḍa.

Beginning:

सर्वप्रपञ्चरूपं विगताशेषप्रपञ्चजालमलम् ।
जयति जगतां निदानं भवबन्धच्छिदि (परं) ब्रह्म ॥
विमलचरितस्य राज्ञो विदुषः श्रीविष्णुगुप्तदेवस्य ।
भृत्येन तदनुभावाच्छ्रीदेवयशस्तनूजेन ॥
बन्धेन विनोदार्थं श्रीवृषभेण स्फुटाक्षरं नाम ।
क्रियते पद्धतिरेषा वाक्यपदीपोदधेः सुगमा ॥
यद्यपि टीका बह्वयः पूर्वाचार्यैः सुनिर्मला रचिताः ।
सन्तः परिश्रमज्ञास्तथापि चैनां ग्रहीष्यन्ति ॥

द्वावुपादानशब्देष्वित्यतः प्रभृति प्रकरणं प्रवर्तिष्यते । तस्य त्वनाख्यातसंबन्धाभिधेयप्रयोजनस्य प्रेक्षापूर्वकारिणामनुपादेयतैव स्यादिति ते कथयितव्याः। तत्र संबन्धः प्रमाणप्रयोजनयोः हेतुहेतुमद्भावलक्षणः ।

* * * *

कः पुनरसौ मोक्षः? ब्रह्मप्राप्तिः । अतस्तस्य स्वरूपकथनाय प्रथमतः प्राप्यस्य ब्रह्मणः स्वरूपं कथयितुमाद्याश्चतस्रः कारिकाः सर्वतो भेदाभावप्रदर्शनाय । तत्र अनादिनिधनमिति कालप्रदेशकृतपरिच्छेदाभावप्रकाशनाय । ब्रह्मेति नामकथनम् । शब्दतत्त्वमिति स्वरूपकथनम् । यदक्षरं विवर्ततेऽर्थभावेनेत्यनेन ब्रह्मणस्सकाशाच्छब्दार्थयोरभेदकथनम् ।

End:

तत्र दर्शनभेदानाख्यातुकाम आह—स्फोटरूपाविभागेनेति। अविभक्त एव स्फोटो ध्वनिर्गृह्यत इत्येके, अगृह्यमाण एव ध्वनिरभिव्यञ्जक इत्यपरे, केवलोऽपि ध्वनिः स्वतन्त्रवद्भाव्यत इत्यपरे, संसृष्ट इति संबद्धः । अविभक्त इत्येकतां गतः । यथोपधा(पाध्यु)परक्तो रक्तस्फटि.

R. No. **2790.**

Paper. 11 × 9⅝ inches. Foll. 122. Lines, 20 in a page. Grantha. Good.

Transcribed from a MS. of M.R.Ry. Kṛṣṇacakravarti of Ketandapatti, North Arcot district.

ब्रह्मसूत्रविवृतिः—मिताक्षरा.

BRAHMASŪTRAVIVṚTIḤ : MITĀKṢARĀ.

Foll. 1*a*—121*a*. Foll. 121*b*—122 are left blank.

A commentary written in accordance with the Advaita-Vēdānta on the Brahmasūtras of Vyāsa, which work has been described under No. 4649 of the D.C.S. MSS., Vol. IX.

Complete.

Beginning:

श्री . . . . र्थस्व . . . ।
अनादिनिधनानन्ता सा मां पातु सरस्वती ॥

श्रुतिः । आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः इत्यादिश्रवणविधिवाक्यविषये सर्वोपनिष . . . . द्वैते ब्रह्मणि तात्पर्यावधारणानुकूलन्यायविचारात्मकवेदान्तशास्त्रमारम्भणीयं नवेति विशये शास्त्रं नारम्भणीयम्; विषयप्रयोजनशून्यत्वादिति पूर्वपक्षे शास्त्रमारम्भणीयं विषयप्रयोजनसत्त्वादिति सिद्धान्तः । पूर्वपक्षे उपायान्तरसाध्या मुक्तिरिति फलम् ।

अथातो ब्रह्मजिज्ञासा ॥

साधनचतुष्टयसम्पन्नस्य ब्रह्मज्ञानाय विचारः कर्तव्य इति श्रौतोऽर्थः । साधनचतुष्टयसम्पन्नस्य मोक्षसाधनब्रह्मज्ञानाय वेदान्तविचारः कर्तव्य इत्यार्थिकोऽर्थः । वाचस्पतिमते तु साधनचतुष्टयसम्पत्त्यनन्तरं ब्रह्मज्ञानेच्छा भवति । कर्मफलस्यानित्यत्वात् ब्रह्मज्ञानात्पुरुषार्थश्रवणाच्चेति श्रौतार्थः ।

* * * *

Colophon:

इति श्रीशारीरकमीमांसासूत्रविवृतौ मिताक्षरायां प्रथमाध्यायस्य प्रथमः पादः ॥

End:

अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् ॥

ये अर्चिरादिमार्गेण ब्रह्मलोकं प्राप्तास्तेषामनावृत्तिरेव । तेषां न पुनरावृत्तिः । क्रममुक्त्यभिधायकशब्दात् । निर्गुणब्रह्मविदां त्वावृत्तिशङ्कैव नास्ति, यतस्सगुणविदामपि निर्गुणाश्रयणेनैवानावृत्तिः नान्यथा । सूत्रावृत्तिः शास्त्रसमाप्तिद्योतनार्था ।

यस्सर्वश्रुतिवन्दिनन्दिततनुर्मायात्मनिद्रां गतः
सुप्तोऽस्मिन् भवपट्टणे परिमिते कल्पान्तकल्पान्तरे ।
यस्सर्वा परिपन्थिसाङ्गनयजप्रज्ञाप्रवाहान्तज-
प्रज्ञालभ्यसुखाकृतिः कृतिमिमां रामस्स गृह्णातु नः ॥

विदुषां कण्ठभूषेयं मया वृत्तिः कृता प्रभो ।
व्यासवाङ्मणिसन्दृब्धा प्रीतये तेऽस्तु सर्वदा ॥

Colophon:

इति श्रीशारीरकमीमांसासूत्रवृत्तौ मिताक्षरायां चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

R. No. **2791.**

Paper. 11 × 9⅝ inches. Foll. 28. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. V. Cina Sītārāma Śāstrulugāru of Vizianagram.

मूलस्तम्बपुराणम्.

MŪLASTAMBAPURĀṆAM.

Foll. 1*a*—28*a*. Fol. 28*b* is left blank.

This Purāṇa gives an account of Viśvakarman, the divine architect, and his human descendants, the artizan class, of their customs, religious rites and ceremonies, etc.

Contains the Adhyāyas 1 to 23 complete.

Deals with the following topics :—

१. विश्वकर्मप्रभावचरिते.
२. विश्वकर्ममूर्तिलक्षणम्.
३. विश्वकर्मश्रुतिस्मृतिवाक्यार्थकथनम्.
४. विश्वकर्मध्यानमन्त्रलक्षणम्.
५. यज्ञकर्मपुरुषसूक्तविधाने.
६. विश्वकर्मादिदेवोत्पत्तिः.
७. त्रिकालसन्ध्यामन्त्रभेदकथनम्.
८. ब्रह्मतत्त्वलक्षणम्.
९. सन्ध्यागायत्रीस्वरूपलक्षणम्.
१०. यज्ञकर्मकर्तृभेदविवरणम्.
११. उपनयनादिकर्मकथनम्.
१२. ऋषिसन्ततिमार्गकथनम्.
१३. मनुवंशोद्भवक्रमकथनम्.
१४. पञ्चतत्त्वकारणविश्वोत्पत्तिकथनम्.
१५. विश्वकर्मरूपांशकथनम्.
१६. अण्डपिण्डादिसमुत्पत्तिकथनम्.
१७. पञ्चभूतवर्णदेवतानिरूपणम्.
१८. विश्वकर्मस्वरूपकथनम्.
१९. भूम्याधारस्वरूपकथनम्.
२०. भूमिविस्तारत्रिस्थानादिकथनम्.
२१. पर्वविस्तारसङ्ख्याकथनम्.
२२. गिरिदेवर्षिस्थितिकथनम्.
२३. विश्वकर्मध्यानश्लोकाः.

Beginning :

विघ्नध्वान्तनिवारणैकतरणिर्विघ्नाटवीहव्यवाट्
विघ्नव्यालकुलोपमत्त(र्द)गरुडो विघ्नेभपञ्चाननः ।
विघ्नोत्तुङ्गगिरिप्रभेदनपविर्विघ्नाब्धिकुम्भोद्भवः
विघ्नाघौघघनप्रचण्डपवनो श्रीविघ्नेश्वरपादपङ्कजम् (विघ्नेश्वरः पातु वः) ॥

श्रीकण्ठतनयं देवमाकण्ठोपरि वारणम् ।
विकुण्ठतनयं चैव वैकुण्ठादिसुरार्चितम् ॥

* * * *

प्रसन्नपरशिवं ध्येयं विश्वकर्माणमव्ययम् ।
नमस्कृत्य महात्मानं मूलस्तम्भं वदाम्यहम् ॥
शृणु षण्मुख वक्ष्यामि चरितं विश्वकर्मणः ।
शृणु सेनानि वक्ष्यामि प्रभावं विश्वकर्मणः ॥
यच्छ्रुत्वा सर्वपापेभ्यो नरो मुच्येत किल्बिषैः ।
न भूमिर्न जलं चैव न तेजो न च वायवः ॥

* * * *

Colophon :

इति श्रीमत्परशिवविश्वकर्मलीलामहिमोन्नतमूलस्तम्भपुराणे प्रथमोऽध्यायः ॥

* * * *

ईश्वर उवाच—

अथातस्संप्रवक्ष्यामि यत्त्वया परिचोदितम् ।
तत्सर्वं हा(हि)समाने(से)न श्याय(शृण्व)तामपि वर्ण्यत ॥
साधकानां हितार्थाय भुक्तिमुक्तिप्रदा(फला)य च ।
विश्वकर्ममहाशास्त्रं तद्वोघृतमिवोद्धृतम् ॥
सुतात्परसमाधृत्य सुधात्मापत्रसंज्ञकम् ।
सहस्रग्रन्थसंयुक्तं सर्वज्ञानसमर्थितम् ॥
अप्रहास्यमिदं तन्त्रं रहस्यं परमदुर्लभम् ।

* * * *

परशिवे सहस्रांशोः पराशक्तिसमुद्भवम् ॥
तत्परस्य सहस्रांशोरादिशक्तिसमुद्भवम् ।
तदादिश्च सहस्रांशोरिच्छाशक्तिसमुद्भवम् ।
तदिच्छेति सहस्रांशोर्ज्ञानशक्तिसमुद्भवम् ॥

तज्ज्ञानेति सहस्रांशोः क्रियाशक्तिसमुद्भवम् ।
एतास्तु शक्तयः पञ्च निष्कलं स्थितिकीर्तिता ॥

End :

जगद्गुरुं कारणकार्यमीश्वरं प्रभूतभूअ(ता)खिललोकनायकम् ।
सुरेण दिक्पालकसेविताङ्घ्रिं श्रीविश्वकर्मं प्रणतोऽस्मि नित्यम् ॥
विश्वाय विश्वरक्षाय विश्वलोकैकसाक्षिणे ।
विश्वविज्ञानरूपाय विश्वकर्माय ते नमः ॥

इति ध्यात्वा ।

Colophon :

इति श्रीमत्परशिवविश्वकर्मलीलामहिमोन्नतमूलस्तम्बपुराणे त्रयोविंशोऽध्यायः ॥

R. No. **2792.**

Paper. 11 × 9⅝ inches. Foll. 18. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of Mānavikrama Anujan Kuññuṇṇi Rāja, (third) of Paḍiññārekōvilagam, Malabar district.

ध्वन्यालोकलोचनव्याख्यानम्.

DHVANYĀLŌKALŌCANAVYĀKHYĀNAM.

Foll. 1*a*—17*a*. Foll. 17*b*—18 are left blank.

Same work as that described under R. No. 2788 ante.

Contains the first stanza only.

R. No. **2793.**

Paper. 11 × 9⅝ inches. Foll. 34. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Nārāyaṇa Numbūdirippāḍ of Puliyanūr, Tiruppanitturai post.

(*a*) उपदेशसाहस्रीव्याख्या—गूढार्थदीपिका.

UPADĒŚASĀHASRĪVYĀKHYĀ : GŪḌHĀRTHADĪPIKĀ.

Foll. 1*a*—23*a*.

A commentary on the prose portion of Upadēśasāhasrī which work has been described under No. 4565 of the D.C.S. MSS., Vol. IX : by Akhaṇḍadhāman, disciple of Akhaṇḍānubhūti.

Complete.

Beginning:

गु णा शिष्यस्यात्मबोधनप्रकारं दर्शयितुं श्रीसहस्रचाख्यं प्रकरणं विरचयन् भाष्यकारो मङ्गलमाचरति—अथेति। अर्थात्साधनचतुष्टयसम्पन्नमधिकारिणं च सूचयति। चिकीर्षितमर्थं प्रतिजानीते—मोक्षेति। मोक्षं प्रति निरपेक्षसाधनं मोक्षज्ञानं तस्योपदेशः सम्प्रदायज्ञापनं प्रतिपादनमिति यावत्। तस्य प्रकारज्ञापनं विधिः व्याख्यास्यामः। इति निबन्धनरूपेण कथयामीत्यर्थः। प्रयोजनमाह—प्रकरणस्य मुमुक्षूणामित्यादि। अर्थाय पुरुषार्थाय। मोक्षायेत्यर्थः।

* * * *

Colophon:

श्रीमदखण्डानुभूतिशिष्येण विरचितायां सम्बन्धोक्तौ प्रथमं प्रकरणम् ॥

End:

पञ्चभूतानामेव करणत्वं कर्तृत्वं कर्मत्वं च न त्वात्मन इति दशहोतृप्रकरणमारभ्यानुगतायामध्यायचतुष्टयेषूक्तो न्यायो द्रष्टव्य इति न प्रपञ्च्यते, स्पष्टार्थत्वात् ॥

Colophon:

इति श्रीमदखण्डानुभूतिशिष्येणाखण्डधाम्ना विरचिता गूढार्थदीपिका समाप्ता ॥

(*b*) पञ्चप्रक्रियाव्याख्या.

PAÑCAPRAKRIYĀVYĀKHYĀ.

Foll. 23*b*—33*b*. Fol. 34 is left blank.

A commentary on the Pañcaprakriyā which is a preliminary treatise dealing with the following five topics in the Advaita-Vēdānta:—

१. महावाक्य.
२. तत्त्वंपदार्थनिर्णय.
३. ब्रह्मपदार्थनिरूपणावान्तरवाक्यार्थ.
४. आत्मपदार्थनिरूपणपरवाक्यार्थ.
५. मोक्षविचारनिर्णय.

From another MS. brought to the Library, the author of the text is made out to be Sarvajñātman. The commentator is Pūrṇavidyā, disciple of Vēdapūrṇamunīndra.

Complete.

Beginning:

रक्षताद्दक्षिणामूर्तेः कटाक्षोज्ज्वलदीपिका ।
निरस्तसंसृतिध्वान्ता सच्चिदानन्ददर्शिनी ॥
यद्वाग्रङ्गगता नित्यं नरीनर्ति सरस्वती ।
तं वन्दे वेदपूर्णाख्यं वेदान्ताब्जरविं गुरुम् ॥
वेदपूर्णपदाम्भोजभृङ्गायितधिया मया ।
व्याक्रिया क्रियते पञ्चप्रक्रियायास्समासतः ॥

पञ्चप्रक्रियाख्यं शारीरकशास्त्रप्रकरणं प्रकुर्वाणस्तदर्थप्रतीतेर्वेदमूलत्वाद्वेदार्थावगतेश्च शब्दवृत्तिपरिज्ञानाधीनत्वात्तद्वृत्तिप्रकारं प्रथमं प्रदिदर्शयिषुः प्रारिप्सितस्य ग्रन्थस्याप्रत्यूहपरिपूरणाद्यभ्युदयलाभार्थमभिधानप्राधान्येन वेदात्मनाभिव्यक्ताभिमतदेवताप्रणतिलक्षणं मङ्गलाचरणं करोति—दीपवदिति श्लोकेन ।

कथं वेदस्य विज्ञातुमर्हस्य सर्वस्यार्थस्य विज्ञानजनिका . . . त्याशङ्कचाह—चिद्विवर्तायेति ।

End:

अविद्येति । प्रकरणार्थसर्वस्वं सङ्क्षेपेण निगमयति—अविद्यावृत्तामित्यादिना । पूर्वोक्तं पुर्यष्टकं प्रतिपत्तिसौकर्यार्थम् । तदेव श्लोकेन सङ्गृह्याह—कर्मेन्द्रियाणीति ।

वेदपूर्णपदाम्भोजभृङ्गायितमना मुनिः ।
व्याक्रियामकरोत्पञ्चप्रक्रियायाः प्रमाणगाम् ॥
वन्देऽहं दक्षिणामूर्तिं कुन्दमन्दारसप्रभम् ।
सुप्रभं सुखसाम्राज्यं सर्वगीर्वाणवन्दितम् ॥

Colophon:

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवेदपूर्णमुनीन्द्रशिष्येण पूर्णविद्याख्येन मुनिना विरचितेयम् ॥

R. No. **2794.**

Paper. $10\frac{7}{8} \times 9\frac{3}{4}$ inches. Foll. 120. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918–19 from a MS. of Mahantu Bharatadās Bāvāji, Parlakimedi, Ganjam district.

अध्यात्मरामायणटीका—बालबोधिनी.

ADHYĀTMARĀMĀYAṆAṬĪKĀ: BĀLABŌDHINĪ.

Fol. 120*b* is left blank.

A commentary on the Adhyātmarāmāyaṇa which work has been described under No. 2153 of the D.C.S. MSS., Vol. IV, Part I. The commentary is called Bālabōdhinī and is by Gōpālasūri of Vandighaṭi family, whose genealogy is given thus :

Hiraṇya
|
Śiva
|
Jñāna — Mahēśa
|
Durgādāsa
|
Gōpāla

Complete in seven Kāṇḍas.

Beginning :

सच्चिदानन्दसन्दोहमव्यक्तं सदसत्परम् ।
सीताभिरामं श्रीरामं (भ)क्तकल्पद्रुमं नुमः ॥
सीतास(त्या)लिङ्गिताङ्गावन्योन्यपरिवर्धनौ ।
अन्योन्यमूर्तिसंवेशौ वन्दे रामेश्वरौ मुदा ॥
आयुर्व्यर्थमुपैति नाशमनिशं व्यर्थार्थचिन्ता(त)तिः
मृत्युर्गर्जति मस्तकोपरि जराव्याली गिलत्यन्वहम् ।
देहो रामकथामृतैर्यदि पुनः सिक्तः क्षणं स्यादिदं
जन्म स्यात्सफलं ततो मृदुमते यत्नो ममायं सदा ॥

अथ सकललोकहितावदातचरितानिरन्तरापरोक्षीकृतपरमात्मतत्त्वनिरस्तसंशयोऽपि श्रीरामतत्त्वं लोके प्रकटयितुकामो भगवान्नारदः सन्धि(न्दिहा)न इव कलिकालीनदुरन्तदुरितभवनिरसनोपायं ब्रह्माणं पप्रच्छ । ब्रह्मापि श्रीरामकथैवात्र परमोपाय ति श्रीशङ्करपार्वतीसंवादभूतमध्यात्मरामायणं नाम पुराणं तस्मै यथावत्प्राह स्म । तदेव ब्रह्माण्डपुराणान्तर्गतं वेदव्यासेन निबद्धं तच्छिष्यः सूतो नैमिशारण्ये शौनकादीन्प्रति कथयति—सूत उवाचेत्यादि । कदाचिदिति । परानुग्रहवाञ्छयेति । स्वस्य संशयाभावात् । बालार्कप्रभयेति । रजोगुणस्योद्रिक्तत्वात् ।

* * * *

Colophon :

इति श्रीमदध्यात्मरामायणटीकायां बालबोधिन्यां प्रथमोऽध्यायः ॥

End:

रामायणमित्यादि—एतद्रामायणमादिकाव्यं प्रथमं श्रीशङ्करेणोक्तत्वात् जनानां मनोहरमतिपुण्यदत्वाद्ब्रह्मादिभिः सुरवरैरपि स्तुतं न केवलं मानुषादिभिरेव । यः पुमान् श्रद्धान्वितः सन्नित्यं पठेच्छृणुयाच्च स विशुद्धदेहस्सन् । देहस्य विशुद्धत्वं तत्कालेऽभौतिकत्वात् । व्याख्यातं च श्रीधरस्वामिपादैः । एतेन पार्षदतनूनां नित्यत्वमभौतिकत्वं चोक्तमिति । विष्णोः सदनं श्रीवैकुण्ठं प्रयाति । यद्वा श्रवणकाल एव विशुद्धदेहः विगतपापशरीरः । अन्ते तु विष्णोः सदनं प्रयाति ॥

इत्युत्तरकाण्डे नवमोऽध्यायः । ग्रहसङ्ख्यया नवसङ्ख्यया परिक्षिप्ता निहिताः कृता इति यावत् ॥

योऽनिन्द्रियः सर्वगुणग्रहीता कर्तापि सर्वस्य विकारहीनः ।
मायाविदूरो जनकात्मजाङ्को रामं तमाश्चर्यकृतं नमामि ॥

प्रीयतां रामचन्द्रो मे कर्मणानेन नित्यदा ।
मया तु तस्य संप्रीत्यै कृतमेतन्न कीर्तये ॥

वक्ता यस्य शिवः स्वयं श्रुतिमयी श्रोत्री च सा पार्वती
वेदान्तागमवेदसारममलं यद् द्वैतधीशोधनम् ।
तद्व्याख्यानकथासु कोऽस्मि जडधीर्हास्याय तन्मे वचः
किं तु श्रीरघुनाथपुण्यचरितैः पापक्षये सच्छ्रमः ॥

आसीत्सर्वगुणावतार(दात)चरितावन्ध्यो हिरण्याभिधः
तत्पुत्रः शिव इत्यभूच्छिवसुतौ ज्ञानं महेशस्तथा ।
दुर्गादाससमाह्वयोऽभवदथो ज्ञानात्मजस्तत्सुतः
श्रीगोपालधरामरः समतनोट्टीकामिमां सन्मुदे ॥

Colophon:

इति श्रीवन्दिघटीकुलप्रसूतसत्पण्डितश्रीगोपालचक्रवर्तिविरचिता बालबोधिनी श्रीमदध्यात्मरामायणटीका समाप्ता ॥

R. No. **2795.**

Paper. $10\frac{7}{8} \times 9\frac{3}{4}$ inches. Foll. 232. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918–19 from a MS. of the Raja of Chirakkal, Malabar district.

Bound in two volumes.

भागवतव्याख्या, अमृततरङ्गिणी.

BHĀGAVATAVYĀKHYĀ: AMṚTATARAṄGIṆĪ.

Fol. 232*b* is left blank.

This commentary on the Bhāgavata is by Jñānapūrṇamuni whose family Guru is stated to be Anantānanda.

Contains the Skandhas one to three.

Beginning:

चिदेकरसनिर्भेदसदानन्दसुधार्णवः ।
जयत्युपनिषत्प्राणवल्लभो वल्लवीसुतः ॥
गीर्वाणमौलिमणिघट्टितपादुकाय गोपाङ्गनास्तनललामपदाम्बुजाय ।
श्रीपुण्डरीकमुनिमण्डलचित्तवृत्तिक्रीडामृगाय वरदाय नमोऽच्युताय ॥
कररुहकुलिशैर्द्विषतां चरणाम्बुजनखरकान्तिभिर्भजताम् ।
हृदयग्रन्थीन्भिन्दन्मनसि नृसिंहः समुल्लसतु ॥
यदङ्घ्रिरेणुबीजानि जनैरुप्तानि मूर्धसु ।
सद्यः सुरद्रुमायन्ते श्रीधरः स श्रियेऽस्तु नः ॥
उल्लसति लोचनाग्नौ जगदपदानानि जुह्वतो यस्य ।
प्रथमाहुतिर्मनोजः स जयति देवः पुरां भेत्ता ॥
यशोभिर्यो विश्वं विशदयति दुग्धाब्धिधवलै-
र्यक्त(क)त्सूक्तीर्मुक्ता इव दधति कर्णेषु सुधियः ।
अपाङ्गज्योत्स्नाभिर्गलति तिमिरं यस्य जगता-
मनन्तानन्दोऽन्तर्हृदि वसतु सोऽस्मत्कुलगुरुः ॥
नमः परमहंसावतंसाय शुकयोगिने ।
निस्तरङ्गनिजानन्दसुधासिन्धुविहारिणे ॥
सत्यः सत्यवतीसूनोः सरसाः सूक्तिशुक्तयः ।
फलन्तु भक्तिवैराग्यज्ञानमुक्तफलानि नः ॥
ग्राहपकपदपाथसि नूतनानाभङ्गीतरङ्गिणि निगूढमहार्थरत्ने ।
अस्मिन्प्रबन्धजलधौ मुनिवल्लभस्य धार्ष्ट्यं विमौढ्यमथवा विजिगाहिषा मे ॥
तथापि गुरुपादाब्जप्रसादोन्निद्रधीरहम् ।
श्रीमद्भागवतव्याख्यां कुर्वेऽमृततरङ्गिणीम् ॥

शास्त्रारम्भे सकलजगदन्तरङ्गरङ्गवासिन्यामखिलोपनिषदङ्गनाजनोपचर्यमाणमनोज्ञपदविलासिन्यामभिमतायां देवतायां मङ्गलाय मनः प्रणिधत्ते । प्रतिपाद्यं

चार्थं संक्षेपतोऽभिधत्ते—जन्माद्यस्य यत इत्यादिना । स हि स्वव्यतिरिक्तं वस्तु कदाचिन्नास्तिप्रत्ययविषयः स्यात् । आत्मा तु न कदाचिन्नास्तिप्रत्ययविषयः। नाहमस्मीति प्रत्ययायोगात्। न हि निराश्रयः प्रत्यय उत्पत्तुमर्हति। न चान्येनात्मनान्यस्याभावोऽवगम्यत इति वाच्यम्। अवगम्यस्य घटादिवदनात्मत्वात्।

* * * *

Colophon:

इति भागवतव्याख्यायाममृततरङ्गिण्यां प्रथमस्कन्धे प्रथमोऽध्यायः ॥

End:

दैवगुप्तं दैवेन प्रारब्धकर्मणा तत्साक्षिणेश्वरेण वा गुप्तनिर्वाणम् । विदेहकैवल्यमुपेयुषी प्राप्ता । मर्त्यस्य भावो मार्त्यं पूजादिरूपेण परिणामः । योगेन विधूतं मार्त्यं यस्य तद्योगविधूतमार्त्यं मर्त्यशरीरम् । प्रागुदीचीम् ईशानाधिष्ठिताम् आस्ते अद्यापीत्यर्थः । साङ्ख्याचार्यैः पञ्चशिखादिभिरात्मयोगगुह्यम् आत्मविषययोगेषु गुह्यं रहस्यम् । आत्मयोगश्च तद्गुह्यमिति ॥

Colophon:

इति श्रीमहाभागवतव्याख्यायाम् अमृततरङ्गिण्यां तृतीयस्कन्धे त्रयस्त्रिंशोऽध्यायः ॥

* * * *

श्रीमद्भागवतव्याख्यां श्रीमद्भागवताशयः ।
अलिखज्ज्ञानपूर्णाख्यः सिद्धोऽमृततरङ्गिणीम् ॥

श्रीमद्भागवतव्याख्या शुद्धामृततरङ्गिणी ।
शोभते खलु संसारविषमूर्छोपहारिणी ॥
व्यासतुल्योऽपि यो मर्त्यः सर्वशास्त्रार्थपारगः ।
स मुह्यति लिखेत्प्रायः किं पुनः स्वल्पधीर्जनः ॥

R. No. **2796.**

Paper. $10\frac{7}{8} \times 9\frac{3}{4}$ inches. Foll. 242. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918–19 from a MS. of the Raja of Chirakkal, Malabar district.

प्रायश्चित्तप्रकरणम्.
PRĀYAŚCITTAPRAKARAṆAM.

Bound in two volumes.

Foll. 241 and 242*a* give the contents of the work. Fol. 242*b* is left blank.

Gives details of Tantric procedure for the commencement of festivals in temples and for the performance of certain purificatory and expiatory ceremonies.

Complete in ten Paṭalas, dealing with the following topics:—

अस्त्रकलशपूजाविधिः.
प्रासादशुद्धिः.
बिम्बशुद्धिकलशपूजा.
मण्डपसंस्कारः.
कुम्भेशपूजा.
अग्निजननम्.
क्रियाधिकारः.
धान्याधिवासः.
मण्डलपूजा.
प्रतिष्ठाहोमप्रकारः.
परिहोमप्रकारः.
प्रतिष्ठामन्त्राः.
बलिपीठादिसंस्थापनम्.
उपयुक्तमन्त्रप्रतिपादनम्.
पूजानाडीशुद्ध्यात्माराधनादिविधानम्.
पञ्चब्रह्मविधानम्.
कलशक्षेत्रक्लृप्तिप्राणप्रतिष्ठादिविधिः.
होमोत्सवबलिप्रकाराः.
घृतारोपणविधिः.
प्रायश्चित्तप्रकरणम्.
स्थानविभागादिविशेषपञ्चकम्.
शान्तिहोमदाहप्रायश्चित्तम्.
तत्त्वहोमः.
बीजाङ्कुरध्वजप्रायश्चित्तम्.
अग्निनाशप्रायश्चित्तम्.

Beginning:

वागीशाद्याः (. . .) तं नमामि गजाननम् ॥

अथ तन्त्रसमुच्चयोक्तक्रमेणाङ्कुरारोपणक्रियाक्रमो लिख्यते । षडध्वन्यायस्तु पूजायां तत्रैव मूलमन्त्रतदङ्गानि तत्तद्गायत्रीपञ्चतत्त्वादिमन्त्राः लिख्यन्ते । अथ बीजाङ्कुरार्पणं कुर्यात् । तद्यथा । ध्याना(धान्या)धिवासदिवसात्प्राग्द्वादशे वा नवमे वा सप्तमे वा पञ्चमे वा दिवसे रात्रौ शुभे मुहूर्ते यामेऽतीते सति गुरुः स्नात्वा यजमानाद्वस्त्रपवित्राणि गृहीत्वा नववस्त्रधर आचम्य देहशुद्ध्यादि कृत्वा प्रासादस्योत्तरभागे पश्चिमद्वारि कृते मण्टपे सम्यगाच्छादितेऽधिवासमण्टपसंस्कारं वक्ष्यमाणरीत्या सूत्रमूलादि विकिरविकरणान्तं संस्कारं कृत्वाङ्कुरारोपणं कुर्यात् ॥

End:

पुनः कलशाधिवासे कृते देवाय विज्ञापिते कलशाभिषेकमध्ये वा अशुद्धिः स्याच्चेत्तदा कलशे बिम्बे च तत्प्रायश्चित्तं कृत्वा संपातजुगुप्सा गच्छति तावत्कार्येत्यर्थः । एवमुक्तेष्वनुक्तेषु च गुरुः श्रुतिस्मृतिन्यायपरैः ततीयज्ञैः(तज्ज्ञैः)विद्भिः सह विचार्य चित्तं कुर्यात् । तथै(दै)व परिपूर्णता स्यात् ॥

Colophon:

इति प्रायश्चित्तप्रकरणं दशमः पटलः ॥

R. No. **2797.**

Paper. $10\frac{7}{8} \times 9\frac{3}{4}$ inches. Foll. 26. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918–19 from a MS. of Pandit Rāmagōvinda Śāstrigāru of Narasapur, Kistna district.

जगदीशीयव्यधिकरणदुलालम्.

JAGADĪŚĪYAVYADHIKARAṆADULĀLAM.

Fol. 26*b* is left blank.

A critical supplement to the Caturdaśalakṣaṇī of Jagadīśa Tarkālaṅkāra.

Breaks off in the Miśralakṣaṇa.

Beginning:

यत्समानाधिकरणा इत्यस्यानुगमप्रकारः । हेतुसमानाधिकरणाभावप्रतियोगिताविशिष्टाभावत्वव्यापकप्रतियोगिताकत्वमेव यत्समानाधिकरणा इत्यादिसमुदितलक्षणार्थः ।

End:

सर्वत्र हेतुसमानाधिकरणसाध्याभावप्रतियोगितावच्छेदके घटत्वादौ घटत्वादिविशिष्टसंबन्धिनिष्ठाभावीयघटत्वादिविशिष्टनिष्ठप्रतियोगिताया अनवच्छेदकस्य सत्त्वाल्लक्षणसमन्वय इति समापयन्ति ॥

R. No. **2798.**

Paper. $10\frac{7}{8} \times 9\frac{3}{4}$ inches. Foll. 76. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918–19 from a MS. of Maguni Miśra of Chaṅguḍisāsanam, Parlakimedi taluk, Ganjam district.

यात्राभागवतम्.

YĀTRĀBHĀGAVATAM.

Fol. 76 is left blank.

Deals with the details connected with the festivals to be performed to God Jagannātha worshipped at Puruṣōttamakṣētra (Puri).

Contains the following Adhyāyas :—

१. डोलायात्राविवरणम्.
२. दमनकयात्रानिर्णयः.
३. अक्षयतृतीयायात्रानिरूपणम्.
४. स्नानयात्रानिरूपणम्.
५. श्रीगुण्डिचायात्रानिर्णयः.
६. देवशयनयात्रानिरूपणम्.
७. कर्कटसङ्क्रमयात्रानिरूपणम्.
८. मकरसङ्क्रमयात्रानिरूपणम्.
९. पार्श्वपरिवर्तनयात्रानिरूपणम्.
१०. देवोत्थापनयात्रानिरूपणम्.
११. षष्ठीयात्रानिरूपणम्.
१२. पुष्पाभिषेकयात्रानिरूपणम्.
१३. मार्गशिरमासयात्रानिरूपणम्.
१४. पौषमासयात्रानिरूपणम्.
१५. माघमासयात्रानिरूपणम्.
१६. फाल्गुनमासयात्रानिरूपणम्.
१७. चैत्रमासयात्रानिरूपणम्.
१८. वैशाखमासयात्रानिरूपणम्.
१९. ज्येष्ठमासयात्रानिरूपणम्.
२०. आषाढमासयात्रानिरूपणम्.
२१. श्रावणमासकृत्यनिरूपणम्.
२२. भाद्रपदमासयात्रानिरूपणम्.
२३. आश्विनमासकृत्यनिर्णयः.
२४. कार्त्तिकमासकृत्यनिर्णयः.

Beginning :

रासोल्लासभरेण नृत्यति महाकल्पद्रुमाधः सदा
नानाभूषणरत्नहारनिकरैरान्दोलितो वक्षसि ।
लावण्यैकनिकेतनं श्रुतिगुरुं ब्रह्मेन्द्ररुद्रैः स्तुतं
वन्दे श्रीव्रजसुन्दरीगणवृतं बृन्दावनेशं हरिम् ॥

श्रीकृष्णलीलाज्ञानार्थं जनानामुपकारकम् ।
यात्राभागवतं नाम ग्रन्थं वक्ष्याम्यहं शुभम् ॥

गजेन्द्रवदनं वन्दे पाशाङ्कुशधरं विभुम् ।
ग्रन्थसंपूर्णतार्थाय वन्दे श्रीगणनायकम् ॥

नीलाचलमकुटमणेः श्रीमज्जगन्नाथदेवस्य यात्रादिकं सर्वं निरूपयितुं प्रमाणमारभते । यात्रायां मध्ये द्वादशयात्रा एव मोक्षदमू(दाः) । तत्प्रमाणमाह स्कान्दे श्रीपुरुषोत्तममाहात्म्ये । इन्द्रद्युम्नराजानं प्रति श्रीभगवद्वाक्यम्—

दोला यात्रा दमनकमहो अक्षपूज्या तृतीया
मश्वस्नानं रथवरगतिः शायनं च(चा)यने द्वे ।
पार्श्वा वृत्तिः शयननिवृतिः प्रावृतिः पुष्पपूजा
एवं यात्रा विधिनिगदिता द्वादशेयं नरेन्द्र ॥

* * * *

Colophon:

इति श्रीयात्राभागवते यात्रानिर्णये द्वादशयात्राविवरणे दोलायात्राविवरणं नाम प्रथमोऽध्यायः ॥

End:

पौर्णमीवृद्धिविषये स्कान्दे—

पौर्णमी वृद्धिगामी चेत्तदोत्तरतिथौ सदा ।
स्नानदानादिकं सर्वं तथैव च समाचरेत् ॥

इति । पौर्णमी(मासी)वृद्धिश्चेत्तदा षष्टिदण्डात्मिका(कां) पौर्णमीं(मासीं) त्यक्त्वा वृद्धिपक्षं(क्षो) ग्राह्यम्(ह्यः) ॥

Colophon:

इति श्रीयात्राभागवते उपयात्रानिर्णये चतुर्विंशोऽध्यायः ।

इति श्रीपाठिकुलकुमुदबन्धुना व . . . . . . ज्ञ(वाल्मीकि)पाठिना विरचिते श्रीयात्राभागवते उपयात्रानिर्णये कार्त्तिकमासकृत्यनिरूपणं नाम चतुर्विंशोऽध्यायः ॥

R. No. **2799.**

Paper. $10\frac{1}{8} \times 9\frac{3}{4}$ inches. Foll. 110. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918–19 from a MS. of Maguni Miśra of Chaṅguḍi-śāsanam, Parlakimedi taluk, Ganjam district.

स्मृतिदर्पणम्.

SMṚTIDARPAṆAM.

Foll. 109*b* and 110 are left blank.

A digest of Smṛtis: by Yōgipraharāja, son of Vaidēhī and Nīlakaṇṭha, whose genealogy is thus given:

Sakalēśvarapraharāja
(of Śrīvatsagōtra and Guru of Raghunāthadēva Gajapati)

- Balabhadra (Guru of Vikramadēva)
- Mārkaṇḍa
- Jagannātha

Mārkaṇḍa and Jagannātha:

- Viśvanātha (Guru of Kṛṣṇadēva)
  - Rāmakṛṣṇa
- Candraśēkhara Mahāpātra (Guru of Mukundadēva)

Rāmakṛṣṇa and Candraśēkhara Mahāpātra:

- Gōpīnātha
- Lōkanātha
- Nīlakaṇṭha (Guru of Vikramadēva)
  - Nityānandasudhī, (Guru of Rāmacandranṛpati)
  - Yōgipraharāja

Raghunāthadēva Gajapati resided at Nandapura in the Guṇapura (Gunupur), Ganjam district.

Contains the Kālavyavahāra and the Śrāddhavyavahāra only.

Beginning:

कनकरुचिरवासाः श्यामलाम्भोदनीलः व्रजकुमुदवनेन्दुः कोटिकामाभिरामः।
त्रिगुणनगनिधानो दीनपक्षैकदक्षः स दिशतु मम भद्रं सर्वदा राधिकेशः ॥

वन्दे गजेन्द्रवदनं तपनीयशोभं पाशाङ्कुशाभयवराङ्कितपाणिपद्मम् ।
विघ्नालिशैलकुलिशं मदघूर्णिताक्षं सिद्धिप्रदं स्वजनदेवतरुं शरण्यम् ॥

धीरश्रीसकलेश्वरो गुणनिधिर्यो वत्सगोत्राम्बुधि(धे):
पूर्णेन्दुः प्रहराजशाटिविदितो दुर्गार्चकोऽप्युत्कले ।
संपूज्यस्तु गजाधिपादिकनृपैर्लब्धप्रतिष्ठोदयो
यस्यैव प्रथयन्ति संप्रति यशो नित्यं द्विजाद्या मिथः ॥

श्रीमन्नन्दपुरान्तरे गुणपुरे देशे यदा विश्वतो
वीरश्रीरघुनाथदेवनृपतिः राजाथ तं स्वागतः ।
यो मान्यो गुरुवद्बभूव नितरां तद्भूपनाम्ना स्वयं
यः कृत्वा द्विजशासनं च नगरे राजश्रियाढ्यः स्थितः ॥

तस्य स्युस्तनयास्त्रयो गुणधरा धीराः क्षितौ विश्रुताः
तेषु श्रीबलभद्रनामविदितो ज्येष्ठोऽम्बिकासेवकः ।
श्रीमद्विक्रमदेवभूपतिगुरुर्भूदेवमुख्यान्वितं
तद्रूपाभिधशासनैकमतुलं चक्रे पुनर्यः श्रुतम् ॥
मार्कण्डाभिध एव सूरिविदितस्तस्यानुजो मान्त्रिकः
श्रीमान्सर्वकलानिधिस्तु गिरिजाध्यानैकनिष्ठात्मकः ।
तस्य स्मार्तवरोऽनुजोऽप्यथ जगन्नाथाह्वयः श्रीयुतो
भूपार्च्यो विदुषां वरो विमलधीर्दक्षः स्वधर्मान्वितः ॥
श्रीमन्तौ तनयौ च मन्त्रि(न्त्र)निपुणौ तस्याग्रजस्तत्र यः
श्रीकृष्णाह्वयभूपकेसरिगुरुः श्रीविश्वनाथो बुधः ।
वेदान्तादिकशास्त्रविन्मतिमतां मुख्योऽपि तस्यात्मजो
नित्यं यः प्रियदर्शनो नृपगुरुः श्रीरामकृष्णोऽभवत् ॥
यः श्रीमानथ चन्द्रशेखरमहापात्रः कनीयांस्ततो
यच्छिष्योऽपि मुकुन्ददेवनृपतिर्धीरस्य तस्यात्मजः ।
तिस्रः स्युर्भुवि विश्रुता नृपगुरुः श्रीगोपिनाथः कृती
ज्येष्ठस्तच्चरमो गुरुर्गुणवतां श्रीलोकनाथाह्वयः ॥
तस्य श्रीहरिसेवकोऽप्यवरजः श्रीनीलकण्ठः सुधीः
श्रीमद्विक्रमदेवनामनृपतेः श्रीपट्टराज्ञां गुरुः ।
विख्यातो भुवि जामदग्न्य इव यो ज्योतिर्विदामग्रणीः
धीरेशान् रुचिरे तु शासनयुगे योऽस्थापयन्भू(द्भू) सुरान् ॥
स्यातां तस्य सुतौ च नीतिनिपुणौ तत्राग्रजः श्रीयुतो
नित्यानन्दसुधीर्धराधिपगुरुः स्मृत्यादिपारङ्गमः ।
शिष्यो यस्य तु रामचन्द्रनृपतिर्हस्त्यादिलक्ष्म्याङ्कितो
धीमांश्चावरजोऽथ तस्य विदितः श्रीकृष्णपादार्चकः ॥
श्रीयोगिप्रहराजसत्कविवरो नानाकलाकोविदः
तातं संप्रति तं वदान्यमतुलं श्रीनीलकण्ठाख्यकम् ।
वैदेहीं जननीं सुपुण्यसदनां नत्वा तथा श्रीमतीं
संक्षेपं स्मृतिदर्पणं वितनुते स्वच्छं मुनीनां मतैः ॥

अपूर्वमेतत्कुलसंभवा ये धीराश्च ते कार्यविदो वदान्याः ।
ब्रह्मण्यभाजो नृपलक्ष्मयुक्ताः दिक्षु श्रुता भूसुरबाहुजाद्यैः ॥
स्मृतिनिर्णयसन्दिग्धमानसा भुवि ये बुधाः ।
मदीयं दर्पणमिमं स्वच्छं पश्यन्तु ते नवम् ॥

स्मृतिशिष्टयुगदेशवर्णाश्रमकुलव्यवस्थाभिः पृथक्पृथक् सप्तधा व्यवहाराश्च क्वचित्केनापि स्मृत्यनुगमि(ता इ)त्यनुसन्धेयम् । तत्र प्रवृत्त्यात्मकतया निवृत्त्यात्मकतया विधिस्तु द्विविधः । तत्रादौ च—

श्रीकृष्णकीर्तनं गङ्गास्नानमेकादशीव्रतम ।
तुलसीसेवनं दानं शस्तान्याहुः कलौ युगे ॥

द्वितीयो यथा—

अश्वमेधं गवालम्भं सन्न्यासं पलपैतृकम् ।
देवरेण सुतोत्पत्तिं कलौ पञ्च विवर्जयेत् ॥

सर्वत्रैवमपि । तथा च—वेदाः प्रमाणं स्मृतयः प्रमाणम् । तदलाभे शिष्टाचारः प्रमाणम् ।

* * * *

श्रीगोविन्दपदारविन्दयुगलध्यानैकतानस्सदा-
नन्दाम्भोधिसुधाकरो गुणनिधिर्नानाकलाकोविदः ।
श्रीयोगिप्रहराजसत्कविवरो ग्रन्थं जनप्रीतये
सङ्क्षेपस्मृतिदर्पणाख्यममलं चक्रे मुनीनां मतैः ॥

Colophon:

इति स्मृतिदर्पणे संवत्सरादिव्यवहारः ॥

End:

गङ्गास्नानयोगः । स्कान्दे—

वारुणेन समायुक्ता मधुकृष्णत्रयोदशी ।
गङ्गायां यदि लभ्येत सूर्यग्रहशतैः समा ॥

वारुणीयम् ।

शनिवारसमायुक्ता सा महावारुणी स्मृता ।

महावारुणीयम् ।

मधुकृष्णत्रयोदश्यां शनौ शतभिषा शुभे ।
महामहेति विख्याता त्रिकोटिकुलमुद्धरेत् ॥

महामहावारुणीयम् ।

ग्रन्थविस्तृतिभीत्यात्र निःसन्देहतयाखिलम् ।
स्वल्पतो लिखितं चान्यज्ज्ञेयं ग्रन्थान्तराद्बुधैः ॥
श्रीगोविन्दपदारविन्दयुगलध्यानैकतानः सदा-
नन्दाम्भोधिसुधाकरो गुणनिधिर्नानाकलाकोविदः ।
श्रीयोगिप्रहराजसत्कविवरो ग्रन्थं जनप्रीतये
संक्षेपं स्मृतिदर्पणाख्यममलं चक्रे मुनीनां मतैः ॥

Colophon:

इति स्मृतिदर्पणे श्राद्धव्यवहारः ॥

R. No. 2800.

Paper. 11 × 9¾ inches. Foll. 30. Lines, 20 in a page. Malayālam. Good.

Transcribed in 1917–18 from a MS. of P.C. Mugilil Kuṭṭi-Anujan Tambirān, fourth Raja, Chalapuram, Malabar district.

कौतुकचिन्तामणिः.

KAUTUKACINTĀMAṆIḤ.

Gives detailed instruction for the performance of magical acts and entertainments, such as, subjugation of enemy armies, putting out of fires, destruction of the effects of poison, etc., as mentioned in the following list of topics. By Siddhanāgārjuna.

१. सेनादिस्तम्बः.
२. अग्निविषादिस्तम्बः.
३. बीजादिस्तम्बः.
४. वशीकरणगर्भनाशनम्.
५. कर्पूरादिसुगन्धवस्तुकरणम्.
६. वयस्स्तम्बः.
७. अङ्कोलादितैलकरणम्.
८. रसवादप्रयोगः.
९. रसवादनिदर्शनानि.
१०. अदृश्यकरणम्.
११ बीजारोपणप्रकारः.
१२. प्रशमिताग्निजलदीपप्रयोगः.
१३. सभातर्जनादिप्रयोगः.
१४. मूषिकमत्कुणोच्चाटनम्.
१५. स्त्रीमुखकान्तिसौरभकरणम्.
१६. सुस्वरादिकरणम्.
१७. शत्रूपद्रवनिवारणमन्त्राः.
१८. मत्स्यवृश्चिकाद्याश्चर्यवस्तूत्पादनम्.

Complete.

Beginning:

[हे] नागराजतमहीधरवासिन् नागहार करुणाकर शम्भो ।
नौमि ते चरणवारिजयुग्मं तुष्यतां मयि वृषध्वज नित्यम् ॥

अथेदानीं कौतुकानि निरूप्यन्ते । तत्र च कौतुकप्रयोक्ता परकृतप्रतिकूलप्रयोगसंभावनायाः स्वशरीररक्षणपूर्वकमेव कौतुकानि प्रयुञ्जीत । अन्यथा —

नासारन्ध्रद्वयं लिप्त्वा गोघृतेन तमोमुखे ।
क्षिपेत् बिम्बफलं यस्य कुयोगो न हि बाध्यते ॥

पूर्वं रक्षाविधिं कृत्वा पश्चात्कौतुकमाचरेत् ।
विना रक्षाविधानेन यः करोति स पीड्यते ॥

अथ पक्षिकदृष्टिबन्धं च कुर्वीत । तत्प्रकारस्तु—

श्मशानतरुमूलेन कुर्यात्पादाङ्गुलीयकम् ।
मृतनिर्माल्यसंयुक्तं रक्तसूत्रेण वेष्टयेत् ॥
स्वपादे धारयेदेनं पश्चात्सिध्यति कौतुकम् ।
तेन निश्शेषलोकस्य दृष्टिबन्धः प्रजायते ॥

अथ सेनास्तम्बं निरूप्यते ।

* * * *

Colophon:

इति सिद्धनागार्जुनकृतौ कौतुकचिन्तामणौ प्रथमः पटलः ॥

End:

नृमुण्डवन्नालिकेरमाश्चर्यं दृश्यते जनैः ।
तया लिप्ते नृकण्ठे तु दृश्यतेच्छिन्नशीर्षवत् ॥
अर्धेन्दुग्रहणं भाति तया लिप्ते च दर्पणे ।
भाण्डपाकस्थलाद्भस्म कुम्भकारस्थलाद्धरेत् ॥
तद्भस्मघुटिकायुक्तमुष्टिबन्धं भुवि क्षिपेत् ।
समुद्रो दृश्यते तत्र महाद्भुतमिदं परम् ॥

Colophon:

इति सिद्धनागार्जुनकल्पे कौतुकचिन्तामणौ अष्टादशः पटलः ॥

इति सकलकौतुकावहमणिः सकललोकानन्दकरमणिः सकलकामफलप्रदमणिः कौतुकचिन्तामणिः समाप्तः ॥

R. No. **2801.**

Paper. 10⅜ × 9⅜ inches. Foll. 68. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Nārāyaṇa Numbūdirippāḍ of Nareri, Tritala, Malabar district.

सिद्धान्तकौमुदीव्याख्या—मितवादिनी.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ: MITAVĀDINĪ.

Foll. 67 and 68 are left blank.

A commentary on the Siddhāntakaumudī of Bhaṭṭōjidīkṣita, described under No. 1354 of the D.C.S. MSS., Vol. III. The author does not give his name, but, in the beginning, he offers worship to God Pallikoṇḍa enshrined at Nellore.

Breaks off in the Sabdādhikāra.

Beginning:

नल्लूरुस्वामिनं नत्वा पल्लिकोण्डाख्यमच्युतम् ।
सिद्धान्तकौमुदीव्याख्यां करोमि मितवादिनीम् ॥
सिद्धान्तकौमुदीव्याख्या प्रसिद्धास्ति मनोरमा ।
तत्र यद्व्याकृतं मूलं तन्नात्र प्रतिपाद्यते ॥

विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नन्नेव चिकीर्षितं प्रतिजानीते—मुनित्रयमित्यादिना । त्रयोऽवयवा यस्य तत्त्रयम् । संख्याया अवयवे तयबित्यवयववृत्तेः संख्यावाचिनः त्रिशब्दादवयविन्यर्थे तयप् । अवयवीत्यत्र समुदाय एव द्वित्रिभ्यामिति तयपोऽयच् । मन्तारो वेदशास्त्रार्थतत्त्वावगन्तारो मुनयः ।

End:

कृतं तु ज्ञापयति । सिजन्तस्यानिदितामिति । उपधालोपो न भवतीति । तेन अमंस्तेत्यादिसिद्धिरिति सुष्ठूक्तम् । सिच इकार उच्चारणार्थ इति ॥

R. No. **2802.**

Paper. 10¾ × 9⅜ inches. Foll. 36. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of Mānavikrama Anujan Kuññuṇṇi Rāja of Paḍiñārekōvilagam, third Raja, Calicut.

चम्पूरामायणव्याख्या.

CAMPŪRĀMĀYAṆAVYĀKHYĀ.

A commentary by King Mānavēda of Calicut on Bhōja's Campurāmāyaṇa which work has been described under No. 12256 of the D.C.S. MSS., Vol. XXI.

Breaks off in the Bālakāṇḍa.

Beginning:

इन्दिरानयनानन्दमिन्दीव(र)दलद्युतिम् ।
वन्दारुजनमन्दारं वन्दे कृष्णमहर्निशम् ॥

मानापनोदनोद्युक्तचन्द्रचूडेन चूडितम् ।
भवानीचरणाम्भोजमहर्निशमुपास्महे ॥

* * * *

क्ष्माभृद्वारिनिधीश्वरार्चितकुलोद्भूतः कणादाक्षपा-
त्पाणिन्यादिगवीविवेकनिपुणो रुद्रस्तथा शेखरः ।
मित्रे यस्य स मानवेदनृपतिर्भोजोदितं साम्प्रतं
चम्पुं व्याकुरुते यथामति बुधाः सन्त्वत्र निर्मत्सराः ॥
सन्देशार्थविलासिनी सहभवा बाला विलासिन्यसौ
सच्छा(शा)स्त्रार्थान्वयवृत्तिमण्डनगुणं श्रीभोजराणन्दनम् ।
चम्पुं प्राप वनं कथंचन चिरान्मन्दाक्षमन्दं यतो
नानार्थानधिगम्य सन्तु सततं सन्तोषवन्तो बुधाः ॥

ईर्ष्याकषायितधियामथवा बुधानां किं स्यादनादरभराद्विफला कृतिर्मे ।
अन्धेषु वा नयनरोगिषु सत्सु दीपो नो ज्वल्यते किमिति नोपकरोति लोके ॥
रसं हि लावण्यमपास्य वारिदो गुणीकृतं वारि करोति चाब्धिजम् ।
गुणीकृतौ यत्कृतिनः स्वभावतः सन्तः कथं मत्कृतिला विला (?) भवेत् ॥

अथ तत्र भवान्कविकुलचूडामणिर्भोजराजः ।

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे ॥

इत्यालङ्कारिकवचनप्रामाण्यात्काव्यस्यानेकश्रेयःसाधनतां काव्यालापांश्च वर्जयेदिति निषेधशास्त्रस्यासत्काव्यविषयतां च पश्यंश्चम्पूरामायणाख्यं महाकाव्यं चिकीर्षुश्चिकीर्षितार्थाविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणफलसाधनत्वात्—

आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम् ।

इत्याद्याशीर्वादाद्यन्यतमस्यापि प्रबन्धमुखलक्षणत्वादाशीरादित्रयं श्लोकत्रयेण यथाक्रमं तावत्प्रयुङ्क्ते—लक्ष्मीमित्यादिना । इतरान्नापेक्षते कस्मैचिदर्थायेति इतरानपेक्षं स्वतन्त्रमित्यर्थः । एतेनाभीष्टदानसामर्थ्यं ध्वन्यते ।

End:

तदनुजन्मा रामानुजो लक्ष्मणोऽपि मैथिलेन्द्रस्य जनकस्य चित्ते निहिता बहवो गुणा विनयादयो यस्य तथा सन् । कौशिकेनेति शेषः । ऊर्मिलां तदाख्यां कन्यामप्यग्रहीदित्यनुषङ्गः ॥

R. No. **2803.**

Paper. 10¾ × 9¾ inches. Foll. 28. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ Kūḍalūr-mana, Nareri, Malabar district.

रासविलासकाव्यम्.

RĀSAVILĀSAKĀVYAM.

Foll. 26*b*—27 and 28 are left blank.

A poem describing Kṛṣṇa's amorous sports called Rāsakrīḍā with the Gōpīs: by Nārāyaṇa.

Complete in three Sargas.

Beginning:

मुरजिदथ कदाचित्तारहारोज्ज्वलायां
शरदि विशदमल्लीफुल्लजालोल्लसन्त्याम् ।
व्रजकुलवनितानां पूरयन्भूरि पुण्यं
व्यथित पदमटव्यां मोदशाली निशायाम् ॥
उदयशिखरिशृङ्गं शीतभानुस्तदानीं
विहृतिकुतुकभाजं नन्दयन्नन्दजातम् ।
अलमकृत तदीयप्रेमभूमाभिलाषी
विसृमरकिरणौघै रञ्जिताशेषदेशः ॥

* * * *

Colophon:

इति नारायणविरचिते रासविलासे प्रथमः सर्गः ॥

End:

यद्बोधे विद्यमाने भवति जगदिदं विद्यमानेन किञ्चि-
द्यच्छक्तिर्विश्वसृष्टिस्थितिविलयकरी विद्यतेऽनन्यरूपा ।

सान्द्रानन्दस्वरूपः स च किल भगवान्मायया गोपरूपी
गोपीरात्मैककामाश्चिरमिति रमयन्भृत्यवश्यो हि रेमे ॥
यः सृष्ट्वा निजमायया जगदिदं पश्चात्प्रविश्य स्वयं
जाग्रत्स्वप्नसुषुप्तिषु प्रकटयन्नेतत्परिक्रीडते ।
सो यं योगविशोधिते हृदि परं ध्येयस्वरूपः सता-
मित्थं गोपवधूभिरद्भुतवपुः स्वैरं समक्रीडत ॥

Colophon :

इति नारायणविरचिते रासविलासे तृतीयः सर्गः ॥

R. No. **2804.**

Paper. 11 × 9½ inches. Foll. 128. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of the Raja of Chirakkal, Malabar district.

Fol. 128 is left blank.

अष्टाङ्गहृदयव्याख्या.

ASṬĀṄGAHṚDAYAVYĀKHYĀ.

A commentary on the Aṣṭāṅgahṛdaya of Vāgbhaṭa which work has been described under No. 13072 of the D.C.S. MSS., Vol. XXIII. According to the commentator, Vāgbhaṭa was a disciple of Nārāyaṇayōgīndra.

Breaks off in the 15th Adhyāya of the Sūtrasthāna.

Beginning :

इह हि तन्त्रकृदादावध्येत्रध्यापयितृरूपशिष्याचार्यपरम्पराजननसफलत्वदायिपुरुषार्थसर्वस्वलाभपरिपन्थिभूतरागादिरोगरिपुगणोन्मूलनोपायमुपदिशन् सदसत्प्रभृतिविभिन्नमवाङ्मनसगोचरानुभावमहन्तातिक्रान्तसत्तामात्रसत्तासारमनवरतस्फुरणानुरूपचैतन्यदानानुगृहीतविविधजन्तूत्करं प्रकृतिपुरुषसमरसीभावविगलदमृतैकघनं(बहिर)न्तश्चैवाप्यतिरिक्तस्त्रीपुम्भावमात्मानमेव प्रस्तौति --रागादीत्यनेनेष्टदेवतानमस्कारश्लोकेन । अस्मिन्नुपजातिवृत्ते पदान्येकादश अन्त्याष्टमनवमदशमैस्साकाङ्क्षान्वयः । सप्तमप्रथमचतुर्थषष्ठैः पुराणान्वयः । शिष्टानि त्रीणि पुराणान्वयगतकर्मणो विशेषणानि । अन्वयक्रमेण पदार्थो विव्रियते । तस्मै तथाभूताय अपूर्ववैद्याय नमः अस्तु तमुद्दिश्य मम प्रह्वीभावः अस्तु साफल्यं प्राप्नोतु ।

* * * *

बुद्धमुनी(न्द्र)नामाभिधेयश्रीनारायणयोगीन्द्रप्रसादवितीर्णदिव्यदृष्टिसा-क्षात्कृतत्रिभुवनवृत्तान्तमतिमणिमुकुरस्य वाहटस्य तस्मिन् भक्तिरधिकेति स्वशास्त्रैः परशास्त्रैः कर्णाकर्णिकयोपदेशाच्च जानीमः ।

* * * *

अयञ्चास्याभिप्रायः—अत्र शास्त्रेऽस्माभिरभिनिवेशेनोपदिश्यमानयोगपाकसम्यग्योगौषधप्रयोगप्रतिषिद्धरोगप्रसाराश्शास्त्राध्येतारस्तदनुगृह्यमाणास्सर्वे लोकाश्च तद्दत्तैरसुभिस्तद्दत्तैर्वसुभिश्च सुखसम्भृतप्रमोदमानपुत्रकलत्रतया सकलमपि जगत्सुखसुहितं सदैव वर्तताम् ।

इति सर्वमङ्गलम् ।

नमः कुमुद्वतीबोधशरच्छीतलरोचिषे ।
समस्तकामसन्तानतरवे गुरवे नमः ॥
ब्रह्मदक्षाश्विमघवदात्रेयादीन् नतोऽस्म्यहम् ।
आयुर्वेदविदो वैद्या लोकत्रयहितैषिणः ॥

प्रारिप्सुस्सदाचारमाचरन् आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमिति प्रबन्धमुखस्थितिलक्षणं चानुविदधानश्शास्त्रस्याविघ्नेन परिसमाप्तिप्रचयगमनार्थं शिष्यशिवाप्त्यर्थं चेष्टदेवतानमस्कारं करोति—रागादीत्यादिना । तस्मै अपूर्ववैद्याय नमः अस्त्वित्यन्वयः । तस्मै इति पदेन सर्वनाम प्रसिद्धार्थमिति प्रमाणतः प्रसिद्धस्यैवापूर्ववैद्यस्य नमस्कार्यता । तस्मात्प्रमाणप्रसिद्धार्थेन परेण भवितव्यम् ।

* * * *

Colophon:

इत्यष्टाङ्गहृदयव्याख्यायां प्रथमोऽध्यायः ॥

End:

अत्र दोषगतिविशेषेण बृंहणलङ्घने एव ग्राह्यादिविशेषे प्राप्तवत इति तात्पर्यम् ॥

Colophon:

इत्यष्टाङ्गहृदयव्याख्यायां चतुर्दशाध्यायः समाप्तः ॥

अथ पञ्चदशोऽध्यायः । शोधनादिगणसङ्ग्रहणीयम् ।

प्रागुपन्यस्तशुद्ध्यादिसाधनद्रव्यसिद्धये ।
अध्याये वक्ष्यते साधु शोधनादिगणात्मकः ॥

शोधनादिगणात्मकः शोधनादिगणसङ्ग्रहमिति शोधनश्शोधनरूपो द्रव्यगण आदिर्येषां ते । एवमादिशब्देन वातहरगणादिपरिग्रहः । तेषां शोधनादिगणानाम् ॥

* * * *

मुस्तेति । मुस्ता - മുത്തങ്ങ, वचा - വയമ്പു, अग्नि - കൊടിവേലി, द्विनिशा - മഞ്ഞളും മരമഞ്ഞളും, द्वितिक्त - കടുകരോഹിണിയും അതിവിടയവും, भल्लातक - ചേര, पाठा - പാടക്കിഴങ്ങു്, त्रिफला - വിക്ഷാള്യം.

R. No. 2805.

Paper. $10\frac{7}{8} \times 9\frac{1}{2}$ inches. Foll. 30. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of Śrīrāmatīrtham Library, Śrīrāmatīrtham, Vizagapatam district.

Fol. 30 is left blank.

नीलाचलनायकचरितम्.

NĪLĀCALANĀYAKACARITAM.

A poem narrating the story of the Rāmāyaṇa in seven Sargas; and the last two stanzas of the seventh Sarga state that God Nārāyaṇa, after having thus incarnated as Rāma, settled in Nīlācala for the sake of His devotees there. By Vādhūla Vēṅkaṭadāsa.

Contains the Sargas five to seven complete.

Beginning :

अथ चारणसेविते पदं पथि तस्याः कनकाद्रिसन्निभः ।
हनुमानतिवीर्यवान् बली भृशमन्वेष्टुमियेष शत्रुहा ॥
गिरिमात्मबलाद्धरीश्वरः पृथिवीतुल्यमतो विवेश सः ।
लघु विष्णुपदं यदृच्छया हृदि कृत्वा हरिमम्बुजेक्षणम् ॥
हनुमान्पथि सिद्धसेविते परितो गन्तुमलं प्रचक्रमे ।

* * * *

Colophon :

इति श्रीभगवद्भागवतदासतद्दासदासचरमावधिदासवाधूलवेङ्कटदासहृदिस्थश्रीमन्नारायणानुकम्पाविरचिते श्रीनीलाचलनायकचरिते पञ्चमस्सर्गः ॥

End :

एवं विधायाखिललोकरक्षां विष्णोः पदात्पङ्कजदीर्घनेत्रः ।
आगत्य नारायण देवदेव(जातोऽत्र नीलाच)लनायकोऽसि ॥

नीलाचले भक्तजनैरनेकैर्दासस्य सेवार्थमरं हरे त्वम् ।
स्थिता रथाङ्गासिगदाब्जपाणिः . . . रमया भुवासि ॥

Colophon:

इति श्रीभगवद्भागवताचार्यदासतद्दासदासचरमावधिदासवाधूलवेङ्कट-दासहृदयस्थश्रीमन्नारायणविरचिते श्रीनीलाचलनायकचरिते सप्तमस्सर्गः ॥

R. No. 2806.

Paper. 10⅝ × 9¾ inches. Foll. 48. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918–19 from a MS. of Mānavikrama Anujan Kuññuṇṇi Rāja, Paḍiññārekōvilagam, Calicut.

बृहज्जातकम्, सव्याख्यानम्.

BṚHAJJĀTAKAM WITH COMMENTARY.

Foll. 47*b* and 48 are left blank.

Same text as that described under No. 13832 of the D.C.S. MSS., Vol. XXIV. It is followed by a commentary called Naukā. The name of the commentator is not known.

Breaks off in the 17th stanza of the fourth Adhyāya.

Beginning:

जयति भगवान्गजास्यो यत्कर्णव्यजनमारुता भजताम् ।
यान्तो व्यसनानि निहत्यायान्तश्चार्पयन्त्यभीष्टानि ॥
सत्यज्ञानपरंब्रह्मज्योतिरानन्दरूपिणीम् ।
नौमि सर्वोत्तरोदात्तप्रश्नमालां सरस्वतीम् ॥
सत्यज्ञानप्रदायेष्टदेशकालप्रबोधिने ।
नमः श्रीगुरवे साक्षात्परमेश्वरमूर्तये ॥

* * * *

श्रीसूर्यादीन्सुसंवेद्य निग्रहानुग्रहान्ग्रहान् ।
जगत्सृष्टिस्थितिलयज्ञानहेतूनुपास्महे ॥
श्रीमद्वराहमिहिरहोरातात्पर्यसागरे ।
सदर्थरत्नसंसिद्ध्यै टीका नौका विरच्यते ॥

तत्र लोकानुग्रहार्थमतीतानागतकालविषयफलविशेषज्ञानोपायभूतहोराशास्त्रं चिकीर्षुः श्रीवराहमिहिराचार्यः[रच्य]प्रथमम् आशीर्नमस्क्रिया वस्तुनिर्देशो

वापि तन्मुखमित्युक्तं शिष्टाचारमनुसरन्नारिप्सितस्याविघ्नपरिसमाप्तये समुचितेष्टदेवतामाशीर्मुखेन परामृशति—

मूर्तित्वे परिकल्पितः(. . .)त्रैलोक्यदीपो रविः ॥

अत्र सप्तविंशतिः पदानि । स रविः नः वाचं दधातु इति क्रियाकारकसंबन्धः । यच्छब्दयुक्तवाक्यसप्तकोक्तगुणविशिष्टः रविः । रु शब्दे इत्यस्माद्धातोर्निष्पत्त्या शब्दब्रह्मस्वरूपस्त्रयीमयो भगवानादित्यो रविशब्देनोच्यते ॥

* * * *

Colophon:

इति होराविवरणे प्रथमोऽध्यायः ॥

End:

अंशकृतः प्रभेद इति पूर्वमुक्ते पुनरपि अंशकेन निर्देशोक्त्या अंशकैरेव विशेषा वक्तव्या इति द्योत्यते ॥

Colophon:

इति तृतीयोऽध्यायः ॥

अथ होरेन्दुसूरिरवीणां प्राबल्यविषयं मानुषं जन्म विवक्षुः गर्भाधानकालमुपदिशति—

कुजेन्दुहेतु प्रतिमासमार्तवं गते तु पीडर्क्षमनुष्णदीधितौ ।
अतोऽन्यथास्ते शुभपुंग्रहेक्षिते नरेण संयोगमुपैतु कामिनी ॥

प्रतिमासं कुजेन्दुहेतु आर्तवमनुष्णदीधितौ पीडर्क्षे गते तु गर्भक्षममार्तवम् ।

* * * *

भसन्धिशब्देन कर्कटवृश्चिकमीनान्त्यद्रेक्काणा गृह्यन्ते । अवागिति वक्तुमशक्य इत्यर्थः । शुभेक्षिते चेच्चिराद्गिरं कुरुते । चन्द्रः शुभेन दृष्टश्चेच्चिरात्स्खलित्वा गिरं कुरुते

R. No. **2807.**

Paper. 11 × 9¾ inches. **Foll.** 68. **Lines,** 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Paravastu Vēṅkaṭaraṅganāthācārya of Vizagapatam.

मदनमञ्जरीमहोत्सवम्.

MADANAMAÑJARĪMAHŌTSAVAM.

Fol. 68*b* is left blank.

A drama describing the marriage of God Śiva with Madanamañjarī, who is described as no other than Pārvatī, born as the daughter of Dharmadhvaja of Puṣkarapuram. Prior to marriage, Śiva is said to have rescued His beloved from the hands of Candravarman, King of Pāṭalipura, who took her away from her father, and also set free His devotee Parākrama, King of Pāñcālapura, who was imprisoned by Candravarman. The author is Vilinātha, son of Kanakasabhāpati and grandson of Yajñanārāyaṇasudhī of Kauśikagōtra. He is stated to be a descendant of Ṣaḍvēdividyāvallabha of Viṣṇupura village in the Cōla country who was presented by Acyutarāya with the village called Maṇibhūṣaṇa for his proficiency in reciting the three Vēdas. The drama was written for being enacted on the occasion of the Caitra festival of God Tējinīvanēśvara in the Cōla country.

Breaks off in the fifth Act.

Beginning:

कल्याणं(स) महेश्वरो दिशतु यः कैलासमुल्लासतो
धूयन्तं दशकन्धरं दृढतरं न्यस्ताङ्घ्रिपद्मोऽग्रतः ।
आगन्तुं बलिमन्दिरस्य र . . न्नायासलेशं विना
भीत्याश्लिष्टवतीमतीव गिरिजां प्रीतामतानीत्क्षणात् ॥

* * * *

नान्द्यन्ते सूत्रधारः—(समन्तादवलोक्य सानन्दातिशयम्) अहो मकुटावतंसमहोत्सवभवधवलीकृतचोलावनीमण्डलस्य

* * * *

भगवतस्तेजिनीवनेश्वरस्य प्रवृत्त एव चैत्रयात्रामहोत्सवः—यदिदानीम् ।

* * * *

(सू)—आर्ये कथमस्मिन् कार्ये वहसि कातर्यम्? यतो मदनमञ्जरीमहोत्सवं नाम विद्यते मम वशे शृङ्गारविभवशेवधि सरसपदसन्दर्भमणिदामहाटकपेटकं नाम नाटकम् ।

* * * *

अस्ति किल चोलेषु प्रशस्तिमाननवरतमास्तिकविविधविद्वज्जनवेदशास्त्रघोषविभ्राजिष्णुर्विष्णुपुरं नाम महानग्रहारः । तत्र कश्चिद्द्विपश्चिदखिलकलाकलापदेशिकः कौशिकवंशमौक्तिकमणिः सूक्तिनिकरपारदृश्वभिः स्वशिष्यैरेव दिगन्तरेषु निरन्तरं विस्तार्यमाणयशोवितानः प्राथमिकस्यैव साक्षाद्विवर्तः पुरुषार्थस्य षड्वेदिविद्यावल्लभो नाम ।

नटी—अत्थि सुणीअदि ।

परं तु . . . . पुरा खलु निजास्थानीमास्थितस्य ऋग्यजुस्साम सुबहुवारमारोहावरोहक्रमपाठधाटीं परीक्ष्य कैश्चिद्विपश्चिद्वतंसैस्साकमच्युतरायचूडामणिर्मणिभूषणग्रामपारितोषिकप्रदानपुरस्सरं प्रयासतौल्येन पुनरीदृशीमाख्यामाख्यातवान् ।

नटी—(सविस्मयानन्दम्) तदोऽपि तदो ततस्ततः ।

सू—अद्य हि विद्यते तदीयान्वयस्य तादृशस्य यज्ञनारायणसुधियः पौत्रः कनकसभापतिसुमतेरात्मसम्भवः शाम्भवानुकम्पासम्पादितविश्रुतविनयादिगुणगणसनाथो विलिनाथो नाम कविः ।

प्रागल्भ्यं यस्य शास्त्रे प्रभुयुवतिसुहृत्संमितायां च वाचि
व्याचिख्यासावलेपं प्रति बुधसदसां विच्छिनत्त्येव सद्यः ।
धत्ते सौहार्दभाजामपि च सुमनसां यः पुनश्शिष्यभावं
पश्यालीकाङ्घ्रिपद्मं भजति च नियतं यन्मनश्चञ्चरीकः ॥

तेन विबुधशिखामणिना विरचितस्यामुष्य नाटकस्याभिनयेन विस्मयनीयविविधरसभाजनं सभाजनमिमं सभाजयामः ।

* * * *

यथा पाञ्चालपुराधीश्वरः पराक्रमो नाम महीपतिर्मामेव सदा हृदये भावयन्मन्दरे तपस्यवर्तत । तदन्तरे रन्ध्रान्वेषी चन्द्रध(व)र्मा नाम दुर्मानदूषितो नरपतिः पाटल(पुर)पुरस्कृतवसतिः

* * * *

प्रज्ञावतीमित्यन्वर्थनामधेयां परिव्राजिकां च नीत्वा स्वनिलयं दास्यकर्मणि न्ययुङ्क्त । ततःप्रभृति सशल्यमिवासीन्ममेदमन्तःकरणम् ।

* * * *

पुष्करपुरवासिनो धर्मध्वजस्य राजर्षेस्तपश्चर्यया सन्तुष्य तस्य दुहितृभावमासादितवत्या हैमवत्या वृत्तान्तं मम विचार्य प्रतिनिवर्तमानस्य तत् कथमनुपस्थानं गाणाधिपत्ये प्रतिष्ठितस्य मम युज्यते निर्गमनसमये ।

End :

रा—(सामोदम्) प्रकृतकार्योपयुक्तमिदमङ्गुलीयकविधिनैव प्रसादीकृतमिति मे वितर्कः । तत्त्वरितमुत्तरकार्यनिर्वाहाय साधयावः—इति निष्क्रान्तास्सर्वे ॥

Colophon :

चतुर्थोऽङ्कः ॥

ततः प्रविशाति कलकण्ठः ।

कलकण्ठः—(दीर्घं निश्वस्य) कदावा पुनरमुष्य विरामो भविष्यति ।

* * * *

आकलितपादाग्रस्पर्शासहनतया तरणिताराधिनाथयोस्सरणिमुपरोद्धुमिव समेधितोत्सेधैरन्यैरपि विशालचन्द्रशालासशैलादिभिरवभासमाना भवतस्सौभाग्यलक्ष्मीरियमेव मे सम्यगावेदयति धर्मध्वजमहाराजस्य निरतिशयभागधेयम् । स—न किमे.

R. No. **2808.**

Paper. 11 × 9¾ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of the Raja of Chirakkal, Malabar district.

बालभारतव्याख्या, मनोहरा.

BĀLABHĀRATAVYĀKHYĀ : MANOHARĀ.

Fol. 20*b* is left blank.

Same work as that described under Nos. **11611** and **11612** of the D.C.S. MSS., Vol. **XX.**

Contains the Sargas six complete and seven incomplete.

R. No. **2809.**

Paper. 11 × 9¾ inches. Foll. 61. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ of Nareri-mana, Tritala, Malabar district.

Fol. 61*b* is left blank.

भारतकथा.

BHĀRATAKATHĀ.

Apparently gives the story of the Mahābhārata in verse intermixed with connecting prose passages. The portion contained in this MS. begins with the boasting of Jarāsandha and closes with the marriage of Abhimanyu, son of Arjuna.

Wants the beginning and the end.

Beginning:

. . . . रागमाना-
माधूसरं मुकुटमाल्यरजोभिरासीत् ॥
वारां दशाष्ट च जितेन युता स्वभर्त्रा
त्रस्ता यतः क्षितिमिमामपहाय सर्वे ।
सिन्धौ स्थितिं विदधते यदपस्तपक्षा
मेनासुतेन सह वज्रभियेव शैलाः ॥
यस्सम्प्रकुप्यति समस्तविपक्षपाली-
विश्लेषकेलिविरलीकृतविग्रहाय ।
स्वस्मै प्रतापदहनाय भुजाग्रजाग्रत्-
कण्डूनिकारकरणान्यनवेक्षमाणः ॥
यष्टुं पिनाकिनमनेकसहस्रसङ्ख्याः
येनाहृता समिति नष्टमदा यथेभाः ।
आराद्गिरिव्रजपुरीं मुखरामिदानीं
कुर्वन्ति शृङ्खलखणात्कृतिभिर्नरेन्द्राः ॥
स जरातनयो मानी भुजगा(ग्र)सितभूतलः ।
मन्मुखेन ब्रवीति त्वां धर्मसूनो निशम्यताम् ॥
रे रे पार्थ समाहितश्शृणु जरासन्धस्य मे शासनं
राजन्यायुतसत्पशुं मखवरं कर्तास्मि शम्भोर्मुदे ।
भूपानामयुतद्वयादपि पराण्यष्टौ शतान्याहिता-
न्यारादद्रिगुहान्तरे युधि मया बद्धानि रुद्धानि च ॥

* * * *

तदनन्तरमुत्सन्नसन्देहः सरित्सूनुर्मुकुन्दचरणारविन्दसन्ततानुध्यानविनिर्धूतमोहान्धकारसमिद्धानपरानुसन्धानसञ्जातनिरतिशयानन्दनिर्वृतो विश्वैककारणं

* * * *

इन्द्रावरजं प्रदर्शयन् सहदेवमेवमभाषत ।

End:

धौम्येन तस्य मिथुनस्य वनागमेन निर्वर्तिते परिणये विधिवत्प्रहृष्टाः ।
साकं मुकुन्दमुखबन्धुजनेन पार्था मात्स्यस्य सद्मनि सुखं न्यवसन् प्रतीताः ॥

* * * *

भूभारायितभूमिभृत्कुलविषक्षोणीरुहान्सर्वतो
दूरात्कौरवयन्त्रमध्यमधिरोप्यैकत्र संमेलयन् ।
स्वैरं तत्र धनञ्जयं प्रजविनं सञ्चारयिष्यन् स्वयं
सारथ्यं कलयन् . . . पीताम्बरः पातु वः ॥
स्तुतस्सदसि भीष्मेण भर्त्सितो दमघोषिणा ।
युधिष्ठिरस्य यजने पातु वो यदुपुङ्गवः ॥

R. No. **2810.**

Paper. 11 × 9¾ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Nārāyaṇa Nambūdiri, Kūḍalūr-mana, Tritala, Malabar district.

कृष्णचरितम्.

KṚṢṆACARITAM.

A poem narrating the story of Lord Kṛṣṇa from the time of His birth : by Mānavēda, sister's son of Vikrama. In the beginning the author extols God Viṣṇu worshipped in Guruvāyur (Malabar district).

Breaks off in the second Sarga.

Beginning :

जगति सुकृतिलोकैर्नन्दितानन्दिताशा
कलरणित(सु)वंशा भासमानासमाना ।
पशुपयुवतिभोग्या देवतादेवता सा
सजलजलदपालीमेचका मे चकास्तु ॥
प्रेम्णा ल . . . मानस्सदयमिह . . नन्दसञ्ज्ञेन पित्रा
रामेण ज्यायसा वा विवशमतियशोदास्यया वा जनन्या ।
आदीव्यन् दिव्यगव्या विबुधपरिबृढोऽरिष्टजाताघमोक्षं
पुष्णन् कृष्णो गुरुर्मे परमतमपदोद्भासको बोभवीतु ॥
सौवर्णाङ्कितभूषणोज्ज्वलवपुस्संवीतपीताम्बरः
नीलाम्भोदनिभो भुजैर्धृतगदाशङ्खारिपङ्केरुहैः ।
भ्राजिष्णुर्गुरुवायुमन्दिरविरोचिष्णुस्स विष्णुस्स्वयं
जिष्णुर्विश्वजनोपताप[क]हरणे काव्यं मम ख्यापयते ॥

विक्रान्त्याक्रान्तविश्वद्विषत इह गुरोर्विक्रमाख्यस्य राज्ञः
स्वस्त्रीयो मानवेदो मुरमथनकथावर्णनालोभनुन्नः ।
विष्णोर्वृष्णीश्वरस्य प्रथयति पदरूपेण किंचित्कथां तां
कान्तां विश्वव्यथान्तामिह विबुधजनास्सन्तु सन्तोषवन्तः ॥
लक्ष्मीनाथ पुरा सुरासुरमृधे ये कालनेम्यादयः
त्वत्पिष्टा अपि शिष्ट . . बलतो दैत्या न मुक्तिं गताः ।
तेषां भूरिभरेण भूतलजुषां सा भूतधात्री व्यथा-
पात्री वेधसमेत्य वेगत इति प्रोवाच देवान्तम् ॥
पा(तो)डिरागेण गीयते(रू)पकतालेन वाद्यते.
त्रपया लपितुमनीशामपि मां व्यसनभरो हि कथापयतीमाम् ।
वनितानामिह वचनं परुषं विषहेथा मम रुगधिकपरुषम् ॥
पल्लवम्—
नाथ कृपालय परिपालय माम् ।

End:

मुरहर खलनृपकृतभूभारं व्यपहर सहसोदारम् ।
माधव मान्द्यं ननु तनुयानो परिपालय तरसा नो ॥ यामः ।

Colophon:

इति मानवेदकृते कृष्णचरिते प्रथमस्सर्गः ॥
नुत्वा नत्वा गते त्वा इति विबुधगणे प्रावृताशा पयोदैः
प्रावृट् प्रादुर्बभूव प्रकटरसमुपानीततत्तत्पदार्था ।
अत्यासन्नप्रसूतिं सपदि परिचरन्तीव हन्तासहाया-
मेनामत्यन्तदीनामिह पुनरनुकूले विधौ को न बन्धुः ॥

* * * *

अवनिसुरावलिरयि विबुधगणादपि नियतत्रिजगतिमहितगुणा ।
यदयमगस्त्यो रुषमृषिरितवान् नहुषं सुरपतिमपि पातितवान् ॥

R. No. 2811.

Paper. 11 × 9¾ inches Foll. 108. Lines, 20 in a page. Telugu. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Sikha Pullayagāru of Viśvēśvara Agrahāram, Amalapuram taluk.

परिमलसङ्ग्रहः.

PARIMALASAṄGRAHAḤ.

A summary of the Parimala of Appayadīkṣita which is a commentary on the Vēdāntakalpataru of Amalānanda and which is described under No. 4678 of the D.C.S. MSS., Vol. IX: by Tārakabrahmāśrama, pupil of Rāmacandrāśrama.

Breaks off in the third Pāda of the first Adhyāya.

Beginning:

श्रीरामं जानकीनाथं तारकब्रह्मरूपिणम् ।
अखण्डानन्दचिद्रूपं जगद्योनिं नमाम्यहम् ॥
श्रीमद्व्यासं भाष्यकृतं शङ्कराचार्यमीश्वरम् ।
रामचन्द्राश्रमगुरून् मूढो नित्यं नमाम्यहम् ॥
प्रीत्यै श्रीजानकीजानेः तारकब्रह्मपूर्वकः ।
कुर्वे परिमलस्याहं सङ्ग्रहं यतिराश्रमः ॥

यदिति प्रत्यग्ब्रह्मविशेषणेन शास्त्रविषयं प्रदर्श्य तत्र सर्वेषां वेदान्तानां समन्वयः प्रथमाध्यायार्थः श्रुतिशतेत्यादिविशेषणेन दर्शितः । शतशब्द आनन्त्यहा(वाचकः) । विश्वं शतं सहस्रं च सर्वमानन्त्यवाचकमिति महाभारतवचनात् ब्राह्मणशतं भुज्यतामित्यत्र भोजनस्येव शिरसां सङ्कोचोपसर्जनसङ्कोचयान्वयः सकलप्रपञ्चाश्रयस्य ब्रह्मणः परिमितकर्तृत्वाद्याश्रयस्य जीवस्य चाभेदमविरोधेनोपपादयितुमुभयत्र विरुद्धधर्माणां मिथ्यात्वं यदज्ञातमित्यादिविशेषणेन दर्शितम् ।

* * * *

प्राणादिप्रकारेणात्मानं पञ्चधा प्रविभज्येत्येवं विभागाक्रियाविशेषणमित्यर्थः ॥

श्रीरामं जानकीनाथं तारकब्रह्मरूपिणम् ।
सत्यानन्दचिदाकारं गुरुं नित्यं नमाम्यहम् ॥
त्वद्वाक्यं सकृदेवेति सत्यमस्तु महाप्रभो ।
इत्येतदनुकूलं स्याद्रामो द्विर्नाभिभाषते ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्रामचन्द्राश्रमपूज्यपादशिष्यतारकब्रह्माश्रमिविरचिते वेदान्तकल्पतरुपरिमलसङ्ग्रहे प्रथमस्याध्यायस्य प्रथमः पादः ॥

End:

ततश्चाध्यात्मिकस्य द्युमूर्धतेजोऽन्तरस्य सम्भवेऽप्याधिदैविकस्य तत्र न सम्भवोऽस्ति; भूतदेवतयोः कथंचित् द्युलोकादिव्याप्तिसम्भवेऽपि न तन्मूर्धत्वादिव्यपदेशसम्भवः ॥

Colophon:

इति श्रीपरिमलसङ्ग्रहे प्रथमस्याध्यायस्य द्वितीयः पादः ॥

निर्विशेषेति । पूर्वस्मिन्पादे मनोमयात्मपादेऽक्षिपुरुषान्तर्यामिवैश्वानर इत्येषां सविशेषत्वेऽपि यथाक्षरं निर्विशेषमेवमस्मिन् पादे द्युभ्वाद्यायतनभूताक्षरेक्षतिकर्मादीनां निर्विशेषत्वेऽपि दहरस्य सविशेष इति प्रायिकत्वमात्रेऽपि विशेषणं द्रष्टव्यम् ।

* * * *

एवकारदर्शनादिति । एतयैव निविदीत्येत्येवकारेण यस्या निविदिदेवतासङ्ख्या पृष्टा; तयैव निविदोत्तरमाहेत्यर्थलाभादित्यर्थः । द्वितीयामिति । देवतानामनन्त्वेऽपि नमस्कार्यत्व.

R. No. 2812.

Paper. 11 × 9¼ inches. Foll. 12. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Bṛndāvanacandra Pāṇigrāhigāru, Parlakimedi.

पञ्चसायकम्.

PAÑCASĀYAKAM.

A treatise bearing on Kāmaśāstra: by Kaviśēkhara alias Jyōtirīśa. The subjects treated herein are given below. In the third stanza here, the author gives the names of other writers on the subject and their works consulted by him.

Contains the following Sāyakas:—

१. चित्रिण्यादिजातिसमुद्देशः.
२. सुरतभेदादिसमुद्देशः.
३. गन्धर्वविधानादिसमुद्देशः.
४. चामुण्डादिमन्त्रसमुद्देशः.
५. रत्युपयोगिभेषजसमुद्देशः.

Breaks off in the fifth Sāyaka.

Beginning:

रतिपरिमलबन्धुः कामिनीकेलिसिन्धुः
विहितभुवनमोदः सेव्यमानप्रमोदः ।

जयतु मकरकेतुर्मोहनस्यैकहेतुः
विरचतु(चित)बहुवेशः कामिनीकामवेशः ॥
आर्तिप्रत्ययसन्धितापहरण(:) कृपैकदीक्षागुरुः
श्रीकण्ठार्चनतत्परो भुवि चतुष्षष्ट्याः कलानां निधिः ।
सङ्गीतागमसत्प्रमेयरचनाचातुर्यचूडामणिः
प्रख्यातः कविशेखरोऽर्चितपदः श्रीयो(ज्यो)तिरीशः कृती ॥
दृष्ट्वा मन्मथतन्त्रमीश्वरकृतं वात्स्यायनीयं मतं
शोणीपुत्रकमूलदेवभणितं बाभ्रव्यकाव्यामृतम् ।
श्रीनन्दीश्वरचिन्तिदेवभणितं क्षेमं च विद्यागमम्
एते कामिषु पञ्चसायकमिति प्रीतिप्रदं प्राणिनाम् ॥
स्वाचारः करुणामयः कृतरतिर्दाता वदान्यो यश-
श्शान्तिः कामकलानिधिः सुवचनः स्त्रीणां मतः सुन्दरः ।
आढ्यो नीतिपटुः क्षमी च कुतुकी पुण्याभिरामो युवा
सङ्क्षेपादिह नायको निगदितः सङ्गीतदीक्षान्वितः ॥

* * * *

Colophon :

इति श्रीकविशेखरविरचिते पञ्चसायके जात्यादिसमुद्देशो नाम प्रथमः सायकः ॥

End :

अनेन मन्त्रेण जलं सुजप्तं पातुं प्रदेयं शुचिमन्तरेण ।
तोयातिपानात् खलु गर्भवत्या प्रसूयते शीघ्रतरं सुखेन ॥
इत्येवं कथितं मया नरपतेर्योगालिकीर्तेश्शतं
सोद्वेगं कृतिभिस्सदैव हृदये धार्या च कार्या नरैः ।
वश्यानामुपकारकर्मकुशलास्तेऽमी महाशक्तयः
क्षन्तव्यं कविशेखरस्य विनयात्सौकर्यकार्यादिकम् ॥

Colophon :

इति श्रीकविशेखरविरचिते पञ्चसायके मन्त्रादिसमुद्देशो नाम चतुर्थस्सायकः ॥

तिलप्रसूनं सह गोपुरेण सदादरं गव्यघृतेन पिष्टम् ।
सप्ताहमात्रेण शिरःप्रलेपात्कुर्वन्ति दीर्घाः प्रचुराग्र्यकेशाः ॥

* * * *

गौरीति नाडी यदुपस्थगेहे प्रधानभूता भवति स्वभावात् ।
पुत्रं प्रसूते बहुवैरिसेयं नष्टोपभोग्या सुरते प्रहृष्टाः ॥

R. No. **2813.**

Paper. 11 × 9⅜ inches. Foll. 70. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Kūḍalūr-mana Nārāyaṇa Nambūdiri of Tritala, Malabar district.

रघुनाथभूपालीयव्याख्या.

RAGHUNĀTHABHŪPĀLĪYAVYĀKHYĀ.

A commentary entitled the Sāhityasāmrājya on the Raghunāthabhūpālīya of Kṛṣṇayajvan which work is described under R. No. 659(*d*) ante: by Sudhīndrayati, pupil of Vijayīndratīrtha. The commentator states that he wrote this at the instance of King Raghunātha, son of King Acyuta and grandson of King Cina Cerva.

Contains the Vilāsas one and three complete and the fourth almost complete.

Beginning:

श्रीलस्संश्रितकाञ्चनक्षितिधरो मेघामणिश्यामलः
स्वाङ्गे कश्चिदचञ्चलामभिवहन् विद्युल्लतामन्वहम् ।
नैदाघार्कविघूर्णचातकगणं पुष्णन् सुधावर्षणैः
हर्षोत्कर्षतरङ्गितो वितनुतामाचन्द्रतारं श्रियम् ॥

धीरः श्रीचिनचेर्वभूपरमणिः क्षोणीमरक्षद्गुण-
श्रेणीविश्रुतरामणीयकनिधिर्यत्कीर्तिविष्फूर्तयः ।
सर्वागारमणीमणीरनुदिनं कर्पूरपूरस्फुर-
त्पाटीरोज्ज्वलहारपङ्क्तिभिरलङ्कुर्वन्ति गर्वोज्झिताः ॥

तस्यासीत्तनयो नयोज्ज्वलगुणो गौणो न यस्मिन्नव-
त्यश्रान्तं मनुजान् भुवो वसुमती राजन्वतीत्याह्वया ।
उद्वेलं यदुपक्रमं श्रुतमहादानक्रियाम्रेडनं
तत्तादृग्विभुरच्युतोऽपर इव ख्यातोऽच्युतक्ष्मापतिः ॥

* * * *

तस्माद्र . समुल्लसद्गुणम . . . . हैवोद्भवो
लक्ष्मीकीर्तिकरग्रहेण ललिता यस्यादिमाभ्युत्थितिः ।

अभ्यासः कलभाषणेष्वपि चतुष्षष्ट्या कलाभिस्समं
यस्य श्रीरघुनाथभूमिरमणस्सोऽयं समुज्जृम्भते ॥

*   *   *   *

अपर इव रामचन्द्रो रघुनाथभूपतिचन्द्रोऽयमविरतमवति भुवनमण्डलम्

तेन श्रीरघुनाथभूमिपतिना सम्प्रार्थितस्सम्मुदे
तत्तादृग्विजयीन्द्रसंयमिम(णेः) षड्दर्शनीदर्शिनः ।
शिष्यो व्याकुरुते सुधीन्द्रयतिराट् कृष्णाध्वरीन्द्रोदित-
ग्रन्थं तद्गुणबन्धुरं रसगुणालङ्कारझङ्कारितम् ॥

इह खलु धरणीमण्डल इव कविमण्डलेऽपि सकले साम्राज्ये पदवीमुपारूढस्य

*   *   *   *

रघुनाथभूवरस्य शौर्यौदार्यगाम्भीर्यादिरमणीयगुणगणप्रतिपादनपरं काव्यमीमांसारूपं रघुनाथभूपालीयं नामालङ्कारशास्त्रं चिकीर्षुः कृष्णदीक्षिताभिधानो मनीषी

*   *   *   *

काव्यादर्शप्रदर्शितनयेनाशीराद्यन्यतमस्य प्रबन्धमुखलक्षणतया प्रकृतकृतिनायकाभीष्टप्रार्थनरूपं मङ्गलमादावाचरति—श्रीमदिति ।

*   *   *   *

कृतिनायकस्य सुधाम्बुधिसाम्यं च विवक्षितमिति शब्दशक्तिमूलोऽलङ्कारध्वनिः स्वकीयप्रबन्धस्य कृतिनायकविषये त्वौचित्यवर्णनात्समालङ्कारश्चेति ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्रश्रीमद्विजयीन्द्रतीर्थपूज्यचरणशिष्येण श्रीसुधीन्द्रयतिना विरचितायां साहित्यसाम्राज्यव्या(समा)ख्यायरघुनाथभूपालीयसमा(व्या)ख्यायां प्रथमो विलासः ॥

End :

रौद्रमिति रूपसिद्धेरत्र शब्दशक्तिमूलता । उरस्स्फुटतरेत्यादौ तु अर्थशक्तिमूलतेति ध्वनिरयमुभयशक्तिमूलमित्याह—अत्रेति ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्रश्रीमद्विजयीन्द्रतीर्थपूज्यचरणशिष्येण श्रीसुधीन्द्रयतिना विरचितायां साहित्यसाम्राज्यसमाख्यायां रघुनाथभूपालीयव्याख्यायां तृतीयो विलासः ॥

उग्वं(क्तं)संलक्ष्यक्रमव्यङ्ग्यं निरूप्य असंलक्ष्यक्रमव्यङ्ग्यं निरु(रू)पयिषुरादौ कृतिनायकाभीष्टसिद्धिमभ्यर्थयते—पट्टाभिषेकेति । वैदेहीरघुवीरयोः पट्टाभिषेकमूर्धन्याः वैवाहमौक्तिकानीव स्थिता गाङ्गाम्बुबिन्दवः पान्तु इति

* * * *

विस्मयस्थायिकस्तज्ज्ञैः स रसः कथ्यतेऽद्भुतः । इति । उदाह

* * * *

थेति । रघुनाथनामा राजा स्वप्ने यद्यपि कान्तया अर्प्यमाणं सबहुमानं वितीर्यमाणम् . . . .

Colophon:

श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्रश्रीमद्विजयीन्द्रतीर्थपूज्यचरणशिष्येण श्रीसुधीन्द्रयतिना विरचिता साहित्यसाम्राज्यव्या(समा)ख्या रघुनाथभूपालीयसमा(व्या)ख्या ॥

R. No. 2814.

Paper. 11 × 9¾ inches. Foll. 30. Lines, 20 in a page. Telugu. Good.

(*a*) त्रिपुरात्रैलोक्यमोहनकवचव्याख्यानम्.

TRIPURĀTRAILŌKYAMŌHANAKAVACAVYĀKHYĀNAM.

Transcribed in 1918-19 from a MS. of Śrī-Śivānandayōgīśvarasvāmigāru, Chicacole, Ganjam district.

Foll. 1*a*—12*b*.

A commentary on the Tripurasundarītrailōkyamōhanakavaca which is described under No. 6335 of the D.C.S. MSS., Vol. XIII.

Complete.

Beginning:

श्रियं नः पुष्णातु प्रणतजनतापत्रयशम-
क्रियादक्षोऽक्षय्यां क्षपितभवसंमोहमहिमा ।
कृपापारावारो हरिहरविरिञ्चिप्रभृतिभिः
नतेष्विष्टावाप्त्यै सततमपि देवो गणपतिः ॥

श्रीमहात्रिपुरसुन्दर्यम्बा जयति । श्रीदेव्युवाच—

श्रीमत्रिपुरसुन्दर्या या या विद्यास्त्वयोदिताः ।
कृपया कथितास्सर्वाः श्रुताश्चाधिगता मया ॥
प्राणनाथाधुना ब्रूहि कवचं मन्त्रविग्रहम् ।
त्रैलोक्यमोहनं चेति नामतः कथितं पुरा ॥

* * * *

अस्योद्धारः—

कामं विष्णुयुतं देवि शक्तिं मायेन्द्रमेव च ।
महामायां ततः पश्चाद्वाग्भवं बीजमुद्धरेत् ॥

अस्यार्थः—कामं व्यञ्जनरूपं ककारः विष्णुना अकारेण युतम् । तेनाकारेण सहितो व्यञ्जनककारः सस्वरो जातः । शक्तिरेकारः, माया दीर्घ ईकारः, इन्द्रो लकारः, महामाया ह्रीङ्कारः । हसकल ह्रीं ललाटं पातु कामेश्वरी मम ।

End:

इदमेव परं यस्मात् भुक्तिमुक्तिप्रदायकम् ।
तस्मात्सर्वप्रयत्नेन पठनीयं मुमुक्षुभिः ॥
भूवेश्मगत्रिवृतषोडशनागचक्रदिग्युग्मवस्वनलकोणगबिन्दुमध्ये ।
सिंहासनोपरिगतारकपीठमध्ये प्रोत्फुल्लपद्मनिलयां त्रिपुरां भजेऽहम् ॥

Colophon:

इति श्रीरुद्रयामले गौरीश्वरसंवादे श्रीराजराजेश्वरीश्रीमहात्रिपुरसुन्दर्याः त्रैलोक्यमोहनाख्यकवचव्याख्यानं सम्पूर्णम् ॥

(*b*) विष्णुसहस्रनामविशेषनामविभागः.

VIṢṆUSAHASRANĀMAVIŚĒṢANĀMAVIBHĀGAḤ.

Fol. 13.

The Viṣṇusahasranāmastōtra consists of one thousand substantive names, each signifying an attribute of God Viṣṇu conceived as the Supreme Brahman. According to Śaṅkarācārya, some of these substantive names should not be construed as independent attributes but should be taken in relation to certain other names and as qualifying them. A list of such qualifying names in each of the ten Śatakas of the work, as well as of the names with which the Satakas commence, is given herein.

Complete.

Beginning:

नत्वा गुरुं देवदेवं सच्चिदानन्दविग्रहम् ।
सविशेषणनामानि विष्णोर्नामसहस्रके ।
भाष्यकारमतेनैव सङ्ख्यातो विभजाम्यहम् ॥
विष्णोर्नामसहस्रे शतकारम्भाः क्रमेण विज्ञेयाः ।
विश्वं वृषाकपिस्संधातृयुगावर्तवीरकपीन्द्राः ॥

* * * *

निधिरव्ययस्स्थविरो ध्रुवो वै मङ्गलं परम् ।
सविशेषणनामानि त्रीण्याद्ये शतके स्फुटम् ॥

End:

उक्तनामातिरेकेण समासघटितं विना ।
सविशेषणनामात्र व्यस्तं नास्ति विविच्यताम् ॥

In foll. 13*b*—14*a* Balabhadrādidhyānaślōkas are given. Foll 14*a*—15*a* contain Viṣṇusahasranāmarudraśāpavimōcanavidhi, 15*a*—17*a* Upacārapūjā, 17*a*—22*b* Śāradāpūjā, Vajrapañjaravibhūtidhāraṇa, Dēvīdigbandhanavidhi, Śaivācamanavidhi and Mānasikasnāna.

(*c*) रेफादिरामसहस्रनामावलिः.

REPHĀDIRĀMASAHASRANĀMĀVALIḤ.

Foll. 23*a*—30*b*.

Transcribed in 1918–19 from a MS. of Śrīrāmatīrtha Library, Śrīrāmatīrtham, Vizagapatam district.

Gives in the form of verse one thousand significant names of Rāma, all beginning with the letter र्. This is said to have been revealed to Dēvī by Mahādēva.

Complete ; as found in the Brahmayāmala.

Beginning :

श्रीदेव्युवाच—

देवदेव महादेव भक्तानुग्रहकारक ।
त्वत्तश्श्रुता मया पूर्वं मन्त्राणां शतकोटयः ॥
तन्त्राणि तन्त्रजालानि सर(ह)स्यानि यानि च ।
तानि तानि महासिद्धैः कल्पितानि शुभानि च ॥

* * * *

श्रीरामतत्त्वजिज्ञासा जायते परमेश्वर ।
रामस्य रामचन्द्रस्य रकाराक्षरपूर्वकम् ॥
नाम्नां सहस्रकं ब्रूहि यद्यहं तव वल्लभा ।
स्त्रियो वा पुरुषो वापि श्रुत्वा ब्रह्मत्वमाप्नुयात् ॥

* * * *

रामो रमाकरो दीप्तो रक्तनेत्रो रमापतिः ।
रणभूमिविहारी च रक्तपादोऽरुणच्छविः ॥

End:

रामस्सर्वाङ्गमानादिनित्यलक्ष्मीविलासदः ।
इतीदं कथितं देवि रामनामसहस्रकम् ॥
* * * *
तव भक्त्या मयाख्यातं नाख्येयं यस्य कस्यचित् ।
इह लोके सुखी भूत्वा वरो मुक्तिर्भविष्यति ॥

Colophon:

इति श्रीब्रह्मयामले सुप्रि ? प्रशंसायामुमामहेश्वरसंवादे रकारादिश्रीरामसहस्रनामस्तोत्रं सम्पूर्णम् ॥

R. No. 2815.

Paper. 11 × 9¾ inches. Foll. 62. Lines, 20 in a page. Grantha. Good.

(*a*) काण्ववेदमन्त्रभाष्यसङ्ग्रहः.

KĀṆVAVĒDAMANTRABHĀṢYASAṄGRAHAḤ.

Foll. 1*a*—34*b*. Foll. 35 and 36 are left blank.

Transcribed in 1918-19 from a MS. obtained through the Sub-Magistrate of Kovvūru, Kistna district.

A commentary on the Kāṇvaśākhāmantrapraśna which is a collection of the Vedic Mantras recited in the performance of the household rituals prescribed for the followers of the Kāṇvaśākhā of the Śukla-Yajurvēda; by Ānandabōdhabhaṭṭōpādhyāya, son of Jātavēdabhaṭṭōpādhyāya who was a pupil of Vāsudēvapūjyapāda.

Contains the Adhyāyas 11 and 12 complete and 13 incomplete.

Beginning:

इन्द्र श्रेष्ठानि द्रविणानि देहि चित्तिं दक्षस्य सुभगत्वमस्मे ।
पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं दाम(वाच)स्सुदिनत्वमह्नाम् ॥

अस्यार्थः—हे इन्द्र परमैश्वर्यसम्पन्न प्रसिद्धेन्द्र । अस्मे अस्मै यजमानाय । श्रेष्ठानि द्रविणानि द्रव्याणि देहि । ननु त्वया दत्तेन मत्तो यजमानो यदि तद्विस्मरणवान् तर्हि दत्तमपि वित्तं भगवद्ध्यानलक्षणमोक्षप्रतिकूलं स्यात् अतः चित्तिं दक्षस्येत्युक्तम् । दक्षस्य समर्थस्य चित्तिं धर्मविषयिणीं बुद्धिं देहि ।

* * * *

अनेन धनुषा त्वयायं यजमाना वृत्रं दध्यात् हन्यात् या विमार्ष्टि । मित्रस्यासि वरुणस्यासीति । द्विबाहुदैवत्ये यजूंषि मित्रस्य सम्बन्धि बाहुरसि वरुणसम्बन्धि सव्यबाहुरसि ।

* * * *

सर्वतः शुद्धिमापादितवति कण्वादिषु पाठाच्च भेषज्यं कृतवति वेत्येव सम्बन्धः ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवासुदेवपरिपूज्यपादपरमकारुण्यासादितश्रीकृष्णभक्तिसाम्राज्यस्य श्रीमज्जातवेदभट्टोपाध्यायस्य सूनुना चतुर्वेदिश्रीमदानन्दबोधभट्टोपाध्यायेन विरचिते काण्वमन्त्रभाष्यसङ्ग्रहे एकादशोऽध्यायः ॥

End:

हे वसुनीथ यज्ञैर्यागैः घृतेन च तन्वं शरीरं वर्धयस्व अभिवृद्धिं गमय एवं यजमानस्य कामाः शिष्टफलविषयाः सत्या अवितथाः सन्तु स्वाहेति होमार्थः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवासुदेवपरिपूज्यपादपरमकारुण्यासादितश्रीकृष्णभक्तिसाम्राज्यस्य श्रीमज्जातवेदभट्टोपाध्यायस्य सूनुना चतुर्वेदिश्रीमदानन्दबोधभट्टोपाध्यायेन विरचिते काण्ववेदमन्त्रभाष्यसङ्ग्रहे द्वादशोऽध्यायः ॥

श्रीमते विश्वरूपाय जगदानन्दरूपिणे ।
वेदिमध्योद्भवायैव नमो ब्रह्मात्मने सदा ॥
श्रीमते शुक्लवर्णाय हयग्रीवाय विष्णवे ।
नमोऽस्तु ब्रह्मगुरवे चन्द्रमण्डलवासिने ॥

दृशानः । यजमानः कण्ठे रुक्मं प्रतिमुञ्चते दृशा नो रुक्म इति । त्रिष्टुप् आदित्या व्यासेन रूत्रसती मयो दृशानः दृश्यमानः

* * * *

दिवस्परीति । वत्सेवालन्दनः द्वादशर्चं । आग्नेयं, त्रिष्टुभम् । दिवस्परि प्रथमम्ग्निः । दिवस्परि दिवस्सकाशात् । प्रथममादौ । जज्ञे जातः अग्निरस्मि(स्मत्) द्वितीयं परि जातवेदाः । अस्मत् अस्मत्तः.

(b) रामायणदीपिका.

RĀMĀYAṆADĪPIKĀ.

Foll. 37*a*—43*a*. Foll. 43*b* and 44 are left blank.

Transcribed in 1918-19 from a MS. of the Raja of Chirakkal, Malabar district.

Same work as that described under No. 1900 of the D.C.S. MSS., Vol. IV, Part I.

Contains the commentaries on the 96th stanza of the first Sarga, on stanzas four, seven, three of the fifth Sarga, on the whole of the 35th Sarga and on the first stanza of the 36th Sarga of the Sundarakāṇḍa.

Beginning:

सुन्दरकाण्डे— त्वमिति । देवराज्ञेत्यत्र समासान्तस्यानित्यत्वात् टजभावः । परिघस्सन्निवेशितः परिघत्वेन परिघस्सन्निवेशितः देवराज्ञा परिघवद् गम्यते असुरान्निरुध्यावस्थाने उपरिवर्धने च तव शक्तिस्स्याद्भावार्थः । सञ्चोदयामीत्याह । आपाते पक्षिसङ्घाते आपतन्त्यस्मिन्निति आपातो मार्गः । या भाति लक्ष्मीरित्यत्र भिन्नाधिकरणलक्ष्म्याश्चन्द्रनिष्ठत्वाभिधानाच्चन्द्रस्य सर्वोत्तरशोभायुक्तत्वमुक्तं भवति ।

End:

नयिता नेता । एवमिति । अवगच्छत् अवागच्छत् । मनुते अमन्यत । देवीनियुक्तार्थकरणे स्वस्य शक्तिरस्तीति द्योतयितुं स्वमाहात्म्यमाह— हतेऽसुर इति ।

Colophon:

सुन्दरकाण्डे पञ्चत्रिंशस्सर्गः ॥

सन्देशकथनादिना देवीं विश्वास्याभिज्ञानभूताङ्गुलीयप्रदानेन च दृढं विश्वासयति—वानरोऽहमित्यादिना ।

(c) कालिकाखण्डः.

KĀLIKĀKHAṆḌAḤ.

Foll. 45*a*—61*b*. Fol. 62 is left blank.

Transcribed in 1917-18 from a MS. of M.R.Ry. Vāsireḍḍi Candramaulīśvaraprasāda Bahadur, Zamindar of Muktyala, Kistna district.

Same work as that described under No. 2290 of the D.C.S. MSS., Vol. IV, Part I, wherein see for the end.

Contains the Adhyāyas two and nine only.

Beginning:

नमः कृत्वातिशायिने सेनान्ये शक्तिपाणये ।
व्यासं महति बोद्धव्यं स्कन्दजन्मोत्तमोत्तमम् ॥

मन्दरस्य गिरेः शृङ्गे सुवर्णद्रुमभूषिते ।
हेमगर्भमयं श्रीमद्गृहं देवस्य शूलिनः ॥
तस्मिन् हैमवतीं देवीं देवश्चन्द्रविभूषणः ।
रमयामास भगवानुमाममरसत्तमः ॥
ततः कदाचिद्रमयन् रतान्ते चन्द्रशेखरः ।
उमामुवाच कालीति कालकण्ठस्स्वयं मुहुः ॥
कालीत्युक्ता दितेः पुत्र सर्वभूतपतौ पतौ ।
चुकोप कोपात्ताम्राक्षी गरुडस्येव पन्नगी ॥

* * * *

Colophon:

इति श्रीस्कन्दपुराणे कालिकाखण्डे देवीप्रसादनं नाम द्वितीयोऽध्यायः ॥

R. No. **2816.**

Paper. 11 × 9¾ inches. Foll. 60. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippāḍ, Nareri, Tritala, Malabar district.

भागवतव्याख्या—कृष्णपदी.

BHĀGAVATAVYĀKHYĀ: KṚṢṆAPADĪ.

Same work as that described under R. No. 2769 ante.

Contains the Adhyāyas 1—23 complete and the 24th incomplete in the third Skandha.

R. No. **2817.**

Paper. 11 × 9¾ inches. Foll. 46. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. V. K. Kuṭṭiyeṭṭan Raja of Pudiyakōvilagam of Calicut, Malabar district.

उषानिरुद्धम्.

UṢĀNIRUDDHAM.

Foll. 1*a*—46*a*. Fol. 46*b* is left blank.

A poem in Prākṛt with Chāyā, i.e., Sanskrit equivalent, describing the mutual love between Bāṇāsura's daughter Uṣā and Lord Kṛṣṇa's grandson Aniruddha, and their marriage against the wishes of Bāṇa who, enraged at their conduct, imprisoned them. The story as found in this manuscript ends with the defeat of Bāṇa and the rescue of the couple.

Contains the Sargas one to four complete. The stanzas of the second Sarga are written here without proper order as in the original MS.

Beginning :

भद्राय वो भक्तिगुणाश्रितानां भवेन्नित्यं भगवान् गणेशः ।
दानेन यः प्रीणयति मानसानि वनीपकानामिव मधुव्रतानाम् ॥
भद्दास वो भत्तिगुणालिआणं भवेज्जणिच्चं भअवं गणेशो ।
दाणेन जो पीणइ माणसाइं वणीवआणं व महुंवआणम् ॥
अबोधनिद्राविह्वलोऽपि लोको यस्याः प्रसादे सति(स)प्रबुद्धः ।
स्वच्छ(न्द)ता बध्नाति काव्यगुम्फं चित्ते नो भासतां भारती सा ॥

* * * *

उषानिरुद्धमिति मया निबद्धं यत्किमपि काव्यं यदुनाथदैवम् ।
श्रुतं शृण्वतामपि यन्न तृप्तिर्यस्मिन् खलु वर्ण्यते वासुदेवः ॥
उसाणिरुद्धं ति मए निबद्धं जं किंवि कव्वं जदुणाहदव्वम् ।
सुदं सुणत्ताण वि जं ण तंजपीखु जहीखु वण्णिज्जइ वासुदेवो ॥
यदोर्वंशे जलधिप्रभूते जगन्निवासो जनित्वा देवः ।
यशोभिर्ज्योत्स्नाधवलैर्लोकानजनयच्चन्द्र इव महाप्रकाशान् ॥

* * * *

पिनाकिना लोचनवीधि(ति)होत्रे हुतस्य पूर्वं कुसुमायुधस्य ।
द्वितीयोऽभवत्स रमणो रतेस्तदानिरुद्धं तनयमलभत ॥
पिणाइणा लोअणवीइहोत्ते हुअस्स पुव्वं कुसुमाउहस्स ।
वीओ भवो सो रमणो रईए तआणिरुद्धं तणअं ळहेई ॥
विकसितेन्दीवरविशालनेत्रः सुतुङ्गसौन्दर्यो घनश्यामलाङ्गः ।
उषेति बाणस्य कुमारिकायाः कदापि दृष्टः स्वप्ने निशायाम् ॥

* * * *

दनुजपतिसुतामुखेन्दुज्योत्स्नाप्रसरविकसितविलोचनोत्पलः सः ।
न्यवसत्कुमारिगृहैकदेशे अगणितबन्धनलाघवोऽनिरुद्धः ॥
दणुअवइसुआमुहेन्दुजोह्वापसरविसदविळोअणुप्पळो सो ।
णिवसइ कुमरीघरैकदेसे अगणिअबन्धणळाहवोणिरुद्धो ॥

Colophon :

इअ उसाणिरुद्धे पढमो सग्गो ॥
इति उषानिरुद्धे प्रथमस्सर्गः ॥

End:

इत्थं सुस्थितपुत्रपौत्रनिकरो विस्तीर्णकीर्तिच्छटा-
ज्योत्स्नापह्नुतवैरिविक्रमतमोभा(सा)सिताशामुखः ।
आनन्दार्णवपूर्णिमाशशधरः सर्वेषां निर्वाणदो
देवो देवकिनन्दनो दिशतु वो निश्शेषनिश्श्रेयसम् ॥
इत्थं सुट्ठिअपुत्तपोत्तणिअरो विद्धिण्णकीत्तिच्छडा-
जोह्लापह्नुअवेरिविक्कमतमोभासाविआसा मुहो ।
आणन्तण्णवपुण्णिमाससहरो सव्वाण निव्वाणदो
देवो देवइणन्दणो दिसदु वो णिस्सेसणिस्सेअसम् ॥

Colophon:

इति उषानिरुद्धे चतुर्थः सर्गः ॥

R. No. **2818.**

Paper. 11 × 9¾ inches. Foll. 218. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Subrahmaṇya Raja of Edappalli, Travancore State.

श्लोकवार्तिकव्याख्या.

ŚLŌKAVĀRTIKAVYĀKHYĀ.

Foll. 1*a*—218*a*. Fol. 218*b* is left blank.

A commentary called Kāśikā on the Ślōkavārtika of Kumārilabhaṭṭa which work is itself a commentary in verse on the first Pāda of the first Adhyāya of Jaimini's Mīmāṁsāsūtras; by Ācārya-Sucaritamiśra.

Breaks off in the fifth Sūtra of the first Pāda in the first Adhyāya.

Beginning:

वार्तिकारम्भे शिष्टाचारमनुविदधानो मङ्गलं तावत्करोति—विशुद्धेति । दृष्टा हि शिष्टानां प्रवृत्तिः . . . . लक्ष देवतास्तुतिनमस्कारादि । अस्य च नियोगतः फलवत्कार्यान्तरारम्भसंयोगात् साक्षादफलत्वाच्च 'फलवत्सन्निधावफलं तदङ्ग'मिति न्यायेन कार्यान्तरशेषत्वेऽवधृते सत्यारम्भस्य समाप्तिपर्यन्तत्वादपेक्षिताविघ्नपरिसमाप्तिः फलम् । 'अपेक्षितविधेरनपेक्षितविधानं दुर्बल'मिति न्यायेन फलान्तरकल्पनाया दुर्बलत्वात् । अतो यथासाम्प्रदायिकमध्यायानध्यायादि स्वाध्यायाविघ्नार्थमेवामिद-

मपि । तदयमर्थः । विशुद्धौ ज्ञानदेहौ यस्य स तथोक्तः । विशुद्धं च भगवतो ज्ञानम् । रागादिभिर्ज्ञानकारणानामदूषितत्वात । देहश्चायोनिजत्वाद्विविधगर्भवेदनाविरहाच्च । त्रिवेदी च तस्य चक्षुरिति गौणो वादः ।

* * * *

विद्यागुरूणामिदानीं स्तुतिनमस्कारौ करोति—अभिवन्द्येति । शिष्यधीपद्मिनीनां रवीनिव विकासकान् गुरूनादौ वन्दे । ततो वार्तिकं करिष्ये । तेषामेव प्रसादेन दृष्टेनार्थतत्त्वोपदेशेनादृष्टेन च स्तुतिनमस्कारभुवा गुर्वनुगमनाद्योऽपि ह्याचारप्रमाणका एव । वार्तिकग्रहणेन च दुरुक्तभङ्गमनुक्तवचनं च समाधत्ते । मीमांसाशब्देन न्यायशास्त्रमिदमतो न्यायानुसारेणाधिकरणभङ्गाद्यदूषणमिति दर्शयति । श्लोकपदेन च लाघविकास्संक्षिपाम इति दर्शयति । ततश्च सूत्रितप्रायमिममर्थमवहिता जिज्ञासवो भावयिष्यन्तीति तात्पर्यार्थ इति ।

* * * *

ननु किमङ्गभूतायां मीमांसायां वार्तिकं प्रणीयते ? वेदा एव साक्षाद्व्याख्यायन्तामत आह—मीमांसेति । वेदा एव संशयपूर्वोत्तरपक्षक्रमेण व्याख्यायमाना मनो हरन्तितराम् । ननु मन्त्रब्राह्मणभाष्यप्रस्थानेन मीमांसयैव च ते तथा व्याख्यायन्त . . . इति । तत्रैव वार्तिकं कर्तुं मे तृष्णा वर्धत इति ।

* * * *

सूत्रतात्पर्यमिदानीं दर्शयति—अथेति । इदं हि सूत्रं धर्माख्यमस्य शास्त्रस्य प्रतिपाद्यतया विषयभूतं प्रयोजनं वक्तुं कृतमाद्यमिति प्रयोजनाभिधानस्थानमिति दर्शयति । यद्यपि धर्मोऽस्य प्रयोजनमिति न कण्ठेनोक्तम् । तथापि जिज्ञासाकर्मभूतो धर्म इत्याचक्षाणेनापुरुषार्थज्ञानस्यानिष्टत्वात्पुरुषार्थीभूतो धर्मः प्रयोजनमिति सूचितमिति सूत्रमित्युक्तम् ।

* * * *

Colophon :

इत्युपाध्यायसुचरितमिश्रकृतौ काशिकाटीकायां प्रथमसूत्रं समाप्तम् ॥

End :

प्रकरणार्थमुपसंहरति—इत्यवासनेति । किञ्चेयं वासना तत्त्वदर्शिभिः बौद्धैः वस्तुतो वर्णितेति नेदं संभावयामः । असतीमेव तु युक्त्यानुपेतां युक्तिशून्यां वासनां विकल्प्य विषयेष्ववस्थां निवर्तयितुमर्थनिराकरणमुक्तम् । एकमेवाद्वितीयमित्याद्युपनिषद्भिरिव तत्रैव त्ववाचीनानां भ्रान्त्या सिद्धान्तावग्रह इति निराकृतं वादिनमाश्वसयतीति । युक्तचेति ॥

Colophon :

इत्याचार्यसुचरितमिश्रकृतौ काशिकाटीकायां निरालम्बनवादः समाप्तः ॥

R. No. **2819.**

Paper. 11 × 9¾ inches. Foll. 56. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS. of M.R.Ry. Tippan Nambūdirippāḍ, Ponnūrkōṭṭa-mana, Travancore State.

शुकसन्देशः, सव्याख्यः.

ŚUKASANDĒŚAḤ WITH COMMENTARY.

Foll. 1*a*—55*a*. Foll. 55*b*—56 are left blank.

A commentary by Gaurīdāsa on the Śukasandēśa of Lakṣmīdāsa which work has been described under No. 11900 of the D.C.S. MSS., Vol. XX. The commentary is designated Cintātilaka.

Breaks off in the second Bhāga.

Beginning :

मदवारिषु मिलितालिभिरुपशोभितवदनं
वरवारणमुखपङ्कजमखिलार्थदममलम् ।
करसंभृतसृणिपाशसुकरदाडिमकलशं
नमताखिलजनवन्दितचरणं भवतनयम् ॥

प्रसरति जगतीह यत्प्रसादादमृतमयी भणितिर्नितान्तहृद्या ।
तुहिनकरकलाकृतावतंसां शरणमहं समुपैमि भारतीं ताम् ॥

अरात्याहितसन्तापशान्तये सन्ततं भजे ।
तारकान्तरकं देवमन्तकान्तकृतस्सुतम् ॥

वासुदेवपदाम्भोजपरागपरमाणवः ।
परिशोधितमच्चेतोमुकुराः पान्तु सन्ततम् ॥

व्याख्यास्ये शुकसन्देशं देशिकापाङ्गसंश्रयः ।
पूर्वव्याख्यानुसारेण तत्र सन्तः प्रसीदत ॥

भुजङ्गभूषं भसिताङ्गरागं भवापवर्गप्रभवैकहेतुम् ।
भवाब्धिकल्लोलनिमग्नचेता भवं शरण्यं शरणं प्रपद्ये ॥

अथ सकलविबुधजनहृदयमार्तण्डः कविकुलावतंसः सकलरसिकजनरसायनं शुकसन्देशसंज्ञकं काव्यमारभमाण आशीरादिष्वन्यतमेन प्रबन्धमुखे भवितव्यमिति प्रथमपद्येन वस्तुनिर्देशं करोति ।

(मू) लक्ष्म्या रङ्गे शरदि शशिनः (. . .) श्राव्यया सन्दिदेश ॥ इति ।

पदच्छेदः स्फुटप्रायः पदार्थपदविग्रहौ ।

साभिप्रायौ प्रदृश्येते पदभङ्गोऽपि कुत्र चित् ॥

शशिनो लक्ष्म्या रङ्गे शरदि सौधशृङ्गे प्रेम्णा पेशलाभिः कलाभिस्सह विहरतोः कयोश्चिद्यूनोः सः स्वप्ने तस्याः दूरनीतः श्राव्ययेति गिरा शुकं सन्दिदेश इत्यन्वयः । शशिनः पूर्णस्य चन्द्रस्य सान्द्रचन्द्रिकानिष्यन्दरूपाया लक्ष्म्या रङ्गे नृत्तमण्डपे रज्यत्यस्मिन्निति रङ्गः । सौधस्य सुधाप्रचुरस्य प्रासादस्य शृङ्गे । बहुभूमिकस्य प्रासादस्योपरितनभूमिकायामित्यर्थः ।

* * * *

Colophon:

इति गौरीदासविरचिते शुकसन्देशविवरणे चिन्तातिलके प्रथमो भागोऽतीतः ॥

जयन्ति जगदानन्ददायिनो गुरवो मम ।

यत्कारुण्यविलासो मां वाचालमुप(द)पादयत ॥

एवमियता सन्दर्भेणादिवाक्यं दौत्ययोजनं पूज्याङ्गकथनमिति त्रीणि सन्देशाङ्गान्यनुसंहितानि । अथेदानीं प्राप्यदेशवर्णनभवनाभिज्ञादा(ना)दीनि दर्शयितव्यानीति तत्र प्रथमप्राप्यदेशो वर्ण्यते ।

* * * *

End:

ततं वीणादिकं वाद्यमानद्धं मुरजादिकमित्यत्रादिशब्दान्मुरवादिस्सङ्गृह्यते । . . . मत्वरसङ्कोचं कदाचिन्मूर्च्छजनप्रसरसङ्कोषमितिवन्मूर्च्छाशब्दोऽत्र द्रष्टव्यः । "शब्दो निनादनिनदध्वनिध्वानरवस्वना" इत्यमरः । निपतनमधः.

R. No. 2820.

Paper. $10\frac{7}{8} \times 8\frac{7}{8}$ inches. Foll. 474. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from the MS. of M.R.Ry. Lakṣmaṇa Śāstrigaḷ of Varahur, Tanjore district.

Fol. 175*b* contains the name of the owner of the MS. from which this was copied. Foll. 76, 288 and 410*b*—412 are left blank.

Bound in four volumes.

हरिहरभेदधिक्कारः.

HARIHARABHĒDADHIKKĀRAḤ.

A treatise in verse and prose criticizing and condemning the alleged superiority of Viṣṇu and Śiva over each other and concluding that there is no difference between them and that they are one and the same Supreme Brahman Śaṅkarācārya's works, viz., Sahasranāmabhāṣya and Gītābhāṣya, Haradattācārya and Appayadīkṣita are all cited as authorities in support of the view maintained in this work.

Contains the Paricchēdas one to five complete.

Beginning:

सदानन्दैकरूपाय सर्गस्थित्यन्तकारिणे ।
सर्वान्तर्यामिणे तुभ्यं श्रीरामायात्मने नमः ॥
सर्वेश्वरोऽपि प्रेम्णा यं भजते राघवं परम् ।
तं वन्दे जानकीजानिं करुणामृतवारिधिम् ॥
सर्वोपनिषदामर्थं सच्चिदानन्दविग्रहम् ।
चिन्मुद्राशोभितं कृष्णं वन्देऽहं पार्थसारथिम् ॥
भूमानन्दं परं दैवं सर्वान्तर्यामिणं शिवम् ।
वन्दे विज्ञानदातारं वटमूलनिवासिनम् ॥
यत्कृपालवमात्रेण मूकस्सर्वज्ञतामियात् ।
श्रीमद्विश्वाधिकगुरून् वन्दे तान् करुणानिधीन् ॥
वेदान्तार्थाभिधानेन सर्वानुग्रहकारिणम् ।
यतिरूपधरं नौमि शङ्करं लोकशङ्करम् ॥
विघ्नेशं विघ्नहर्तारं भक्ताभीष्टविधायिनम् ।
सर्वशास्त्रमयीं देवीं भारतीं च समाश्रये ॥
श्रीरामकृपादृष्टिज्ञानबलप्रभृतिसाम्यमैक्यं च ।
कथयन्तं हरिहरयोः कुरुते हरिगिरिशभेदधिक्कारम् ॥

इह खलु धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थेषु यत्किञ्चित्पुरुषार्थार्थिनां सर्वेषां विष्णुशिवयोः भेदबुद्धिराहित्यमावश्यकमेवेत्याशयेन भगवद्भिः सर्वशास्त्रार्थसम्प्रदायप्रवर्तकैः शिष्टाग्रगण्यैर्दयामयतनुभिः श्रीमद्भगवत्पादाचार्यैः सहस्रनामभाष्यादिषु विष्णुशिवयोरभेदस्सम्यक् प्रतिपादितः । तान्यत्र प्रथमपरिच्छेद उपरिष्टात्प्रदर्शयिष्यते । भेदनिश्चयवतां तयोरन्यतरावमानकर्तॄणां निरवधिकानर्थावाप्तिरुक्ता सहस्रनामभाष्ये । भगवद्गीताभाष्ये च ।

* * * *

द्वितीयपरिच्छेदे तु शैवंमन्या विष्णुशिवोभयनिन्दकाः केचन ब्रह्मविष्णुमहेश्वरेभ्यस्तुरीयत्वं साम्बमूर्तिरूपशिवस्यैव वक्तुं शक्यम्, न तु श्रीनिवासमू-

र्तिरूपविष्णोः, तथोत्कर्ष एव शिवस्य निकर्षस्त्वन्यस्य शिवस्येति निकर्षराहित्यं सर्वकारणत्वं मुमुक्षूपास्यत्वं मुक्तप्राप्यत्वादिरूपसर्वोत्कृष्टत्वं च तुरीयशिवस्यैव न तु मूर्तित्रयान्तर्गतविष्णुशिवयोरिति विष्णुशिवावुभौ निन्दन्त आहुः। अयश्चार्थः हरदत्ताचार्यैः अप्पयदीक्षितैश्च शास्त्राणि सम्यग्विचार्यायमेव सकलशास्त्रार्थ इति निर्णीतमिति। इदं पापकर्म तयोरुपर्यारोपयन्ति च।

* * * *

विष्णोर्जगत्कारणत्वादिरूपमुत्कृष्टत्वं शिव एव पर्यवस्यति न तु विष्णाविति विष्णुशिवोभयनिन्दकैरुक्तस्य निराकरणप्रकारः विष्णौ जगत्कारणत्वादिरूपसर्वोत्कृष्टत्वप्रतिष्ठापनप्रकारश्च तृतीयपरिच्छेदे वक्ष्यते।

* * * *

अतो वैदिकानां बुद्धिव्यामोहवारणाय शिवनिन्दकानां गर्वनिर्वापणाय च शिवनिन्दकैश्शिवेऽभिहितानीश्वरत्वनिराकरणप्रकारः अथर्वशिखादिश्रुतिभिः पुराणादिभिश्च शिवेऽभिहितजगत्कारणत्वाद्युत्कृष्टत्वप्रतिष्ठापनप्रकारश्च तुरीयपरिच्छेदे वक्ष्यते। तदनन्तरपरिच्छेदे तु विष्णुशिवयोरभेदः श्रुतिपुराणादिषु सर्वत्र प्रतिपादित इति वक्ष्यते। तदनन्तरं षष्ठपरिच्छेदे तु शिवनिन्दकैरुक्तस्य केषाञ्चित्पुराणानामप्रामाण्यस्य सम्यङ्निराकरणप्रकारः सर्वेषां पुराणानां प्रामाण्यं समानमेवेति प्रतिष्ठापनप्रकारश्च वक्ष्यते। तत्र विष्णोरीश्वरत्वादिप्रतिपादकसन्दर्भाः प्रथमपरिच्छेदस्यादौ प्रदर्श्यन्ते---अत्र केचन विष्णुशिवोभयनिन्दका अविचार्यैवेत्थं विकत्थन्ते—विष्णोस्सर्वेश्वरत्वादिकं भगवत्पादैर्नाप्युक्तमिति। लोकत्राणपरायणैः श्रीमद्भगवत्पादैस्तु श्रीमच्छारीरकभाष्यादिग्रन्थेषु भगवतो नारायणस्य महाविष्णोः सत्यज्ञानानन्दात्मकं त्रिविधपरिच्छेदरहितं ज्ञेयं मुमुक्षुप्राप्यं निर्विशेषमेकं रूपमचिन्त्यशक्तियुक्तं सर्वज्ञं जगज्जन्मादिकारणं सर्वान्तर्यामिरूपं

* * * *

अतश्च संक्षेपमिमं शृणुध्वं नारायणस्सर्वमिदं पुराणः।
स सर्गकाले च करोति सर्गं संहारकाले च तदत्ति भूयः॥

इति च पुराणे। भगवद्गीतासु च—

अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा॥ इति।

* * * *

भाष्यवार्तिकतात्पर्यसिद्धमैक्यं हरीशः।
बिम्बचिद्रूपयोस्साम्यं गुणैः श्रीमूर्तिरूपयोः॥

इति प्रदर्शनपरः प्रथमोऽयं परेशितुः ।
प्रीतयेऽस्तु परिच्छेदः श्रीरामस्य कृपाम्बुधेः ॥

Colophon:

इति हरिहरभेदधिक्कारे प्रथमः परिच्छेदः ॥

End:

अत एव च श्रीमूर्तिरूपयोर्विष्णुशिवयोस्तारतम्यज्ञानवतां तयोर्भजने फलतारतम्यज्ञानवतां च निरवधिकानर्थस्तथा तयोस्सकलसामर्थ्यतारतम्याभावः तथा तयोर्भजने चतुर्विधपुरुषार्थरूपफलतारतम्याभावश्च श्रुतीतिहासपुराणादिसकलप्रमाणसिद्धः, सकलशिष्टधौरेयाणामभिमतश्चेति सिद्धमेवेति सर्वं सुस्थम् ॥

जगदुदयलयादेः कारणं यो हि रामो मुरपुरहरयोस्तद्रूपयोस्सर्वदैक्यम् ।
निरुपमसुखसच्चिन्मूर्तिरूपेण भेदस्सकलगुणसमूहैस्सर्वदा साम्यमव ॥
इति दृढतरबुद्धिस्सर्वसौख्यैकहेतुस्सकलनिरयहेतुस्तारतम्यादिबुद्धिः ।
इति निगमपुराणन्यायसंसाधितार्थो निपुणतरमिहोक्तः पञ्चमे साधुतुष्ट्यै ॥
पञ्चमेऽस्मिन् परिच्छेदे प्रतिपाद्यः परेश्वरः ।
श्रीरामो नीरदश्यामस्सदा स्फुरतु मे हृदि ॥
पञ्चमोऽयं परिच्छेदः श्रीरामकृपया कृतः ।
प्रीतयेऽस्तु सदा तस्य श्रीरामस्याखिलेशितुः ॥

Colophon:

इति हरिहरभेदधिक्कारे पञ्चमपरिच्छेदः संपूर्णः ।

The scribe of the original MS. adds—

हरीशभेदधिक्कारे परिच्छेदस्तु पञ्चमः ।
लिखितो विप्रवर्येण कृष्णाख्येन हरेर्मुदे ॥

R. No. **2821.**

Paper. 11 × 9¾ inches. Foll. 56. Lines, 20 in a page. Telugu. Good.

Transcribed in 1918–19 from a MS. of Śrīrāmatīrtha Library, Śrīrāmatīrtham, Vizagapatam district.

(*a*) वासुदेवरोमन्थः.

VĀSUDĒVARŌMANTHAḤ.

Foll. 1*a*—55*a*.

A lucid commentary on the Vāsudēvastava which is a eulogy in verse on God Vāsudēva or Viṣṇu embodying the Dvādaśākṣarīmantra in the twelve-syllabled prayer-formula relating to God Vāsudēva: by Muḍumbai Nṛhari or Narasiṁhāoārya of Śrīvatsagōtra.

Complete in nine Rōmanthas.

Beginning:

अथातो वासुदेवस्तवस्य रोमन्थमारभ्यते—अयं स्तवो नवपुष्करविभक्तः। तत्रादिपुष्करे पृथक् च(तु)र्भिः विष्वक्सेनस्य मनसा आराधनं क्रियते। तत एकेन निर्विघ्नपरिसमाप्तिः प्रारभ्यते। ततस्सिंहगिरिनाथा . . . . व वासुदेवस्संस्तूयते। तत्र श्रीमद्वैकुण्ठसेनान्यमित्यादि विष्वक्सेनमानसाराधनम्। श्रीमता . . . . लक्ष्मीसंश्लिष्टस्य वैकुण्ठस्य भगवतस्सेनान्यं सेनाधिपतिम्। सूत्रवत्या देव्या समेयुषम् सहितम्। चक्रेण शङ्खेन महावेत्रेण तूष्णींमुद्रया तर्जनीमुद्रया। तूष्णीमेव सर्वैः स्थातव्यं न मुखरतयेति सूचिकया (यो) पराजितं शोभितम्। चतुर्भुजम्। उदारं गभीरमङ्गं विग्रहो यस्य तं तथोक्तम्। पीतं कौशेयं वासः परिधानं यस्य तम्।

* * * *

ममतां कृतिं वासुदेवस्तवरूपामवतु विघ्नादिकं निवर्त्य रक्षतु।
यस्य द्विरदवक्त्राद्याः पारिषद्याः परश्शतम्।
विघ्नान्निघ्नन्ति सततं विष्वक्सेनं तमाश्रये॥

इति विघ्ननिवारणे निरुत्तराधिकारित्व प्रामाणिकम्। अथ भर्तुराज्ञया पत्न्याः प्रवृत्तिवच्छ्रीसिंहाद्रिनाथस्याज्ञया स्वस्य स्तुतौ च प्रवृत्तिरावेद्यते—श्रीसिंहशैलेत्यादि।

* * * *

त्वदाज्ञया वासुदेवमन्त्रपुरश्चर्यां कुर्विति गतप्रमाथिवत्सरशारदप्रथमप्रतिपदि पत्रिकामूलेन प्रदत्तया देवस्याज्ञयैवोपास्यश्रीवासुदेवमन्त्रावर्तनेन भजित्वा हे जगन्नामधीश तदाख्ययैव वासुदेवाख्ययैव स्तुतिं च कुर्वे। जपनियमविरामसमनन्तरकाले वासुदेवस्तवाख्यं ग्रन्थं करोमीति विज्ञाप्यते। त्वदेकनियम्यस्य ममैषा प्रवृत्तिः जपवत् त्वदाज्ञयैवेति। भोजनात्प्राक् जपः। भोजनादुत्तरत्र स्तवश्चेति सूचितम्। अथ वासुदवस्तुतिप्रारम्भः—

(व्या) श्रीवासुदेवेत्यादि। हे श्रीवासुदेव वासुदेवस्सर्वमिति स महात्मा सुदुर्लभ इत्युक्तसर्वात्मक श्रीवासुदेव। हे भगवन् मायानिगूढम्। "नाहं प्रकाशस्सर्वस्य योगमायासमावृत" इत्युक्तरीत्या पुरःस्थितमपि निधिवददृश्य-

मपि, सर्वगतं पुरतोऽञ्जनदृशो निधिवद्योगसंस्कृतदृशस्सर्वत्र परिदृश्यमानं तव देवस्य स्वरूपम् ।

* * * *

(मू) श्रीवासुदेव तव भावयितुं यतेय मायानिगूढमपि सर्वगतं स्वरूपम् ।
त्वत्प्रेरणैव हृदये मधु तन्वती मां कार्ये महत्यपि नियोजयतीममल्पम्॥

* * * *

Colophon:

इति श्रीवासुदेवस्तवे प्रथमपुष्करस्य रोमन्थः ।

End:

ओं नमो वासुदेवाय नमस्सङ्कर्षणाय च ।
प्रद्युम्नायानिरुद्धाय नमो नारायणाय ते ॥
परस्ते विग्रहो देव यथाशक्तिर तुतो मया ।
प्रसीद भगवन् दासे सिंहशैलस्य नायक ॥

Colophon:

इति श्रीवासुदेवस्तवे पूजापुष्करस्य रोमन्थः ॥

समाप्तश्च ग्रन्थः ।

इति श्रीमन्मुडुम्बाङ्कश्रीवत्सकुलसंभवः ।
श्रीवासुदेवरोमन्थं चकार नृहरिर्मुदा ॥

(*b*) पुष्पस्तवः.

PUṢPASTAVAḤ.

Foll. 55*b*—56*a*. Fol. 56*b* is left blank

A eulogy on God Nṛsiṁha in which the supplicant expresses his devotion by way of offering flowers at the feet of God: by the same author as that of the last.

Complete.

Beginning:

पद्मानि सिंहशैलेन्द्रपादयोः पूजनच्छलात् ।
समताहंत्वमामोच्य पातयन्ति मनीषिणः ॥
मधुमदजनितान्ध्यः षड्भिरागृह्य पादैः
त्यजति न हरिभर्तुः पादयोः पुण्डरीकम् ।

यदिह मधुलिडेतत्खेलनेऽभूत्तदिन्दोः
हसति च पदपद्मज्योतिषेदं नखानाम् ॥

End:

विकचान्तरालरजसा दुरीक्षण-
क्रकचाश्वलेन च दुरासदा हि नः ।
न पदद्वयं स्पृशतु केतकी विभोः
यदि वा प्रतीक्षति कृते श्रियोऽस्त्वियम् ॥

इति श्रीमन्मुडुम्बाङ्कश्रीवत्सकुलसंभवः ।
चकार नृहरिः विष्णोर्दिव्यपुष्पस्तवं मुदा ॥

R. No. **2822.**

Paper. 11 × 9¾ inches. Foll. 126. Lines, 20 in a page. Malayālam. Good.

Transcribed in 1918-19 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippāḍ, Nareri, Tritala, Malabar district.

(*a*) धातुकाव्यम्, केरलव्याख्यासहितम्.

DHĀTUKĀVYAM WITH MALAYĀLAM COMMENTARY.

Foll. 1*a*—112*a*.

Same text as that described under No. 11538 of the D.C.S. MSS., Vol. XX, but with meaning in Malayālam. From the colophon given below, it is inferred that the work is called Vāsudēvavijaya and that its author was Nārāyaṇa.

Breaks off in the second Sarga.

Colophon:

इति नारायणकृतौ वासुदेवविजये कंसवधभागे प्रथमस्सर्गः ॥

(*b*) शिवधर्मः.

ŚIVADHARMAḤ.

Foll. 112*b*—126*a*. Fol. 126*b* is left blank.

Same work as that described under No. 5507 of the D.C.S. MSS., Vol. XI, and R. No. 2442(*a*) ante.

Ctains the sixth Adhyāya complete.

R. No. 2823.

Paper. 11 × 9¾ inches. Foll. 36. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918–19 from a MS of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippāḍ, Tritala, Malabar district.

Fol. 36*b* is left blank.

वक्तव्यचन्द्रिका.

VAKTAVYACANDRIKĀ.

A commentary on Pāṇini's Aṣṭādhyāyī with the Vārtika of Vararuci.

Contains from the fifth Sūtra of the first Pāda of the first Adhyāya to the end of the 66th Sūtra of the first Pāda of the fourth Adhyāya.

Beginning:

वागीशाद्यास्सुमनसः (. . .) तं नमामि गजाननम् ॥

इको गुणवृद्धी, न धातुलोप आर्धधातुके इत्यधिकृत्य, क्ङिति च-निमित्तसप्तम्येषा । क्गिन्निमित्ते ङिन्निमित्ते च ये गुणवृद्धी इकः प्राप्नुतः ते न भवतः । स्तुतः स्तुतवान् । भिन्नः भिन्नवान् । रदाभ्यामिति निष्ठातो नकारः ।

* * * *

Colophon:

इति श्रीमद्वक्तव्यचन्द्रिकायां प्रथमस्याध्यायस्य प्रथमः पादः ॥

End:

लोटो लङ्वदिति वर्तमाने, एरुः—लोडादेशानामिकारस्य उकारादेशो भवति । पचतु, पचन्तु । हिन्योरुक्(त्व)प्रतिषेधो वक्तव्यः; लुनीहि, पचानि ।

Colophon:

इति श्रीमद्वक्तव्यचन्द्रिकायां तृतीयोऽध्यायः ॥

स्त्रियाम्, ऋन्नेभ्यो ङीप् इति वर्तमाने, उगितश्च—उगिद्यस्य सम्भवति यथाकथञ्चित् तदुगिच्छब्दरूपम्, तदन्तात् स्त्रियां ङीप् प्रत्ययो भवति । अतिमहती, पचन्ती, यजन्ती । धातोरुगितः प्रतिषेधो वक्तव्यः—उखास्रत्, पर्णध्वत् ब्राह्मणी । अञ्चतेश्चोपसंख्यानम्—प्राची, प्रतीची ।

* * * *

ऊङुतः—उकारान्तात् प्रातिपदिकान्मनुष्यजातिवाचिनः स्त्रियामूङ् प्रत्ययो भवति । कुरूः, ब्रह्मसूः । ङकारो ना ् धात्वोरिति विशेषणार्थः । दीर्घोच्चारणं कपो बाधनार्थम् । अयोपधादित्येतदत्रापेक्ष्यते ; अध्वर्युः ब्राह्मणी । अप्राणिजातेश्चारज्ज्वादीनामिति वक्तव्यम्— अलाबूः, कर्कन्धूः । अप्राणि-ग्रहणं किम् ? कृकवाकुः । अरज्ज्वादीना.

R. No. 2824.

Paper. 11 × 9¾ inches. Foll. 62. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of the Raja of Chirakkal, Malabar district.

देवनारायणीयम्.

DĒVANĀRĀYAṆĪYAM.

Foll. 1*a*—61*a*. Foll. 61*b* and 62 are left blank.

A grammatical treatise similar to and written on the lines of Mādhava's Dhātuvṛtti which work has been described under R. No. 1483 of the D.C.S. MSS., Vol. II, Part I-C: by one who says that he is under the orders of the King Dēvanārāyaṇa.

Breaks off in the fourth Pāda in Uṇādi.

Beginning :

देवनारायणक्ष्मापशासनस्थायिना मया ।
धातवोऽत्र विलिख्यन्ते माधवोक्तेन वर्त्मना ॥
उदात्तेत्त्वानुदात्त्वेत्त्वस्वरितेत्त्वविभागकृत् ।
एधादीनुदकोठोन्त्यकहादीनान्त्ववृद्धिकृत् । ?
आदिदीदिच्च निष्ठानामनिट्त्वार्थं कृतावुभौ ॥
भावादिकर्मणोर्वेट् स्यादादितामिति भिद्यते ।
इदित्त्वं हि नुमर्थं स्यादूदित्त्वं त्वेड्विकल्पकृत् ॥
ऌदित्वं लुङ्यङर्थं स्यादेदित्वं सिच्यवृद्धिकृत् ।
निष्ठानत्वार्थमोदित्त्वं ङित्तङर्थौ द्वयाय ञित् ॥
इरित्त्वमङ्विकल्पार्थं षित्त्वं भावेऽङ्विधायकम् ।
ञिर्वर्तमाने क्तार्थोऽयं डुट्शब्दौ क्तूचथुज्झलौ ॥
नकारजावनुस्वारपञ्चमौ झलि धातुषु ।

सकारजश्शकारश्च षड्वर्गस्तदवर्गजः ॥
अनुदात्तात्मता धातोरिण्निषेधार्थमुच्यते ।
उदात्तेत्त्वं च सेट्त्वार्थमिति सर्वत्र दृश्यताम् ॥

भू—सत्तायाम्, उदात्तः, परस्मैभाष इति । भूः इति धातुस्सत्तायां वर्तते । उदात्त इत्यनुदात्ततयेण्णिषेधस्याभावात् सेडित्यर्थः । परस्मैभाषः परस्मैपदी । सत्तायामित्यर्थोक्तिरुपलक्षणम् । पुत्रो भवतीति जनने । भवत्यसावित्यैश्वर्यप्राप्तौ ॥

* * * *

Colophon:

इति भूवादिखण्डः । शब्विकरणं समाप्तम् ॥

* * * *

Colophon:

इति द्वितीयः पादः ।

End:

इति तृतीयः पादः ॥

वातप्रमीः मृगविशेषः । देवयजीरित्यपि कौमुद्याम् । देवान् यजतॊत्यर्थे बाहुलकादीप्रत्ययः प्रसाद उक्तः । बाहुलकादिप्रत्ययादिदन्त एवायमिति शङ्करः ।

* * * *

विस्तरस्तु भोजोक्तितो ग्राह्यः । भृवम्यमिकुम्यश्शक् । भशं वंशः अंशः कुशः । गुगम्यमितुदिमदिभ्यः छक् । गवन्ते भृङ्गा अत्र गुच्छः । किच्चादनुदात्तोपदेशेति न लोपः । गच्छो गतसङ्ख्या । अच्छः । तुटति व्यथयत्यपर्याप्तत्वात्तुच्छः ।

R. No. 2825.

Paper. 11 × 9½ inches. Foll. 230. Lines, 20 in a page. Grantha. Good.

Transcribed in 1918–19 from a MS. of the Raja of Chirakkal, Malabar district.

प्रपञ्चसारटीका—विज्ञानद्योतिनी.

PRAPAÑCASĀRAṬĪKĀ : VIJÑĀNADYOTINĪ.

Foll. 1*a*—230*a*. Fol. 230*b* is left blank.

A commentary by Trivikrama on the Prapañcasāra of Śaṅkarācārya which work deals with the Mantras, Yantras, Prayōgas, etc., occurring in the various Āgamas—vide No. 7939 of the D.C.S. MSS., Vol. XV. The commentary is called Vijñānadyōtinī.

Contains the Paṭalas 7 to 32 complete.

Beginning:

अथाक्षराणामधिदेवताया इति । तदेवं पुरुषस्य भोगापवर्गहेतुकामाभिधानाभिधेयरूपां सृष्टिमभिधाय पुरुषार्थस्य कारणतत्त्वपरिज्ञानोपायत्वात्तत्परिज्ञानस्य च वाचकज्ञानपूर्वत्वाद्वाचक[स्य]ज्ञानस्य च दीक्षामूलत्वाद्दीक्षाश्चाभिधाय मातृकायास्सर्वार्थपरिज्ञानोपायत्वात्प्रथमं तस्या जपादिविधिमभिदधात्याह मूलाक्षरविकृतौ कथितमिदं वर्णविकृतिबाहुल्यमित्युक्तत्वान्मातृकायाश्च शक्तेस्तत्कारणत्वात् किमर्थं शक्तेर्जपादिविधानं प्रथमं नोच्यते । मूलप्रकृतेर्मन्त्रः परमात्मनो मन्त्रं प्रगवं वान्मद्यासर्वः ? मातृकावर्णविशेषेणैव वक्तुं शक्यते । सर्वव्यवहारस्य च लिपेर्मूलत्वात्प्रथमं तावत्सैव वक्तव्येति प्रथमं सैवोच्यते । तस्मादयमदोषः ।

अथाक्षराणामधिदेवतायास्समन्तबोधस्थितिदीपिकायाः ।
अशेषदुःखप्रशमाय नृणां वक्ष्ये जपादेः परमं विधानम् ॥

अथेति । अनन्तरमक्षराणामधिदेवताया अधीत्याधिक्ये ऐश्वर्ये च । सर्वस्मादधिकाया देवतायास्सर्वैश्वर्यान्विताया वाग्देवताया द्योतनादिगुणयुक्तायास्सर्वाधिक्यसर्वैश्वर्यप्रदायाः । अथवा अधिदेवता(याः)यथोक्तगुणयुक्ताया देवताया अक्षराणां जपादेर्विधानं जपादेरनुष्ठानं वक्ष्ये ।

* * * *

Colophon:

इति विज्ञानद्योतिन्यां त्रिविक्रमकृतायां प्रपञ्चसारटीकायां सप्तमः पटलः ॥

End:

दुःखमेव सर्वं विरोधिन इति भगवान् पतञ्जलिः । अनिष्टं जन्ममरणादिसंस्कारः आत्मनि देहे आत्मबुद्धित्वसम्बन्धी . . . . . क्षेषु पुत्रादिषु स्वे स्वमतिस्तदेतत्संसारस्तद्यथात्मज्ञापनसमर्थोऽनिष्टसंहर्ता . . . . दान्तो जितेन्द्रियः । तपःक्लेशसहो दान्त इति हलायुधः । अदान्त अ-

. . . नामशान्तमना रागाद्यकलुषितचित्तः नितान्तं कान्तविग्रहः अतिशयेन सुन्दरदेहः ।

Colophon :

इति विज्ञानद्योतिन्यां प्रपञ्चसारटीकायां त्रिविक्रमकृतायां द्वात्रिंशत्पटलः ॥

R. No. **2826.**

Paper. 11 × 9⅜ inches. Foll. 120. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1918-19 from a MS. of the Raja of Chirakkal, Malabar district.

याज्ञवल्क्यस्मृतिः, सव्याख्या.

YĀJÑAVALKYASMṚTIḤ WITH COMMENTARY.

Foll. 1*a*—119*a*. Foll. 119*b* and 120 are left blank.

Same text as that described under No. 2676 of the D.C.S. MSS., Vol. V. It is followed by an easy commentary called Bālakrīḍā. By Viśvarūpa.

Contains the third Adhyāya complete.

Beginning :

श्रद्धामव्यभिचरितनिर्व्याजप्राप्तिहेतुतया कण्टकोद्धरणं राजधर्मत्वेनानेकधा व्यवहारप्रकरणे विप्रकीर्णतयोक्तम् । सर्ववर्णानां चाश्रमद्वयसाधारणे . . . . न्तरं प्रसक्तमप्युत्क्रुप्य पूर्वाश्रमशेषभूतां प्रेतशुद्धिमेव तावत्प्रस्तौति । तस्मात्पुनः प्रसक्तमप्याश्रमान्तराभिधानमुत्क्रुप्यते । वर्णमात्रसम्बन्धितयाप्युच्यमाना प्रेतक्रिया तद्व्यतिरेकेणैव यथा स्यात् । प्रतिपत्त्यन्तरं च तच्छरीरस्यारण्यनयनादि । यथोक्तम् । एतद्वै परमं तपो यत्प्रेतमरण्यं नयन्तीति । तदधुना वयोऽवस्थाविशेषेणैव तावत्प्रेतक्रियामाह—

ऊनद्विवर्षं निखनेन्न कुर्यादुदकं ततः ।
आश्मशानादनुव्रज्य इतरो ज्ञातिभिर्मृतः ॥

ऊनद्विवार्षिकोऽमुक(मृत)ः खात्वा गर्ते निखातव्यः । न दाहाद्युदकक्रिया कार्या । यतश्चोदकक्रियानिवृत्तिस्तत एव ज्ञातिभिर्नानुगन्तव्य इत्यर्थः । इतरस्तूर्ध्वं वर्षद्वयादाश्मशानादनुगन्तव्यः । दाहाद्युदकक्रिया तस्य कार्येत्यर्थः ।

यत्तु स्वायम्भुवम्—

ऊनद्विवार्षिकं प्रेतं निदध्युर्बान्धवा बहिः ।
अलङ्कृत्य शु चैभूमावस्थिसञ्चयनादृते ॥

नास्य कार्योऽग्निसंस्कारो नापि कार्योदकक्रिया ।

निवृत्तिस्ततएव ज्ञातिभिः अरण्ये काष्ठवत् त्यक्त्वा क्षिपेयुः । ञ्यह-मेवन्त्विति ।

End:

मानवीयश्चायं सर्वोऽर्थस्स्मार्त इत्येतदपि तन्नमस्कारेणैव स्पष्टीकृतम् । ततश्च वेदविरोधवन्मनुविरोधेऽपि स्मृत्यन्तराणामप्रामाण्यं स्मृत्यन्तरानुसारेणैव मानवेऽपि सन्दिग्धार्थनिर्णयः । मानवीय एवार्थः स्मृत्यन्तरेऽपि यस्मादत-स्सूक्तं नमः कृत्वा स्वयम्भुव इति ।

लब्ध्वा रहस्यानि सुदुर्लभानि यजूंषि शुक्लानि विवस्वतो यः ।
स्वर्गापवर्गावकरोत्प्रकाशौ जयत्यसौ ब्रह्मविदेकहंसः ॥
प्रज्ञापराधादिह यद्दुरुक्तं नोक्तं च सर्वं मन . कुलिन्ना ।
कृपालुभिस्सम्यगमत्सरेण विवेचनीयं स्वमतिप्रभावात् ॥

Colophon:

इति परमभारतयोगीन्द्रप्रणीते धर्मशास्त्रे विश्वरूपकृतबालक्रीडायां तृतीयोऽध्यायः समाप्तिमगमत् ॥

R. No. 2827.

Palm-leaf (Śrītāla). 8⅜ × 1¼ inches. Foll. 40. Lines, 8 in a page. Grantha. Good.

Purchased in 1918–19 from M.R.Ry. Śrīnivāsa Śāstrigaḷ, son of Śēṣa Śāstrigaḷ, Cranganore, Cochin State.

त्रिपुराविंशतिः, सव्याख्या.

TRIPURĀVIMŚATIḤ WITH COMMENTARY.

Foll. 1*a*—40*a*. Foll. 39*b* and 40*b* are left blank.

Same work as that described under R. No. 2500 ante, but with additional stanzas in the end wherein it is stated that the work consists of 21 stanzas and that Rāghavānanda, the commentator, assumed ascetic order on the initiation of Kṛṣṇānandamuni.

Complete.

End:

कर्तृस्वात्मनि लघुशब्दः प्रयुक्त इति लघुस्तुतिरित्यस्या लोके प्रसिद्धिः प्रवृत्तेति ज्ञेयम् । क्षिप्रकरणाद्वार्थतो बहुत्वेऽपि विंशतिश्लोकमितत्वेन वा लघु-स्तुतिः । लघोः ऋज्व्या भक्तान(न)वञ्चयित्वा देव्याः स्तुतिरिति वा लघुस्तुतिः ।

एवमेकाधिक(तया)विंशत्या शारदास्तुतिः ।
लघुभट्टैः(ट्टारकैः)तृ(ःक्ल)प्ता भक्तानां भुक्तिमुक्तिदम् ॥
कृष्णानन्दमुनीश्वरस्य कृपया तुर्याश्रमं योऽश्रमं
प्राप्याम्नायशिरोऽधिरूढमवगम्यात्मानमप्यात्मना ।
साक्षादपि च पद्धतिं शिवमयीमानन्दनाथां गुरो-
रानन्दार्ति(दि)कराघवो मुनिरगात् तृप्तिं समृद्धिं व्यधात् ॥
कृष्णं त्रिलोचन इति त्रिपुरेन्दिरेति ब्रह्मेति वा यदुदितं परतत्त्वमेकम् ।
सच्चित्सुखैकतरवे प्रणतोऽस्मि तस्मै सर्वात्मने सकलबन्धविदारणाय ॥

Colophon:

इति विंशतिव्याख्या समाप्ता ॥

R. No. 2828.

Paper. $11\frac{1}{2} \times 5$ inches. Foll. 207. Lines, 10 in a page. Dēvanāgarī. Good.

Purchased in 1918–19 from M.R.Ry. Śēṣa Śāstrigaḷ of Cranganore, Cochin State.

सिद्धान्तकौमुदीव्याख्या—बृहच्छब्देन्दुशेखरः.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ: BṚHACCHABDĒNDU-ŚĒKHARAḤ.

Fol. 1*a* is left blank.

Same work as that described under No. 1411 of the D.C.S. MSS., Vol. III.

Breaks off in Śabdādhikāra.

R. No. 2829.

Paper. $8\frac{1}{2} \times 4\frac{1}{2}$ inches. Foll. 3. Lines, 11 in a page. Telugu. Fair.

Purchased in 1918–19 from M.R.Ry. Śēṣa Śāstrigaḷ of Cranganore, Cochin State.

चण्डीदण्डकम्.

CAṆḌĪDAṆḌAKAM.

Foll. 1*a*—3*b*.

At the end of the MS. there are five lines of the Śivadaṇḍaka.

A composition in Daṇḍaka metre in praise of Caṇḍī, a manifestation of Śakti: by Mukunda, also called Bālāji, son of Pārvatī and Trivikrama.

Complete.

Beginning:

मधुकैटभमाहिषप्रभेत्री हृदि धूम्रेक्षणचण्डमुण्डहन्त्री ।
मम राजतु रक्तबीजभेत्री सुषमा शुम्भनिशुम्भकालमृत्युः ॥

जयजय जगदम्ब जम्भारिमुख्यामरानेककोटीरकोटीमणीराजिनीराजिताङ्घ्रिद्वयन्यासपीठे नताभीष्टसन्धायिवाग्धोरणीमाधुरीधूतचूताङ्कुरास्वादमाद्यत्पिकीकाकलीके समास्तीर्णकादम्बतूलाढ्यशय्यालसन्मल्लिकातल्लजोल्लासिते पञ्चकब्रह्ममञ्चे निषण्णस्य जोषं जगन्मोहनाकारकामेश्वरस्याङ्कपीठे वसन्त्या भवन्त्या नखांशुस्तवे ।

End:

स्मराविद्धपुङ्खानुपुङ्खाम्बकाघातनिर्भिन्नगात्रास्त्रसद्धन्यसारङ्गशालीननेत्राः करं गृह्णते तस्य वाणी वदेद्यन्मनः कामयेताविरास्ते समस्तं नमस्ते नमः ॥

बालाजीति च यं प्राहुर्मुकुन्द इति यं जगुः ।
चण्डपुष्टिप्रयासाख्यो दण्डकस्तेन निर्मितः ॥

Colophon:

इति श्रीत्रिविक्रमसूरिसूनोः पार्वतीगर्भसंभवस्य मुकुन्दस्य कृतौ चण्डीदण्डकस्समाप्तः ॥

The scribe adds—

श्रीशालीवाहनशके १७६५ शोभकृद्वत्सरज्येष्ठवद्य(शुद्ध)प्रतिपदि लिखितोऽयं रामेण दण्डकः ॥

R. No. **2830.**

Palm-leaf (Śrītāla). 19½ × 2⅛ inches. Foll. 5. Lines, 9 in a page. Telugu. Slightly injured.

Purchased in 1918–19 from M.R.Ry. Śēṣa Śāstrigaḷ of Cranganore, Cochin State.

सेवन्तिकापरिणयम्.

SĒVANTIKĀPARIṆAYAM.

A drama representing the incidents that led to the marriage of Sēvantikā, a princess of the Kēraḷa country, with the prince Gōdavarman: by Śokkanātha, son of Tippādhvarīndra. It was intended to be staged on the occasion of the festival of God Subrahmaṇya in the city called

Subrahmaṇya. A certain Nīlakaṇṭhamakhin is mentioned in the introduction wherein are given also the names of his four elder brothers and of one younger brother of the author: thus Kuppādhvarin, Tirumala, Svāmiyajvan, Sītārāma Śāstrin and Yajñēśvarārya.

Breaks off in the first Act.

Beginning:

पत्या केलिगृहं चिराय बहुभिस्सान्त्वोक्तिभिः प्रापिता
भाषस्वेत्यनुयाचिता शुकवचः श्रुत्वा तदुक्तिभ्रमात् ।
कारा . . . . नितोत्कण्ठेन तेनार्थिता
साचीकृत्य मुखाम्बुजं दिशतु वो गौरी हसन्ती मुदम् ॥

अपि च—

शय्योत्थायमगात्मजा विदधती भूयोऽङ्गभङ्गं तदा
नाभीमूलमुरश्च नाथमसकृत्पश्यन्तमुद्वीक्ष्य सा ।
लज्जानम्रमुखी करेण कुचयोरेकेन कूर्पासकं
सन्नह्यन्त्यपरेण नीविमपि च श्वःश्रेयसायास्तु वः ॥

(नान्द्यन्ते सूत्रधारः) मारिष इतस्तावत् ।

(प्रविश्य पारिपार्श्वकः) भाव एषोऽस्मि.

सू— इह खलु शतमखपवनसखमुखमखभोजिसमाजसभाजितचरणसरोजस्य भगवतो विचित्रचरित्रस्य वल्लीकलत्रस्य सुराग्रगण्यस्य सुब्रह्मण्यस्य महोत्सवदर्शनार्थम्

* * * *

नानादेशसमागतनरनारीजननिवहनिबिडितरथ्यं पृथ्वीतलनैपथ्यं सुब्रह्मण्यं नाम नगरम् ।

* * * *

यतः—

पञ्चषाणि विरचय्य पदानि क्वाहमेष भवभुतिकविः क्व ।
कालिदासकविरीतिरभव्येत्यामनन्ति कवयो हि नवीनाः ॥

अत एव कण्ठरवेणाभिहितं नीलकण्ठमखिनापि—

"कर्णौ निष्करुणं दहन्ति कवयः कस्मादिदानीन्तना" इति ॥

सू—मारिष, मामैवम् । अचिरानुभूतमपि वृत्तान्तं कथं विस्मृतवानसि ।

तिप्पाध्वरीन्द्रतनयो ननु चोक्कनाथनामा विपश्चिदयमद्भुतनाटकेन ।
सन्तोष्य सद्गुणनिधिं बसवक्षितीन्द्रं लब्ध्वाधिकां बहुमतिं स्वपुरं प्रयातः ॥

किञ्च—तदानीमेव तत्सन्निधौ मामाहूय महाराज इत्थमवादीत् ।

पञ्चषदिवसैरेतद्रूपकमभ्यस्य सानुबन्धिजनः ।
अभिनीय भरतदेशिक नन्दय नानाकवीन्द्रसन्दोहम् ॥

पा— . . . . (स्मरणमभिनीय) व्यासक्तचित्तेन मया विस्मृत्यैवमिदमुदीरितमिदानीम् ।

नानादेशसमागतसुमनोवितर्तेमनो विनोदयितुम् ।
तस्यैव तु प्रयोगः प्रभवति सेवन्तिकापरिणयस्य ॥

भवतु पात्रक्लृप्तिं कथं मन्यते भावः ।

* * * *

प्रासङ्गिकमिदं पृच्छामि । तस्य महोपाध्यायस्य तिप्पाध्वरीन्दोरात्मजानामयं ज्यायानयं कनीयानिति क्रमः कथ्यताम् ।

सू—ज्येष्ठः कुप्पाध्वरीन्द्रस्तदनु तिरुमलप्राज्ञवर्योऽतिवाग्मी
पश्चाद्ग्रन्थप्रचारप्रकटितधिषणावैभवस्स्वामियज्वा ।
श्रीसीतारामशास्त्री तदनु तदनुजश्चोक्कनाथस्सुधीन्द्रः
पश्चाद्यज्ञेश्वरार्यो जितविबुधगुरोस्तस्य पुत्राः षडेते ॥

* * * *

गोदवर्ममित्रवर्मणोरतिदारुणं प्रविदारणं चलतीत्येतन्मात्रं मया श्रुतमस्ति ।

म—तदनन्तरं गोदवर्मणा मित्रवर्मा समरधरणौ जीवग्राहं गृहीतः तत्रान्तरे राजभवनरक्षिभिः पुत्रैरपत्यकलत्रप्रमुखः स्वजनस्सर्वोऽपि मूकाम्बिकानगरमानीय निवेशितः । अद्यत्वेतं वृत्तान्तमुपश्रुत्य महाराजो नूतनभवनप्रदानादिपुरस्सरं तदीयजनं बहुप्रकारं बहु मन्यते ।

* * * *

म—मूकाम्बिकापुरमितोऽभिगतस्य राज्ञः
पाणिग्रहो भवति केरलकन्यकायाः । इत्यर्धोक्ते ।

End:

अत एवार्यकौषीतकः तव समागमनिवेदनेनार्यपुत्रं नियच्छाति ।

दे . (सरोषमुपसृत्य) पकडिदो खु दाणिं अय्यवुत्तस्स मइ सिणेहबन्धो
(छा) प्रकटितः खल्विदानीमार्यपुत्रस्य मयि स्नेहबन्धः ।
रा — संभ्रान्तस्तिष्ठति ।
वि । साद्धिही दीए . स्वस्ति भवत्यै ।

R. No. 2831.

Palm-leaf. $17\frac{1}{8} \times 1\frac{3}{8}$ inches. Foll. 247. Lines, 6 in a page. Grantha. Slightly injured.

Purchased in 1918–19 from M.R.Ry. M. Vēdāntācārya of Māṅgāḍu, Chittoor district.

(*a*) योगयाज्ञवल्क्यम्.

YŌGAYĀJÑAVALKYAM.

Foll. 1*a*—31*a*. Fol. 31*b* is left blank.

Slightly different in the beginning and in the end from the work described under No. 4362 of the D.C.S. MSS., Vol. IX.

Complete in 12 Adhyāyas.

Beginning :

बिभ्रज्ज्ञानमयीं मुद्रां निद्राविद्राविणीं सदा ।
हृदि स्फुरतु रामो मे बोधयन्नात्मभावनाम् ॥
याज्ञवल्क्यः—
मुनयः श्रूयतां सर्वे गार्ग्या सह समागताः ।
पद्मासने समासीनं चतुराननमव्ययम् ॥
चराचराणां स्रष्टारं ब्रह्माण परमेष्ठिनम् ।
कदाचित्तत्र गत्वाहं स्तुत्वा स्तोत्रैः प्रणम्य च ॥
पृष्टवानिदमेवाद्य यद्यूयं परिपृच्छथ ।
देवदेव जगन्नाथ चतुर्मुख पितामह ॥
येनाहं यामि निर्वाणं तज्ज्ञानं मोक्षमव्ययम् ।
ज्ञानं च परमं गुह्यं यथावद्ब्रूहि मे प्रभो ॥
मयैवमुक्तो दाक्षिण्यात्स्वयम्भूर्लोकनायकः ।
ममालोच्य प्रसन्नात्मा ज्ञानकर्माण्यभाषत ॥
ज्ञानस्य द्विविधौ ज्ञेयौ पन्थानौ श्रुतिचोदितौ ।
अनुष्ठितौ च विद्वद्भिः प्रवर्तकनिवर्तकौ ॥
वर्णाश्रमाणां यत्कर्म कामसङ्कल्पपूर्वकम् ।
प्रवर्तकं भवेदेतत्पुनरावृत्तिहेतुकम् ॥

End:

ईप्सया यदि शरीरविसर्गं ज्ञातुमिच्छसि सखे तव वक्ष्य ।
व्याहर(न्) प्रणवकं नयबुद्ध्याभिद्य योजय तदात्मनि कायम् ॥
एतत्पवित्रं परमं योगमष्टाङ्गसंयुतम् ।
ज्ञानं पुण्यतमं गुह्यं कीर्तितं ते वरानने ॥
य इदं शृणुयान्नित्यं योगाख्यानं नरोत्तमः ।
सर्वपापविनिर्मुक्तस्सर्वज्ञस्सम्भविष्यति ॥
इत्येवमुक्त्वा भगवान् रहस्ये रहस्यजं मुक्तिकरं च तस्याः ।
योगामृतं बन्धविनाशहेतुं समाधिमास्ते रहसि द्विजेन्द्रः ॥
सा तं सुसंपूज्य मुनिं ब्रुवन्तं विद्यानिधिं ब्रह्मविदां वरिष्ठम् ।
गार्गी प्रणामैश्च सतां वरिष्ठं सदा मुदं प्राप परां वरिष्ठा ॥
योगं सुसङ्गृह्य तदा रहस्ये रहस्यजं मुक्तिकरं च गार्गी ।
संसारमुत्सृज्य मुदान्विता सा परे रहस्ये च तदाविवेश ॥
येन प्रपञ्चं परिपूर्णमेतत् येनैव विश्वं प्रतिभाति सर्वम् ।
तं वासुदेवं श्रुतिमूर्ध्नि जातं नमामि मोक्षप्रदमादिदेवम् ॥
दृष्ट्वा सदास्ते हृदि मूर्ध्नि चैव यदेकमव्यक्तमनन्तरूपम् ।
प्रपञ्चजन्मादिकमप्रमेयं तं वासुदेवं श्रुतिमूलभूतम् ॥
. . . . नमामि मोक्षप्रदमादिदेवम् ॥

Colophon:

इति योगयाज्ञवल्क्ये द्वादशोऽध्यायः ॥

(*b*) दत्तात्रेयबोधः.

DATTĀTRĒYABŌDHAḤ.

Foll. 32*a*—44*a*. Fol. 44*b* is left blank.

Same work as that described under No. 4346 of the D.C.S. MSS., Vol. IX, but slightly different in the beginning and in the end and in the colophon.

Complete.

Beginning:

दत्तात्रेय उवाच—

योगो हि बहुधा ब्रह्मन् तत्त्ववित्कथयामि ते ।
मन्त्रयोगो लयश्चैव हठयोगस्तृतीयकः ॥

राजयोगश्चतुर्थस्स्याद्योगानामुत्तमोत्तमः ।
आरम्भश्च घटश्चैव तथा परिचयस्स्मृतः ॥
निष्पत्तिश्चेत्यवस्था च सर्वत्र परिकीर्तिताः ।
एतेषां लक्षणं वक्ष्ये यदि त्वं श्रोतुमिच्छसि ॥
अग्रे तु मातृकान्यासपूर्वं मन्त्रं जपेत्सुधीः ।
एकेन चापि सिद्धस्स्यान्मन्त्रयोगस्स उच्यते ॥

* * * *

आदिनाथेन सङ्केतास्सार्धकोटि(:) प्रकीर्तिताः ।

साङ्कृतिरुवाच—

भगवन्नादिनाथो हि कोऽयं पुरुष उच्यते ।

दत्तात्रेय उवाच—

देवदेवस्य नामानि आदिनाथो हि कानिचित् ।

* * * *

अहिंसा नियमेष्वेका मुख्या भवति साङ्कृते ।
चतुरशीतिसङ्ख्येषु आसनेषूत्तमं शृणु ॥
आदिनाथेन संप्रोक्तं पद्मासनमिहोच्यते ।
उत्तानौ चरणौ कृत्वा ऊरूसन्ध्योः प्रयत्नतः ॥

End:

महामायाप्रसादेन सर्वेषामेव चित्सुखम् ।
एतत्सर्वं समायुक्तं तामेवाराधयेत्ततः ॥

Colophon:

इति दत्तात्रेयसङ्कृतिसंवादे योगशास्त्रे नानाविधलक्षणलक्षितदत्तात्रेय-कथितं शास्त्रं सम्पूर्णम् ॥

(*c*) हठप्रदीपिका.

HAṬHAPRADĪPIKĀ.

Foll. 45*a*—76*a*. Fol. 76*b* is left blank.

By Svātmārāmayōgīndra. Same work as that described under Nos. 4393 and 4394 of the D.C.S. MSS., Vol. IX, but with colophon, introductory stanzas in the beginning and with slight difference in the end.

Contains one to four Upadēśas complete.

Beginning:

आदिनाथो विरूपाक्षो मत्स्येन्द्रो घानरस्तथा ।
नागार्जिनो मेघनादो चौरङ्गी योगशास्त्रवित् ॥

* * * *

विराजते प्रोन्नतराजसौधमारोढुमिच्छोरधिरोहिणीव ॥

End:

प्रवेशे निर्गमे वामे दक्षिणे चोर्ध्वमप्यथः ।
न यस्य वायुर्वहति स मुक्तो नात्र संशयः ॥
सर्वे लयहठो वायुः राजयोगस्य सिद्धये ।
राजयोगसमारूढः पुरुषः कालवञ्चकः ॥
इति सकलयोगसिद्धात्परिमथितादपकृष्टसारभूतम् ।
इदमनुभवत हठमनग्रं यमीन्द्रा यदि भवतामजरामरत्ववाञ्च्छा ॥

Colophon:

इति स्वात्मारामयोगीन्द्रविरचितायां हठप्रदीपिकायां चतुर्थ उपदेशस्समाप्तः ॥

(*d*) चन्द्रावलोकनम्.

CANDRĀVALŌKANAM.

Foll. 77*a*—79*b*.

Same work as that described under No. 4344 of the D.C.S. MSS., Vol. IX, but with slight difference in the beginning.

Complete.

Beginning:

अथ स्थानानि वक्ष्यामि गुह्यानि तव सुव्रते ।
समाहितेन मनसा शृणुष्वैतानि सुन्दरी ॥
दशद्वारपुरं देहं दशनाडीमहापथम् ।
दशभिर्वायुभिर्व्याप्तं दशेन्द्रियपरिच्छदम् ॥
षडाधारं पवकरं षडन्वयमहापनम् ।
चतुःपीठसमाकीर्णं चतुराम्नायदीपिकम् ॥
बिन्दुं नादं महालिङ्गं शिवशक्तिनिकेतनम् ।
देहं शिवालयं प्रोक्तं सिद्धिदं सर्वदेहिनाम् ॥
गुदमेढ्रान्तरालस्थं मूलाधारत्रिकोणकम् ।
जीवस्य जीवरूपस्य स्थानं तद्धि प्रचक्षते ॥
यत्र कुण्डलिनी नामा परा शक्तिः प्रतिष्ठिता ।
यस्मादुत्पद्यते वायुर्यस्माद्वह्निः प्रवर्तते ॥

यस्मादुत्पद्यते बिन्दुर्यस्मान्नादः प्रवर्तते ।
यस्मादुत्पद्यते हंसो यस्मादुत्पद्यते मनः ॥

* * * *

तदेतत्पूर्णगिर्याख्यं पीठं तव वरानने ।
कण्ठकूपे विशुद्धाख्यं यच्चक्रं षोडशाश्रकम् ॥
नित्याभ्यासरतः कश्चित् गुरुभक्तिश्च निश्चलः ।
सहजं च न जानाति अन्धवत्संप्रवर्तते ॥

(e) खेचरीविद्या.

KHĒCARĪVIDYĀ.

Foll. 80*a*—84*a*. Fol. 84*b* is left blank.

Deals with the attainment of certain supernatural powers by a Yōgin through the knowledge and practice of what is known as Khēcarīvidyā.

Complete.

Beginning:

अथ देवि प्रवक्ष्यामि विद्यां खेचरिसंज्ञिताम् ।
यथा विज्ञातवानस्य लोकेऽस्मिन्नजरामरः ॥
मृत्युव्याधिजराग्रस्ता दृष्टाविव मम प्रिये ।
बुद्धिं दृढतरां कृत्वा खेचरीं तु समभ्यसेत् ॥
जरामृत्युहतिघ्नो यः खेचरीं वेत्ति भूतले ।
ग्रन्थतश्चार्थतश्चैव तदाभ्यासप्रयोगतः ॥
तं देवि सर्वभावेन गुरुं मत्वा समाश्रयेत् ।
दुर्लभा खेचरी विद्या तदभ्यासोऽपि दुर्लभः ॥
अभ्यासं मेलनं चैव युगपन्नैव सिध्यति ।

* * * *

य इदं परमं शास्त्रं यत्र कुत्र प्रकाशयेत् ॥
स शीघ्रं भक्षितो देवी योगिनीभिश्शिवाज्ञया ।
ग्रन्थं सदार्चयेत्तस्य विना कौलिकदर्पणम् ॥

End:

सदा रसनया योगी मार्गं न परिसङ्क्रमेत् ।
एवं द्वादशवर्षान्ते संसिद्धिः परमेश्वरी ॥

शरीरे सकलं विश्वं पश्यत्यात्मा विभेदतः ।
ब्रह्माण्डोऽयं महामार्गे राजादन्तोर्ध्वकुण्डली(?) ॥

Colophon:

इति खेचरीविद्या सम्पूर्णा ॥

Foll. 85*a*—86*a* contain the Lakṣyatraya, 86*a* and 86*b* Vyōmapañcaka, 86*b*—87*b* Navacakraviveka and 88 Ṣōḍaśādhāra.

(*f*) सिद्धविद्यायोगः.

SIDDHAVIDYĀYŌGAḤ.

Foll. 88*b*—95*b*.

Another treatise on Yōga. It deals with the practice of Siddhavidyā.

Complete.

Beginning:

कुण्डलिनीयोग उच्यते—
त्रैलोक्यसिद्धाय शिवाय तस्मै समस्तसिद्धान्तसमाश्रयाय ।
कृत्वा(ता)सनः स्यान्नियमैः प्रसिद्धः सिद्धप्रयोगान् मदभीष्टसिद्धैः ॥
श्रीगोरक्षशिवपरिचयादीरितानन्दलक्ष्मीः
आधिव्याधिप्र(व्य)थितजनि(न)तारक्षणे सव्यपेक्षः ।
प्रथ्वा प्रथ्वा मलहृततमां यैः प्रयोगैः प्रतीतां
नित्यामास्यान्नियतिसचिवो(?) मीलयन्मेघवर्णः ॥
अमृतोद्दीपिनी दिव्या निरपाया निरञ्जना ।
अमनस्का कला कापि जयत्यानन्ददायिनी ॥
अग्नीषोमगणात्मकस्य वपुषः स्रष्टा यथा रक्षिता
संहर्ता च स एक एव भगवान् विश्वाधिको मारुतः ।
रोगास्तस्य हि वैकृतेन वपुषस्तस्मात्तमप्युत्क्रमैः
योगैरौषधकल्पनाभिरथ वा रक्ष्यध्वमात्मेश्वराः ॥
पञ्चभूतात्मनो(को)देहः पञ्चमण्डलपूरितः ।
काठिन्यं पृथिवीमेकां पानीयं तद्द्रवाकृतिः ॥
दीपितं च भवेत्तेजः प्रचारो वायुलक्षणम् ।
आकाशस्सत्त्वतस्सर्वं ज्ञातव्यं योगमिच्छताम् ॥

* * * *

अतीत्यैव च कर्तव्यं स्तोकं स्तोकमनेकधा ।
सर्वेषु योगाभ्यासेषु कार्यमेव न संशयः ॥
यश्चित्तसन्ततगतिस्स लयः प्रदिष्टो वस्तुप्रभञ्जनपिधानकृतोहंऽऽसः ।
यो मन्त्रमूर्तिवशगस्स तु मन्त्रयोगो यश्चित्तवृत्तिरहितस्स तु राजयोगः ॥
मृदुमध्याधिमात्रेषु क्रमान्मन्त्रं लयं हठम् ।
लयमन्त्रहठा राजयोगाद्यष्टाङ्गसंयुतम् ॥

End:

तपांसि यानि कथ्यन्ते यज्ञदानव्रतानि च ।
कोटिकोटिगुणैस्तानि भवन्त्यभ्यासयोगतः ॥
प्रकृत्यैवं गुणा दोषा प्या(व्या)धयो विविधास्तु वै ।
नश्यन्त्यभ्यासयोगेन खं मेघा वायुना यथा ॥

Colophon:

इति सिद्धविद्यायोगस्सम्पूर्णः ॥

(*g*) योगबीजम्.

YŌGABĪJAM.

Foll. 97*a*—108*b*. Foll. 96 and 97*a* contain योगचक्रपीठविषयकश्लोकाः.

Same work as that described under No. 4360 of the D.C.S. MSS., Vol. IX.

Complete.

Colophon:

इति सदाशिवानुगृहीतं योगशास्त्रं परिसमाप्तम् ॥

(*h*) हंसविद्योपासना.

HAṀSAVIDYŌPĀSANĀ.

Foll. 109*a*—115*b*.

A treatise on Yōga dealing with the practice of what is known as Haṁsavidyā.

Complete.

Beginning:

अथ हंसविद्योपासनहंसलक्षणम् ।
वायुस्तेजस्तथाकाशास्त्रिविधो जीवसंज्ञितः ।
जीवस्य प्राण इत्युक्तो वालाग्रशतकल्पितः ॥

इत्यनेन जीवस्य दुर्विज्ञेयत्वमात्रं सूचितम् । अयमेव हंस हंसेति जपतीत्याह—

नाभिस्थाने स्थितं विश्वं शुद्धं तत्त्वं स(सु)निर्मलम् ।
आदित्यमिव दीप्यन्तं रश्मिभिश्चाखिलं शिवम् ॥
सकारं च हकारं च जीवो जपति सर्वदा ।
नाभिरन्ध्राद्विनिष्क्रान्तं विषयव्याप्तिवर्जितम् ॥

End:

उच्चरन् पतितो हंसः [ह]सोहमित्यभिधीयते ।
पूर्वभागो ह्यधो लिङ्गं शिखिन्यां चैव पश्चिमम् ॥
ज्योतिर्लिङ्गं भ्रुवोर्मध्ये रक्तशुक्लात्मकं स्थितम् ।
पूर्वपश्चिमदिग्भागे वज्रे दण्डे व्यवस्थितम् ॥
चतुष्षष्टियोगिनीस्थानं पश्चाल्लिङ्गं प्रकाशते ।
सितासितं परं स्थानं मेदोमज्जास्थिपूरितम् ॥
स्रवन्तं ब्रह्मणः स्थानं न किञ्चिद्भुवनत्रयम् ॥

Colophon:

इति हंसविद्योपासना ॥

(*i*) उपासनासारसङ्ग्रहः.

UPĀSANĀSĀRASAṄGRAHAḤ.

Foll. 116*a*—139*b*.

A treatise on the principles of Yōga as applied to the realization of Ātman (soul) and Paramātman (Supreme Soul).

Deals with the following topics:—

१. आत्मनिर्णयः.
२. सुषुम्नाप्रकरणम्.
३. भूतिपथः.
४. जीवपरमात्मस्वरूपोपासनाप्रकरणम्.
५. अभ्यासभेदः.
६. महामुद्रामुद्रामाहात्म्ये.

Beginning:

आत्मनिर्णयः—

कोऽयमात्मेति? कथमुपास्महे? कतरस्स आत्मा हृदि स्थाने अत ऊर्ध्वं मध्ये अष्टदलपद्मं वर्तते । तन्मध्ये त्रिरेखावलयां कृत्वा वर्तते । तन्मध्ये जीवात्मलिङ्गं ज्योतीरूपमणुमात्रं वर्तते । तस्मिन् सर्वं प्रतिष्ठितं भवति ।

* * * *

सुषुम्नायै कुण्डलिन्यै सुधायै चन्द्रमण्डलात् ।
मनोन्मन्यै नमस्तुभ्यं महाशक्तिचिदात्मिका ॥

सुषुम्नाविषये श्रुतिमाह छान्दोग्ये—

शतं चैका च हृदयस्य नाड्यः तासां मूर्धानमभिनिस्सृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्यादुत्क्रमणे भवति ।

* * * *

Colophon :

इत्युपासनासारसङ्ग्रहे जीवपरमात्मस्वरूपोपासनाप्रकरणम् ॥

End :

यत्र वायुः स्थिरं खे स्यात्सेयं प्रचयभूमिका ।
यत्रात्मना सृष्टिलयौ जीवन्मुक्तिदशां गतः ॥
सहजं कुरुते योगं सेयं निष्पत्तिभूमिका ॥

Colophon :

इत्युपासनासारसङ्ग्रहे अभ्यासयोगप्रकारः ॥

(*j*) योगमार्ताण्डः.

YŌGAMĀRTĀṆḌAḤ.

Foll. 140*a*—143*b*.

The title here given is found on the margin in the MS.

A treatise apparently explaining the six limbs of Yōga, viz., **आसन, प्राणसंरोध, प्रत्याहार, धारण, ध्यान** and **समाधि.**

Breaks off in the Prāṇasaṁrōdha.

Beginning :

द्विजसेवितशाखस्य श्रुतिकल्पतरोः फलम् ।
शमनं भवतापस्य योगं भजत सत्तमाः ॥
आसनं प्राणसंरोधः प्रत्याहारश्च धारणम् ।
ध्यानं समाधिरेतानि योगाङ्गानि भवन्ति षट् ॥
आसनानि च तावन्ति यावन्त्यो जीवजातयः ।
एतेषामतुलान् भेदान् विजानाति महेश्वरः ॥
चतुरशीतिलक्षाणामेकैकं समुदाहृतम् ।
एकं सिद्धासनं नाम द्वितीयं कमलासनम् ॥

End :

चन्द्राङ्गे तु समभ्यस्य सूर्याङ्गे पुनरभ्यसेत् ।
यावत्तुल्या भवेत्सङ्ख्या ततो मुद्रां विवर्जयेत् ॥

न हि पथ्यमपथ्यं वा रसास्सर्वेऽपि नीरसाः ।
अपि भुक्तं विषं घोरं पीयूषमिव जीर्यते ॥
क्षयं कुष्ठगुदावर्तगुल्माजीर्णपुरोगमाः ॥
तस्य दोषाः क्षयं यान्ति महामुद्रां समभ्यसेत् ।
कथितेयं महामुद्रा महासिद्धिकरी नृणाम् ॥

Colophon:

इति महामुद्रा समाप्ता ॥

(*k*) योगतारावली.

YŌGATĀRĀVALĪ.

Foll. 144*a*—145*b*.

By Gōvindabhagavatpūjyapāda. Same work as that described under No. 4356 of the D.C.S. MSS., Vol. IX, but with the additional stanzas at the end as given below.

Complete.

प्रकाशमाने परमात्मभानौ नश्यत्यविद्यातिमिरे समस्ते ।
अहो बुधा निर्मलदृष्टयोऽपि किञ्चिन्न पश्यन्ति जगत्प्रपञ्चम् ॥
अशेषदृश्योत्थितदृष्ट्यग्रानामवस्थितानामिह राजयोगे ।
न जागरो नास्ति सुषुप्तिभावो न जीवितं नो मरणं च किंचित् ॥

* * * *

मार्गे बिन्दुं समाबध्य वह्निं प्रज्वाल्य जीवने ।
शोषयित्वा तु सलिलं तेन कायं दृढं भवेत् ॥

(*l*) त्रिपुरासारसमुच्चयः.

TRIPURĀSĀRASAMUCCAYAḤ.

Foll. 146*a*—161*a*.

By Bhaṭṭanāga. Same work as that described under No. 5651 of the D.C.S. MSS, Vol. XII.

Contains the Adhyāyas three to five complete and six incomplete.

(*m*) त्रिपुरासारसमुच्चयव्याख्या.

TRIPURĀSĀRASAMUCCAYAVYĀKHYĀ.

Foll. 161*b*—178*b*.

Same commentary on the Tripurāsārasamuccaya of Bhaṭṭanāga as that described under No. 5653 of the D.C.S. MSS., Vol. XII. The commentary is called Sampradāyapradīpikā.

Contains the Adhyāyas three to five complete and six incomplete.

(*n*) अमृतसिद्धियोगः.

AMṚTASIDDHIYŌGAḤ.

Foll. 179*a*—188*b*.

By Virūpākṣasiddha. Same work as that described under No. 4341 of the D.C.S. MSS., Vol. IX, but with additional stanzas in the beginning which are given below.

Contains the following topics:—

१. अमृतशरीरविवेकः.
२. सामान्यविवेकः.
३. वह्निविवेकः.
४. वायुविवेकः.
५. बिन्दुविवेकः.
६. चित्तविवेकः.
७. प्रकृतिविवेकः.
८. गुणविवेकः.
९. महामुद्राविवेकः (incomplete).

नाभौ शुभ्रारविन्दे तदुपरि विमलं मण्डलं चण्डरश्मेः
तत्स्थैस्तस्यैकवारं त्रिभुवनजननी धर्मकर्मादघाधाः ? ।
तस्या मध्ये त्रिमार्गे त्रितवतनुपरां चिह्नहस्तां समस्तां
तां वन्दे ज्ञानरूपां मरणभयहरां योगिनीं योगमुद्राम् ॥
श्रीविरूपाक्षनाथाय नमस्सन्तानधारिणे ।
गुरवे सर्ववाहाय सिद्धवर्त्मनि गच्छताम् ॥
अज्ञानविषनिद्रात्मा ज्ञानपीयूषधारया ॥

(*o*) अमरौघप्रबोधः.

AMARAUGHAPRABŌDHAḤ.

Foll. 188*b*—191*a*.

By Gōrakṣanātha. Same work as that described under No. 4339 of the D.C.S. MSS., Vol. IX.

Complete.

Colophon:

इत्यमरौघं गोरक्षविरचितं सम्पूर्णम् ॥

(*p*) गोरक्षशतकम्.

GŌRAKṢAŚATAKAM.

Foll. 191*b*—197*b*.

One hundred stanzas on the practice of Yōga attributed to Gōrakṣa. They deal with the following subjects:—

१. योगसाधनत्रयम्.
२. प्राणसंरोधः.
३. बन्धत्रयम्.
४. समाधिक्रमः.

Complete.

Beginning:

अधुना सिद्धराजेन गोरक्षेण प्रकाशितम् ।
योगसाधनमल्पैस्तु दिवसैः सिद्धिसूचकम् ॥
गुरुवक्त्रप्रसादेन स्वानुभूतं मया हि तत् ।
सम्यग्वक्ष्यामि संसिद्ध्यै विरक्तानां चिदात्मनः ॥

* * * *

मरुज्जयस्य तस्योक्तं साधनत्रयमुत्तमम् ।
मिताहारश्चासनं च शक्तिचालस्तृतीयकः ॥
एतेषां लक्षणं सम्यग्वक्ष्यमाणक्रमेण तु ।
सुस्निग्धमधुराहारः चतुर्थांशविवर्जितः ॥
भुज्यते शिवसंप्रीत्यै मिताहारस्स उच्यते ॥

End:

या बिन्द्वाख्येति धारा विगलितमनसा तां पिबामो न मद्यं
पञ्चानामिन्द्रियाणां विषयनिरसनं चर्वयामो न मांसम् ।
आलिङ्गामो न कान्तां कुशकुटिलतनुं नाडिकां तां सुषुम्नां
शून्ये चित्ते प्रलीने प्रविलयविवश . . . चेन्न योनौ ॥

Colophon:

इति गोरक्षशतकं सम्पूर्णम् ॥

(q) कुण्डलिनीस्तवः.

KUṆḌALINĪSTAVAḤ.

Foll. 198a—199b.

A eulogy on Kuṇḍalī, the presiding deity of that portion of the inner body, called Kuṇḍalinī by the Yōgins.

Complete.

Beginning:

द्वादशा(भ्य)न्तरे सन्ततं चिन्तये कोटिसूर्यप्रतीकाशमीशं विभुम् ।
मूलशक्त्यर्चितं कोटिशीतांशुसंशीतलाङ्गं सदा हंसमीडे स्फुटम् ॥

सुषुम्नान्तसंस्थं परब्रह्मरूपं मुनिस्वान्तवेद्यं महापद्मपीठे ।
निशान्ते दिनान्ते त्रिकाले वसन्तं प्रशान्तं तमीडे गुरुं हंसमूर्तिम् ॥

* * * *

सुषुम्नाख्यरन्ध्रादुदञ्चन्मरीचिं प्रकाशोन्मुखीं तां विमर्शस्वरूपाम् ।
तटित्कोटिकान्तां मृणालाग्रतन्तूल्लसत्सूक्ष्मरूपां भज कुण्डलीं ताम् ॥

End:

इति स्तोत्रमुक्त्वा भजे कुण्डलीं तां तटिद्दण्डकान्तिं सुधाशीतलाङ्गीम् ।
गुरोः सत्कटाक्षात् क्षितौ भुक्तभोगस्सुखी बन्धमुक्तो भवत्येव मर्त्यः ॥

Fol. 200*a* contains Kuṇḍalyupaniṣad.

(*r*) योगसारः.

YŌGASĀRAḤ.

Foll. 200*b*—208*a*. Fol. 208*b* is left blank.

A treatise on Yōga dealing with the topics given below and as taught to Pārvatī by Paramēśvara :—

१. मूलमन्त्रमाहात्म्यम्.
२. नादबिन्दुस्वरूपवर्णनम्.
३. नाडीस्थानपीठचक्रनिर्णयः.
४. योगसाधकक्रमवर्णनम्.

Contains the Paṭalas one to four complete.

Beginning:

श्रीदेव्युवाच—

मूलमन्त्रस्य माहात्म्यं श्रोतुमिच्छामि शङ्कर ।
येन विज्ञानमात्रेण खेचरी समतां व्रजेत् ॥
शृणु देवि प्रवक्ष्यामि गुह्यानां गुह्यमुत्तमम् ।
गोपनीयं प्रयत्नेन त्वया नित्यं वरानने ॥
द्वादशाब्दस्तु शुश्रूषां यः कुर्यादप्रयत्नतः ।
तस्मै वक्ता यथातथ्यं दाताथ ब्रह्मचारिणे ॥

* * * *

मूलमन्त्रस्य माहात्म्यं मोक्षद्वारमपावृतम् ।
मद्भक्त एतद्विज्ञाय कृतकृत्यस्सुखी भवेत् ॥
यस्य देवे परा भक्तिः यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

Colophon:

इति योगसारे प्रथमः पटलः ॥

End:

योगसारमिदं तत्त्वं यो जानाति महामतिः ।
न तस्य किञ्चिदज्ञातं त्रिषु लोकेषु विद्यते ॥
न पुण्यपापे न स्वस्थो न दुःखो न पराजयः ।
न चास्ति पुनरावृत्तिः अस्मिन् संसारमण्डले ॥
सिद्धिश्चेन्नोपतिष्ठेत चञ्चलत्वेन चेतसः ।
तथापि ज्ञानं तत्त्वादौ मुक्त एव न संशयः ॥

Colophon:

इति योगसारे चतुर्थः पटलः ॥

(*s*) स्वरशास्त्रम्.

SVARAŚĀSTRAM.

Foll. 209*b*—223*b*.

Similar to the work described under No. 14014 of the D.C.S. MSS., Vol. XXIV.

Deals with the following topics:—

१. स्वरस्वरूपकथनम्.
२. तत्त्वप्रकरणम्.
३. विषुवोदयः.
४. स्वरप्रश्नः.
५. नाडीराशित्वकल्पनम्.
६. नाडीकालज्ञानम्.
७. आसननिरूपणम्.

Beginning:

श्रीदेव्युवाच—

न तिथिर्न च नक्षत्रं न हरो नैन्दवं बलम् ।
सर्वसिद्धिकरं ज्ञानं कथयस्व मम प्रभो ॥

ईश्वरः—

शृणुष्व कथ्यते देवि देहस्थं ज्ञानमुत्तमम् ।
यस्य विज्ञानमात्रेण सर्वज्ञत्वं प्रजायते ॥
स्वरं तु शृणु देवेशि त्रैलोक्ये कारणं परम् ।
स्वरो वेदाश्च शास्त्राणि स्वरो गान्धर्वमुत्तमम् ॥
स्वरहीनश्च दैवज्ञः अर्थहीनं च यौवनम् ।
शास्त्रहीनं च यद्वक्त्रं शिरोहीनं च यद्वपुः ॥

त्रिमार्गतत्त्वसद्भावं दूतज्ञानं पराजयम् ।
लाभालाभं जयं यस्य कालज्ञानादिवञ्चनम् ॥
* * * *
चन्द्रः स्त्री पुरुषस्सूर्यः चन्द्रः कृष्णो रविस्सितः ।
निर्गमे तु शुभा वामा प्रवेशे दक्षिणा शुभा ॥
शुभकार्ये भवेद्वामा दक्षिणा क्रूरकर्मणि ।
चन्द्रचारे विषं हन्ति सूर्ये बालां वशं नयेत् ॥
* * * *
पृथिव्या स्थूलचिन्ता तु जीवः स्यात्तोयवातयोः ।
तेजसा धातुचिन्ता तु शून्यमाकाशतो व्रजेत् ॥

तत्त्वोदयः—

एवं कर्माणि कुर्वीत श्रुत्वा तत्त्वं वरानने ।
* * * *

Colophon :

इति तत्त्वप्रकरणानि समाप्तानि ॥

End :

उक्तं च स्वरशास्त्रं च दर्शितं वायुलक्षणम् ।
दूतज्ञानं तथा प्रोक्तं न देयं यस्य कस्य चित् ॥
अष्टमं दशमं चैव द्वादशं च चतुर्दशम् ।
षोडशे विषमे लग्ने पुंप्रसूतिर्न संशयः ॥
* * * *
वाच्यौ के जीव्यति प्राणं प्राणे वाचं तथापरे(?) ।
वाचि प्राणेन पश्यान्ते यान्ति निर्वृत्तिमक्षयाम्? ॥
स्वामिन् भृते हि कुरुते नमला नमदीरिताः(?) ।
तस्मात्सत्यं परित्यज्य क्रियामन्यां प्रकुर्वयेत् (?) ॥

(*t*) योगपादः.

YŌGAPĀDAḤ.

Foll. 224*a*—226*b*.

A treatise explaining the principles of Yōga.

Contains the 32nd Paṭala complete, which deals with what is called Ṣaḍādhāra.

Beginning :

निश्वाससंहितायां च

कुर्वन्त्युपासनं केचित् षडाधारे जगत्पतिम् ।
ज्ञात पूर्वं त्वया देव प्रतिपादितमादरात् ॥

आधारं तत्स्वरूपं च उपासनविधिक्रमः(म्)
समाचक्ष्व जगन्नाथ तव दासस्य साम्प्रतम् ॥

देवः—

आधारस्यादिपद्मे तु जारपं मण्डलं मुनिः ।
विचिन्त्य तत्र देवेशं वासुदेवं यजेत्ततः ॥
अनन्ताख्यस्तदाधारः मण्डलं गन्धमात्रकम् ।
सर्वा मिश्रा च शक्तिः स्यात्षाड्गुण्यं तत्र वर्तते ॥
विशेषगुणमाचष्टे येन सिद्धिमवाप्नुयात् ।
नैर्मल्यं देहशुद्धिश्च इन्द्रियाणां प्रसादता ॥

End:

यदा तु कमलं कला कलयति(ते) शलाकां मुदा
तदा विदधते मुदं सुदति भोगसौख्यं मुनिः ।
न बिन्दुपतनं न च श्रमजलं सुधाकर्षणं
सुधाकृतिमधारयन्नहमिवात्मसंमोदते(ने) ॥
इति ते सम्यगाख्यातं षडाधारनिरूपणम् ।
न वक्तव्यं त्वया देवि सत्यं सत्यं वदाम्यहम् ॥

Colophon:

इति योगपादे द्वात्रिंशत्पटलः ॥

(*u*) योगपादव्याख्यानम्.

YŌGAPĀDAVYĀKHYĀNAM.

Foll. 227*a*—229*b*.

A commentary on the work described above. The commentator states that the Ṣaḍādhāra portion deals incidentally with Saṁyama, Pratyāhāra, Dhāraṇa, Dhyāna and Samādhi.

Incomplete.

Beginning:

भवमार्गगतागतस्य पुंसः सरिदेषाखिलदुःखहन्त्रिणी ।
विजयाप्तरमापतेर्दयाहं सततं तां प्रणमामि सिद्धये ॥
पुत्रो यस्य चतुर्मुखः शशिधरो नप्ता रमा नायकी
दासाश्शक्रमुखाः ग्रहा अपि वरं वैकुण्ठमत्यद्भुतम् ।

शय्यानन्तगुणाकरः फणिपतिश्छन्दोमयं वाहनं
तं देवं दयितासमेतमनिशं वन्दे महासिद्धये ॥

इह खलु सकललोकविदितवैभवः भवविमोचनक्षमः भवविमोहहन्ता संसारोदधिनिमग्नानविघ्नेन योगमार्गमनुपन्नयन् षडाधारनिरूपणव्याजेन तृतीयसंयमादिसमाध्यन्तं फलं निरूपयितुं वायुं शिष्यं कृत्वा कुर्वन्त्युपासनमिति प्रश्नप्रतिवचनव्याजेनोपपादयति—आधारेत्यादिना । जगत्पतिमुद्दिश्येत्यर्थः । इतीति इत्थमित्यर्थः । अत्र एवंप्रक्रियप्राणायामादिभिः शुद्धनाडी(स)श्चयस्य उत्तमाद्यसम्भवभेरीशब्दोत्पत्तिकाले सिद्धनमस्कृतमुद्रया वशीकृतेन्द्रियस्य कमलनाभ-

* * * *

देवस्याराधनार्थं त्रिप्रकारा ह्यपेक्षिता भवन्ति ।

End:

चरणारविन्दमभिमर्शाखिलान् ज्ञापयन्ति । कर्ला साधयतीति भावः तथा चे . . . . तं यमी । ज्ञात्वा तत्र स्थितं सोमकलया तत्पद्मं यजेदिति पृथिवीधारण . . . . मिति । अम्मण्डलाभिप्रायेण लिङ्गेऽलङ्कृतषड्दलस्य विलसत्पद्म.

(*v*) साङ्ख्यज्ञानम्, सव्याख्यम्.

SĀṄKHYAJÑĀNAM WITH COMMENTARY.

Foll. 230*a*—233*a*. Fol. 233 contains some passages regarding Yōga.

Explains the 25 Tattvas or fundamental realities recognized in the Sāṅkhya system of philosophy, as viewed from the standpoint of the Advaita-Vēdānta. The work is followed by a commentary. Neither the name of the author of the work nor that of the commentary is given.

Complete.

Beginning:

अतश्शृणु महाश्चर्यं राजयोगाभिधानकम् ।
इमं सद्गुरुणा याति सज्जनो न स्वकर्मभिः ॥
दुष्कराभ्यासयोगेन महायासेन किं फलम् ।
क्षणेन लभते ब्रह्म सद्गुरोरवलोकनात् ॥

बाह्ये चाभ्यन्तरे ब्रह्म सर्वजन्तुषु भासते ।
तथापि गुरुमज्ञात्वा ते न पश्यन्ति तत् पदम् ॥
ज्ञानवैराग्ययोगेन तृणीकृत्य जगत्त्रयम् ।
आदौ सद्गुरुमाश्रित्य तत्त्वज्ञानं समभ्यसेत् ॥

* * * *

पञ्चविंशतितत्त्वानि पञ्चभूतस्थितानि च ।
तानि यो वेत्ति तत्त्वज्ञस्स एव स तु मुक्तिभाक् ॥

एवं पञ्चविंशतितत्त्वपरिज्ञानं मोक्षहेतुरिति प्रतिपाद्याध्यात्मिकाधिभौतिकाधिदैवतपरिज्ञानमपि तत्साधनमिति कृत्वा तत्त्रितयं बहुधा विविच्य प्रदर्शयति—

आध्यात्मिकाधीति ।

आध्यात्मिकाधिभूतिकाधिदैवतनिवेदितक्रमम ।
दशेन्द्रियेषु विभजन् जीवान्तःकरणेषु च ॥

अस्यार्थः—आध्यात्मिकाधिभूतिकाधिदैवतानि च यथाक्रमेण ।

End :

गुरुश्शिष्यं प्रत्युपदिश्य प्रकारान्तरेणापि बोधयति—देहत्रयमिति ।

देहत्रयं प्रथितषोडशकान् विकारान् लिङ्गानि सप्तदशधा नवधा पदार्थान् ।
आत्मानमष्टकविधप्रकृतिस्वभासा ज्ञात्वा तदन्य इति जीवसखो महात्मन् ॥

देहत्रयं देही देहमायास्वरूपभूतस्थूलसूक्ष्मकारणशरीरत्रयम् । प्रथिताः प्रसिद्धा ये षोडशधा विकाराः ।

End :

मुक्तानन्दस्वरूपं च ननु त्वमसि स्थिरं नैतद्देहं नैतद्देहं चेति । यदन्यद्विभाव(यसि त्व)मात्मानं सोऽहमिति सोऽहमिति । ननु भावय सर्वं त्वमात्मानमिति ज्ञानादेव मोक्ष इत्येतद्वाक्यमादराद्गृहीत्वा ज्ञानयोगेऽस्मिन् समाहितमना भव ॥

Colophon :

इति साङ्ख्यज्ञानम् ॥

(*w*) अजपागायत्रीविधानम्.

AJAPĀGĀYATRĪVIDHĀNAM.

Foll. 234*a*—238*b*.

Similar to the work described under No. 7733 of the D.C.S. MSS. Vol. XV.

Complete.

Beginning:

अस्य श्रीअजपागायत्रीमहामन्त्रस्य परमहंस ऋषिः, अव्यक्ता देवी गायत्री छन्दः, परमहंसरूपी श्रीमन्नारायणो देवता, हं बीजं, हंस शक्तिः, सो हं कीलकं, मम अजपागायत्रीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

पूर्वेद्युररुणोदयमारभ्याद्यारुणोदयपर्यन्तं मत्कृतोच्छ्वासनिश्वासात्मकमजपागायत्रीजपमहं षट्छतोत्तरैकविंशतिसहस्रसङ्ख्याकम् ।

End:

सोऽहं कृत्वात्ममन्त्रं प्रथमपरपदव्यत्ययात्सन्धियोगा-
द्वे लुप्तव्यञ्जने द्वे पुनरपि रचयेत् सन्धिमोङ्कारमन्त्रम् ।
कृत्वानुस्वारपूर्वं मधुपरुचिसमां ब्रह्मनाडीं नयेद्यः
मध्ये हंसस्य कुण्डल्यनुभव(वि)गलत्कल्मषा मुक्तिमेति ॥

(*x*) श्रीचक्रलेखनप्रकारः.

ŚRĪCAKRALĒKHANAPRAKĀRAḤ.

Foll. 239*a*—244*a*. Foll. 244*b*--247 are left blank.

Same work as that described under No. 5731 of the D.C.S. MSS., Vol. XII.

Almost complete.

The scribe adds—

प्लवङ्गवर्षे बहुसौख्यकारिणि मघावृतौ पूषणि मेषगे च ।
दर्शे तिथौ रेवतिभे च पुण्ये निशाकरस्यात्मजकस्य वारे ॥
रामानुजेति चार्यस्य द्विजाग्रस्य कलाविदः ।
योगशास्त्रमिदं कोशं ब्रह्मज्ञानां सुखावहम् ॥
पुदुप्पाडित्यग्रहारे विप्रसिंहेन वासिना ।
शेषाख्येण बुधाग्र्येण लेखितं च समाप्तिगम् ॥

R. No. 2832.

Paper. 13 × 8 inches. Foll. 109. Lines, 22 in a page. Dēvanāgarī. Good.

Purchased in 1918–19 from M.R.Ry. C. Sītārāma Sōmayājulugāru of Vizianagram.

Foll. 1—12 are left blank.

वीरमित्रोदयः

VĪRAMITRŌDAYAḤ.

Foll. 13*a*—109*a*. Fol. 109*b* is left blank.

A digest of the Smṛtis and Dharmaśāstras compiled by Mitramiśra, son of Paraśurāma and grandson of Haṁsapaṇḍita of Dūrvāra family and living in Gōpācala. The work is said to have been written at the instance of Vīrasiṁha of the royal family of Kāśi (Benares). The following genealogy of this family, as given in the introduction, is given below :—

Mōhinīmalla alias Mēdinīmalla
|
Arjuna
|
Mallakhāna
|
Pratāparudra
|
Madhukarasāha
|
Vīrasiṁha
|
Jaharsiṁha
|
Vikramāditya

A portion of the work has been printed in the Chowkamba Sanskrit Series; and it is stated therein that it consists of 22 Prakāśas the names of which are noted in the English introduction to the Paribhāṣāprakāśa. The India Office Library Catalogue mention two chapters under No. 1471.

Contains the Lakṣaṇa-Prakāśa which has also been printed in the Chowkamba Sanskrit Series. The topics dealt with therein are given in the introductory stanzas.

Beginning :

कोपाटोपनटत्सरो(टो)द्भटमटद्भ्रूभीषणभ्रूकुटि-
भ्रा[म्यै](म्य)द्भैरवदृष्टिनिर्भरनमद्दर्वीकरोर्वीधरम् ।
गीर्वाणारि[रि](व)पुर्विपाटविकटाभोगत्रु[क]टद्धा(द्धो)टक-
ब्रह्माण्डोरुकटाहकोटि नृहरेरव्याद[य]पूर्वं वपुः ॥
सटाग्रव्यग्रेन्दुस्रवदमृतबिन्दुप्रतिवल-
न्महादैत्यारम्भस्फुरितगुरुसंरम्भरभसः ।
लिहन्नाशाच[कुं]कं हुतवहशिखावद्रसनया
नृसिंहो रंहोभिर्दमयतु मदंहो मदकलम् ॥

* * * *

वा[म]मान्भिन्दन्नवामान् भुवमनुसुखयन् पूरयन्नर्थिकामान्
श्रीमान् भीमानुकारी बहलबलभरैर्मोहिनीमल्लनामा ।
आसीदाशीविषेन्द्रद्युतिधवलयशा भूपचक्रावतंसः
श्रीकाशीराजवंशे विधुरिव जलधौ सर्वभूसार्वभौमः ॥
संग्रामग्रामकामो निरू(रु)ममहिमा सत्त्वविश्रामधाम
क्षामन्नेवारिचक्रं मिहिर इव तमो विक्रमोरुक्रमेण ।
सारैर्मेरोरुदारैरपर इव गिरिर्मेदिनीमल्लनेन
प्रख्यातः क्षोणिचक्रे समजनि नृपतिर्मेदिनीमल्लनामा ॥
निर्यद्भिस्तर्जयद्भिर्विधुमिव जगतीमर्जुनाभैर्यशोभिः
सम्पूर्यावार्यवीर्यो विशि[ष]खवितरणैरर्जुनो दुर्जनानाम् ।
साम्राज्योपार्जुनश्रीरग[त]णितगुणभूरर्जुनप्रांशुबाहु-
र्नाम्नाभूदर्जुनोऽस्मान्नरपतिरतु[लि]लो मेदिनीमल्लभूपात् ॥
बुद्धिः शुद्धिमती क्षमा निरुपमा विद्यानवद्या मनो
गाम्भीर्यैकनिकेतनं वितरणं दीनार्तिनिर्दारणम् ।
आसीदर्जुनभूपतेर्विदधतो विद्रावणं विद्विषां
भूमीनामवनं च कारणवशात्कार्यं यशोऽप्यर्जुनम् ॥
तस्मादाविरभूत्प्रभूतमहिमा भूमीपतेरर्जुनात्
सौजन्यैकनिधिर्गुणैरनवधिर्लावण्यवारांनिधिः ।
भिन्दन्दुर्जनमर्जयन् बहुयशः प्रौढप्रतापोदयैः
दुर्जेयो(जय्यो) मलखाननामनिखिलक्ष्मामण्डलाखण्डलः ॥
यस्मिन् शासति नीतिभिः क्षितिमिमां निर्वैरमासीज(ज्ज)गत्
पारीन्द्रेणक्ष(स)मं करीन्द्ररभसारम्भोऽपि सम्भावितः ।
श्येनः क्रीडति कौतुकी स्म विहगैश्चिक्रीड नक्रैर्ज(र्झ)षः
किं वान्यद्दहनोऽभवत्सह मृगैः शार्दूलविक्रीडितम् ॥
हिमविशदयशोऽभिशोभिताशो महिमतिरोहितवारिधिस्वभावः ।
समजनि मलखानतः प्रतापैस्त्रिजगति रुद्र इव प्रतापरुद्रः ॥
शुचि धनमर्थिनि सहसा यशसा सममानने गुणो जगतः ।
पुत्रे भूरभिदध्रे चेतो रुद्रे प्रतापरुद्रेण ॥

जातः प्रतापरुद्रात्ससमुद्रां पालयन्नवनीम् ।
कृतरिपुकाननदाहो मधुकरसाहो महीपतिः शुशुभे ॥
पृथुः पुण्याभोगैर्विहितहितयोगैरनुदयत्
ब(ख)लाद्योगैर्योगैः कृतसुकृतियोगैरपि गुरुः ।
भुजस्तम्भालम्बालसशयितविश्वंभरतया
बभौ प्रौढोत्साहः स मधुकरसाहः क्षितिपतिः ॥
प्रजागणरुजापहो द्युतिमहोदयाविष्कृतः
सुधांशुरिव मांसलो रसभरैस्सभारञ्जनः ।
प्रदीप्तकुमुदावलिद्विजपतिश्च नक्षत्रपो
नृपो जयति सत्कृपो मधुकरः कृतारित्रपः ॥
विन्यस्य वीरसिंहे भूपतिसिंहे महीभारम् ।
ज्ञानानलमलदाहो मधुकरसाहो दिवं भेजे ॥
अन्तर्गम्भीरतान्धूकृतसलिलनिधिर्लालिताशेषबन्धुः
वु(बु)न्देलानन्दसिन्धुः सुललितललनालोचनेन्दीवरेन्दुः ।
भ्रूभङ्गीलेशभङ्गीकृतरिपुनिवहो नृत्यसंगीतरङ्गी
सन्मातङ्गीतुरङ्गीधरणिपतिरभूद्वीरसिंहो नृसिंहः ॥
अमुष्य प्रस्थाने सति सपदि नानेभनिवहै-
रिहैकोऽपि द्वेषी न खलु रणरोषी समजनि ।
परं तस्थौ दुःस्थो गहनकुहरस्थोऽपि भयतः
क्षिपन्नुच्चैर्दिक्षु भ्रमितचकितं चक्षुरभितः ॥
दानं कल्पमहीरुपो(हो)परि यशः क्षीरोदनीरोपरि
प्रज्ञा शक्रपुरोहितोपरि महासारोऽपि मेरूपरि ।
दावाग्नेरुपरि प्रतापगरिमा कामोपरि श्रीरभूत्
सिंहातिक्रमवीरसिंहनृपतेः किं किं न कस्योपरि ॥

* * * *

शौर्यौदार्यगभीरताधृतिदयादानादिनानागुणा-
नुर्वीदुर्वहभारवत्यहिपतिस्पर्द्धालदोःशालिनि ।
संयोज्यैव जुहारसिंहधरणीधौरेयचूडामणौ
म[ज]ज्जन्ब्रह्मणि वीरसिंहसुकृती तस्थौ स्वयं निर्गुणः ॥

नद्यः स्वादुजला द्रुमाश्च सुफला भूरुर्वरा भूसुरा
वेदध्वानविधूयमानदुरितालोका विशोका बभुः ।
राजन्निती(न्नीति)निरीतिरीति पितरीवोर्वीमिमां शासति
श्रीमद्वीरजुहारसिंहनृपतौ भ्रूभङ्गभग्नद्विषि ॥
सङ्ग्रामोत्कटताण्डवोद्भटभटैरारब्धहेलारूढौ(रब्धहेलाहठैः)
चण्डाडम्बरपूरिताम्बरतर(ट)क्षीराब्धिगोध्रावटैः ।
भूभृत्सिंहजुहारसिंहधरणीजानेः प्रयाणे रणे
शौर्यौदार्यधनोऽपि को नु धरणीचक्रे न चक्रे भयम् ॥
तावद्वीरगभीरहुङ्कृतिरवस्तावद्गजाडम्बर-
स्तावत्तुङ्गतरङ्गरिङ्गणचमत्कारश्चमूनामपि ।
तावत्तोयमहामहीभृदटवीदुर्गग्रहो विद्विषां
यावन्नैव जुहारसिंहनृपतिर्युद्धाय बद्धोत्सवः ॥

* * * *

सत्कीर्तिग्रामदामाभरणभृतजगद्विक्रमादित्यनामा
धाम्नो भूम्ना महिम्ना विघटितरिपुणा विक्रमोपक्रमेण ।
सुप्रांशुः पीवरांसः पृथुभुजपरिघस्तस्य वंशावतंसो
विश्वोदश्चत्प्रशंसो गुणिगणहृदयानन्दनो नन्द(नोऽ)भूत् ॥
आशापूर्तिं प्रकुर्वन्करव(वि)तरणतः पद्मिनीप्राणबन्धुः
प्रोद्यद्दिव्याम्बरश्रीः स्फुटमहिमरुचिः सर्वदा ध्वस्तदोषः ।
जम्भारातेरिहोच्चैरचलसमुदयात्सुप्रभातप्रकाशी
पुत्रो राज्ञः पवित्रो रचयति सुदिनं विक्रमादित्य एव ॥

* * * *

श्रीगोपाचलमौलिमण्डनमणिः श्रीदूरवा(रा)न्वये
श्रीहंसोदयहंसपण्डित इति ख्यातो द्विजाधीश्वरः ।
यं लक्ष्मीश्च सरस्वती च विगतद्वन्द्वं चिरं भेजतुः
भोक्तारं रभसात्समानमुभयोः साम्रापमाव्य(यं)गुणैः ॥
पटु दिक्षु विदिक्षु कुर्वतीनां नटलीलां स्फुटकीर्तिनर्तकीनाम् ।
स्फुरदध्वरधूमधोरणीह च्युतवेणीति जनै[र्यै]रमानि यस्य ।
ततोऽनल इवारणेरतुलधामभूर्भूभुजां
शिरोमणिहरोमणिर्धरणिनामवामभ्रुवः ।

रणी बहुगुणी धनी भुवि वनीपकश्रीखनी
रमारमणमिश्रणी परशुराममिश्रोऽजनि ॥
योनागत्य पुरा पुरारिनगरे विद्यानवद्यार्जिता
श्रीचण्डीश्वरमग्निहोत्रितिलकं लज्जागरीयो गुरुम् ।
शुद्धाशै(सै)व महोद्यमेन बहुधा भान्ती भवन्ती स्थिरा
तद्वंश्येषु कियन्न कल्पलतिकेवाद्यापि सूते फलम् ॥
आस्यारविन्दमनुपास्य गुरोरपास्य
लास्यं चतुर्मुखमखेषु सरस्वतीह ।
सालङ्कृतिश्च सरसा च गुणान्विता च
यस्यातनोति रसने(नो)परि पा(ता)ण्डवानि ॥
अङ्के लोमलतेव शी(सी)मनि दृशोरेकेव रेखाञ्जनी
करतूरीतिलकेव भाल(फल)के धारेव मूर्ध्न्यालकी ।
ऊर्ध्वं भृङ्गपरम्परेव कबरी सौरभ्यलोभाकुला
यस्यैवाध्वरधूमधोरणिरभूदाशाकुरङ्गीदृशः ॥
सुरा(भा)सुरयशोनिधेः सुनिरवद्यविद्यानिधेः
सुचारुकवितानिधेः स्मृतिनिधेः श्रुतिश्रीनिधेः ।
अयं सुकृतगौरवात्परशुराममिश्राद्गुणि(णै)
रनूनगरिमा पितुर्जगति मित्रमिश्रोऽजनि ॥
धर्मार्थैकनिकेतनं विधिमयं कर्मावनीदर्शनं
स्मृत्यम्भोजमहोदयं श्रुतिमयं श्रीवीरमित्रोदयम् ।
द्राक्सिद्धीकृतशुद्धसिद्धिशतया श्रीवीरसिंहाज्ञया
तेने विश्वमुदे पुरे पुरभिदः श्रीमित्रमिश्रः कृती ॥
क्षितितिलकवीरसिंहप्रणयकृताग्रहधीरमित्रमिश्रः ।

उन्मानलक्षणम् ;

गुणिगणहृदयानुरागहेतुं कलयति लक्षितलक्षणप्रकाशम् ॥
लक्षणस्य प्रकाशेऽस्मिन्परिचायु(चिच्यु)षः पुरः ।
उन्मानलक्षणं चाथो मानलक्षणमेव च ॥

* * * *

पार्ष्णिलक्षणमुक्त्वा तु जङ्घलक्षणमेव च ।
अथोक्तं रोमजानूरुकटिस्फिग्गुदलक्षणम् ॥

End:

व्यजनानि च भूयांसि कल्याणानि महान्ति च ।
चतुष्कं हेमदण्डांशं पूजार्थं परिकल्पयेदिति ॥
प्रत्याशं परिवर्धतेऽर्थिनु(जनता)दैत्या(न्या)धनाक्य(न्धकारापहे)
श्रीमद्वीरमृगेन्द्र(दा)नजलधिर्यद्वक्त्रचन्द्रोदये ।
राजादेशितमित्रमिश्रविदुषस्तस्योक्तिभि-
र्निर्मिते ग्रन्थे लक्षणसंग्रहस्य गहनः पूर्तिं प्रकाशोऽगमत् ॥

Colophon:

इति श्रीमत्सकलसामन्तचक्रचूडामणिमरीचिमञ्जरीनीराजितचरणाङ्कलसश्री-(च्छ्री)मन्महाराजाधिराजमधुकरसाहसूनुचतुरुदधिवलयवसुन्धराहृदयपुण्डरीकवि-कासदिन(क)रश्रीमन्महाराजाधिराजश्रीवीरसिंहदेवयोजितश्रीहंसपण्डितात्मजश्री-पर[ह]शुराममिश्रसूनुसकलविद्यापारावारपारीणधुरीणजगद्दारिद्र्यमहागजपारीन्द्रवि-द्वज्जनजीवातुश्रीमित्रमिश्रकृते वीरमित्रोदयाभिधनिबन्धे लक्षणप्रकाशः समाप्तः । सं. १६३३.

R. No. 2833.

Palm-leaf. 17 × 1½ inches. Foll. 52. Lines, 8-9 in a page. Telugu and Grantha. Slightly injured.

Presented in 1918–19 by M.R.Ry. Veṅkaṭagiri Appalācāryar of Triplicane, Madras.

(*a*) तत्त्वचिन्तामणिदीधितिप्रकाशिका.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

Foll. 1*a*—31*b*.

By Gadādharabhaṭṭācārya. Same work as that described under Nos. 4040 and 4041 of the D.C.S. MSS., Vol. VIII.

Contains the Pañcalakṣaṇī incomplete.

(*b*) तर्कसङ्ग्रहवाक्यार्थनिरुक्तिः.

TARKASAṄGRAHAVĀKYĀRTHANIRUKTIḤ.

Foll. 32*a*—52*a*. Fol. 52*b* is left blank.

By Paṭṭābhirāma. Same work as that described under No. 4184 of the D.C.S. MSS., Vol. VIII, but with an additional stanza in the beginning.

Beginning:

विशेषज्ञानलाभाय संप्रदाय(राघवार्य)गुरोः पदम् ।
स्मृत्वा नत्वा च वाक्यार्थनिरुक्तिर्लिख्यते मया ॥

Complete.

R. No. **2834.**

Palm-leaf. 12⅛ × 1½ inches. Foll. 59. Lines, 7 in a page. Telugu. Good.

Presented in 1918-19 by M.R.Ry. Kavirāyuni Veṅkaṭa Śāstrigāru of Sālūr, Vizagapatam district.

सौन्दर्यलहरीव्याख्या—सौभाग्यवर्धनी.

SAUNDARYALAHARĪVYĀKHYĀ: SAUBHĀGYA-VARDHANĪ.

Foll. 1*a*—59*a*. Fol. 59*b* is left blank.

By Kaivalyāśrama. Same commentary as that described under No. 10877 of the D.C.S. MSS., Vol. XIX.

Complete.

The scribe adds—

कार्तिके मासि शुक्लाब्दे सप्तम्यां भानुवासरे ।
सौन्दर्यलहरीटीका लिखिता देवसूरिणा ॥

R. No. **2835.**

Palm-leaf (Śrītāla). 20 × 1⅞ inches. Foll. 72. Lines, 9 in a page. Telugu. Good.

Presented in 1918-19 by M.R.Ry. Veṅkaṭagiri Appalācāryar of Triplicane, Madras.

वेदान्तदीपः.

VEDĀNTADĪPAḤ.

Foll. 1*a*—72*a*. Fol. 72*b* is left blank.

By Bhagavad-Rāmānuja. Same work as that described under No. 5011 of the D.C.S. MSS., Vol. X.

Complete.

R. No. **2836.**

Palm-leaf (Śrītāla). 8⅞ × 1⅞ inches. Foll. 60. Lines, 11 in a page. Grantha Slightly injured.

Presented in 1918-19 by M.R.Ry. Veṅkaṭagiri Appalācāryar of Triplicane, Madras.

(a) गीतार्थसङ्ग्रहः.

GĪTĀRTHASAṄGRAHAḤ.

Foll. 1*a*—3*b*.

By Yāmunācārya. Same work as that described under No. 4876 of the D.C.S. MSS., Vol. X.

Complete.

(b) भगवद्गीता.

BHAGAVADGĪTĀ.

Foll. 4*a*—44*b*.

Same work as that described under No. 1992 of the D.C.S. MSS., Vol. IV, Part I.

Complete.

Fol. 45 contains the Kāvērīstōtra.

(c) विष्णुसहस्रनामस्तोत्रम्.

VIṢṆUSAHASRANĀMASTŌTRAM.

Foll. 46*a*—53*b*.

Same work as that described under No. 9008 of the D.C.S. MSS., Vol. XVII.

Complete.

(d) रामस्तवराजः.

RĀMASTAVARĀJAḤ.

Foll. 54*a*—60*a*. Fol. 60*b* is left blank.

Same work as that described under No. 10303 of the D.C.S. MSS. Vol. XVIII, but with the following colophon.

Complete.

Colophon:

इति ब्रह्माण्डपुराणे रामस्तवराजस्तोत्रं संपूर्णम् ॥

R. No. 2837.

Palm-leaf. 17 × 1¼ inches. Foll. 206. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1918–19 by M.R.Ry. Veṅkaṭagiri Appalācāryar of Triplicane, Madras.

रामायणम्.

RĀMĀYAṆAM.

By Vālmīki. Same work as that described under No. 1806 of the D.C.S. MSS., Vol. IV, Part I.

Contains the first two Kāṇḍas complete.

R. No. 2838.

Palm-leaf. 15¼ × 1⅜ inches. Foll. 144. Lines, 7 in a page. Telugu. Good.

Presented in 1918–19 by M.R.Ry. Survarna Rāma Śāstrulugāru of Bobbili, Vizagapatam district.

Foll. 1—10 are left blank.

प्रपञ्चदर्पणः.

PRAPAÑCADARPAṆAḤ.

Foll. 11*a*—144*a*. Foll. 61*b* and 144*b* are left blank.

A treatise dealing with the topics given below under the three headings, Dharmakhaṇḍa, Arthakhaṇḍa and Kāmakhaṇḍa: by Vēṅkaṭakavisārvabhauma, son of Jōgibhukta and Pārvatī. The names of the author's paternal and maternal grandfathers are given as Rāmbhukta of Kutsagōtra and Acyutarāma, respectively.

Deals with the following topics :—

धर्मखण्डे.

४. जातिभेदतत्कृत्यादिकथनबिम्बः.

५. कार्याकार्यधर्मस्वरूपकथनबिम्बः.

६. दिनकृत्यनिरूपणबिम्बः.

सर्वमतबिम्बः.

स्मार्तबिम्बः.

प्रायश्चित्तबिम्बः.

अर्थखण्डे.

गजाश्वरत्नादिशास्त्रकथनबिम्बः.

सर्वदानबिम्बः.

लोकव्यवहारकथनबिम्बः.

कामखण्डे.

सामुद्रिकावयवलक्षणकथनबिम्बः.

चतुष्षष्टिकलाबिम्बः.

कामबिम्बः.

कान्ताजातिभेदबिम्बः.

मोहबिम्बः.

Complete.

The transcription of this MS. is said to have been begun on Friday, the 11th day of the bright fortnight of the Caitra month in the year Saumya, and completed on Sunday, the 11th day of the bright fortnight of the Śrāvaṇa month in the same year. Ayyalusōmayājula Rāmakṛṇṣa Śāstri wrote it for Raṅga Rao Bahadur.

Beginning:

श्रीसीतारामसर्वज्ञलोकरक्षणकारकः ।
प्रपञ्चदर्पणे पञ्चब्रह्मतत्त्वं गृहाण भो ॥

अथ प्रपञ्चदर्पणाख्यमहाग्रन्थराजे आदौ प्रपञ्चस्वरूपं वक्ष्यामः । पद्म-पुराणे पार्वतीश्वरसंवादे कपिल . . . . ब्रह्ममाहात्म्यस्वरूपनिरूपणे पञ्च-ब्रह्मादिपञ्चत्रिंशत्पञ्चकानि वक्ष्यामि तत्त्वथ(तः) ।

नत्वा श्रीरामपादाब्जं स्मृत्वा मोक्षार्थसिद्धिदम् ।
तारकाभ्यन्तरे पञ्चब्रह्मतत्त्वं तदुच्यते ॥
पञ्चब्रह्मा पञ्चदेवं पञ्चस्थानेषु तत्तथा ।
पञ्चमात्रा पञ्चवाचा पञ्चशून्यं तथैव च ॥
पञ्चावस्थाः पञ्चदेहाः पञ्चमात्रासु संस्थिताः ।

* * * *

अथ पञ्चत्रिंशत्पञ्चभेदान् वक्ष्यामः ।

तारकं दण्डकं चैव कुण्डलं चार्धचन्द्रकम् ।
पञ्चमं बिन्दुसङ्काशं पञ्चब्रह्म सनातनम् ॥
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।
पञ्चदैवतविज्ञेयं पञ्चब्रह्मस्वरूपकम् ॥

* * * *

सीताराम महाबाहो रावणान्तक राघव ।
प्रपञ्चदर्पणे जातिभेदबिम्बं गृहाण भो ॥

Colophon:

इति श्रीसीतारामचन्द्रचरणारविन्दद्वन्द्वमिलिन्दायमानमानसकुत्ससगोत्र-पवित्रारांभुक्तपौत्रजोगिभुक्तपुत्र -अच्युतरामयज्वदौहित्रपार्वतीगर्भशुक्तिमौक्तिका-यमानचतुःषष्टिकलाप्रवीणयोगविद्याधुरीणान्ध्रगीर्वाणरचनाधुरन्धरघनयशोबन्धुर-द्वात्रिंशल्लक्षणाभिरामवेङ्कटकविसार्वभौमविरचिते प्रपञ्चदर्पणाख्यग्रन्थे शैवपुरा-

णीयवामदेवमार्कण्डेयसंवादोक्ताष्टविधविवाहचातुर्वर्ण्यानुलोमविलोमसङ्करतत्कृत्य-सुवर्णादिमानकथनं नाम चतुर्थबिम्बस्समाप्तः ॥

End :

भक्तानां वरदा श्यामा पूर्णकामप्रदा भवेत् ॥
पुन(र)श्चरणकं कर्म श्यामलामन्त्रदीक्षितः ।
सर्वसिद्धिं च लभते श्यामलायाः प्रसादतः ॥
रहस्यं तु मया प्रोक्तं सर्वसिद्धिप्रदायकम् ।
जगन्मोहनदिव्यास्त्रं कामुकानां शुभावहम् ॥

इति श्वःश्रेयसभृङ्गीशतन्त्रे श्रीरतिस्मरसंवादे श्रीराजश्यामलारहस्यपुरश्चरणखण्डे वसन्तभृगुपौर्णमीपुनश्चरणादिजगन्मोहनास्त्रस्वरूपनिरूपणं समाप्तम् ॥

श्रीरामचन्द्र सर्वेश जगन्मोहनकारण ।
प्रपञ्चदर्पणे मोहनाख्यं बिम्बं गृहाण भो ॥

Colophon :

इति श्रीरामचन्द्रचरणारविन्दद्वन्द्वमिलिन्दायमानमानसकुत्ससगोत्रपवित्ररामभुक्तपौत्रजोगिभुक्तपुत्रवेङ्कटकविसार्वभौमरचिते मोहबिम्बं समाप्तः(म्) ॥

R. No. **2839.**

Paper. 12¼ × 4¾ inches. Foll. 131. Lines, 17 in a page. Telugu. Good.

Presented in 1918-19 by M.R.Ry. Susarla Rāma Śāstrulugāru of Bobbili, Vizagapatam district.

(*a*) मीमांसाकौस्तुभः.

MĪMĀṀSĀKAUSTUBHAḤ.

Foll. 1*b*—28*b*.

By Khaṇḍadēva. Same work as that described under No. 4445 of the D.C.S. MSS., Vol. IX.

Contains the second Pāda of the first Adhyāya.

(*b*) न्यायकौस्तुभः.

NYĀYAKAUSTUBHAḤ.

Foll. 29*a*—130*b*. Fol. 131 is left blank.

By Mahādēvapaṇḍita. Same work as that described under No. 4200 of the D.C.S. MSS., Vol. VIII, wherein see for the beginning.

Contains the Śabdakhaṇḍa which wants the beginning but is otherwise complete.

End:

मृगीव चपला मृगचपलेत्यादिभाष्यकारादिप्रयोगसामर्थ्यात्तादृशानुशासनस्यानियतलिङ्गविशेषशब्दपरत्वेनादोषात् । अत एव पार्थ एव धनुर्धर इत्यादावपि नानुपपत्तिरिति दिक् ।

शब्दार्थानामनन्तत्वात्स्वल्पत्वात् संविदो मम ।
मया नोक्तं प्रमेयं यत् बोद्धव्यं तत्सुधीवरैः ॥
नानानिबन्धानालोक्य विभाव्य च पुनः पुनः ।
मयात्र लिखितं यद्यत्तेन तुष्यन्तु तार्किकाः ॥
महाक्लेशतो भावनातश्च सम्यक् मया सङ्गृहीतं प्रमेयं हि यद्यत् ।
अवश्यं सुधीभिस्तदालोचनीयं प्रमादाद्दुरुक्तं हि संशोधनीयम् ॥
यथाश्रुतानां मणिगोचराणां निष्कर्षबोधाय बहूक्तियुक्तः ।
अयं महादेवबुधेन यत्नाच्छम्भोर्दयातो रचितो निबन्धः ॥

Colophon:

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणश्रीमन्मुकुन्दपण्डितात्मजप्रणतामकरो(प)नाममहादेवपण्डितविरचिते न्यायकौस्तुभे शब्दपरिच्छेदस्समाप्तः ॥

समाप्तं च प्रमाणपदार्थनिरूपणम् ॥

R. No. 2840.

Palm-leaf (Śrītāla). 9⅞ × 2¼ inches. Foll. 16. Lines, 9 in a page. Telugu. Good.

Presented in 1918–19 by M.R.Ry. Veṅkaṭagiri Appalācāryar of Triplicane, Madras.

(*a*) कृष्णाष्टोत्तरशतनामावलिः.

KṚṢṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Foll. 1*a*—2*b*.

Same work as that described under No. 8909 of the D.C.S. MSS., Vol. XVII.

Complete.

(b) रामाष्टोत्तरशतनामस्तोत्रम्.

RĀMĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Foll. 3a—11a. Fol. 11b is left blank.

A eulogy on Śrī-Rāma by the repetition of 108 significant names relating to Him.

Complete.

Beginning:

श्रीरामचन्द्र श्रितपारिजात समस्तकल्याणगुणाभिराम ।
सीतामुखाम्भोरुहचञ्चरीको निरन्तरं मङ्गलमातनोतु ॥
श्रीरामचन्द्रकरुणाकर रामचन्द्र राजेन्द्रचन्द्र रघुवंशसमुद्रचन्द्र ।
सुग्रीवनेत्रयुगलोत्पलपूर्णचन्द्र सीतामनःकुमुदचन्द्र नमो नमस्ते ॥

End:

दयारूपे भूपे रघुकुलकलापे समुदय-
द्भुजास्तम्भे डिम्भेतरविजयगुम्भे विहरताम् ।
महावीरे धीरे दशरथकुमारे परिलस-
द्गुणारामे रामे दशमुखविरामे मम मनः ॥

The scribe adds—

पिनाकिनीतीरविलासिनो महद्गिराजतो गङ्गवरस्य नाथः ।
रघूत्तमस्तोत्रमिदं पुराणं नृसिंहनामाख्य(भ्य)लिखत्सुधीरः ॥

(c) कृष्णाष्टोत्तरशतनामस्तोत्रम्.

KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Foll. 12a—13a.

Same work as that described under No. 8890 of the D.C.S. MSS., Vol. XVII.

Complete.

(d) रामाष्टोत्तरशतनामस्तोत्रम्.

RĀMĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Fol. 13.

Same work as that described under Nos. 8974 and 8975 of the D.C.S. MSS., Vol. XVII, but with slight difference in the end and with colophon as given below.

Complete.

End:

य: पठेच्छृणुयाद्वापि भक्तियुक्तेन चेतसा ।
स सर्वमु(र्वैर्मु)च्यते पापैर्नात्र कार्या विचारणा ॥

Colophon:

इति पद्मपुराणे उमामहेश्वरसंवादे श्रीरामाष्टोत्तरशतदिव्यनामस्तोत्रं संपूर्णम् ॥

(*e*) श्रीस्तुतिः.
ŚRĪSTUTIḤ.

Foll. 14*a*—16*b*.

Same work as that described under No. 9779 of the D.C.S. MSS., Vol. XVIII.

Complete.

R. No. 2841.

Palm-leaf. 10⅛ × 1¼ inches. Foll. 42. Lines, 9 in a page. Telugu. Slightly injured.

Presented in 1918–19 by M.R.Ry. Veṅkaṭagiri Appalācāryar of Triplicane, Madras.

कुजादिग्रहचारगणितम्.
KUJĀDIGRAHACĀRAGAṆITAM.

Similar to the work described under No. 13400 of the D.C.S. MSS., Vol. XXIV.

Incomplete.

Beginning:

कुजचारः—

I	
1-18-6.	9-9-11.
2-2-त्या.	10-16-12.
3-9-7.	11-30-1.
5-5-8.	12-19.
6-18-6.	
7-21-10.	II

End:

12	13
2-14-त्या.	2-22-त्या.
5-1-आ.	5-28-4.
6-2-6.	6-28-पु.
0-14-8.	8-20-6.
10-6-रो.	12-1.

R. No. 2842.

Palm-leaf. 20⅝ × 1⅛ inches. Foll. 230. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1918–19 by M.R.Ry. Veṅkaṭagiri Appalācāryar of Triplicane, Madras.

हरिवंशः.

HARIVAṀŚAḤ.

Same work as that described under No. 1968 of the D.C.S. MSS., Vol. IV, Part I, wherein see for the beginning.

Complete in 359 Adhyāyas.

End:

द्वैपायनोष्ठपुटनिस्सृतमप्रमेयं पुण्यं पवित्रमथ पापहरं शिवं च ।
यो भारतं समधिगच्छति वाच्यमानं किं तस्य पुष्करजलैरभिषेचनेन ॥
यो गोशतं कनकशृङ्गखुरं ददाति विप्राय वेदविदुषे विनयान्विताय ।
पुण्यं च भारतकथां च (य)इमां शृणोति तुल्यं फलं भवति तस्य च तस्य चैव ॥

इत्युक्त्वा विररामैव व्यासशिष्यो महातपाः ।
जनमेजयस्तु राजर्षिर्विष्णोर्वंशमनुत्तमम् ॥
श्रुत्वा शशास च नृपो राज्यं निहतकण्टकम् ।

Colophon:

इति हरिवंशे महाभारते हरिवंशभारतश्रवणविधिर्नामैकोनषष्ठ्युत्तरत्रिशततमोऽध्यायः ॥

हरिवंशं संपूर्णम् ॥

R. No. 2843.

Palm-leaf. 12⅜ × ⅝ inches. Foll. 63. Lines, 5 in a page. Grantha and Telugu. Slightly injured.

Presented in 1918–19 by M.R.Ry. Veṅkaṭagiri Appalācāryar of Triplicane, Madras.

(*a*) पुरुषसूक्तम्.

PURUṢASŪKTAM.

Foll. 1*a*—8*a*.

Same work as that described under No. 200 of the D.C.S. MSS., Vol. I, Part II, but without Śānti.

Complete.

(*b*) श्रीसूक्तम्.

ŚRĪSŪKTAM.

Foll. 8*a*—10*a*.

Same work as that described under No. 19 of the D.C.S. MSS., Vol. I, Part I, but without Śānti.

Complete.

(*c*) भूसूक्तम्.

BHŪSŪKTAM.

Foll. 10*b*—11*b*. Foll. 11*b*—12*b* contain Nīlāsūktam.

Same work as that described under No. 216 of the D.C.S. MSS., Vol. I, Part II.

Complete.

(*d*) आशीर्वादऋचः.

ĀŚĪRVĀDARCAḤ.

Foll. 13*a*—29*b*.

Benedictory verses taken from the Taittirīya-Saṁhitā.

Incomplete.

Beginning:

अस्मे देवासो वपुषे चिकित्सत यमाशिरा दम्पती वाममश्नुतः । पुमान् पुत्रो जायते विन्दते वस्वथ विश्वे अरपा एधते गृहः ।

End:

प्रजापतेर्ब्रह्मकोशं ब्रह्म प्रपद्य ओं प्रपद्ये । अन्तरिक्षं म उर्वन्तरं बृहद्भयः । पर्वताश्च यथा पात स्वस्त्या स्वस्तिमान्तया स्वस्त्या स्वस्तिमानसानि.

Foll. 30—31 contain the names of certain Ācāryas (religious teachers) of Śrī-Vaiṣṇava religion and their Taniyans (single stanzas in praise).

(*e*) रङ्गनाथाष्टकम्.

RAṄGANĀTHĀṢṬAKAM.

Foll. 32*a*—33*a*.

Same work as that described under No. 10246 of the D.C.S. MSS., Vol. XVIII, but with additional stanzas in the end.

Complete.

End:

सच्चित्तशायी भुजगेन्द्रशायी नन्दाङ्कशायी कमलाङ्कशायी ।
अम्भोज(धि)शायी वटपत्रशायी श्रीरङ्गशायी रमतां मनो मे ॥
कावेरितीरे कमलाधिलोले बृन्दारमूले स्ति(स्मि)तचारुबा(फा)ले ।
दैत्येन्द्रकालेऽखिललोकमूले श्रीरङ्गमूले रमतां मनो मे ॥
* * * *
अनन्तानन्तशयन पुराण पुरुषोत्तम ।
श्रीरङ्गनाथ जगन्नाथ नाथ तुभ्यं नमो नमः ॥

Foll. 33*b*—37*b* contain the Pañcaśānti, 38*a*—42*b* the Puruṣasūkta and 43*a*—45*a* Śrāddhabhōktṛvaktavyasūktas. Fol. 45*b* is left blank. Foll. 46*a*—48*b* contain the Śrīsūkta and 48*b*—51*a* the Bhūsūkta. Fol. 51*b* is left blank. Foll. 52*a*—53*a* contain the Nṛsiṁhaprapatti. Fol. 53 contains the Nṛsiṁhamaṅgalāśāsana.

(*f*) पार्थसारथिस्तोत्रम्.

PĀRTHASĀRATHISTŌTRAM.

Fol 54.

A eulogy on God Pārthasārathi, a form of Viṣṇu, worshipped in the sacred shrine at Triplicane.

Complete.

Beginning:

श्रीमत्कैरविणीपुरीपरिबृढं धीरं नृसिंहं भजे
पार्थस्यन्दनसारथिं गिरिधरं धाराधरं श्रीधरम् ।
रङ्गेन्द्रं गजसार्वभौमवरदं कोदण्डचण्डायुधं
रामं सोमसमाननं रघुवरं सीतानुरूपाकृतिम् ॥

End:

श्रीपार्थसारथिस्तोत्रं पावनं पापनाशनम् ।
पठेद्यस्तस्य तत्पादपद्मभक्तिर्विवर्धते ॥

(g) हर्यष्टकम्.

HARYAṢṬAKAM.

Foll. 55b—56a.

Same work as that described under R. No. 673 (n) ante, but with additional stanzas in the beginning and in the end.

Complete.

Beginning:

हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः ।
अनिश्च(च्छ)यापि संस्पृष्टो दहत्येव हि पावकः ॥

End:

हर्यष्टकमिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
आयुष्यं बलमारोग्यं यशोवृद्धिं श्रियावहम् ॥

(h) कृष्णाष्टकम्.

KṚṢṆĀṢṬAKAM.

Fol. 56b.

Same work as that described under R. No. 324 (k) ante, but with an additional stanza in the beginning.

Complete.

Beginning:

श्रीवत्साङ्कं महोरस्कं वनमालाविभूषितम् ।
शङ्खचक्रगदापाणिं कृष्णं वन्दे जगद्गुरुम् ॥

(i) रङ्गराजसुप्रभातम्.

RAṄGARĀJASUPRABHĀTAM.

Fol. 57a.

Same work as that described under No. 10258 of the D.C.S. MSS., Vol. XVIII.

Complete.

(j) देवराजसुप्रभातम्.

DĒVARĀJASUPRABHĀTAM.

Foll. 57b–58a. Fol. 58b is left blank.

Same work as that described under No. 10047 of the D.C.S. MSS., Vol. XVIII.

Complete.

(*k*) वेङ्कटेशदयितासुप्रभातम्.

VEṄKAṬĒŚADAYITĀSUPRABHĀTAM.

Foll. 59*a*—61*b*.

Same work as that described under No. 10384 of the D.C.S. MSS., Vol. XVIII, and R. No. 488 (*q*) ante.

Complete.

(*l*) वेङ्कटेशस्तोत्रम्.

VEṄKAṬĒŚASTŌTRAM.

Foll. 61*b*—62*b*.

Same work as that described under No. 10389 of the D.C.S. MSS., Vol. XVIII.

Complete.

R. No. **2844**.

Palm-leaf. 14⅝ × 1¼ inches. Foll. 158. Lines, 7 in a page. Telugu. Good.

Presented in 1918–19 by M.R.Ry. Tātā Cina Gaṅgārāmayyagāru, Palteru, Vizagapatam district.

(*a*) सद्वैद्यजीवनम्.

SADVAIDYAJĪVANAM.

Foll. 1*a*—8*b*.

By Lōlambarāja. Same work as that described under No. 53 on pages 26 and 161 of M. Seshagiri Sastri's Report, No. I.

Contains the first Vilāsa only.

(*b*) सद्वैद्यजीवनव्याख्या—विद्वद्वैद्यरञ्जनी.

SADVAIDYAJĪVANAVYĀKHYĀ: VIDVADVAIDYA-RAÑJANĪ.

Foll. 9*a*—158*b*.

A commentary on the Sadvaidyajīvana of Lōlambarāja which work has been described under No. 53 on pages 26 and 161 of M. Seshagiri Sastri's Report, No. I. By Tātā Sūryanārāyaṇa, son of Vēṅkaṭēśvara and grandson of Gaṅgārāmēśvara of Lōhitagōtra. The author salutes Maṇḍapāka Kāmasūri.

Complete.

Beginning:

लक्ष्मीनारायणौ लोकपितरावादिदम्पती ।
कल्याणसत्रिणौ वन्दे सदाकल्याणसत्रिणौ ॥

दयोदयोज्ज्वलहृदं सुरभासुरभाग्यदम् ।
भजे भजेष्टघटकं विघ्नविघ्नमुमासुतम् ॥
शारदां शारदाम्भोदगौरीं गौरीनुतश्रियम् ।
श्रियं श्रियङ्करीरत्नं रत्नालङ्करणां भजे ॥
गङ्गारामेश्वरं तातकुलीनं भिषगुत्तमम् ।
मण्डपाकान्वयभवं कामसूरिं च नौम्यहम् ॥

ताताभिधाप्रथितलोहितगोत्रपात्रश्रीवेङ्कटेश्वरमनीषिवरात्मजोऽस्मि ।
सङ्कुचावतामभिमतोऽखिलवैद्यराजसंमानितो गुरुनिषेवणहृष्टचेताः ॥
लोलम्बराजकविराजविनिर्मितायाः सद्वैद्यजीवनकृतेरविबोधितायाः ।
व्याख्यां करोमि विदुषां भिषजामपीष्टां तद्रञ्जनीत्यभिधया प्रकटां सुरम्याम् ॥

अथ तत्रभवान् कवी रोलम्बराजः "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे" इत्यालङ्कारिकप्रामाण्यात् काव्यस्यानेकश्रेयस्साधनतां काव्यालापांश्च वर्जयेदिति निषेधशास्त्रस्यासत्काव्यविषयतां च पश्यन् वैद्यजीवनाख्यं काव्यं चिकीर्षुराशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्याशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वाच्चिकीर्षितात्रिघ्नपरिसमाप्तिलक्षणफलसाधनत्वाच्चादौ विशिष्टदेवतावर्णनपूर्वकमात्ममङ्गलाशिषं प्रयुङ्क्ते—प्रकृतीति । प्रकृत्या स्वभावेन सुभगं सुन्दरं गात्रं शरीरं यस्य तत्तथोक्तम् । रमायाः लक्ष्म्याः प्रीत्याः पात्रमास्पदम् ।

* * * *

Colophon :

इति श्रीमत्तातागङ्गारामेश्वरपौत्रवेङ्कटेश्वरपुत्रलोहितसगोत्रश्रीसूर्यनारायणविरचितायां वैद्यजीवनव्याख्यायां विद्वद्वैद्यरञ्जनीसमाख्यायां प्रथमो विलासः ॥

End :

लोलम्बराजः लोलम्बराजनामकः कविः काव्यकर्ता कान्तार्थे कान्तायाः रत्नकलाख्यायाः अर्थे याच्ञायां सत्यां तत्प्रार्थनयेत्यर्थः । अथेमेऽर्थयतेरर्थायानं याच्ञावरोधनमित्यभिधानात् । इदं वैद्यजीवनं नाम काव्यमकृत कृतवान् ।

तर्कव्याकरणच्छन्दोऽलङ्कारादिविदो बुधाः ।
टीकामेतां परिष्कृत्य गृह्णन्तु हतदूषणम् ॥

Colophon:

इति श्रीमत्तातागङ्गारामेश्वरपौत्रवेङ्कटेश्वरपुत्रलोहितसगोत्रसूर्यनारायणविरचितायां वैद्यजीवनव्याख्यायां विद्वद्वैद्यरञ्जनीसमाख्यायां पञ्चमो विलासः ॥

काव्यं समाप्तम् ॥

R. No. 2845.

Palm-leaf (Śrītāla). $20\frac{5}{8} \times 3$ inches. Foll. 450. Lines, 12 in a page. Telugu. Good.

Presented in 1918-19 by M.R.Ry. T. Rāmānuja Rao of Triplicane, Madras.

रामायणम्.

RĀMĀYAṆAM.

Same work as that described under No. 1807 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Kāṇḍas one to six complete.

R. No. 2846.

Paper. $14\frac{3}{8} \times 8\frac{3}{4}$ inches. Foll. 450. Lines, 19 in a page. Dēvanāgarī. Good.

Presented in 1918-19 by M.R.Ry. Śrī-Rājā Jagga Rao Bahadurgaru, Kottah Shermahamadpur, Chicacole post, Ganjam district.

नित्याषोडशिकार्णवः, सव्याख्यः.

NITYĀṢŌḌAŚIKĀRṆAVAḤ WITH COMMENTARY.

Foll. 1*a*—447*a*. Foll. 447*b* and 450 are left blank.

A standard work on the Śāktēya religion. It is followed by a commentary by Bhāskararāya, also called Bhāsurānandanātha, son of Gambhīra and Kōnamāmbā and the pupil of Nṛsiṁhaguru. This commentary is called Sētubandha. The author is said to have received his initiation from Śivadatta. The author has also written a commentary on the Lalitāsahasranāmastōtra—vide R. No. 332 ante.

Complete.

Beginning:

श्रीगम्भीरविपश्चितः पितुरभूद्यः कोनमाम्बोदरे
विद्याष्टादशकस्य मर्मभिदभूद्यः श्रीनृसिंहाद्गुरोः ।
यश्च श्रीशिवदत्तशुक्लचरणैः पूर्णाभिषिक्तोऽभव-
त्स त्रेत्रा त्रिपुरात्रयीति मनुते तामेव नाथत्रयीम् ॥
वामकेश्वरतन्त्रस्थे नित्याषोडशिकार्णवे ।

पूर्वोत्तरचतुश्शत्यौ व्याचष्टे भास्करस्सुधीः ॥
नित्याषोडशिकार्णवनामनि तन्त्रे शिवैकपरतन्त्रे ।
अतिगहने फणिपटले स्पन्दितुमपि कः क्षमो मनुजः ॥
यद्यप्येवमथापि तु पूर्वाचार्यैः प्रदर्शितं स्तोतुम् ।
दृढबन्धैरुद्धर्तुं गुरुभक्त्यैव(प्रव)तोऽस्मि बलात् ॥
नित्याषोडशिकाम्भोधेः परं पारं यियासवः ।
विश्रामैरष्टभिर्युक्तं सेतु(बन्धं)भजन्त्वमुम् ॥
आप्राचः कामरूपात् द्रुहिणसुतनदप्लाविताद्दाप्रतीचो
गान्धारात्सिन्धुसार्द्राद्रघुवरचरितादा च सेतोरवाचः ।
आकेदारादुदीचस्तुहिनगहनतस्सन्ति विद्वत्समाजा
ये ये तानेष यत्नस्सुखयतु समजान् कश्चमत्कर्तुमीष्टे ॥

इह खलु निखिलजनाभिलषणीयं सुखमेव पुरुषार्थः । तच्च कृत्रिममकृत्रिमं चेति द्विविधं क्रमेण काममोक्षपदाभ्यामभिलप्यते । तदुभयसाधनत्वाद्धर्मो धर्मसाधनत्वादर्थोऽपि सर्वाभिलषित एवेति परस्परं तरतमभावापन्ना अपि पुरुषैरर्थ्यमानत्वाविशेषाच्चत्वारोऽपि पुरुषार्था एव । यत्तु स्वविमर्शः पुरुषार्थ इति कल्पसूत्रं तन्मोक्षस्यैवाकृत्रिमसुखत्वान्मुख्यत्वाभिप्रायेणेत्यविरुद्धम् ।

* * * *

अत एव स्वरसादृजुविमर्शिन्यामुक्तम्—

श्रीवामकेश्वरं नाम शास्त्रं तन्त्रं प्रकाशते ।
मध्ये शास्त्रस्य तस्यास्ति नित्याषोडशिकार्णवः ॥

तत्र च द्वे चतुश्शत्याविति । मनोरमायां तु "नित्यानां षोडशीनां च नव तन्त्राणि कृत्स्नशः" इति श्लोकव्याख्यावसरे नित्याषोडशिकार्णवसुन्दरीहृदयवामकेश्वरतन्त्राणि पृथग्गणितानि । परं तु तद्योगिनीहृदय एव "वामकेश्वरतन्त्रेऽस्मिन्नज्ञातार्थास्त्वनेकशः" इति निर्देशः स्वरसविरुद्धम् ।

* * * *

प्राचीनैर्बहुभिर्व्याख्याते एव । परं तु तात्टीका अस्थाने विस्तृताः स्थाने सङ्कुचिताः काचिद्याया(न्याय)विरुद्धाः (क)चित्स्यैक(च्यक्त)मूलश्लोकाः (क)चित्तन्त्रान्तरविरुद्धाः (क)चित्पक्षपातकलुषिता इति तत्तदंशान् परिहृत्यातीव निष्कृष्येतरांशेषु तत्प्रदर्शितदिशैव सङ्क्षिप्य व्याख्यातुमयमुद्योगस्सफल इति सहृदया विदाङ्कुर्वन्तु ॥

इत्यनुबन्धचतुष्टयनिरूपणम् ।

अथात्रोपास्यायाः परमेश्वर्यास्त्रिरूपाण्युपास्तियोग्यानि । तत्राद्यं करचरणाद्यवयवशीलं मन्त्रासिद्धिमतां चक्षुरिन्द्रियपाणीन्द्रिययोर्योग्यम् । ततः पद्मनिभां देवीं बालार्ककिरणारुणामित्यादिना ।

* * * *

तत्र नित्याषोडशिकार्णवं प्रारिप्समानः परमशिवस्तस्य निर्विघ्नपरिसमाप्त्यर्थं मुख्यस्याप्यखण्डरूपस्य वागतीतत्वे साक्षात् स्तोतुमशक्यत्वात् स्थूलारुन्धतीन्यायेन सूक्ष्मरूपद्वारा तदाराधनरूपं मङ्गलमाचरति—गणेशग्रहनक्षत्रेत्यारभ्य नौमि श्रीत्रिपुरामहमित्यन्तैः द्वादशभिः श्लोकैः । अस्य देव्याराधनरूपस्य स्तवस्याप्यनेकश्लोकसमुदायरूपत्वेन तदविघ्नतायै मङ्गलान्तरमावश्यकमित्याशयेन प्रथमतो गणेशस्तव(न)माचरितम् ॥

* * * *

गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीम् ।
देवीं मन्त्रमयीं नौमि मातृकां पीठरूपिणीम् ॥

गणेशा विघ्नेश्वरादिगणेश्वरान्ता एकपञ्चाशद्विनायकमूर्तयः । ग्रहनक्षत्रराशयः प्रसिद्धाः । योगिन्यो डाकिन्यादयस्सप्त देवताः । पीठानि कामरूपादिछायाछत्रान्तान्येकपञ्चाशत् । एवं सप्ताधिकं सार्धशतं देवताः । एतासामेव लघुषोढान्यासाख्यः स्वदेहे प्रक्षेपः परमेश्वरभावापादकोऽष्टमे पटले वक्ष्यते ।

* * * *

Colophon :

इति श्रीभास्करोन्नीते नित्याषोडशिकाम्बुधेः ।
व्याख्याने सेतुबन्धाख्ये विश्रामः प्रथमोऽभवत् ॥

End :

सङ्केतं योऽभिजानाति योगिनीनां भवेत्प्रियः ।
सर्वेप्सितफलप्राप्तिस्सर्वकाम्यफलाश्रयः ॥
यतोऽपि दृश्यते देवि कथञ्चिन्न विचिन्तयेत् ।

सङ्केतत्रयज्ञानमात्रेण योगि(नी)ना दयापात्रं भवति । सर्वेप्सितफलानां प्राप्तिर्यस्य स एतादृशश्च भवति । शास्त्रसमाप्तिद्योतनायैतदेव विशेषणमावर्तयन्नाह—

सर्वकाम्यफलाश्रय इति । एतच्छास्त्रपरमरहस्यसारं निष्कृष्य भूयः स्यात् प्रोक्तमिलनमिति शैवशास्त्रान्तिमसूत्रार्थमर्थेन सङ्क्षिप्ये(प्या)ह—यतोऽपीति सर्वत्र स्वयमेव दृश्यते अतः स्वापेक्षया भिन्नं किमपि न चिन्तयेदित्येतदुपासनासारमिति सर्वं शिवम् ।

इति श्रीभास्करोन्नीते नित्याषोडशिकाम्बुधेः ।
व्याख्याने सेतुबन्धाख्ये विश्रामोऽभवदष्टमः ॥

एवमत्रेदं विचार्यते षष्ठपटलमारभ्योत्तरचतुश्शतीप्रारम्भः । तत्राष्टमपटलारम्भे ग्रन्थकारैरेव सार्धैः पञ्चाशीत्या श्लोकैरित्युक्तत्वात् । सप्तमपटले ८५½ श्लोकाः ।

* * * *

तच्छक्तिपञ्चकं सृष्टेति श्लोकस्य पूर्वोत्तरतन्त्रयोर्वारद्वयं पाठात्तयोरन्यतरस्य परिगणनाभावाभिप्रायेण वा तदुपपत्तिरित्यवधेयम् ॥

Colophon:

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणनिखिलतन्त्रस्वतन्त्रश्रीमद्गम्भीररायभारतीदीक्षितसूरिसूनुना भासुरानन्दनाथदीक्षिताभिधानेन भास्कररायेण प्रणीता नित्याषोडशिकार्णवव्याख्या सेतुबन्धस्सम्पूर्णः ॥

The scribe adds—

श्रीमदुभयकवितावल्लभषड्दर्शिनीपतिश्रीवत्सचिन्तामणिकवितिलकतनयवेङ्कटसत्येशेन लिखितोऽयं ग्रन्थः ॥

R. No. 2847.

Palm-leaf. 14½ × 1½ inches. Foll. 38. Lines, 10 in a page. Telugu. Half the portion is eaten by rats.

Presented in 1918-19 by M.R.Ry. Śukla Kṛṣṇāji, Gujarātipēṭa, Vizagapatam district.

तन्त्रवार्तिकटीका—सुबोधिनी.

TANTRAVĀRTIKAṬĪKĀ : SUBŌDHINĪ.

A commentary on Kumārila-Bhaṭṭa's Tantravārtika,—vide No. 2328 ante : by Annaṁbhaṭṭa.

Begins in the course of the third Pāda of the third Adhyāya and breaks o in the fourth Pāda thereof.

R. No. **2848.**

Palm-leaf. 18 × 1⅝ inches. Foll. 270. Lines, 10 in a page. Telugu. Good.

Presented in 1918–19 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., B.L., Vakil, Tirupati, Chittoor district.

रामायणम्.

RĀMĀYAṆAM.

Same work as that described under No. 1806 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Kāṇḍas one to four complete.

R. No. **2849.**

Palm-leaf. 18 × 1⅝ inches. Foll. 260. Lines, 10 in a page. Telugu. Good.

Presented in 1918–19 by M.R.Ry. N. Kuppusvāmi Ayyagāru, B.A., B.L., Vakil, Tirupati, Chittoor district.

रामायणम्.

RĀMĀYAṆAM.

Same work as that described under No. 1806 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Yuddha- and the Uttara-Kāṇḍas complete.

R. No. **2850.**

Palm-leaf. 6½ × 1¼ inches. Foll. 33. Lines, 7 in a page. Telugu. Good.

Presented in 1918–19 by M.R.Ry. T. Rāmānuja Rao of Triplicane, Madras.

(*a*) सामुद्रिकशास्त्रम्.

SĀMUDRIKAŚĀSTRM.

Foll. 1*a*—10*a*.

Similar to the work described under No. 14004 of the D.C.S. MSS., Vol. XXIV.

Contains the Puruṣalakṣaṇa and the Strīlakṣaṇa.

Beginning:

कर्माणि प्राकृतानीह नराणां भागधेयशः ।
शरीराण्युपचीयन्ते तस्माल्लक्षणमुच्यते ॥
पूर्वमायुः परीक्षेत पश्चाल्लक्षणमुच्यते ।

आयुर्हीने नराणां तु लक्षणं किंप्रयोजनम् ॥
वामभागे च नारीणां पुरुषाणां तु दक्षिणे ।
निर्दिष्टं लक्षणं सर्वं सामुद्रिकवचो यथा ॥
कनिष्ठिकामूलदेशे रेखा याति प्रदेशिनीम् ।
शतं जीवति वर्षाणां पुरुषो नात्र संशयः ॥

* * * *

Colophon:

पुरुषलक्षणं संपूर्णम् ।

स्त्रियाः पादौ परीक्षेत अङ्गुल्यश्च नखास्तथा ।
ओष्टा दन्ताश्च जिह्वा च ललाटं केशसञ्चयम् ॥
पूर्णचन्द्रमुखी कन्या बालसूर्यसमप्रभा ।
विशालनेत्री रक्तोष्ठी सा कन्या लभते सुखम् ॥

End:

स्थानभ्रष्टा ललाटे तु गण्डयोश्च परप्रिया ॥
नयने नासिकायोर्नौ पादयुग्मं तु मध्यमम् ।
ओष्ठद्वये हस्तयुगे कपोलेऽपि च मध्यमम् ॥

Colophon:

स्त्रीलक्षणं संपूर्णम् ॥

Foll. 10*a*—11*a* contain Sāmudrikalakṣaṇa in Telugu Padyas and 11*b*—13*b* Svapnaphala and Praśnaviṣaya in Telugu.

(*b*) స్వరచింతామణిః.

SVARACINTĀMAṆIḤ.

Foll. 14*a*—18*a*.

See the Telugu Part of the Triennial Catalogue for extracts.

Complete.

(*c*) పఞ్చభూతతత్త్వాలు.

PAÑCABHŪTATATTVALU.

Foll. 18*a*—22*b*.

See the Telugu Part of the Triennial Catalogue for extracts.

Complete.

Foll. 23*a*—33*b* contain Jyautiṣaviṣaya in Telugu.

R. No. **2851.**

Palm-leaf. 12¾ × 1⅝ inches. Foll. 29. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1918-19 by M.R.Ry. Śukla Kṛṣṇāji, Gujarātipēṭa, Vizagapatam district.

(*a*) जीवन्मुक्तिविचारः.

JĪVANMUKTIVICĀRAḤ.

Foll. 1*a*—24*b*.

A treatise supporting the view of the Advaitins that there can be such a thing as मुक्ति, i.e., salvation, while alive, which is denied and contradicted by the followers of the Viśiṣṭādvaita-Vēdānta.

Complete.

Beginning:

जगद्ब्रह्मात्मकं सर्वं जानन्त्यद्वैतिनो यतः ।
न निन्दन्ति ततः कंचिज्जडं वाजडमेव वा ॥
एतेषामपि साधूनां भवेत्कोप उपाधितः ।
उपाधिस्तु द्विधा निन्दाकृपाभेदात् प्रकीर्तितः ॥
निन्दके निगमज्ञानां प्रथमोपाधितो भवेत् ।
शिक्षणीये सुते शिष्ये द्वितीयोपाधितो भवेत् ॥
अत्र तु प्रथमोपाधेस्संरम्भोऽयं सभासदः ।
नाहं ततो दूषकः स्यां किं तु दूषकशिक्षकः ॥
शास्त्रीययुक्तितत्त्वज्ञैर्न निन्द्योऽहं महात्मभिः ।

अथ संरम्भोपाधिं दर्शयामः—

आन्ध्रभाषाघटितप्राथमिकपत्रिकाग्रन्थे श्रीमच्छङ्करभगवत्पादादिषु
* * * *

कस्यचित्साङ्केतिकप्रपन्नस्य विप्रतिपत्तिमुपपत्तिभिर्निवारयामः—ननु जीवन्मुक्तिरित्यत्र जीवतो मुक्तिरित्येव खलु विग्रहः, जीवनं च सशरीरत्वं तथा च न ह वै सशरीरस्येत्यादिभिश्श्रुतिभिस्सशरीरस्य मुक्तिनिषेधान्न घटते जीवन्मुक्तिरिति चेन्न ।

End:

सर्वेच्छास्सकलाश्शङ्कास्सर्वेहास्सर्वनिश्चयाः ।
धिया येन परित्यक्तास्स जीवन्मुक्त उच्यते ॥

इत्यादिप्रमाणैः स्पष्टमुच्यते उद्घोष्यते जीवन्मुक्तिः । स्वकपोलबलेनैतेषां प्रमाणानामर्थान्तरपरत्ववादे प्रमाणत्वानभ्युपगमवादे वा कृते चिरन्तनानूनैनः

प्रपञ्चवञ्चितचित्तस्य साङ्केतिकप्रपन्नस्यायं न दोषः, किं तु तच्चित्तस्येति निश्चिनुमः ।

निर्धारितेऽर्थे लेख्येन खलूक्त्वा खलु वाचिकम् । इति न्यायेनान्ध्रभाषापत्रिका व्यर्थेति न लिखिता ॥

(b) भेदखण्डनम्.

BHĒDAKHAṆḌANAM.

Foll. 25a—27a.

Similar to the work described under No. 4695 of the D.C.S. MSS., Vol. IX.

Complete.

Beginning:

श्रीगुरोः करुणालेशात् क्रियते भेदखण्डनम् ।
श्रुत्युक्तं युक्तितस्सन्तः शृणुताद(व)हिता हिताः ॥

जागतोऽयं भेदो वस्तुस्वरूपत्वेन तद्भिन्नधर्मत्वेन च कैश्चिद्वादिभिरङ्गीकृतः । तत्र प्राभाकरास्तावत् घटात्पटो भिन्न इत्यत्र घटप्रतियोगिघटितं पटस्वरूपमेव भेदो न ततोऽतिरिक्त इत्यङ्गीकुर्वते ।

End:

अतः प्रतियोगिनोरन्यत्वे सिद्धे भेदस्सिध्यति । भेदे सिद्धेऽन्यत्वं च सिध्यतीत्यात्माश्रयान्योन्याश्रयचक्रकापत्त्यनवस्थापत्तयः स्युर्दुष्परिहराः । एवमविद्वद्विषयोऽयं दुर्घटोऽपि व्यावहारिको भेदो विद्वद्विषये निरस्यते ॥

Colophon:

इति भेदखण्डनं समाप्तम् ॥

Foll. 27a—29b contain Advaita-Vēdāntaviṣayavacanas.

R. No. 2852.

Paper. $10\frac{3}{4} \times 4\frac{5}{8}$ inches. Foll. 8. Lines, 14 in a page. Dēvanāgarī. Slightly injured.

Presented in 1918–19 by M.R.Ry. Śukla Kṛṣṇāji, Gujarātipēṭa, Vizagapatam district.

मनीषापञ्चकम्, सव्याख्यानम्.

MANĪṢĀPAÑCAKAM WITH COMMENTARY.

Foll. 1a—8a. Fol. 8b contains Vēdāntaviṣayavacanas.

The text is by Śaṅkarācārya and the commentary is by Bālagōpālēndrayati. Same work as that described under No. 4706 of the D.C.S. MSS., Vol. IX, but with difference in the stanza containing the colophon.

Complete.

मनीषापञ्चकस्यैवं कृता टीका मनोहरा ।
बालगोपालेन्द्रनाम्ना मुनिना मधुमञ्जरी ॥

R. No. **2853**.

Paper. $9\frac{3}{4} \times 4\frac{3}{4}$ inches. Foll. 13 Lines, 14 in a page. Dēvanāgarī. Slightly injured.

Presented in 1918-19 by M.R.Ry. Śukla Krṣṇāji, Gujarātipēṭa, Vizagapatam district.

कालमाधवीयम्, सव्याख्यानम्.

KĀLAMĀDHAVĪYAM WITH COMMENTARY.

By Mādhavācārya. Same text as that described under No. 3109 of the D.C.S. MSS., Vol. VI, but without the introductory stanzas. The commentary is by Nārāyaṇa, son of Rāmēśvarasūrin.

Incomplete.

Beginning :

सूरिरामेश्वरस्याद्यस्सूनुर्नारायणः कृती ।
कृतवान् माधवाचार्यस्सङ्ग्रहश्लोकनिर्णयम् ॥

उपोद्घात इति । प्रथमे वादे साङ्ख्यमतमाश्रित्य कालशब्दवाच्यः कश्चिदर्थो नास्तीति पूर्वपक्षीकृत्य वैशेषिकादिमतमाश्रित्य तत्सत्त्वं साधितम् ।

* * * *

उपोद्घाते कालसत्त्वं तस्य निर्णययोग्यता ।
ईश्वरो नित्यकालात्मा चिन्तनीयस्स कर्मसु ॥
तस्य कालेऽब्दमुख्यत्वमुक्तमेतच्चतुष्टयम् ।
अब्दायनर्तुमासाश्च पक्षः प्रकरणान्तरे ॥

अब्देति । तेषु संवत्सरावान्तरविभागं तद्वियोगं च दर्शयति—अब्दः पञ्चविध इति । चान्द्रः, सौरः, सावनः, नाक्षत्रः, बार्हस्पत्यश्चेति । एवं पञ्चविधः संवत्सरः । तिलकव्रतं भविष्यत्पुराणे पठितम् ।

End :

रात्राविति । रात्रौ द्वितीयप्रहरस्य चरमघटिका तृतीयप्रहरस्य प्रथमघटिकेत्येवं घटिकाद्वयात्मकः कालोऽर्धरात्रः ।

कालस्तस्मादधः पूर्वं रात्रौ सङ्क्रमणे सति ।

पूर्वदिने मध्याह्नस्योपरि प्रहरद्वये स्नानादिक्रिया कार्या । अर्धरात्रादूर्ध्वं सङ्क्रमणे सति उत्तरकाली.

R. No. 2854.

Palm-leaf. 16½ × 1⅝ inches. Foll. 84. Lines, 5 in a page. Telugu. Good.

Presented in 1918–19 by M.R.Ry. Suvarṇa Narasiṁha Śāstrulugāru of Bobbili, Vizagapatam district.

(*a*) काव्यप्रकाशः.

KĀVYAPRAKĀŚAḤ.

Foll. 1*a*—8*a*. Foll. 8*b* and 9 are left blank.

Same work as that described under No. 12816 of the D.C.S. MSS., Vol. XXII. By Mammaṭa.

Incomplete.

(*b*) काव्यप्रकाशव्याख्या—ऋजुवृत्तिः.

KĀVYAPRAKĀŚAVYĀKHYĀ : ṚJUVṚTTIḤ.

Foll. 10*a*—84*a*. Fol. 84*b* is left blank.

Same work as that described under R. No. 381 ante, but without the introductory stanzas in the beginning. By Narasiṁhasūrin.

Breaks off in the fourth Ullāsa.

R. No. 2855.

Palm-leaf. 14 × 1½ inches. Foll. 79. Lines, 5 in a page. Telugu. Good.

Presented in 1918–19 by M.R.Ry. Suvarṇa Narasiṁha Śāstrulugāru of Bobbili, Vizagapatam district.

गोवर्धनार्यासप्तशतीव्याख्या.

GŌVARDHANĀRYĀSAPTAŚATĪVYĀKHYĀ.

A commentary on the Gōvardhanāryāsaptaśatī which work has been described under No. 11968 of the D.C.S. MSS., Vol. XX. The name of the commentator is not given.

Contains 84 stanzas.

Beginning:

अथ सकलकविलोकाचार्यो गोवर्धनार्यो लु(?)कारादिक्रमेण प्र(?)ज्यारूपामार्यासप्तशतीं निर्विघ्नमाशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्यालङ्कारिकोक्तरीत्याशीराद्यन्यतमस्य काव्यमुखत्वात् प्रथमतो जयतीत्यादि व्यङ्ग्यं शिवादिनमस्कारं निर्दिशन् तत्र प्रथमतो नवभिः श्लोकैः शिवं वर्णयति —पाणिग्रहण इति । पाणिग्रहणे विवाहे पार्वतीकरस्पर्शनकाले सात्त्विकवशात्पुलकितमीशमीश-

सम्बन्धं तद्वपुः शरीरं जयति सर्वोत्कर्षेण वर्तते । वपुः किम्भूतं भूतिभूषितम् । भूत्या भस्मना भूषितमलङ्कृतम् । भूतिर्भस्मनि सम्पदीत्यमरः ।

End :

दृष्टिः किम्भूता दर्शितनिरालोकत . . . सहितेत्यर्थः । किंच निरन्तराला अच्छिद्रा निर्निमेषा का इदं विमुखमग्रे यान्तमित्यर्थः । भगीरथं गङ्गेव गङ्गा च दर्शितनीरा दर्शितजला निरन्तराला । अच्छिद्रावकाशा जल . . . वदनादित्यर्थः । विमुखस्य भगीरथस्य पश्चाद्यथा गङ्गा धावति तथा विमुखमपि त्वां वाञ्छतीत्यर्थः ॥

R. No. **2856.**

Palm-leaf. $13\frac{7}{8} \times 1\frac{1}{8}$ inches. Foll. 127. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1918-19 by M.R.Ry. Suvarṇa Narasiṁha Śāstrulugāru of Bobbili, Vizagapatam district.

Fol. 92*b* is left blank.

पूजासङ्ग्रहः.

PŪJĀSAṄGRAHAḤ.

A collection of extracts from several Saṁhitās dealing with details connected with the temple festivals.

Foll.	Saṁhitā.	Adhyāya.	Subjects dealt with.
1*a*—1*b*	परमपुरुषसंहिता ...	22nd	मृगुप्तिविधिः.
1*b*—6*b*	पाद्मे चर्यापादे ...	17th	जीर्णोद्धारणसंप्रोक्षणविधिः.
6*b*—14*a*	विष्णुरहस्ये ...	8th	ग्रामशान्तिविधिः.
14*b*—21*b*	परमपुरुषसंहिता ...	18th	दिशाहोमविधिः.
25*b*—26*b*	do. ...	29th	प्रायश्चित्तविधिः.
26*b*—35*b*	do. ...	10th	महोत्सवप्रायश्चित्तविधिः.
35*b*—56*a*	विष्वक्सेनसंहिता ...	39th	प्रायश्चित्तविधिः.
56*b*—58*a*	नारायणसंहिता ...	45th	उत्तरदक्षिणकवाटमोचन - प्रायश्चित्तम्.
58*a*—58*b*	do. ...	...	उत्सवप्रायश्चित्ताध्यायः.
58*b*—66*b*	अगस्त्यसंहिता ...	9th	पवित्रारोपणविधिः.
66*b*—67*a*	do. ...	10th	तन्त्रसङ्करभेदः.

Foll.	Samhitā.		Adhyāya.	Subjects dealt with.
67*b*—98*a*	नारायणसंहिता	...	21st	....
98*a*—101*b*	ब्रह्मसंहिता	...	21st	मरणप्रोक्षणनिर्णयः.
101*b*—102*b*	नारदसंहिता	...	...	मरणप्रायश्चित्तविधिः.
102*b*—106*b*	जयोत्तरसंहिता	...	...	रथारोहणप्रायश्चित्तम्.
106*a*—107*a*	पौष्करसंहिता	...	44th	वर्षबिन्दुपतनप्रायश्चित्तम्.
107*a*—109*a*	do.	...	...	अशनिपातप्रायश्चित्तम्.
109*a*—121*b*	कश्यपसंहिता	...	...	भूगुप्तप्रायश्चित्तप्रोक्षणपटलः.
121*b*—125	पौष्करसंहिता	...	...	भूगुप्तविधानप्रायश्चित्तम्.

Wants the beginning.

Beginning:

. . . . . . त्मानं मूलबेरं प्रचक्षते ।
प्रासादस्य च कर्माणि मूलबेरे च कारयेत् ॥
प्रोक्षणादीनि कर्माणि प्रायश्चित्तानि सर्वशः ।
शयने मूलबेरस्य तत्तच्छक्तिं न्यसेत्ततः ॥
शय्याबिम्बे च विप्रेन्द्र शय्यापूजां समारभेत् ।
तत्तद्बिम्बं प्रसुप्तं च तत्तच्छक्तिं न्यसेत्ततः ॥

* * * *

Colophon:

इति श्रीपाञ्चरात्रे परमपुरुषसंहितायां भूगुप्तिविधिर्नाम द्वाविंशोऽध्यायः ॥

End:

सदा विष्णुं महाविष्णुं विष्णौ तु कमलोद्भव ।
आवाहयेत्तथा पश्चाज्जगत्स्थित्यन्तकारणम् ॥
स्थिते तु मूलबेरे च वट्षडक्षरविद्यया ।
मूलबिम्बार्चकुम्भेषु मच्छक्तिं च समाह्वयेत् ॥
पुण्डरीकाक्षमन्त्राणां देशिकस्तन्त्रपारगः ।
अर्चने पूर्ववत्कुर्यात् तदावाहनमीरितः ॥
स्थितिक्रमं चतुर्वक्त्र

R. No. **2857.**

Palm-leaf. 14⅜ × 1½ inches. Foll. 229. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1918-19 by M.R.Ry. T. E. Tiruvēṅkaṭācārlu of Mandasa, Ganjam district.

मुक्तावलीव्याख्या—तार्किकसिद्धान्तरत्नमञ्जूषा.

MUKTĀVALĪVYĀKHYĀ : TĀRKIKASIDDHĀNTA-RATNAMAÑJŪṢĀ.

Foll. 1*a*—185*b*.

By Paṭṭābhirāma Śāstrin. Same work as that described under No. 3977 of the D.C.S. MSS., Vol. VIII.

Contains the Pratyakṣa incomplete.

R. No. **2858.**

Palm-leaf (Śrītāla). 14 × 1¾ inches. Foll. 49. Lines, 9 in a page. Malayālam. Good.

Presented in 1918-19 by M.R.Ry. Rāghava Nambi, Muḷikulam.

मालतीमाधवव्याख्या.

MĀLATĪMĀDHAVAVYĀKHYĀ.

A commentary on the Mālatīmādhava of Bhavabhūti described under No. 12589 of the D.C.S. MSS., Vol. XXI : by Pūrṇasarasvatī.

Contains from the fifth Act (wants the beginning) to the seventh Act which is incomplete.

Beginning :

. . . . हरेः भजन्नपक्कोऽथ पतेत्ततो यदि ।
यत्र क वाट्टभद्रदमुष्य ? किं को वार्थ आप्तो भजतां स्वधर्मतः ॥

इत्यादिभिः प्रतिपादितां परमेश्वरभक्तिं

यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमां लोकान्न हन्ति न निबध्यते ॥

इति ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुते तथेति

* * * *

वसोरुपरिचरस्य राजर्षेः वसुसंज्ञया प्रसिद्धस्येति समग्रशक्तित्रयत्वं प्रकाश्यते । सुतेत्येकापत्यत्वमाह—मृत्योर्यमस्य मुख इति । अनन्तरमेव जिघांसितत्वान्मृत्योर्मुखं प्रविष्टेव न निगीर्णेत्येतावानस्माकमाश्वास इत्यर्थः ।

* * * *

युद्धं कापालिकवधं चोपरि विष्कम्भकेण सूचयिष्यन् पात्रनिष्क्रमणेनाङ्कं परिसमापयतीत्यशेषमतिमङ्गलम् ॥

Colophon:

मालतीमाधवस्येत्थं पञ्चमाङ्कार्थचर्चनम् ।
पूर्णज्योतिःप्रसादेन चक्रे पूर्णसरस्वती ॥

End:

उभयलोकोपकारकं कविकुलमुकुन्दः कन्दलयतीत्यशेषमतिमङ्गलम् ॥

Colophon:

मालतीमाधवस्येत्थं षष्ठाङ्कार्थस्य वर्णनः(म्) ।
पूर्णज्योतिःप्रसादेन च(क्रे) पूर्णसरस्वती ॥

अथ पताकानायकवृत्तान्तस्य पृथक्प्रतिपादनाय प्रवेशमारभते—ततः प्रविशतीति । नियुक्तेव हि मया तत्र सखी बुद्धरक्षितेति मदयन्तिकासमागमने नियुक्तत्वात् बुद्धरक्षिता ।

* * * *

भारती तया भरितं पूरितं कर्णविवरं श्रवणरन्ध्रं यथा भवति तथा व्याहरति कथयति । अथ व्याहरन् कोपोद्वृत्तोत्तरीयाञ्चलावलम्बनपराभवसमुत्तरङ्गनिश्श्वासधमधमायमानहृदया समु.

R. No. 2859.

Palm-leaf. 18 × 1¼ inches. Foll. 281. Lines, 7 in a page. Telugu. Good.

Presented in 1918–19 by M.R.Ry. Vēṅkaṭagiri Appalācāryar of Triplicane.

रामायणम्.

RĀMĀYAṆAM.

Same work as that described under No. 1806 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Yuddhakāṇḍa complete.

R. No. 2860.

Palm-leaf. 17⅜ × 1⅝ inches. Foll. 224. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1918–19 by M.R.Ry. Vēṅkaṭagiri Appalācāryar of Triplicane.

भागवतम्.

BHĀGAVATAM.

Same work as that described under No. 2161 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Skandhas 10—12 complete.

R. No. **2861.**

Palm-leaf. 18 × 1⅜ inches. Foll. 175. Lines, 6 in a page. Telugu. Injured.

Presented in 1918–19 by M.R.Ry. Vēṅkaṭagiri Appalācāryar of Triplicane.

भागवतव्याख्या—मुनिभावप्रकाशिका.

BHĀGAVATAVYĀKHYĀ : MUNIBHĀVAPRAKĀŚIKĀ.

Same work as that described under No. 2229 of the D.C.S. MSS., Vol. IV, Part I. By Kṛṣṇaguru of Bhāradvājagōtra, son of Nṛsiṁhaguru and nephew of Rāmadēśika.

Contains the Adhyāyas 1—38 in the tenth Skandha.

R. No. **2862.**

Palm-leaf. 11 × 1⅞ inches. Foll. 40. Lines, 16 in a page. Grantha. Slightly injured.

Presented in 1918–19 by M.R.Ry. Vēṅkaṭagiri Appalācāryar of Triplicane.

रामायणम्.

RĀMĀYAṆAM.

Same work as that described under No. 1806 of the D.C.S. MSS., Vol. IV, Part I.

Breaks off in the 27th Sarga of the Sundarakāṇḍa.

R. No. **2863.**

Palm-leaf. 16⅝ × 1½ inches. Foll. 150. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1918–19 by M.R.Ry. Vēṅkaṭagiri Appalācāryar of Triplicane.

विवादभङ्गार्णवः.

VIVĀDABHAṄGĀRṆAVAḤ.

Same work as that described under No. 3189 of the D.C.S. MSS., Vol. VI.

Foll. 53*b*, 73*b*, 102*b*, 107*b*, 132*b*, 142*b* and 150*b* are left blank.

From the beginning of Asvāmivikrayaprakaraṇa in the Nikṣēpādidvīpa to the end of Saṁvidvyatikramaprakaraṇa in Bhṛtyādidvīpa.

R. No. 2864.

Palm-leaf. 17 × 1½ inches. Foll. 40. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1918-19 by M.R.Ry. Vēṅkaṭagiri Appalācāryar of Triplicane.

चम्पूरामायणम्.

CAMPŪRĀMĀYAṆAM.

By Bhōjarāja and Lakṣmaṇa. Same work as that described under No. 12256 of the D.C.S. MSS., Vol. XXI.

Complete in six Kāṇḍas.

R. No. 2865.

Palm-leaf. 17 × 1½ inches. Foll. 68. Lines, 9 in a page. Grantha. Slightly injured.

Presented in 1918-19 by M.R.Ry. Vēṅkaṭagiri Appalācāryar of Triplicane.

(*a*) आचारनवनीतम्.

ĀCĀRANAVANĪTAM.

Foll. 1*a*—52*b*. Fol. 53 is left blank.

By Appādhvarin. Same work as that described under No. 346 ante.

Contains the Ācārakāṇḍa without the Āhnikaprakaraṇa.

(*b*) गौतमधर्मसूत्रम्.

GAUTAMADHARMASŪTRAM.

Foll. 54*a*—67*b*.

Same work as that described under No. 1200 of the D.C.S. MSS., Vol. II.

Complete.

Fol. 68 contains a copy of a document relating to the temple at Pallikoṇḍa, North Arcot district.

R. No. 2866.

Palm-leaf. 18⅝ × 1½ inches. Foll. 74. Lines, 7 in a page. Grantha. Good.

Presented in 1918-19 by M.R.Ry. Vēṅkaṭagiri Appalācāryar of Triplicane.

अभिज्ञानशाकुन्तलव्याख्या—साहित्यटीका.

ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀ: SĀHITYAṬĪKĀ.

Foll. 1*a*—74*a*. Fol. 74*b* is left blank.

By Śrīnivāsācārya. Same work as that described under No. 12488 of the D.C.S. MSS., Vol. XXI.

Complete.

R. No. 2867.

Palm-leaf. 18½ × 1¼ inches. Foll. 112. Lines, 9 in a page. Grantha. Slightly injured.

Presented in 1918-19 by M.R.Ry. Vēṅkaṭagiri Appalācāryar of Triplicane.

भगवद्गीताभाष्यम्.

BHAGAVADGĪTĀBHĀṢYAM.

By Rāmānuja. Same work as that described under No. 2073 of the D.C.S. MSS. of the Vol. IV, Part I, but with the following introductory stanzas in the beginning.

Complete.

यो नित्यमच्युतपदाम्बुजयुग्मरुक्मव्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धो रामानुजस्य चरणौ शरणं प्रपद्ये ॥

यत्पदाम्भोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनेयं नमाम्यहम् ॥

R. No. 2868.

Palm-leaf. 18¼ × 1½ inches. Foll. 63. Lines, 7 in a page. Grantha. Good.

Presented in 1918-19 by M.R.Ry. Vēṅkaṭagiri Appalācāryar of Triplicane.

अभिज्ञानशाकुन्तलम्.

ABHIJÑĀNAŚĀKUNTALAM.

Foll. 1*a*—62*a*. Fol. 62*b* is left blank.

By Kālidāsa. Same work as that described under No. 12465 of the D.C.S. MSS., Vol XXI.

Complete.

Fol. 63 contains Citrādibandhaślōkas.

R. No. 2869.

Palm-leaf. 15¾ × 1⅛ inches. Foll. 115. Lines, 8 in a page. Grantha. Much injured.

Presented in 1918-19 by M.R.Ry. Vēṅkaṭagiri Appalācāryar of Triplicane.

वेदान्तदीपः.

VĒDĀNTADĪPAḤ.

By Rāmānuja. Same work as that described under No. 5011 of the D.C.S. MSS., Vol. X.

Breaks off in the third Pāda of the second Adhyāya. The leaves are in disorder.

R. No. 2870.

Palm-leaf. 15⅝ × 1¼ inches. Foll. 119. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1918-19 by M.R.Ry. Vēṅkaṭagiri Appalācāryar of Triplicane.

भागवतव्याख्या.

BHĀGAVATAVYĀKHYĀ.

By Śrīdharasvāmin. Same commentary as that described under No. 2199 of the D.C.S. MSS., Vol. IV, Part I.

Contains the 11th Skandha complete.

R. No. 2871.

Palm-leaf. 15 × 1½ inches. Foll. 130. Lines, 7 in a page. Grantha. Injured in the beginning.

Presented in 1918-19 by M.R.Ry. Vēṅkaṭagiri Appalācāryar of Triplicane.

(*a*) पादुकासहस्रम्.

PĀDUKĀSAHASRAM.

Foll. 1*a*—20*a*. Fol. 20*b* is left blank.

By Vēdāntadēśika. Same work as that described under No. 10571 of the D.C.S. MSS., Vol. XIX.

Breaks off in the eighth Paddhati.

(*b*) तैत्तिरीयोपनिषत्.

TAITTIRĪYŌPANIṢAD.

Foll. 21*a*—49*b*.

Same work as that described under No. 486 of the D.C.S. MSS., Vol. I, Part III.

Contains the Praśnas two to five complete.

(c) कृष्णयजुर्वेदमन्त्रप्रश्नः.

KṚṢṆAYAJURVĒDAMANTRAPRAŚNAḤ.

Foll. 50*a*—66*b*.

Same work as that described under No. 237 of the D.C S. MSS., Vol. I, Part II.

Complete.

(d) आपस्तम्बगृह्यसूत्रम्.

ĀPASTAMBAGṚHYASŪTRAM.

Foll. 67*a*—81*b*.

Same work as that described under No. 1180 of the D.C.S. MSS., Vol. II.

Complete.

(e) कृष्णयजुर्वेदकाठकम्.

KṚṢṆAYAJURVĒDAKĀṬHAKAM.

Foll. 82*a*—110*b*.

Same work as that described under No. 184 of the D.C.S. MSS., Vol. I, Part II.

Complete.

(f) कृष्णयजुर्वेदब्राह्मणम्.

KṚṢṆAYAJURVĒDABRĀHMAṆAM.

Foll. 111*a*—130*b*.

Same work as that described under No. 142 of the D.C.S. MSS., Vol. I, Part II.

Contains the second Praśna of the third Aṣṭaka.

R. No. **2872.**

Palm-leaf. $17\frac{1}{8} \times 1\frac{3}{8}$ inches. Foll. 107. Lines, 10 in a page. Grantha. Slightly injured.

Presented in 1918–19 by M.R.Ry. Vēṅkaṭagiri Appalācāryar of Triplicane.

कृष्णयजुर्वेदसंहितापदपाठः.

KṚṢṆAYAJURVĒDASAṀHITĀPADAPĀṬHAḤ.

Same work as that described under No. 91 of the D.C.S. MSS., Vol. I, Part II.

Contains the Kāṇḍas five and six only.

R. No. **2873.**

Palm-leaf. 19 × $1\frac{3}{8}$ inches. Foll. 80. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1918–19 by M.R.Ry. Vēṅkaṭagiri Appalācāryar of Triplicane.

कृष्णयजुर्वेदसंहितापदपाठः.

KṚṢṆAYAJURVĒDASAṀHITĀPADAPĀṬHAḤ.

Same work as that described under No. 91 of the D.C.S. MSS., Vol. I, Part II.

Contains the seventh Kāṇḍa only.

R. No. **2874.**

Palm-leaf. $16\frac{1}{8}$ × $1\frac{1}{4}$ inches. Foll. 62. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1918–19 by M.R.Ry. Vēṅkaṭagiri Appalācāryar of Triplicane.

कृष्णयजुर्वेदसंहितापदपाठः.

KṚṢṆAYAJURVĒDASAṀHITĀPADAPĀṬHAḤ.

Same work as that described under No. 91 of the D.C.S. MSS., Vol. I, Part II.

Contains the fifth Kāṇḍa only.

R. No. **2875.**

Palm-leaf. $15\frac{1}{2}$ × $1\frac{3}{8}$ inches. Foll. 204. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1918–19 by M.R.Ry. Vēṅkaṭagiri Appalācāryar of Triplicane.

नामलिङ्गानुशासनम्, आन्ध्रटीकासहितम्.

NĀMALIṄGĀNUŚĀSANAM WITH TELUGU MEANING.

Same work as that described under No. 1620 of the D.C.S. MSS., Vol. III, but with a Telugu commentary. The text is by Amarasiṁha. Complete.

R. No. 2876.

Palm-leaf. 8¼ × 1⅜ inches. Foll. 102. Lines, 8 in page. Grantha. Good.

Presented in 1918–19 by M.R.Ry. Vēṅkaṭagiri Appalācāryar of Triplicane.

छान्दोग्योपनिषत्.

CHĀNDŌGYŌPANIṢAD.

Same work as that described under No. 451 of the D.C.S. MSS. Vol. I, Part III.

Complete.

R. No. 2877.

Palm-leaf. 9 × 1 inches. Foll. 70. Lines, 6 in a page. Grantha. Good

Presented in 1918–19 by M.R.Ry. Vēṅkaṭagiri Appalācāryar of Triplicane.

Foll. 1 and 2 contain Varavaramunyarcārādhanavicāra, 3 and 4 Ghaṭasphōṭavidhi and 5—9 Vānādrīśamaṭhagūruparamparādhyānaślōkas.

(*a*) சிறியதிருமடல்.

ŚIṞIYATIRUMAḌAL.

Foll. 10*a*—15*b*.

See the Tamil Part for description and extract.

Complete.

(*b*) इतिहासोपनिषत्.

ITIHĀSŌPANIṢAD.

Foll. 16*a*—25*a*. Fol. 25*b* contains Mahālayaśrāddhīyavacanāni.

Same work as that described under No. 298 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*c*) श्रीगुणरत्नकोशः.

ŚRĪGUṆARATNAKŌŚAḤ.

Foll. 26*a*—35*b*.

By Parāśarabhaṭṭa. Same work as that described under R. No. 160 (*f*) ante.

Complete.

(*d*) நிகமனப்படி.

NIGAMANAPPAḌI.

Foll. 36*a*—40*b*. Foll. 41 and 42 contain Muhūrtaviṣaya.

See the Tamil Part for description and extract.

(*e*) सुचरितचषकम्.

SUCARITACAṢAKAM.

Foll. 43*a*—50*a*. Fol. 50*b* is left blank.

A poem describing the leading incidents in the life of Maṇavāḷamāmuni, a chief Guru and teacher of the Teṅgalai Śrī-Vaiṣṇavas: by Rāghavārya, pupil of Varadaguru and son of Nṛsiṁha of Dāśarathi family, who resided in Bhūsāra or Tirumaḷiśai village.

Complete.

Beginning:

मूलर्क्षे श्रीनगर्यामुदयमधिगतो जैत्रजिह्वेशदासात्
तस्मात्तापादिपूर्वं रुचिरवर इति प्राप्तनामा गुणैस्स्वैः ।
तिष्ठन् ग्रामे कडारे कतिचन शरदो मातुलावासभूते
साङ्गोपाङ्गागमज्ञो द्रमिडनिगमविल्लाप दारानुदारान् ॥
भूयः श्रीरङ्गनाथे निजनिलयगते श्रीनगर्यां कडार-
श्रीशैलार्यं श्रितस्तत्कलितयतिपतौ विंशतिं शंसति स्म ।
तद्दत्तां तत्सपर्यामनुदिनमकरोद्द्रामिडाम्नायभाष्यं
षट्त्रिंशत्तत्सहस्रैर्गणितमिति मतिर्वाग्विधेयं दधौ स्म ॥

End:

इत्थं पू(भू)सारवासान्नृहरिगुरुवराद्दाशरथ्यार्यवंश्या-
ज्जातस्तद्दृष्टिपूतो वरदगुरुकृपालब्धबोधप्रबुद्धः ।
सत्सेवी राघवार्यो रुचिरवरमुनेः सर्वलोके हिताङ्कः
व्याजह्रे दिव्यचर्यास(ह)चषकमिदं यः पठेत्सोऽतिधन्यः ॥

Colophon:

इति सुचरितचषकं संपूर्णम् ॥

Foll. 51*a*—53*b* contain Vaiśvadēvaprayōga and 54*a*—56*b* Ādhāraśaktyāditarpaṇa.

(*f*) அஷ்டாதசபேதநிர்ணயம்.

AṢṬĀDAŚABHĒDANIRṆAYAM.

Foll. 57*a*—70*b*.

See the Tamil Part for description and extract.

Complete.

R. No. 2878.

Palm-leaf. 16¼ × 1⅝ inches. Foll. 72. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1918-19 by M.R.Ry. T. E. Tiruvēṅkaṭācāryar of Mandasa, Ganjam district.

Fol. 38*b* is left blank.

तर्कभाषाप्रकाशिकाव्याख्या, तर्कसारः.
TARKABHĀṢĀPRAKĀŚIKĀVYĀKHYĀ: TARKASĀRAḤ.

By Vēṅkaṭādribudha, son of Pērumāmbā and Nṛsiṁhasūri of Rōmpilla family. Same work as that described under No. 4188 of the D.C.S. MSS., Vol. VIII, wherein see for the beginning.

Complete.

End:

पूर्वोक्तव्यभिचारात्समाप्तिकारणत्वं बाधितमेवेति वाच्यम्, अत्रापि जन्मान्तरीयमङ्गलकल्पनात्। सति विघ्ने निर्विघ्नपरिसमाप्तौ विघ्नध्वंसे वा मङ्गलस्य हेतुत्वं बोध्यत इति तत्र स्वतस्सिद्धविघ्नाभावादेव समाप्त्युपपत्तौ मङ्गलसमाप्तिकारणताबोधकश्रुत्यादेः प्रामाण्यसंभवाच्च। तदेवं मङ्गलस्य समाप्तिकारणत्वे सिद्धे प्रकृतग्रन्थे समाप्तिदर्शनेन मङ्गलानुमानादनुल्लङ्घितशिष्टाचारेण कृतत्वादयं तर्कभाषाग्रन्थः सद्भिरादरणीय इति सर्वमवदातम्॥

उज्जीवयेत्कृतिमिमामुपमाविदूरतेजो विशुभ्रमुपकण्ठमुपेतनैल्यम्।
उत्तंसितेन्दुकिरणैरिव मुद्रितं यद्भालाटनेत्रजलजं जगतो हिताय॥
अक्षाङ्घ्रिपक्षिलमुनिप्रमुखैकवेद्ये शास्त्रेऽत्र यद्यपि कृतिर्मम हास्यहेतुः।
बालप्रबोधमभिकाङ्क्ष्य तथापि किञ्चित्सञ्जल्पितं बुधवरास्तदिहाद्रियध्वम्॥
दोषान्धकारमपहन्त्य(त्य)विभासयन्ति सिद्धान्तमक्षचरणस्य मितैः पदैस्स्वैः।
रोम्पिल्ल वेङ्कटबुधस्य कृतेः कलेयं प्रीत्यै भवेदुडुपतेः परदेवतायाः॥

Colophon:

इति श्रीरोम्पिल्लवंशाम्बुधिसुधाकरश्रीनृसिंहसूरिसुतेन पेरुमाम्बागर्भशुक्तिमुक्तामणिना वेङ्कटाद्रिबुधेन विरचिते तर्कसारे प्रमेयादिपरिच्छेदस्समाप्तः॥

R. No. 2879.

Palm-leaf. 12 × 1¼ inches. Foll. 10. Lines, 5 in a page. Grantha. Good.

Presented in 1918-19 by M.R.Ry. T. E. Tiruvēṅkaṭācāryar of Mandasa, Ganjam district.

हनुमद्दण्डकम्.

HANUMADDAṆḌAKAM.

A poem describing the miraculous deeds of Hanumat in the Daṇḍaka metre.

Incomplete. Contains the portion beginning with the crossing of the ocean to the burning of Laṅkā.

Beginning :

पारावारजलं विलङ्घ्य नगरीं यो रावणस्याविशन्
वीराड्व्येषु विचित्य दुर्गभवनेष्वारादृहाराममगान् ।
दारान् दाशरथेः प्रसाद्य कुशलोक्त्याराध्य लङ्कां दहन्
धीरात्मा पुनराप राममवतु श्रीरामदूतस्स नः ॥

स रामदूतः पुराणऋक्षपगिराश्रितमहापराक्रमश्रीधरासुतामाशराधिपहृतां चिराय शोकातुरां विचेतुं सुराग्रणीभास्करानिलमुखामरान्नमस्यन् कराङ्घ्रिहति-जर्झरात्स्रवन्निर्झराच्चलितनिर्जरान्महेन्द्राद्धराधिपाद्वानरान् यथा वा सुराघवेरित-शरालिरेवं तरामि जलधीन् ।

End :

सेन्धनाग्निभामूर्च्छनातिपरिदेवनाकुलस्सुमणिना तु चन्द्राननां सदुपगूहना-मिवाप्तोऽस्य नात्र विश्राणनाय किमपि च हनूमतो ले भे। सर्वस्वमितीममेव परि-रेभे ।

R. No. 2880.

Palm-leaf. 10 × 1¼ inches. Foll. 34. Lines, 5 in a page. Telugu. Good.

Presented in 1918–19 by M.R.Ry. Dannemrāju Sūrya Bhagavānulu Pantulugāru of Vizianagram.

चाटुश्लोकाः.

CĀṬUŚLŌKĀḤ.

Foll. 1*a*—30*b*.

Similar to the work described under No. 12017 of the D.C.S. MSS., Vol. XX. The covering leaf gives the names Sakalavidvajjana-manōhara and Ratnaguccha which are probably the titles of the work.

Beginning :

श्रुतिस्तु भिन्ना स्मृतयश्च भिन्नाः महामुनीनां मतयस्तु भिन्नाः ।
विचार्यमाणे विविधप्रकारे महाजनो येन गतस्स पन्थाः ॥

राजन् तव कुमारस्य यदि कल्याणमिच्छसि ।
देहि दानं द्विजातीनां वर्णानां ब्राह्मणो गुरुः ॥
अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम् ।
अयोग्यः पुरुषो नास्ति प्रयोक्ता तत्र दुर्लभः ॥
विभागे भ्रातरं विन्द्याद्भार्यां भाग्यविपर्यये ।
मित्रमापदि जानीयात्पुत्रमन्ते च कर्मणि ॥

End:

काकयाचकयोर्मध्ये वरं काको न याचकः ।
काकानाहूयते काको याचको न तु याचकम् ॥
जातस्य च ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्यार्थे न त्वं(तु) शोचति(न्ति) पण्डिताः ॥

Foll. 31 and 32 contain Rāmastōtram. Fol. 33 contains Pañcadrāviḍabrāhmaṇanirṇaya and 34 Rāmapaṭṭābhiṣēkaślōka and Śivapaṭṭābhiṣēkaślōka.

R. No. **2881.**

Palm-leaf. $17\frac{1}{8} \times 1\frac{1}{2}$ inches. Foll. 47. Lines, 10 in a page. Grantha. Slightly injured.

Presented in 1918-19 by M.R.Ry. Vēṅkaṭagiri Appalācāryar of Triplicane.

(*a*) अनिङ्ग्यम्, सव्याख्यानम्.

ANIṄGYAM WITH COMMENTARY.

Foll. 1*a*—15*b*.

Same work as that described under No. 855 of the D.C.S. MSS., Vol. II.

Complete.

(*b*) शमानम्, सव्याख्यानम्.

ŚAMĀNAM WITH COMMENTARY.

Foll. 16*a*—21*a*.

Same work as that described under No. 983 of the D.C.S. MSS., Vol. II, but slightly different in the beginning as given below and without colophon.

Complete.

अथ संहितायामित्यादि प्रवक्ष्यामीत्यन्तम् । अथशब्दोऽधिकारार्थः । संहितायामिति विषयसप्तमी । आकारप्लुतपूर्वेति विसर्जनीयस्य विशेषणम् । आकारश्च प्लुतश्चाकारप्लुतौ ।

(c) विलङ्घ्यम्, सव्याख्यानम्.

VILANGHYAM WITH COMMENTARY.

Foll. 21*a*—25*b*.

Same work as that described under Nos. 965 and 966 of the D.C.S. MSS., Vol. II.

Complete.

(d) अवर्णि, सव्याख्यानम्.

AVARṆI WITH COMMENTARY.

Foll. 26*a*—30*a*.

Same work as that described under No. 860 of the D.C.S. MSS., Vol. II.

Complete.

(e) आवर्णि, सव्याख्यानम्.

ĀVARṆI WITH COMMENTARY.

Foll. 30*b*—33*a*.

Same work as that described under No. 870 of the D.C.S. MSS., Vol. II.

Complete.

(f) नपरतपरम्, सव्याख्यानम्.

NAPARATAPARAM WITH COMMENTARY.

Foll. 33*a*—37*b*.

Same work as that described under No. 918 of the D.C.S. MSS., Vol. II, but with slight difference in the beginning as given below.

Complete.

Beginning:

नारायणं प्रणम्याथ भगवन्तं परापरम् ।
परं नव(त)परस्यास्य रचयिष्यामि न स्वयम् ॥

अथ नपराख्यदव(वेद)लक्षण[करण]करणान्तरमखिलजगदुत्पत्तिस्थिति-लयकारणं सकलमुनिगणहृदयानिलयमादिमध्यावसानरहितं मत्कुलदैवतं परापर-

मिति श्रेष्ठं विश्वेश्वरं भगवन्तं नारायणं प्रणम्यास्य नपरस्य स्वयमेव व्याख्यानं च यिष्यामीति प्रतिज्ञा । अथेदानीं नपरस्य श्लोकमुपादाय व्याख्यायते ।

(*g*) सिद्धान्तशिक्षा.

SIDDHĀNTAŚIKṢĀ.

Foll. 38*a*—39*b*.

Same work as that described under No. 1008 of the D.C.S. MSS., Vol. II.

Complete.

Foll. 39*b*—40*b* contain Jaṭālakṣaṇa, Svarabhakti and some Vēdalakṣaṇavacanāni.

(*h*) लक्षणमाला, सव्याख्या.

LAKṢAṆAMĀLĀ WITH COMMENTARY.

Foll. 41*a*—42*b*.

A treatise in Vēdalakṣaṇa dealing with the Sanskrit alphabet. The text is accompanied by a commentary.

Incomplete.

Beginning:

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थं प्रथममिष्टदेवतां नमस्कृत्य ग्रन्थनाम च निर्दिश्य ग्रन्थोद्भवं गुणविशेषप्रचयं दर्शयति । चिकीर्षितं प्रतिजानीते—

प्रत्यूहतिमिरतरणिं प्रणम्य गणनायकं देवम् ।
क्रियते लक्षणमाला पटीयसी बालबोधनविधौ ॥

प्रत्यूहो विघ्नः स एव तिमिरं तद्विषये तरणिं सूर्यम् । गणनायकं देवं प्रणम्य लक्षणमाला क्रियते । सा किंगुणा बालाः स्वरलक्षणज्ञानरहितास्तेषां बोधः लक्षणज्ञानं तस्य विधिर्विधानं तत्र पटीयसी पटुतरा ।

*　　　　*　　　　*　　　　*

आदौ वर्णानुद्दिशति—

षष्टिश्चतुरधिका (वा) त्र्यधिका वा लोकवेदयोर्वर्णाः ।
अष्टोत्तरषष्टिपक्षाः षष्टिस्तैत्तर्यशाखायाः ॥

लोके वेदे चतुरधिकाः चतुरुत्तरवर्णाः वा त्र्यधिका

End:

संवृतमकारस्येति । अकारादयः ककारपर्यन्ताः जिह्वामूलीयोपध्मानीय-हकारा ऊष्माणः । तेषां विवृतं करणमकारस्य संवृतं करणम् । अथ वर्णानुप-संहरति । संज्ञाविधिरेषाम्.

(*i*) प्रातिशाख्यम् (यजुस्).

PRĀTIŚĀKHYAM (YAJUS).

Foll. 43*a*—47*b*.

Same work as that described under No. 928 of the D.C.S. MSS., Vol. II.

Complete.

R. No. **2882.**

Palm-leaf. 16 × 1½ inches. Foll. 44. Lines, 5 in a page. Telugu. Good.

Presented in 1918–19 by M.R.Ry. Veṅkaṭakṛṣṇa Raja of Madugala, Vizagapatam district.

Fol. 1*a* is left blank and 1*b* contains some astrological stanzas.

(*a*) जातकचन्द्रिका.

JĀTAKACANDRIKĀ.

Foll. 2*a*—22*b*.

A treatise in horoscopy dealing with the twelve Bhāvas (vide No. 13782 of the D.C.S. MSS., Vol. XXIV): by Prāṇanāthamiśra.

Apparently complete.

Date of the MS: Friday, the 4th day of the bright fortnight of the Śrāvaṇa month in the year Vibhava. Name of scribe: Īśvara Śaravaya.

Beginning:

नारायणमहं वन्दे सुरनाथं जगद्गुरुम् ।
सर्वलोकोपकारार्थं वक्ष्ये जातकचन्द्रिकाम् ॥
जयतु किरणशाली पद्मिनीप्रीतिकारी
निशिचरसुखहारी पद्मिनीदुःखहारी ।
तिमिरभयनिहन्ता सर्वलोकोपभ(क)र्ता
मुनिजनसुखकर्ता सर्वपापौघहर्ता ॥

व्यासोह(सहा)रितगार्ग्याणां मतमालोक्य विस्तरम् ।
श्रीप्राणनाथमिश्रेण कृता जातकचन्द्रिका ॥
तनुर्धनं च सहजं बन्धुः पुत्रा रिपुस्तथा ।
पत्नीनिधनधर्माश्च कर्म चायव्ययस्तथा ॥
एतान्येवं विजानीयाल्लग्नाद्यांश्च विचक्षणः ।
एतैर्द्वादशभिर्युक्ता कोष्ठेति परिकीर्तिता ॥

रविः—

सवितरि तनुसंस्थे शैशवे व्याधियुक्तो
नयनगतसुदुःखी नीचसेवानुरक्तः ।
स भवति गृहमेधी धैर्ययुक्तो मनुष्यो
भवति विपुलमूर्तिः पुत्रपत्नीविहीनः ॥

End:

यत्कारको व्ययस्थश्चेत् तन्मूलधननाशनम् ।
यथा तस्तं(तत्स्थं) भवेत्कष्टं स्याचु धातुविनाशनः ॥

Colophon:

इति व्ययभावस्समाप्तः ॥

(*b*) जातकसिंहः, आन्ध्रटीकासहितः.

JĀTAKASIṀHAḤ WITH TELUGU COMMENTARY.

Foll. 23*a*—31*b*.

A treatise dealing with predictions in regard to the duration of life of children born under certain astrological conditions. The text is accompanied by a Telugu meaning.

Contains the Adhyāyas one to three, the last being incomplete:

१. दिनसङ्ख्याध्यायः.
२. मासाध्यायः.
३. बालारिष्टायुर्भाव.

Date of the MS: Thursday, the 1st day of the dark fortnight of the Śrāvaṇa month in the year Vibhava.

Beginning:

उदये पापसंयुक्ते चन्द्रे क्षीणे तथैव च ।
एकाहं वा त्रिरात्रं वा अत ऊर्ध्वं न जीवति ॥

नवपञ्चमचन्द्रे च चतुरष्टस्थिते रवौ ।
एकाद्ये मानवो जातः त्रिरात्रं नातिवर्तते ॥

* * * *

Colophon:

इति जातकसिंहे दिनसङ्ख्या नाम प्रथमोऽध्यायः ॥

End:

जन्मेश्वरः क्रूरयुतोऽपि तद्वच्छिद्रस्थितो हन्ति चतुर्थमासे ।
व्ययाद्धनैषण्मृतिगैश्च पापैः रसाष्टसौम्ये मृतिरष्टमासे ॥

* * * *

Colophon:

इति श्रीजातकसिंहे मासाध्यायो द्वितीयः.

एकः पापोऽष्टमगे शत्रुगृहे पापवीक्षितो यस्मात् ।
वर्षान्मारयति नरं जातं सुधारसो येन पीतोऽपि ॥

* * * *

धने व्यये च पाताले सप्तमे चाष्टमे कुजः ।
स्त्रीजातके भर्तृवधः पुरुषस्त्रीविनाशनम् ॥

अन्योन्यस्य धनव्ययायुसहजव्यापारबन्धुस्थिता तत्काले सुहृदः ।

Foll. 32 and 33 contain the Grahaśarīravarṇa, etc. Fol. 34 is left blank. Foll. 35*a*—44*a* contain Daśāprāṇadaśasaṅkhyānirṇaya. Fol. 44*b* is left blank.

R. No. **2883.**

Palm-leaf. 16 × 1½ inches. Foll. 25. Lines, 5 in a page. Telugu. Good.

Presented in 1918–19 by M.R.Ry. Vēṅkaṭakṛṣṇa Raja of Malugala, Vizagapatam district.

जातकभूषणम्.

JĀTAKABHŪṢAṆAM.

A treatise on horoscopy giving the characteristics and fortunes of persons born under various astrological conditions. The name of the author is not known.

Incomplete.

Beginning:

अश्विनीनक्षत्रजातस्य गुणः—

दीर्घायुः, स्थूलशरीरः, दीर्घहस्तः, सूक्ष्मनखः, विशालाक्षः, स्व(सु)रूपः

सुभगः, राजपूज्यः, भूषणप्रधानः, दुर्जनसखः, साहसी, लुब्धः, चञ्चलः, स्थिरारम्भः, कटिप्रदेशे मत्स्याङ्कितः ।

End:

विलग्नात्सप्तमस्थाने एकपापो भवेद्यदि ।
दुग्धहीनो भवेद्बालः परक्षीरेण जीवति ॥

R. No. **2884.**

Palm-leaf. 16½ × 1¼ inches. Foll. 99. Lines, 7 in a page. Telugu. Very much injured.

Presented in 1918–19 by M.R.Ry. Rāyaprōlu Śivarāma Śāstrigāru of Ellamanchili, Vizagapatam district.

चातुर्मास्यमाहात्म्यम्.

CĀTURMĀSYAMĀHĀTMYAM.

Same work as that described under No. 2426 of the D.C.S. MSS., Vol. IV, Part II.

Wants the beginning in the first Adhyāya and breaks off in the seventh Adhyāya.

R. No. **2885.**

Paper. 11 × 9⅝ inches. Foll. 24. Lines, 20 in a page. Telugu. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Tējōmūrtula Rāmamūrtigāru of Śrī-Rāmapuram, Vizagapatam district.

ज्यौतिषविषयः, आन्ध्रटीकासहितः.

JYAUTIṢAVIṢAYAḤ WITH TELUGU MEANING.

This work deals with predictions relating to rain, war, famine and other general conditions affecting the country as a whole, as may be made from certain astronomical combinations.

Complete.

Beginning:

पुष्पबन्धं प्रवक्ष्यामि गिरिराजसुते शृणु ।
कार्तिक्यां पूर्णिमायां[ति](तु) कृत्तिकाऋक्षपूर्णता ॥
पुष्पबन्धं समादिष्टमादिश्चत्वारि वर्षति ।
सुभिक्षं क्षेममारोग्यं सस्यनिष्पत्तिरेव च ॥

టీ. ఓ పార్వతీ! పుష్పబంధ మని చెప్పెను వినుమా. అని ఈశ్వరుఁడు చెప్పుచున్నాఁడు. కార్తిక శుద్ధ ౧౫ నాడు కృత్తిక సంపూర్ణముగా నుండెనా పుష్పబంధము గనుక. వర్షకాలము నాలుగు నెలలున్ను వర్షము గురిసి సుభిక్షముగా నుండును. సస్యవృద్ధియగును.

अथास्य तद्दिने देवि याम्यर्क्षं यदि जायते ।
अतिदाहमनावृष्टिः खण्डं खण्डं प्रवर्षति ॥

టీ. ఆ పౌర్ణమి నాడే భరణి కూడెనా వర్షము లేక యెండకాస్తున్ను ఖండవృష్టిగా కురుసును.

End:

धनिष्ठापञ्च ऋक्षेषु भार्गवे वोच(द)यास्तगे ।
नृपाणामाहवं प्राहुस्सस्य वृद्धिः प्रजायते ॥

టీ. ధనిష్ఠాపంచక నక్షత్రాలయందు శుక్రునకు ఉదయాస్తమయాలు అయితే రాజులకు అన్యోన్యము యుద్ధము లౌను. సస్యాదులు విశేషముగా ఫలించును.

Colophon:

इति श्रीपार्वतीसंहितायामुमामहेश्वरसंवादे दशधातुमेघगर्भधारणं नामैकाध्यायस्समाप्तः ॥

R. No. 2886.

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 60. Lines, 24 in a page. Grantha. Good.

Transcribed in 1917-18 from a MS. acquired through the Sub-Magistrate of Kovvuru, Kistna district.

(*a*) कण्वस्मृतिः.

KAṆVASMṚTIḤ.

Foll. 1*a*—33*b*.

Same work as that described under No. 2624 of the D.C.S. MSS., Vol. V, but wants ten stanzas in the beginning.

Complete.

(*b*) कपिलस्मृतिः.

KAPILASMṚTIḤ.

Foll. 34*a*—59*a*. Fol. 59*b* gives a table of contents of this work and 60 is left blank.

Same work as that described under R. No. 1157 (*v*) ante.

Complete.

R. No. 2887.

Palm-leaf. 15½ × 1⅝ inches. Foll. 97. Lines, 7 in a page. Telugu. Much injured.

Purchased in 1917–18 from M.R.Ry. Niḍadavōlu Sundaram Pantulugāru of Vizagapatam.

विश्वप्रकाशः.

VIŚVAPRAKĀŚAḤ.

By Mahēśvara. Same work as that described under No. 1746 of the D.C.S. MSS., Vol. III.

Breaks off in the words ending in ह.

Complete.

R. No. 2888.

Palm-leaf. 11 × 1¼ inches. Foll. 10. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1918–19 by M.R.Ry. Kāśibhaṭla Vēṅkaṭēśvarlugāru, Lakkavaram, Gannavaram post, Vizagapatam district.

पार्वतीपरिणयचम्पुः.

PĀRVATĪPARIṆAYACAMPUḤ.

A work in prose and verse describing the marriage of Pārvatī and God Śiva: by Ramēśvaravidvat of Kandukūri family and disciple of Pārvatīśvara of Kalyapalli family. It is noteworthy that the author calls this work a Nāṭaka (drama) although it is in the form of a Campū.

Breaks off in the second Stabaka.

Beginning:

श्रेयः करोतु सततं मम चन्द्रमौलेः
पादाब्जयुग्ममघसञ्चयनाशनिघ्नम् ।
मेशेन्द्रमुख्यसुरवन्दितगीयमानं
छात्रानुकम्पि समतत्त्वधुरन्धरं तत् ॥

काहं विद्वान् ग्रन्थकर्तृत्वबुद्धिः जानन् द्वित्राण्यानिकानि प्रकुर्वे ? ।
नानाविद्याभूषितानां तथापिं ग्रन्थं विद्वन्मानुषाणां मुदे च ॥

गद्यपद्यात्मकं रत्नं रमणीयरसाकरम् ।
श्रीभर्गनायकोपेतं भुक्तिदं मुक्तिदं नृणाम् ॥

पार्वतीपरिणयाख्यनाटकाह्वानमञ्जुलमखण्डभूतिदम् ।
पाठकाभिमतदायकं शिवं बालकप्रकरभावबोधकम् ॥

श्रीमत्समस्तगन्धर्वसिद्धयक्षकिन्नरकिम्पुरुषविद्याधरवीणाधरबृन्दमन्दगमन-सुन्दरीजनकमलामल

* * * *

हिमालयो गोत्रराजश्चतुस्समुद्रपर्यन्तभुवो मानदण्ड इव स्थितः ।
बभौ स हिमवान् राजा काञ्चीकृतमहार्णवः ।
अवरोहणसुस्तम्भस्सूर्यलोकसदामिव ॥

End:

जगाम सा हैमवती शिवस्य समाधिवश्येन्द्रियवर्गकस्य ।
अधिष्ठिता हैमवतोर्ध्वभूमिभागस्य तस्यान्तिकमर्चनाय ॥

Colophon:

इति श्रीकश्यपल्लिवंशसुधाकूपारशशाङ्कस्य चतुश्शास्त्रपारावारपारंगतस्य पार्वतीश्वरविदुषः चरणारविन्दमरन्दाश्वास(स्वाद)नषट्चरणायमानस्यान्तेवासिनः कन्तु(न्दु)कूरिकुलाम्भोधिराकासुधाकरस्य रामेश्वरविद्वत्कविराजस्य कृतौ पार्वतीपरिणयाख्यनाटके प्रथमः स्तबकः समाप्तः ॥

तपस्सम्पादितक(व)रस्तारकाख्यो महासुरः ।
देवदत्तकरो वीरः स्थितोऽस्मिन् सुरकण्टकः ॥
तारकाख्यकरवालविभिन्ना बाहुशाखविभवादिजिताशाः ।
तत्प्रतापमुकुलीकृतनेत्रा ब्रह्मलोकमगमन् सुरराजाः ॥

* * * *

नः प्रयोजनार्थमेव कर्तव्यं भवत इति स्मरेण साकं व्याहृत्य मरुत्वाननङ्गमालिङ्गनेन सम्भावयामास ।

पुनर्दिवं जगामाशु देवतागणसंयुतः ।
वज्राद्यायुधसम्पूर्णबाहुः स्वर्गाधिपो हरिः ॥

R. No. 2889.

Paper. $6\frac{7}{8} \times 4\frac{1}{2}$ inches. Foll. 42. Lines, 18 in a page. Telugu. Slightly injured.

Purchased in 1918-19 from M.R.Ry. Manapalli Rāmacandra Śāstri, Vizagapatam.

Foll. 1, 2 and 37*b*—42*b* are left blank.

रतिदर्पणम्.

RATIDARPAṆAM.

Foll. 3*a*—37*a*.

A treatise on Kāmaśāstra: by Harihara, son of Candravidvat. Contains the following Paricchēdas 1 to 4:—

१. स्त्रीविटविभागावस्थादिलक्षणम्.

२. स्त्रीपुरुषजात्यादिनिरूपणम्.

३. भोगबन्धादिनिरूपणम्.

४. वश्यौषधादिनिरूपणम्.

The MS. is dated Jayavāra, 16th February 1892

Beginning:

यस्यास्स्मरणमात्रेण वाग्विभूतिर्विजृम्भते ।
सर्वदा भारती नित्यं रमतां मन्मुखाम्बुजे ॥
मया विरचितं काव्यं दृष्ट्वा योगिजनस्य च ।
मानसं तु चलत्येव किमन्ये मनुजाधिपाः ॥
नारीविहीनशयनं नवपञ्चबाणशास्त्रं विहीनसुरतं रसहीनवाणी ।
लज्जागुणप्रियवियुक्तवराङ्गना चेदेतानि षण्डरतवत्सुरतं वृथा स्यात् ॥

* * * *

मुग्धा मध्या प्रगल्भा च त्रिविधा वै स्त्रियो मताः ।

* * * *

Colophon:

इति श्रीचन्द्रनामाङ्कसुतहरिहरनामाङ्कविरचिते रतिदर्पणे कामशास्त्रे प्रथमः परिच्छेदः ॥

End:

काकरक्तं श्वदुग्धं च तालकं च समीकृतम् ।
त्रिगुणं तो(तु)त्थकं चैव पेषयित्वा (पुनः पुनः) ॥
स्त्रीदग्धभस्मना युग्मं प्रयुञ्ज्यान्मधुले कृते ।
कामबाणसमं चैतन्मरणान्तं वशं भवेत् ॥

. . . . . शुद्धशुक्लार्के(र्क)मूलं वनभयतरुमूलं लाङ्गलीयष्टिमूलम् ।
असितशुनकदुग्धः . . . . . मदनशरसमानां(नं)मानिनीमानभङ्गम् ॥

Colophon:

इति श्रीचन्द्रनामाङ्कविद्वत्सुतहरिहरनामाङ्कविरचिते रतिदर्पणे कामशास्त्रे चतुर्थः परिच्छेदः समाप्तः ॥

R. No. 2890.

Paper. $10\frac{7}{8} \times 9\frac{5}{8}$ inches. Foll. 66. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Jayanti Jōgannagāru of Hamsavaram, Godavari district.

नरपतिजयचर्या, आन्ध्रटीकासहिता.

NARAPATIJAYACARYĀ WITH TELUGU MEANING.

By Padmādityadēvakavi or Narapati. Same work as that described under No. 13938 of the D.C.S. MSS., Vol. XXIV.

Breaks off in the fourth Adhyāya.

R. No. 2891.

Paper. $8\frac{3}{4} \times 6\frac{7}{8}$ inches. Foll. 35. Lines, 18 in a page. Telugu. Slightly injured.

Purchased in 1917-18 from M.R.Ry. Nidadavōlu Sundaram Pantulugāru of Vizagapatam.

विश्वनिघण्टुः, आन्ध्रटीकासहितः.

VIŚVANIGHAṆṬUḤ WITH TELUGU MEANING.

Foll. 1*a*—32*a*. Foll. 32*b*—34*a* contain some witty stanzas with Telugu Padyas. Foll. 34*b*—35 are left blank.

A lexicon of homonymous words arranged in the form of stanzas. One of the colophons attributes the authorship to Vyāsa.

Contains one to three chapters in the Nānārtha portion.

Date of copying: Saturday, the 4th day of the dark fortnight of the Mārgaśira month in the year Sarvadhāri.

Beginning:

चन्द्रे पद्मे मराले च चातके गजभृङ्गयोः ।
वीणावारिदकन्दर्पचापदीपेषु सारगः ॥
* * * *
राजसूर्येन्दुफालाक्षविष्णुवैश्रवणे नृपः ।
कादम्बे वृषभे छत्रे सुवर्णे वारिदे तथा ॥
* * * *

Colophon:

इति नानार्थविश्वनिघण्टौ प्रथमस्सर्गः ॥

* * * *

Colophon:

इति नानार्थविश्वनिघण्टौ व्यासप्रोक्ते भूतभविष्यद्वर्तमाने द्वितीयाश्वासस्समाप्तः ॥

End:

कटकाङ्गः कण्टकारिमृणालां च बर्बरः ।
वृश्चिकेद्रौ च भल्लातखड्गभेद उपानतः ॥

* * * *

चिराङ्गो ध्रुवहन्मन्तो जाम्बवन्तो विभीषणः ।
अश्वत्थामा बलिर्व्यासो जामदग्न्याश्विनीकृपाः ॥

* * * *

Colophon:

इति नानार्थविश्वनिघण्टौ एकशब्दप्रयोगः तृतीयाश्वासः ॥

R. No. 2892.

Palm-leaf. 17 × 1⅜ inches. Foll. 10. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1917–18 from M.R.Ry. Niḍadavōlu Sundaram Pantulugāru of Vizagapatam.

विश्वनिघण्टुः, आन्ध्रटीकासहितः.

VIŚVANIGHAṆṬUḤ WITH TELUGU MEANING.

By Vēdavyāsa. Same work as the above.

Contains the chapters one and two only.

R. No. 2893.

Palm-leaf. 15¾ × 1⅜ inches. Foll. 131. Lines, 6 in a page. Telugu. Much injured.

Presented in 1918–19 by M.R.Ry. Kāśibhaṭla Vēṅkaṭēśvarlugāru, Lakkavaram, Gannavaram.

(*a*) रुद्रप्रश्नभाष्यम्.

RUDRAPRAŚNABHĀṢYAM.

Foll. 1*a*—20*b*.

By Bhaṭṭabhāskara. Same work as that described under No. 134 of the D.C.S. MSS., Vol. I, Part II.

Wants the beginning; otherwise complete.

(*b*) जगद्वल्लभा.

JAGADVALLABHĀ.

Foll. 21*a*—131*b*. Foll. 78*b*, 88*b* and 96*b* are left blank.

Same work as that described under R. No. 1724 ante By Paiḍimukkala Śrīvallabhācārya of Bhāradvājagōtra.

Contains the Prakaraṇas 6—13 complete and the 14th incomplete.

R. No. 2894.

Palm-leaf. $15\frac{1}{8} \times 1\frac{1}{2}$ inches. Foll. 154. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1918-19 by M.R.Ry. Duggirāla Rāmaliṅgēśvaram Pantulugāru, Vizianagram.

Fol. 1 is left blank.

शारदातिलकम्.

SĀRADĀTILAKAM.

By Lakṣmaṇadēśika. Same work as that described under No. 8102 of the D.C.S. MSS., Vol. XV.

Complete in 25 Paṭalas.

The following dates are found in the MS:—

Sunday, the 2nd day of the dark fortnight of the month of Phālguna of the Śubhakṛt year according to Bārhaspatya era.

Monday, the 4th day of the dark fortnight of the Āṣāḍha month in the year Saumya.

Name of the scribe: Puligaḍḍa Aruṇācalam.

R. No. 355 (of the Tamil Part).

Palm-leaf. $17 \times \frac{1}{2}$ inches. Foll. 220. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1916-17 by M.R.Ry. Prativādi-Bhayaṅkaram Vēdāntācārya of Vijayarayi, Kistna district.

(*b*) तत्त्वदीपप्रकाशः.

TATTVADĪPAPRAKĀŚAḤ.

Foll. 144*a*—220*a*. Fol. 220*b* is left blank.

By Saumyajāmātṛmuni. Same work as that described under No. 5250 of the D.C.S. MSS., Vol. XI.

Complete.

R. No. **372** (of the Tamil Part).

Palm-leaf. 17½ × 1½ inches. Foll. 105. Lines, 6 in a page. Tamil and Grantha. Injured.

Purchased in 1918–19 from M.R.Ry. M. Vēdāntācārya of Triplicane.

(*e*) श्राद्धविधिः.

ŚRĀDDHAVIDHIḤ.

Foll. 58*a*—64*b*.

Similar to the work described under No. 3082 of the D.C.S. MSS., Vol. VI.

Incomplete.

Beginning :

श्राद्धभुक् प्रातरुत्थाय प्रकुर्याद्दन्तधावनम् ।
श्राद्धकर्ता न कुर्वीत दन्तानां धावनं बुधः ॥
कर्ता भोक्ता च सर्वत्र नैकवस्त्रो भवेद्द्विजः ।
यस्मिन् मासि मृताहः स्यात् . . . . मेव वा ॥
क्षुरकर्म न कुर्वीत परान्नं च तथा त्यजेत् ।
अशक्तौ दिनत्रयं परान्नं वर्जयेत् ॥
पूर्वेद्युश्च परेद्युश्च कर्ता श्राद्धदिनेऽपि च ।
परस्यान्नं तु नाश्नीयादश्नंश्चेत्पितृघातकः ॥
अत्यन्ताशक्तौ अत्रिः—
सुहृदन्नं गुरोरन्नं यदन्नं मातुलस्य च ।
स्वसृश्वशुरयोरन्नं परान्नं न विदुर्बुधाः ॥

End :

इमं श्राद्धविधिं पुण्यं शृणुयाद्वा पठेत्तु वा ।
. . . . समृध्नोति अमृतत्वं च गच्छति ॥
गोकर्णाकृतिहस्तेन माषमग्नजलं पिबेत् ।
तन्न्यूनमधिकं पीत्वा सुरापानसमं भवेत् ॥
* * * *
अङ्गुष्ठाग्रं समाकुञ्च्य मध्यमा मध्यपर्वणि ।
संयोज्याचमने कुर्यादेतद्गोकर्णलक्षणम् ॥

R. No. **390** (of the Tamil Part).

Palm-leaf. 7 × ⅞ inches. Foll. 145. Lines, 7 in a page. Tamil and Grantha. Injured.

Presented in 1918–19 by M.R.Ry. S. Kṛṣṇamācāriyar of Triplicane

(*a*) नरसिंहाष्टोत्तरशतनामावलिः.

NARASIṀHĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Foll. 1*a*—2*b*.

Similar to the work described under No. 89[?]3 of the D.C.S. MSS., Vol. XVII.

Complete.

Beginning :

श्रीनरसिंहाय मनः, दिव्यसिंहाय नमः, महाबलाय नमः, उग्रसिंहाय नमः, महादेवाय नमः, उपेन्द्राय नमः, सर्वाद्भुताय नमः, शौरिणे(रये) नमः, महावीराय नमः, सुविक्रमाय नमः ।

End :

लोकगुरवे नमः, परंज्योतिषे नमः, स्रष्ट्रे नमः, परंज्योतिषे नमः, परायणाय नमः, श्रीलक्ष्मीनरसिंहाय नमः ॥

Colophon :

अष्टोत्तरनामार्चनं सम्पूर्णम् ॥

(*b*) श्रीभाष्यगुरुपरम्परा.

ŚRĪBHĀṢYAGURUPARAMPARĀ.

Foll. 3*a* and 3*b*.

Same work as that described under No. 5386 of the D.C.S. MSS., Vol. XI.

Incomplete, the beginning being wanting.

(*g*) पराङ्कुशाष्टकम्.

PARĀṄKUŚĀṢṬAKAM.

Fol. 27.

Same work as that described under No. 10569 of the D.C.S. MSS., Vol. XIX.

Complete.

(*h*) श्रीभाष्याद्यन्तभागः.

ŚRĪBHĀṢYĀDYANTABHĀGAḤ.

Foll. 28*a*—30*b*.

Same work as that described under No. 5052 of the D.C.S. MSS., Vol. X.

Complete.

Foll. 31*a*—32*a* contain the Rāmāyaṇādiśānti.

(*i*) श्रीशैलेशाष्टकम्.

ŚRĪŚAILĒŚAṢṬAKAM.

Foll. 32*b*—34*b*.

Eight stanzas glorifying the origin of the Sanskrit stanza beginning with the word Śrīśailēśa which is said to have been uttered by God Raṅgānātha in praise of Ramyajāmātṛmuni or Maṇavāḷamāmuni: by Dēvarāja.

Complete.

Beginning:

शेषः श्रीमानजनि स पुरा सौम्यजामातृयोगी
भोगीभूतस्तदनु भगवान् राघवस्यानुजन्मा ।
भूत्वा भूयो वरवरमुनिर्भूयसा भासमानो
रक्षत्यस्मान् रघुकुलपतेराश्रितो भद्रपीठम् ॥
श्रोतुं द्राविडवेदभूरिविवृतिं सौम्योपयन्तुर्मुनेः
उत्कण्ठास्ति ममैनमानय ततस्ताक्ष्याश्रयं मण्टपम् ।
आविश्यार्चकमूचिवानिति मुदा निश्शेषलोकान्विते
रङ्गी वत्सरमेकमेवमशृणोद्व्यक्तं यथोक्तं क्रमात् ॥

* * * *

श्रीमान् रङ्गेश्वरोऽयं वकुलधरवचोभाष्यसारार्थजातं
श्रुत्वा सौम्योपयन्तुर्मुनिवरचरणाच्छात्रभावं प्रपन्नः ।
श्रीशैलेशेति पद्यं खगपतिनिलये मण्टपे तत्समाप्ता-
वुक्ताध्येतव्यमेतन्निखिलनिजगृहेष्वादिशत्तत्तदादौ ॥

End:

श्रीशैलेशाष्टकं दिव्यं देवराजेन निर्मितम् ।
पठन्तु सर्वदा सन्तस्सर्वसम्पत्समृद्धये ॥

(*l*) वानाद्रिमठगुरुपरम्परा.

VĀNĀDRIMAṬHAGURUPARAMPARĀ.

Foll. 47*a*—52*a*.

In praise of the successive pontiffs who occupied the Vānamāmalai Mutt in the Tinnevelly district.

Complete.

Beginning:

श्रीशैलेशदयापात्रं (. . .) रम्यजामातरं मुनिम् ॥
रम्यजामातृयोगीन्द्रपादरेखामयं सदा ।
तदायत्तात्मसत्तादिं रामानुजमुनिं भजे ॥

कृपां व्योममहाशैलरामानुजमहामुनेः ।
सम्प्राप्येन्धानसद्वृत्तिं सेवे रामानुजं मुनिम् ॥

* * * *

विद्याज्ञानसुवृत्तमङ्गलगुणैः पूर्णस्य गोप्तुस्सतां
पादाब्जे सुतरां निविष्टहृदयं वानाद्रियोगीशितुः ।
वेदान्तद्वयपारगं शुभगुणैर्जुष्टं सुशीलान्वितं
वन्दे लक्ष्मणयोगिवर्यममलं वानाचलेशप्रियम् ॥
लक्ष्मीनाथसमारम्भां (. . .) वन्दे गुरुपरम्पराम् ।
यो नित्यमच्युतपदाम्बुजयुग्मरुक्म-
व्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धोः
रामानुजस्य चरणौ शरणं प्रपद्ये ॥

* * *

वन्दे वानमहाशैलरामानुजमुनिप्रियम् ।
रामानुजार्यं सर्वज्ञं वत्सान्वयविभूषणम् ॥

End:

देवेशं कोलनाथं नतहितमनसं पद्मनाभं रमेशं
लोकार्यं कृष्णयुग्मेन च निगमशिरोयोगिभट्टारकौ च ।
गोविन्दं कूरनाथेन च सह कुरुकेशेन्दुसिन्धुं यतीन्द्रं
मालाढ्ययामुनार्यौ मम हृदि निदधौ रामपद्माक्षनाथौ ॥

(*p*) भूतशुद्धिः.

BHŪTAŚUDDHIḤ.

Foll. 94*a*—96*b*. Fol. 97 contains the Ācāryadhyānaślōkas.

Deals with the purification of one's self preliminary to the ceremonial worship of God.

Incomplete.

Beginning:

प्राणानायम्य, भगवदाराधनयोग्यतासिद्ध्यर्थं भूतशुद्धिं करिष्य इति सङ्कल्प्य, तत्त्वक्रमेण संहारन्यासं कृत्वा, ओं कं पृथिव्यै नमः । ओं चं गन्धतन्मात्रात्मने नमः । ओं टं पायवे नमः । ओं तं घ्राणाभ्यां नमः । पञ्चगुणां पृथिवीं पायुघ्राणाभ्यां गन्धतन्मात्रया सहाप्सु विलापयामि ।

End:

ओं पं मनसे नमः मनः पारिमण्डलमाकाशं वाक्श्रुतिभ्यां शब्द-तन्मात्रया सहाकाशमुत्पादयामि । ओं ङं आकाशाय नमः आकाशाद्-द्विगुणं वायुं त्वक्करभ्यां स्पर्शतन्मात्रया सह वायुमुत्पादयामि । ओं घं वाय.

(q) घटस्फोटविधिः.

GHAṬASPHOṬAVIDHIḤ.

Foll. 98—100b.

Similar to the work described under No. 3057 of the D.C.S. MSS., Vol. VI.

Incomplete.

Beginning:

सर्वेभ्यः श्रीवैष्णवेभ्यो नमः । अशेषे (. . .) यथोक्तदक्षिणामिव स्वी कृत्य गोत्रस्य शर्मणः पतितस्य मत्सम्बन्धनिवृत्त्यर्थं घटस्फोटनं कर्तुं योग्यता-सिद्धिमनुगृहाण । सङ्कल्प्य पुण्यतिथौ गोत्रस्य शर्मणः पतितस्य मत्सम्ब-न्धनिवृत्त्यर्थं घटस्फोटनं करिष्य इति सङ्कल्प्यादौ प्राजापत्यकृच्छ्रं कृत्वा दर्भस्तम्बे गोत्रं शर्माणं त(म)त्सम्बन्धं(द्धं) पतितमावाहयामि ।

End:

तद्दिने सम्बन्धपरित्यागखेदयुक्तः सूतकी तिष्ठेत् । तदितरेषां सूतकं नास्ति न तु नित्यकर्मनिवृत्तिः ब्रह्माध्यतिष्ठद्भुवनानि धारयन्.

Fol. 101a contains the Pratyāhārasūtra, Vararucivākya (Jyautiṣa), etc. Fol. 101b is left blank.

(s) मुहूर्तलक्षणम्.

MUHŪRTALAKṢAṆAM.

Foll. 108a—110b.

Similar to the work described under No. 13591 of the D.C.S. MSS., Vol. XXIV.

Incomplete.

Beginning:

अथ मुहूर्तलक्षणमभिधास्ये ; सिद्धान्ते—

सूक्ष्मसूच्याब्जपुष्पस्य दलवेधस्त्रुटीभवेत् ।
तच्चतुर्लव इत्युक्तः तत्त्रिंशत्तु निमेषकः ॥

* * * *

एकस्मिन् दिवसे त्रिंशन्मुहूर्ताः परिकीर्तिताः ।
घटिकाद्वयसंमिश्रं मुहूर्तमिति कथ्यते ॥

End :

रौहिणाह्वयबला विजयाख्ये नैरृतिश्शतमखो वरुणश्च ।
सप्तमस्तु भगसंज्ञिक . . . अष्टमस्य च भवेत्कुतपाख्यः ॥
रौद्रो गन्धर्वनामा द्रविणपरिवृतस्त्वारणो वायवाख्यो
. . . . . . मुनिभिरिह पुराणार्थचिन्ताप्रवीणैः—काश्यपः.

Foll. 111*a*—112*b* contain दन्तधावनमन्त्र, तुलसीग्रहणमन्त्र, and दर्भग्रहणमन्त्र. Foll. 113*a*—120*a* contain the following subjects:—ब्रह्मयज्ञ, श्रीपादतीर्थग्रहणप्रमाण, वपनविषयवचन, भुक्तिपात्रस्पर्शविषयवचन and श्रीपादतीर्थपानक्रम.

(*t*) सुचरितचषकम्.

SUCARITACAṢAKAM.

Foll. 120*b*—127*b*.

Same work as that described under R. No. 2877 (*e*) ante.

Complete.

(*x*) वैश्वदेवप्रयोगः.

VAIŚVADĒVAPRAYŌGAḤ.

Foll. 128*a*—130*b*.

Same work as that described under No. 3801 of the D.C.S. MSS., Vol. VII, wherein see for the end.

Complete.

Beginning:

पादौ प्रक्षाल्याचम्य श्रीभगवदाज्ञया भगवत्कैङ्कर्यरूपप्रातर्वैश्वदेवं करिष्ये । अदितेऽनु (. . .) प्रसुव इत्यग्निं परिषिच्य, भूतं सुभूतमिति प्रतिवचनम् । सा विराट् तन्मा क्षायि ॥

(*v*) आधारशक्तितर्पणप्रयोगः.

ĀDHĀRAŚAKTITARPAṆAPRAYŌGAḤ.

Foll. 131*a*—13?*b*.

Same work as that described under No. 3546 of the D.C.S. MSS.

(w) सन्ध्यावन्दनमन्त्रर्षिच्छन्दोदेवताः.

SANDHYĀVANDANAMANTRARṢICCHANDŌDĒVATĀḤ.

Foll. 131a—137a. Fol. 137b is left blank.

Same work as that described under No. 3840 of the D.C.S. MSS., Vol. VII.

Complete.

Fol. 138 contains Amṛtādiyōgas. Foll. 139—143 contain the Pūrvācāryadhyānaślōkas. Foll. 144 and 145 are left blank.

R. No. **391** (of the Tamil Part).

Palm-leaf. 14½ × 1⅜ inches. Foll. 72. Lines, 10 in a page. Tamil and Grantha. Injured.

Presented in 1918-19 by M.R.Ry. S. Kṛṣṇamācārya of Triplicane.

(f) वैष्णवेष्टिः.

VAIṢṆAVĒṢṬIḤ.

Foll. 21a—22a.

On the performance of a religious ceremony called Vaiṣṇavēṣṭi by a person desirous of expiating for the sin of his father having died a non-Vaiṣṇava. This forms part of the Śrāddhaprakaraṇa of the Vāsiṣṭhasmṛti.

Beginning :

पित्रादयो मृता ये च भवेयुर्यद्यवैष्णवाः ।
इष्टिं च वैष्णवीं कुर्यात् तेषां पापविशुद्धये ॥
अब्दे अ. च यः कुर्याद्विधिना वैष्णवोत्तमः ।
वैष्णवत्वं प्रयात्येव कुलमेकोत्तरं शतम् ॥
एकादश्यां शुक्लपक्षे समुपोष्य द्विजोत्तमः ।
(गन्ध)चूर्णेन लिप्ताङ्गो नद्यां स्नायाच्छुभे जले ॥
नित्यमुक्तसमेतं च देवेशं पूजयेद्धरिम् ।
गृहं गत्वा विधानेन पूजयेद्विष्णुम . . ॥

* * * *

एवमिष्टिं प्रकुर्वीत वैष्णवीं वैष्णवोत्तमः ।
पितुः पूर्वोक्तविधिना संस्कारादीन् समाचरेत् ॥
वैष्णवेष्टिविधानेन कृत्वा वै द्विजसत्तमः ।
कुलमेकोत्तरशतं पुनात्येव न संशयः ॥

End:

प्रत्यङ्कं क्रियमाणानां वैष्णवानां कुलं च तत् ।
उद्धृत्य परमं धाम प्रयात्येव न संशयः ॥
जातकर्मविवाहादौ प्रायश्चित्तं विधीयते ।
प्रायश्चित्तिरियं सा तु वैष्णवीरि(त्वि)ष्टिरुच्यते ॥

Colophon:

इति वासिष्ठस्मृतौ श्राद्धप्रकरणं नाम सप्तमोऽध्यायः ॥

(*g*) सुदर्शनधारणविधिः.

SUDARŚANADHĀRAṆAVIDHIḤ.

Foll. 22*b*—23*a*.

Similar to the work described under No. 3855 of the D.C.S. MSS., Vol. VII.

Complete.

Beginning:

श्रीसुदर्शनधारणविधिः.

कौशिकगोत्रं वरदनारायणशर्माणं सुदर्शनपाञ्चजन्येन, पुण्ड्रादिधारणेन, मन्त्रोपदेशेन च संस्करिष्ये । तदङ्गं प्रतिसरबन्धकर्म करिष्ये—इति सङ्कल्प्य स्नातं शिष्यं मूलमन्त्रेण संप्रोक्ष्य रक्षासूत्रमापो हि ष्ठा मयोभुवः, हिरण्यवर्णाः, पवमानः, कृणुष्वपाजैरस्त्रमन्त्रेण च संप्रोक्ष्य ।

End:

दक्षिणे भुजे सुदर्शनं वामे पाञ्चजन्यं च तत्तन्मन्त्रेण धारयित्वाग्निं देवं च शिष्येण सह प्रदक्षिणीकृत्य दिव्यायुधसान्निध्यं प्रार्थयेत । केशवादिनामानि रूपाणि च यथावदुपविश्य विधिवत ॥

(*h*) मानसिकस्नानम्.

MĀNASIKASNĀNAM.

Fol. 23.

Same work as that described under No. 5789 of the D.C.S. MSS., Vol. XII.

Complete.

Colophon:

मानसस्नानं सम्पूर्णम् ॥

(*j*) सुदर्शनधारणप्रमाणानि.

SUDARŚANADHĀRAṆAPRAMĀṆĀNI.

Foll. 25*a*—26*b*.

Similar to the work described under No. 5372 of the D.C.S. MSS., Vol. XI.

Incomplete.

Beginning:

ऋग्वेदे—पवित्रं ते विततं ब्रह्मणस्पते । प्रभुर्गात्राणि पर्येषि विश्वतः । अतप्ततनूर्न तदामो अश्नुते । यजुषि—चरणं पवित्रम् । साम्नि मैत्रायणीयशाखायाम्—अग्नेर्वै सहस्रारः । सहस्रारो नेमिः । नेमिना तप्ततनूः । ब्रह्मणस्सायुज्यं सलोकतां यन्ति । अथर्वणे—चक्रं बिभर्षि वपुषाभितप्तम् ।

See under the subdivision (*p*) below for end.

(*o*) अघविवेचनम्.

AGHAVIVĒCANAM.

Foll. 33*a*—35*b*.

By Rāmacandrādhvarin, son of Ananta Sōmāyājin. Same work as that described under No. 3006 of the D.C.S. MSS., Vol. V.

Complete.

(*p*) सुदर्शनधारणप्रमाणानि.

SUDARŚANADHĀRAṆAPRAMĀṆĀNI.

Foll. 36*a*—37*b*.

Same work as that described under R. No. 390 (*j*) (of the Tamil Part) ante, wherein see for the beginning.

Incomplete.

End:

वसिष्ठसंहितायाम्—

विधिनैव प्रतप्तेन चक्रेणैवाङ्कयेद्भुजम् ।
तथैव बिभृयात्काले पुण्ड्रं शुभतरं मृदा ॥
बिभृयादुपवीतं च.

(*q*) रहस्यरक्षा.

RAHASYARAKṢĀ.

Foll. 38*a*—49*a*. Fol. 49*b* is left blank.

By Vēdāntadēśika. Same work as that described under Nos. 5348 and 5349 of the D.C.S. MSS., Vol. XI.

Contains the Catuśślōkyadhikāra only.

(r) द्रमिडोपनिषत्सारम्.

DRAMIḌŌPANIṢATSĀRAM.

Foll. 50a—51b.

A work giving the substance of each of the Pattus (centums) of the Tamil Tiruvāymoli of Śaṭhakōpa in one or two Sanskrit stanzas: by Vēdāntadēśika.

Complete.

Beginning:

सेवायोग्योऽतिभोग्यश्शुभसुभगतनुस्सर्वभोग्यातिशायी
श्रेयस्तद्धेतुदाता प्रपदनसुलभोऽनिष्टविध्वंसशीलः ।
भक्तच्छन्दानुवर्ती निरुपधिकसुहृत्सत्पदव्यां सहायः
श्रीमान् सर्वोचितायामुपनिषदि मिषत्वेष गाथाशतैर्नः ॥

आद्ये पश्यन्नुपायं प्रभुमिह परमप्राप्यभूतं द्वितीये
कल्याणोदारमूर्तेर्हितयमिदमिति प्रेक्षमाणस्तृतीये ।
ऐश्वर्यादेश्चतुर्थे विषमधुतुलयानन्यभोग्यत्वमिच्छन्
षड्भिः स्वां पञ्चमाद्यैरनितरगतितामाचचक्षे मुनीन्द्रः ॥

End:

मनुष्यासप्राचेतसपरिषदर्हा क्वचिदियं
सुधासिक्ता सूक्तिः स्वयमुदयमन्विच्छति जने ।
निरुन्ध्युः के विन्ध्याचलविकटसन्ध्यानटजटा-
परिभ्रान्ता पङ्गोरुपरि यदि गङ्गा निपतति ॥

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु द्रमिडोपनिषत्सारः सम्पूर्णः ॥

(s) द्रमिडोपनिषत्तात्पर्यरत्नावलिः.

DRAMIḌŌPANIṢATTĀTPARYARATNĀVALIḤ.

Foll. 51b—55b.

A work by Vēdāntadēśika conveying in the form of a stanza the substance of each of the Tiruvāymoḻis of each of the ten Pattus (centums) of the Tamil work Tiruvāymoḻi.

Complete.

Beginning:

सारस्सारस्वज्ञानां शठरिपुभणितिश्शान्तिशुद्धान्तसीमा
मायामायामिनीभिस्स्वगुणविततिभिर्बन्धयन्तीन्धयन्ती ।
पारं पारम्परीतो भवजलधिभवन्मज्जनानां (जनानां)
प्रत्यक् प्रत्यक्षयेन्नः प्रतिनियतरमासन्निधानं निधानम् ॥
प्रज्ञाख्ये मन्थशैले प्रथितगुणरुचिं नेत्रयन् सम्प्रदायं
तत्तल्लब्धिप्रसक्तैरनुपधिविबुधैरर्थितो वेङ्कटेशः ।
तल्पं कल्पान्तयूनः शठजिदुपनिषद्दुग्धसिन्धुं विमथ्नन्
ग्रथ्नाति स्वादुगाधालहरिदशशतीनिर्गतं रत्नजातम् ॥
पाञ्चालीगात्रशोभाहृतहृदयवधूवर्गपुम्भावनीत्या
पत्यौ पद्मासहाये प्रणयिनि भजतः प्रेयसीपारतन्त्र्यम् ।
भक्तिश्शृङ्गारवृत्त्या परिणमति मुनेर्भावबन्धप्रथिम्ना
योगात्प्रागुत्तरावस्थितिरिह विरहो देशिकास्तत्र दूताः ॥
भाषागीतिः प्रशस्ता भगवति वचनाद्राजवच्चोपचारा-
त्सा चागस्त्यप्रसूता त्विति परिजगृहे भूमिकाभेदयोग्या ।
यत्तत्कृत्यं श्रुतीनां मुनिगणविहितैस्सेतिहासैः पुराणैः
तत्रासौ सत्त्वसीम्नश्शठमथनमुनेस्संहिता सार्वभौमी ॥
आदौ शारीरकार्थक्रममिह विशदं विंशतिर्वक्ति साग्रा
सङ्क्षेपोऽसौ विभागं प्रथयति च ऋचां चारुपाठोपपन्नम् ।
सम्यग्गीतानुबद्धं सकलमनुगतं सामशाखासहस्रं
संलक्ष्यं साभिधेयैर्यजुरपि शतकैर्भात्यथर्वा रसैश्च ॥

End:

शोकश्श्लोकत्वमभ्यागत इति नयतश्शुद्धबोधार्णवोद्य-
न्नानाकल्लोलनाथानुभवरसपरीवाहतश्श्राव्यवेदात् ।
वेदान्ताचार्यकश्रीबहुमतबहुविद्वेङ्कटेशोद्धृतेयं
रम्या तात्पर्यरत्नावलिरनघगुणा रञ्जनी रङ्गभर्तुः ॥

Colophon:

तात्पर्यरत्नावली सम्पूर्णा ॥

(u) गृहार्चाप्रतिष्ठाविधिः.

GṚHĀRCĀPRATIṢṬHĀVIDHIḤ.

Foll. 56*a*—58*b*.

Same work as that described under No. 5237 of the D.C.S. MSS., Vol. XI.

Incomplete.

(*v*) तप्तचक्राद्यङ्कनप्रमाणानि.

TAPTACAKRĀDYAṄKANAPRAMĀṆĀNI.

Foll. 59*a*—72*b*.

Similar to the work described under No. 5255 of the D.C.S. MSS., Vol. XI. Vēdāntadēśika is referred to in the work.

Incomplete; wants the beginning.

Beginning :

एकायनब्राह्मणे च

ओङ्कारः स्वरः मकारो व्यञ्जनम् । यः स्वरस्सा प्रकृतिरिति स्वरप्राधान्यमेवोक्तम् । अयमत्र विध्यर्थः—सर्वपापप्रमोक्षक ऊर्ध्वपुण्ड्रचक्रादिधारी प्रणवेन प्रतिपादकेन विष्णुं ध्यायेदिति यो महात्मा स ध्यायेदित्य[न]-ध्याहारेण वा योजना । यो ध्यायति स महात्मा भवेदिति वा वचनव्यक्तिः । तथा ऋचि प्र ते विष्णो अब्जचक्रे इत्यादिस्तवप्रियं स्तव्यं भगवन्तं तुष्टूषन्नभिमुखयति—विष्णो इति । त इति निर्देशेनानिष्टनिवर्तकत्वेष्टप्रापकत्वाद्यपेक्षितसकलाकारयोगित्वमभिप्रेतम् । अनिष्टनिवृत्त्याद्यर्थं हि कस्य चिह्नाञ्छनधरणम् । अत्राब्जशब्देन शङ्ख उच्यते ।

End :

अतस्सिद्धं ब्राह्मणादिभिस्सुदर्शनादिकमवश्यं धार्यं मुमुक्षुभिस्तु विशेषत इति ।

श्रीमद्वेङ्कटनाथेन सम्यगेतत्समर्थितम् ।
श्रुतिस्मृतीतिहासादिसिद्धं चक्रादिधारणम् ॥
अयमनवमसूक्तैरादिभ.

R. No. **297** (of the Telugu Part).

Paper. $8\frac{1}{8} \times 6\frac{7}{8}$ inches. Foll. 13. Lines, 19 in a page. Good.

Purchased in 1916–17 from M.R.Ry. Śyāmola Kāmā Śāstri of Karapa, Cocanada taluk.

(*a*) पञ्चदशी, सव्याख्या.

PAÑCADAŚĪ WITH COMMENTARY.

Foll. 1*a*—7*a*.

By Vidyāraṇya. Same work as that described under No. 4613 of the D.C.S. MSS., Vol. IX.

Contains the Nāṭakadīpa only.

Colophon:

इति श्रीविद्यारण्यविरचितनाटकदीपः ॥

R. No. **337** (of the Telugu Part).

Paper. 10⅜ × 9⅝ inches. Foll. 133. Lines, 20 in a page. Good.

Transcribed in 1916–17 from a MS. of M.R.Ry. Tējōmūrtula Veṅkaṭappa Siddhāntigāru of Tuni, Godavari district.

(*d*) ग्रहचन्द्रिकागणितम्, आन्ध्रटीकासहितम्.

GRAHACANDRIKĀGAṆITAM WITH TELUGU MEANING.

Foll. 67*b*—76*b*.

A treatise in astronomy. The author appears to be Appaya, son of Marla Pērubhaṭṭa.

Contains the following Adhikāras:—

१. मध्यग्रहाधिकारः.
२. स्फुटग्रहाधिकारः.
३. वक्रवक्रत्यागोदयास्तमयाधिकारः
४. पाताध्यायः.
५ लग्नाधिकारः.
६. चन्द्रग्रहणाधिकारः.
७. सूर्यग्रहणाधिकारः.

Complete.

Beginning:

श्रीमर्लवंशकलशाम्बुधिकौस्तुभेन श्रीपेरुभट्टतनयेन विराजितेन ।
सा दीयतामभिमताप्पयधीमतेयं बोधाय सर्वधरणीसुरपण्डितानाम् ॥

* * * *

शाके विश्वपयोधिचन्द्र (१४१३) रहितः सूर्याहतो मासयुक्
द्विस्थः २ खाग्नि ३० हतः खखाङ्ग ६०० सहितः षड्भूधराङ्काप्तयुक् ९७६ ।
त्रिंश ३० घ्नो दिनयुक् त्रिधा ३ वसुवियच्छैलांश ७०८ नागाग्नियुक् ३८
वेदाङ्गा ६४ प्तफलोनितो दिनगणः स्याच्छुक्रवारादिकाः ॥

भक्तो वारगणाद्युगाङ्गदहनै ३६४ र्लब्धेन वर्षध्रुवा-
निघ्नाशेषहताः कलादिगतयोर्युक्ताः क्रमाः स्वध्रुवैः ।
खेटाः स्युर्दशकन्धरस्य नगरे सूर्योदये सम्भवा
भूरेखाः परपूर्वयोजनहता भुक्तैः खनागै ८० र्भजेत् ॥

लब्धं खेऽटविलिप्तकासुसहितं पश्चाद्धनं प्राग्वृणं
राश्याद्याः क्रमशो भवन्ति खचरा मध्यस्वदेशोद्भवाः ।
राहोस्तद्विपरीतमात्रमखिलं पूर्वध्रुवैस्सर्वदा
राहुस्पष्टतरो भषट्कसहितं केतुग्रहास्स्युस्तदा ॥ तथापि
वर्षग्रहकलाद्याश्च यत्कादिपदसंयुतम् ।
पूर्वध्रुवः पादगत्या संयोज्ये मध्यमो ग्रहः ॥

अथ रव्यादीनां वर्षध्रुवमाह—

श्रीकण्ठा वसुबाहवः शरकृता रामाग्नयोऽग्न्यब्ध्यब्धयः
तर्कास्या गजसागरा वसुकृता भानोः ११. २८. ४९. ३३. ४३ ६. ४८.
[४८. गुणाः षड्यमाः ।
रुद्रा भूमिगुणाः सुधाकरशराः पूर्णेन्दवः सागराः
दन्ताश्शीतकरस्य ३. २६. २२. ३२. ५२. २०. ४. ३२.
[भूमितनयस्याङ्गानि शून्येन्दवः ॥

* * * *

Colophon:

इति ग्रहचन्द्रिकाख्यगणिते मध्यग्रहाधिकारः प्रथमः ॥

End:

रवीन्दुमासयोगार्धं भागोनग्रासलिप्तकाः ।
स्थितिखण्डादिकं पूर्वं क्रमात्पूर्ववदानयेत् ॥

Colophon:

इति ग्रहचन्द्रिकाख्यगणिते सूर्यग्रहणाधिकारः सप्तमः ॥

आलिख्य पङ्क्तिमङ्कानामोजयुग्मं पुनः पुनः ।
ओजोभागे द्वियोगाः स्युः द्विघ्नस्सर्वैर्भजत्कृतिः ॥

* * * *

सैंहिकेयस्य पादश्च द्विषष्टिर्दिवसं तथा ।
कृतेषु घटिकाश्चैव कृताब्धिश्च विनाडिकाः ॥

* * * *

Colophon:

इति श्रीग्रहचन्द्रिकाख्यगणिते तिथ्यादिग्रहणान्तं मूलं सम्पूर्णम् ॥

R. No. **360** (of the Telugu Part).

Palm-leaf. 14 × 1½ inches. Foll. 44. Lines, 7 in a page. Fair.

Presented in 1916–17 by M.R.Ry. Prērēpa Subbayyagāru of Pekeru, Tanuku taluk, Kistna district.

(*b*) रतिरहस्यम्.

RATIRAHASYAM.

Foll. 20*a*—42*b*.

By Kokkōkakavi. Same work as that described under No. 3895 of the D.C.S. MSS., Vol. VIII.

Complete in ten Paricchēdas.

Fol. 43 contains some Smṛtivacanas and Cāṭuślōkas, and 44 some sentences in Telugu language.

R. No. **468** (of the Telugu Part).

Palm-leaf. 11⅞ × 1¼ inches. Foll. 152. Lines, 4 in a page. Telugu.

Slightly injured.

Purchased in 1917–18 from M.R.Ry. Niḍadavōlu Sundaram Pantulugāru of Vizagapatam.

(*b*) जगन्नाथाष्टकम्.

JAGANNĀTHĀṢṬAKAM.

Foll. 64*a*—65*b*.

A eulogy in eight stanzas on Lord Kṛṣṇa worshipped as Jagannātha at Nīlācala (Puri). This work is printed in the Stōtraratnāvali in Bombay with some variations in reading.

Complete.

Name of the copyist: Koḍukula Veṅkaṭa Sōmayāji. Date of copying: Friday, the 14th day of the bright fortnight of he Caitra month in the year Dhātu.

Beginning:

कृपापारावारस्सजलजलदश्रेणिरुचिरः
रमावाणीरामश्शरदमलपद्मेक्षणयुतः ।
सुरेन्द्रैराराध्यश्श्रुतिगणसखागीतचरितः
जगन्नाथस्वामी नयनपथगामी भवतु मे ॥

End:

महाम्भोधेस्तीरे कनकरुचिरे नीलशिखरे
वसन् प्रासादान्ते सहजबलभद्रेण सहितः ।
सुभद्रामध्यस्थस्सकलसुरसेवावसरदः
जगन्नाथस्वामी नयनपथगामी भवतु मे ॥

Colophon:

इति श्रीजगन्नाथाष्टकं सम्पूर्णम् ॥

(c) गणेशाष्टकम्.

GAṆĒŚĀṢṬAKAM.

Fol. 66.

Slightly different from that described under No. 9407 of the D.C.S. MSS., Vol. XVIII, but the two additional stanzas are wanting in the beginning.

End:

गणाष्टकमिदं पुण्यं यः पठेत्सततं नरः ।
सर्वान् कामानवाप्नोति सर्वसिद्धिफलं लभेत् ॥

Colophon:

इति श्रीगणेशाष्टकं सम्पूर्णम् ॥

Date of copying: Friday, the 14th day of the bright fortnight of the Caitra month in the year Dhātu.

(d) यमुनाष्टकम्.

YAMUNĀṢṬAKAM.

Foll. 67*a*—69*a*. Fol. 69*b* is left blank.

Eight stanzas in praise of the river Yamunā (the Jumna): by Śaṅkarācārya.

Complete.

Date of copying: Monday, the 2nd day of the dark fortnight of the month of Caitra in the year Dhātu.

Beginning:

कृपापारावारां तपनतनयां तापशमनीं
मुरारिप्रेयस्यां भवभवदवां भक्तिवरदाम् ।
वियज्जालान्मुक्तां श्रियमपि सुखाप्तेः प्रतिदिनं
सदा धीरो नित्यं भजति यमुनां मुक्तिफलदाम् ॥
मधुवनचारिणि भास्करवाहिनि जाह्नविसङ्गिनि सिन्धुसुते
मधुपरिभूषिणि माधवतोषिणि गोकुलभीतिविनाशकृते ।
जगदघमोचनि मानसदायिनि केशवकेलिनिदानगते
जय यमुने यदुभीतिनिवारणि सङ्कटनाशनि पावय माम् ॥

End:

भवोत्तापाम्भोधौ निपतितजनो दुर्गतियुतो
यदि स्तौति प्रातः प्रतिदिनमनन्याश्रयतया ।
हयाहेषैः कामाङ्कुरकुसुमपुञ्जै रविसुतां
सदा भोक्ता भोगान्मरणसमयं(ये) याति हरिताम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकश्रीमच्छङ्कराचार्यविरचितं यमुनाष्टकं समाप्तम् ॥

(*e*) देवतार्चनविधिः.

DĒVATĀRCANAVIDHIḤ.

Foll. 70*a*—77*a*. Fol. 77*b* is left blank.

Slightly different from the work described under No. 8636 of the D.C.S. MSS., Vol. XVI.

Complete.

Date of copying: Tuesday, the 3rd day of the dark fortnight of the Caitra month in the year Dhātu.

Beginning:

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ।
कुर्याद्घण्टारवं तत्र देवताह्वानलाञ्छनम् ॥
अपसर्पन्तु ये भूता ये भूता भूमिसंस्थिताः ।
ये भूता विघ्नकर्तारः ते नश्यन्तु शिवाज्ञया ॥

* * * *

श्रीरामचन्द्रदेवतामुद्दिश्य श्रीरामचन्द्रदेवताप्रीत्यर्थं तद्ध्यानावाहनादिषोडशोपचारपूजां करिष्ये । तदङ्गकलशपूजां करिष्ये ।

End:

पुष्पाञ्जलिं स्वीकुरु पुष्कराक्ष प्रपन्नकल्पद्रुमपारिजात ।
इन्द्रादिवृन्दारकपूजिताङ्घ्रे नमोऽस्तु ते देव हरे प्रसीद ॥

सहस्रशीर्षं देवं . . . स्वराट् । श्रील . . . नमः। मन्त्रपुष्पं समर्पयामि ॥

(*f*) नर्मदाष्टकम्.

NARMADĀṢṬAKAM.

Foll. 78*a*—79*b*

Eight stanzas in praise of the river Narmadā. The authorship is attributed to Śaṅkarācārya.

Complete.

Date of copying: Thursday, the 5th day of the dark fortnight of the Caitra month in the year Dhātu.

Beginning:

सबिन्दुसिन्धुसुस्खलत्तरङ्गरङ्गरञ्जितं
द्विषत्सुपापजातजातकारिवारिसंयुतम् ।
कृतान्तदूतकालभूतभीतिहारिवर्मदे
त्वदीयपादपङ्कजं नमामि देवि नर्मदे ॥

End:

इदं तु नर्मदाष्टकं त्रिकालमेव ये सदा
पठन्ति ते निरन्तरं न यान्ति दुर्गतिं कदा ।
सुलभ्यदेहदुर्लभं महेशधामगौरवं
पुनर्भवा नरा न वै विलोकयन्ति रौरवम् ॥

Colophon:

इति श्रीमच्छङ्कराचार्यविरचितं नर्मदाष्टकस्तोत्रं सम्पूर्णम् ॥

(*g*) प्रयागाष्टकम्.

PRAYĀGĀṢṬAKAM.

Foll. 80*a*—81*b*. Fol. 82 contains the Akṣayavaṭastōtra.

Eight stanzas in praise of the sacredness of Prayāga (Allahabad).

Complete; as found in the Matsyapurāṇa.

Date of copying: Thursday, the 5th day of the dark fortnight of the Caitra month in the year Dhātu.

Beginning:

मुनय ऊचुः—

सुरमुनिदिविजेन्द्रैः सेव्यते योऽस्ततन्द्रैः
गुरुतरदुरितानां का कथा मानवानाम् ।
स भुवि सुकृतकर्तुर्वाञ्छितावाप्तिहेतु-
र्जयति विजति(तत)यागस्तीर्थराजप्रयागः ॥

श्रुतिः प्रमाणं श्र(स्मृ)तयः प्रमाणं पुराणमप्यत्र(व्यक्त)परं प्रमाणम् ।
यत्रास्ति गङ्गा यमुना प्रमाणं स तीर्थराजो जयति प्रयागः ॥

End:

तीर्थराजप्रयागस्य माहात्म्यं कथयिष्यतः ।
शृण्वतस्सततं भक्त्या वाञ्छितं फलमाप्नुयात् ॥

Colophon:

इति श्रीमत्स्यपुराणे प्रयागराजस्य माहात्म्याष्टकं सम्पूर्णम् ॥

(*h*) तुलस्यष्टकम्.

TULASYAṢṬAKAM.

Fol. 83.

By Śaṅkarācārya. Similar to the work described under R. No. 1447 (*d*) ante.

Complete.

Date of copying : Thursday, the 5th day of the dark fortnight of the Caitra month in the year Dhātu.

Beginning:

कल्याणमूर्तिं कलिकल्मषापहां ब्रह्मादिभिर्वन्दितपादपद्माम् ।
स्वभक्तचिन्तामणिकामधेनुं देवीं भजेऽहं तुलसीं प्रभाते ॥
नमामि तुलसीं देवीं विष्णुपादाब्जसेविनीम् ।
शङ्खचक्रधरे देवि जगन्मातर्नमोऽस्तु ते ॥

End:

यः पठेत्प्रातरुत्थाय भक्तियुक्तेन चेतसा ।
कालमृत्युमतिक्रम्य स याति परमां गतिम् ॥
शङ्करेण कृतस्तोत्रां तुलसीं तां नमाम्यहम् ।
पौर्णमास्याममावास्यां(यां वा) द्वादश्यां च विशेषतः ॥
ब्रह्मघ्नोऽपि सुरापायी स्वर्णस्तेयी गुरुतल्पगः ।
सर्वपापविनिर्मुक्तस्तद्विष्णुपरमं पदम् ॥

Colophon:

तुलस्यष्टकं सम्पूर्णम् ॥

(*i*) मणिकर्णिकाष्टकम्.

MAṆIKARṆIKĀṢṬAKAM.

Foll. 84*a*—86*a*. Fol. 86*b* is left blank.

By Śaṅkarācārya. Same work as that described under R. No. 226 (*b*) ante.

Complete.

Colophon:

इति श्रीशङ्कराचार्यविरचितं मणिकर्णिकाष्टकं सम्पूर्णम् ॥

Date of copying: Thursday, the 10th day of the bright fortnight of the Āśvija month in the year Dātu.

(*j*) गङ्गाष्टकम्.

GAṄGĀṢṬAKAM.

Foll. 87*a*—88*b*.

Same work as that described under No. 9370 of the D.C.S. MSS., Vol. XVIII. The stanzas are attributed to Vālmīki.

Complete.

Colophon :

इति श्रीवाल्मीकिना विरचितं गङ्गाष्टकं सम्पूर्णम् ॥

(*k*) अन्नपूर्णाष्टकम्.

ANNAPŪRṆĀṢṬAKAM.

Foll. 89*a*—91*a*. Fol. 91*b* is left blank.

By Śaṅkarācārya. Same work as that described under R. No. 488 (*f*) ante.

Complete.

Colophon :

इति श्रीशङ्कराचार्यविरचितमन्नपूर्णाष्टकं सम्पूर्णम् ॥

(*l*) विश्वनाथाष्टकम्.

VIŚVANĀTHĀṢṬAKAM.

Foll. 92*a*—93*b*.

By Vyāsa. Same work as that described under R. No. 488 (*e*) ante.

Complete.

Colophon :

इति श्रीव्यासविरचितं विश्वेश्वराष्टकं सम्पूर्णम् ॥

(*m*) कालभैरवाष्टकम्.

KĀLABHAIRAVĀṢṬAKAM.

Foll. 94*a*—95*b*.

By Śaṅkarācrāya. Same work as that described under R. No. 488 (*d*) ante.

Complete, but the last stanza is slightly different.

कालभैरवाष्टकं पठन्ति ये मनोहरं ज्ञानमुक्तिसाधनं विचित्रपुण्यवर्धनम् ।
शोकमोहदैन्यलोभकोपतापनाशनं ते प्रयान्ति कालभैरवाङ्घ्रिसन्निधिं ध्रुवम् ॥

Colophon:

इति श्रीशङ्कराचार्यविरचितं कालभैरवाष्टकं सम्पूर्णम् ॥

(*n*) दण्डपाण्यष्टकम्.

DAṆḌAPĀṆYAṢṬAKAM.

Foll. 96*a*—97*a*. Fol. 97*b* is left blank.

Eight stanzas in praise of God Daṇḍapāṇi, a manifestation of of Śiva, worshipped at Benares.

Complete.

Beginning:

जय यक्षपते धीर जय पिङ्गललोचन ।
जय पिङ्गजटाभार जय दण्डमहायुध ॥
अविमुक्तमहाक्षेत्रसूत्रधारोग्रतापन ।
सौम्यानां सौम्यवदन भीषणानां भयानक ॥

End:

दण्डपाण्यष्टकं धीमान् जपन् विघ्नैर्न जातुचित् ।
श्रद्धया परिभूतो यः काशीवासफलं लभेत् ॥

* * * *

श्रुत्वाध्यायमिमं पुण्यं दण्डपाणिसमुद्भवम् ।
पठित्वा पाठयित्वापि न विघ्नैरभिभूयते ॥

Colophon:

इति श्रीकाशीखण्डे दण्डपाण्यष्टकं सम्पूर्णम् ॥

(*o*) बिन्दुमाधवाष्टकम्.

BINDUMĀDHAVĀṢṬAKAM.

Foll. 98*a*—99*b*.

Same work as that described under R. No. 488 (*h*) ante.

Complete.

Colophon:

इति श्रीबिन्दुमाधवाष्टकं सम्पूर्णम् ॥

(*p*) मृत्युलाङ्गूलमन्त्रः.

MṚTYULĀṄGŪLAMANTRAḤ.

Foll. 100*a*—101*b*.

Similar to the work described under No. 6955 of the D.C.S. MSS., Vol. XIII.

Complete.

Beginning:

अस्य श्रीमृत्युलाङ्गूलस्तोत्रमन्त्रस्य उलूकलाङ्गूल ऋषिः अनुष्टुप् छन्दः,

श्रीकालाग्निरुद्रो देवता, क्लां बीजं, क्लीं शक्तिः, क्लां कीलकम् , अपमृत्यु-
परिहारार्थे मृत्युलाङ्गूलमन्त्रपठने जपे विनियोगः ।

End:

मन्त्रो नश्यति मन्त्रो नश्यति मन्त्र इत्याह भगवान् महादेवः ।
वसिष्ठः ॥

* * * *

ऋषीणां कु(ले) महामेधावी भवति मृत्युर्नश्यति ॥

(q) रुद्रत्रिशतीनामस्तोत्रम्.

RUDRATRIŚATĪNĀMASTŌTRAM.

Foll. 102*a*—117*b*.

Similar to the work described under No. 9238 of the D.C.S. MSS., Vol. XVII.

Complete.

Beginning:

हिरण्यबाहुस्सेनानीर्दिक्पतिस्तरुराट् परः ।
हरिकेशः पशुपतिर्महान् सस्पिञ्जरो मृडः ॥
विव्याधी बभ्रुशश्श्रेष्ठः परमात्मा सनातनः ।
सर्वान्नराड्जगत्कर्ता पुष्पीशो नन्दिकेश्वरः ॥

End:

सर्वज्ञः परमात्मा च ब्रह्मानन्दाश्रयो विभुः ।
महेश्वरो महादेवः परब्रह्म सदाशिवः ॥

(r) गणपतिद्वादशनामस्तोत्रम्.

GAṆAPATIDVĀDAŚANĀMASTŌTRAM.

Foll. 118*a*—119*a*. Fol. 119*b* is left blank.

Same work as that described under No. 8789 of the D.C.S. MSS., Vol. XVII, but with slight difference and additional stanzas in the beginning.

Complete.

Beginning:

उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ मधुसूदन ।
उत्तिष्ठ जानकीकान्त त्रैलोक्यं मङ्गलं कुरु ॥

* * * *

अस्य श्रीविघ्नेश्वरद्वादशनामस्तोत्रमहामन्त्रस्य ईश्वर ऋषिः, अनुष्टुप् छन्दः, श्रीविघ्नेश्वरो देवता, गोक्षीरवर्णधवलमिति बीजं, प्रमाणप्रत्याम्नायमिति शक्तिः, सप्तकोटिमहामन्त्रमिति कीलकं, हेमवर्णमिति ध्याने विनियोगः ।

प्रथमं वक्रदण्डं च द्वितीयमेकदंष्ट्रकम् ॥

Colophon:

इति श्रीगणपतिस्तोत्रं सम्पूर्णम् ॥

(*s*) हनुमद्द्वादशनामस्तोत्रम्.

HANUMADDVĀDAŚANĀMASTŌTRAM.

Fol. 120*a*.

Same work as that described under No. 8785 of the D.C.S. MSS., Vol. XVII.

Complete.

Colophon:

श्री आञ्जनेयस्तोत्रं सम्पूर्णम् ॥

(*t*) प्रातस्स्मरणीयश्लोकपञ्चकम्.

PRĀTASSMARAṆĪYAŚLŌKAPAÑCAKAM.

Foll. 120*b*—121*b*.

Same work as that described under No. 10163 of the D.C.S. MSS., Vol. XVIII.

Complete.

(*u*) प्रातस्स्मरणीयपञ्चरत्नस्तोत्रम्.

PRĀTASSMARAṆĪYAPAÑCARATNASTŌTRAM.

Foll. 122*a*—123*a*.

Same work as that described under No. 11065 of the D.C.S. MSS., Vol. XIX.

Complete.

(*v*) अर्धनारीश्वराष्टकम्.

ARDHANĀRĪŚVARĀṢṬAKAM.

Foll. 123*b*—124*b*.

Same work as that described under No. 10926 of the D.C.S. MSS., Vol. XIX.

Complete.

(*w*) हरिहरवर्णनम्.

HARIHARAVARṆANAM.

Foll. 124*a*—126*a*. Fol. 126*b* is left blank.

This forms the eighth Adhyāya of the Skāndapurāṇa and is in praise of Hari (God Viṣṇu) and Hara (God Śiva).

Complete.

Beginning:

गोविन्द माधव मुकुन्द हरे मुरारे शम्भो शिवेश शशिशेखर शूलपाणे ।
दामोदराच्युत जनार्दन वासुदेव त्याज्या भटा य इति सन्ततमामनन्ति ॥
गङ्गाधरान्धकरिपो हर नीलकण्ठ वैकुण्ठ कैटभरिपो कमलाब्जपाणे ।
भूतेश खण्डपरशो मृड चण्डिकेश त्याज्या . . . . . न्ति ॥

End:

इत्थं द्विजेन्द्रनिजभृत्यगणान् सदैवा संशिक्षयादवनिगां स हि धर्मराजः
अन्वेति ये हरिहराङ्कधरा धरायां ते दूरतः पुनरहो परिवर्जनीयाः ॥

Colophon:

इति श्रीस्कन्दपुराणे हरिहरवर्णनं नामाष्टो(ष्टमो)ऽध्यायः ॥

(*x*) वेङ्कटेश्वराष्टकम्.

VEṄKAṬĒŚVARĀṢṬAKAM.

Foll. 127*a*—128*b*.

Eight stanzas in praise of God Vēṅkaṭēśa, a form of Viṣṇu worshipped in the sacred shrine in the Tirupati Hills.

Complete; as found in the Mārkaṇḍēyapurāṇa.

Beginning:

मुखे चारुहासं करे शङ्खचक्रं गले रत्नमाला स्वयं मेघवर्णम् ।
करे दिव्यशस्त्रं प्रियं रत्नवस्त्रं धरन्तं मुरारिं भजे वेङ्कटेशम् ॥
सदाभीतिहस्तं मुदा जानुपाणिं रसन्मेखलारत्नशोभप्रकाशम् ।
जगत्पावनं पादपद्माकरान्तं धरन्तं मुरारिं भजे वेङ्कटेशम् ॥

End:

वेङ्कटेशाष्टकं पुण्यं त्रिषु लोकेषु यः पठेत् ।
सर्वत्र जयमाप्नोति सर्वत्र विजयी भवेत् ॥

Colophon:

इति श्रीमार्कण्डेयपुराणे वेङ्कटेश्वराष्टकं सम्पूर्णम् ॥

(v) रामकोटिव्रतकल्पम्.
RĀMAKŌṬIVRATAKALPAM.

Foll. 129a—146b.

On details connected with the performance of a Vrata which primarily consists in writing the name of Rāma one crore of times. It is stated that this Vrata should be commenced on an auspicious hour and day in certain specified months of the year.

Complete; as found in the 429th Adhyāya of the Uttarakhaṇḍa of the Brahamāṇḍapurāṇa.

Beginning:

अथातस्सम्प्रवक्ष्यामि संसारोत्तारकारणम् ।
यस्य संस्मृतिमात्रेण मुच्यते सर्वकिल्बिषम् ॥
रामनाम महापुण्यं तारकं वेदसंमितम् ।
लिखितं येन भक्त्यैव दश वा शतमेव वा ॥
सहस्रं लक्षमथवा कोटिसङ्ख्यामितं तथा ।
* * * *

श्रीसूतः—

साधु वक्ष्ये महाभाग व्रतमुद्यापनं तथा ।
समाहितमना भूत्वा श्रृणुष्व द्विजसत्तम ॥
कार्त्तिके मार्गशीर्षे वा माघे वैशाख एव वा ।
श्रवणे वा महाभाग (व्रतमे)तत्समारभेत् ॥
वेदविद्भिर्द्विजैस्सार्धं पुण्यस्त्रीभिस्तथैव च ।
शुभे मुहूर्ते दिवसे पुण्याहं वाच्य भक्तितः ॥
ब्राह्मणान् भोजयित्वाथ गोभूतिलहिरण्यकैः ।
अनुज्ञां प्राप्य विप्रेभ्यो लिखेत्तेषां च सन्निधौ ॥

End:

सूतः—

इत्येतत्सर्वमाख्यातं यथादृष्टं यथाश्रुतम् ॥
साक्षात्सदाशिवेनोक्तं य एतच्छृणुयान्नरः ।
सोऽपि मुक्तिमवाप्नोति किमु॰ पुस्तकपूजनात् ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे पार्वतीश्वरसंवादे रामकोटिप्रशंसा नामैकोनत्रिंशोत्तरचतुःशततमोऽध्यायः ॥

(x) रामकोटिविधानम्.

RĀMAKŌṬIVIDHĀNAM.

Foll. 146b—152a. Fol. 152b is left blank.

Deals with the Mantra which consists in the repetition of the name of Rāma one crore of times, and also with its religious efficacy.

Complete; as found in the 68th Adhyāya of the Bhaviṣyōttara-purāṇa.

Beginning:

गङ्गातीरे तपस्यन्तं व्यासशिष्यं तपोनिधिम् ।
पप्रच्छुरृषयस्सर्वे धर्मश्रवणकाङ्क्षिणः ॥
व्यासशिष्य वयं सर्वे उपदिष्टास्त्वया पुरा ।
इदानीं श्रोतुमिच्छामो रामकोटिविधिं वद ॥

श्रीसूतः—

शृणुध्वं मुनयस्सर्वे पाण्डवाः काम्यके वने ।
द्रष्टुं समागतं कृष्णं प्रणिपत्येदमब्रुवन् ॥

* * * *

पार्वती—

जपकोटिविधानं मे मन्त्रस्यास्य वद प्रभो ।

श्रीशिवः—

वैशाख्यां कार्त्तिके माघे प्रारभ्य नियमेन च ।
दिनेदिने लक्षमात्रमयुतं वा सहस्रकम् ॥
एवं जपं जपस्यान्ते उद्यापनमथाचरेत् ।
मूढादिदोषरहिते चैत्रमासे शुभप्रदे ॥
नवम्यां स्नानसन्ध्यादिक्रियाः . . . . ।

End:

यूयं जपध्वं रामस्य मन्त्रमोक्षस्य सिद्धये ॥
इत्युक्त्वा सूतपुत्रेण रामभक्तिपरायणः ।
जपतस्सिद्धिमापन्नाः परां निर्वृतिमाययुः ॥

Colophon:

इति श्रीभविष्योत्तरपुराणे सूतऋषिसंवादान्तर्गतश्रीकृष्णयुधिष्ठिरसंवादे राममन्त्रमाहात्म्ये रामकोटिविधानं नाम अष्टषष्टितमोऽध्यायः ॥

श्रीसूतः.

R. No. **473** (of the Telugu Part).

Palm-leaf. $14\frac{1}{4} \times 1\frac{1}{2}$ inches. Foll. 283. Lines, 6 in a page. Telugu. Much injured.

Purchased in 1917-18 from M.R.Ry. Niḍadavōlu Sundaram Pantulugāru of Vizagapatam.

Foll. 1—3 are left blank.

(*b*) तारकब्रह्ममाहात्म्यम्.

TĀRAKABRAHMAMĀHĀTMYAM.

Foll. 216*a*—279*b*. Foll. 20*b*, 48*b*, 179*b* and 281—283 are left blank. Foll. 279*b* and 280 contain the Rāmamaṅgalaślōkas.

Same work as that described under R. No. 2224 (*a*) ante.

Contains the Adhyāyas 1—23 complete.

R. No. **476** (of the Telugu Part).

Paper. $8\frac{1}{8} \times 6\frac{1}{8}$ inches. Foll. 91. Lines, 21 in a page. Telugu. Good.

Purchased in 1917-18 from M.R.Ry. Niḍadavōlu Sundaram Pantulugāru, Vizagapatam.

(*b*) सर्वसारोपनिषद्.

SARVASĀRŌPANIṢAD.

Foll. 76*a*—79*a*.

Same work as that described under No. 816 of the D.C.S. MSS., Vol. I, Part III, and with an additional stanza in the beginning as given below.

Complete.

समस्तवेदान्तसारासिद्धान्तार्थकलेबरम् ।
विकलेबरकैवल्यरामचन्द्रपदं भजे ॥

(*c*) कैवल्योपनिषद्.

KAIVALYŌPANIṢAD.

Foll. 79*b*—82*a*.

Same work as that described under No. 395 of the D.C.S. MSS., Vol. I, Part III, but with a different Śānti —भद्रं कर्णेभिः—बृहस्पतिर्दधातु.

Complete.

(*d*) निरालम्बोपनिषद्.

NIRĀLAMBŌPANIṢAD.

Foll. 82*b*—86*b*. Foll. 87—91 are left blank.

Same work as that described under No. 570 of the D.C.S. MSS., Vol. I, Part III.

Complete.

R. No. 486 (of the Telugu Part).

Palm-leaf. 18¾ × 1½ inches. Foll. 188. Lines, 6 in a page. Telugu. Slightly injured.

Purchased in 1917–18 from M.R.Ry. Niḍadavōlu Sundaram Pantulugāru of Vizagapatam.

(c) पुष्पबाणविलासः.

PUṢPABĀṆAVILĀSAḤ.

Foll. 104*a*—106*a*.

Same work as that described under No. 11971 of the D.C.S. MSS., Vol. XX, but without commentary. Attributed to Kālidāsa.

Complete in 26 stanzas.

(d) पुष्पबाणविलासव्याख्या—शृङ्गारचन्द्रिका.

PUṢPABĀṆAVILĀSAVYĀKHYĀ : ŚṚṄGĀRACANDRIKĀ.

Foll. 106*b*—136*a*. Fol. 136*b* is left blank.

By Vēṅkaṭapaṇḍita. Same commentary as that described under No. 11971 of the D.C.S. MSS., Vol. XX.

Complete.

Colophon :

इति श्रीगणेशजनितगेरिवतासमासादितविभवेन श्रीभास्करभट्टाचार्य-श्रीरघुनाथमिश्रसहाध्यायिना वेङ्कटपण्डितरायसार्वभौमेन विरचितशृङ्गारच-न्द्रिकाभिख्यपुष्पबाणविलासकृतिव्याख्या समाप्ता ॥

(e) सनत्कुमारवास्तुशास्त्रम्, आन्ध्रटीकासहितम्.

SANATKUMĀRAVĀSTUŚĀSTRAM WITH TELUGU MEANING.

Foll. 137*a*—160*a*. Fol. 160*b* is left blank.

Same work as that described under Nos. 13060 and 13064 of the D.C.S. MSS., Vol. XXII. Attributed to Sanatkumāra.

Complete.

Colophon :

इति वास्तुशास्त्रे सनत्कुमारमते गृहगेहोपकरणलक्षणं समाप्तम् ॥

R. No. **488** (of the Telugu Part)

Palm-leaf. 11½ × 9⅜ inches. Foll. 92. Lines, 5 in a page. Telugu. Much injured.

Purchased in 1917-18 from M.R.Ry. Niḍadadavōlu Sundaram Pantulugāru of Vizagapatam.

(*c*) नीतिशास्त्रसमुच्चयः, आन्ध्रटीकासहितः.

NĪTIŚĀSTRASAMUCCAYAḤ WITH TELUGU MEANING.

Foll. 84*a*—92*a*. Fol. 92*b* is left blank.

Same work as that described under No. 12054 of the D.C.S. MSS., Vol. XX.

Incomplete.

R. No. **509** (of the Telugu Part).

Paper. 11 × 9⅞ inches. Foll. 40. Lines, 20 in a page. Telugu. Good.

Transcribed in 1917-18 from a MS. of M.R.Ry. Boddapati Veṅkaṭēśvara Raogāru, Karnam, Ramanapūḍi, Gudivaḍa taluk.

(*a*) प्रणवसारः, आन्ध्रटीकासहितः.

PRAṆAVASĀRAḤ WITH TELUGU MEANING.

Foll. 1*a*—24*a*. Foll. 17*b*, 18*a*, 24*b* and 40*b* are left blank.

Same work as that described under R. No. 2645 ante.

Contains the Prakaraṇas one to three complete.

R. No. **512** (of the Telugu Part).

Palm-leaf. 16 × 1⅝ inches. Foll. 265. Lines, 6 in a page. Good.

Presented in 1917-18 by M.R.Ry. Nelturi Subrahmaṇya Śāstrigāru, Andrange, Kistna district.

(*a*) मूलस्तम्बपुराणम्, आन्ध्रटीकासहितम्.

MŪLASTAMBAPURĀṆAM WITH TELUGU MEANING.

Foll. 1*a*—103*a*. Fol. 103*b* is left blank.

Slightly different from the work described under R. No. 2791 ante.

Incomplete.

Beginning:

नमस्तुङ्गशिरस्तु(श्चु) म्बिच्छत्रचामरचारया(वे) ।
त्रैलोक्यनगरारम्भे मूलस्तम्बाय शम्भवे ॥

श्रीमत्परशिवविश्वकर्मलीलाविनोदमहिमोन्नतमूलस्तम्भपुराणारम्भः—

न भूमिर्न जलं चैव न तेजो न च वायवः ।
न च ब्रह्मा न च विष्णुर्न च नक्षत्रतारकाः ॥

सर्वशून्यं निरालम्बं स्वयम्भूर्विश्वकर्मणः ।

* * * *

साधकानां हितार्थाय भुक्तिमुक्तिप्रदाय च ।
विश्वकर्ममहाशास्त्रं तद्गोघृतामिदं शृणु ॥

* * * *

गुह्याद्गुह्यमिदं त्रेता (चैव) सर्वशास्त्रसमुद्धृतम् ।
सूक्ष्माख्यमतिसूक्ष्मं च सारसारमहोदया(यम्) ॥

* * * *

अतिरहस्यमिदं तन्त्ररहस्यमतिदुर्लभम् ।
विश्वकर्ममहाशास्त्रं सङ्क्षेपाद्वक्ष्यतेऽधुना ॥

* * * *

विश्वकर्मस्वरूपेण प्रज्वलत्प्रमदं प्रभुम् ।
तन्मूर्तिलक्षणं वक्ष्ये सुमनाः शृणु षण्मुख ॥

End :

दशरात्रं पिण्डरूपं [च] पक्षमेकाण्डकारयोः ।
मासेन शिर उत्पन्नं द्विमासं पक्षमुद्भवम् ॥

* * * *

त्रिमासे देहसर्वाङ्गं चातुर्मासं चावयवम् ।
रोम पञ्चमासं च षण्मासास्तितबुधयोः (?) ॥

* * * *

प्राणप्रवेशस्तम्बं च मासोऽष्ट ज्ञानचिन्तयोः ।
पूर्वजन्म स्मरेत्प्राणः जुन्मजन्मान्तरे भ्रमः ॥

* * * *

मृतस्याहं(स्येह) पुनर्जातं (जात)स्येह मृतिस्तथा ।
नानायोनिसहा·

GENERAL INDEX.

[NOTE.—The names printed in *italics* are those of the works described.]

AGENTS FOR THE SALE OF MADRAS GOVERNMENT PUBLICATIONS.

IN INDIA.

BUTTERWORTH & Co. (LTD.), 6, Hastings Street, Calcutta.
R. CAMBRAY & Co. Calcutta.
E. M. GOPALAKRISHNA KONE, Pudumantapam, Madura.
HARTLEYS, Mount Road, Madras.
HIGGINBOTHAMS (LTD.), Mount Road, Madras.
V. KALYANARAMA IYER & Co., Esplanade, Madras.
G. C. LOGANADHAM BROTHERS, Madras.
S. MURTHY & Co., Madras.
G. A. NATESAN & Co., Madras.
The Superintendent, NAZAIR KANUN HIND PRESS, Allahabad.
NIVASARKAR, Manager, "Hitawada," Nagpur.
P. R. RAMA IYER & Co., Madras.
RAMAKRISHNA & SONS, Lahore.
R. SUNDER PANDURANG, Kalbadevi Road, Bombay.
D. B. TARAPOREVALA SONS & Co., Bombay.
THACKER & Co. (LTD.), Bombay.
THACKER, SPINK & Co., 3, Esplanade East, Calcutta.
S. VAS & Co., Madras.
S.P.C.K. PRESS, Vepery, Madras.

IN THE UNITED KINGDOM.

B. H. BLACKWELL, 50 and 51, Broad Street, Oxford.
CONSTABLE & Co., 10, Orange Street, Leicester Square, London, W.C.
DEIGHTON, BELL & Co. (LTD.), Cambridge.
T. FISHER UNWIN (LTD.), 1, Adelphi Terrace, London, W.C.
GRINDLAY & Co., 54, Parliament Street, London, S.W.
KEGAN PAUL, TRENCH, TRÜBNER & Co. (LTD.), 68—74, Carter Lane, London, E.C., and 39, New Oxford Street, London, W.C.
HENRY S. KING & Co., 65, Cornhill, London, E.C.
P. S. KING & SON, 2 and 4, Great Smith Street, Westminster, London, S.W.
LUZAC & Co., 46, Great Russell Street, London, W.C.
B. QUARITCH, 11, Grafton Street, New Bond Street, London, W.
W. THACKER & Co., 2, Creed Lane, London, E.C.
OLIVER AND BOYD, Tweeddale Court, Edinburgh.
E. PONSONBY (LTD.), 116, Grafton Street, Dublin.
WHELDON AND WESLEY (LTD.), 28, Essex Street, Strand, London.

ON THE CONTINENT.

ERNEST LEROUX, 28, Rue Bonaparte, Paris.
FRIEDLANDER AND SOHN, Berlin.
MARTINUS NIJHOFF, The Hague, Holland.
OTTO HARRASSOWITZ, Leipzig.